8 *a*) K₂ B Dc₂ Dn D₄–₆ इमे (B₂ इदं) येपि; S हि ये सर्वे (for हि मे येऽपि). — *b*) B₂ D₄ M₁ फलमूलं; D₆ फलं मूलं (for फलमूल-). Dc फलमूलतृणं तथा; G₁ (corrupt) फलं मूलमधुस्तथा. 9 *c*) K₂ B Dn D₄–₆ दुःखार्दितान्. D₃ इह (for इमान्). B₂ चैव (for क्लेशैर्). — *d*) S तान्योक्तुम् (for योक्तुमिह). 10 Ś₁ K₃ विप्रा ऊचुः. — *c*) K₂ B Dn D₄. ₆ चान्नानि (B₁ °द्यां); K₃ वन्यं तु; Dc D₅ वन्यास्त्वां (for वन्यानि). Ś₁ स्वयमाहृतवन्याः स्म. — *d*) Ś₁ ह्यनुयास्याम त्वा; K₂ B Dn D₄. ₆ उपयोक्ष्यामहे; K₃ T G₂. ₃ M₂ ह्यनुयास्यामहे; Dc यातु यास्या°; D₁–₃ त्वानु°; G₁. ₄ M₁ [अ]प्यनु°. 11 *a*) K₂. ₃ D₁–₃. ₆ जाप्येन. — *b*) D₅ विदधामः. — *c*) Dc om. च. Ś₁ K₃ D₅ G₁ चा(G₁ अ)नुरूपाभिः; K₂ B₂. ₃ Dn D₄ चाभिरम्याभिः. — *d*) D₁. ₃ सर्वे (for सह). N (except Ś₁) T₁ (*sup. lin.* as in text) वयं (for वने). 12 *a*) Dc D₅ G₁ एव (for एतन्). — *b*) Ś₁ K₂ B Dc Dn D₄–₆ रमेहं (Dc °यं) सततं द्विजैः; K₃ रमेहं सह ब्राह्मणैः; D₁–₃ न चोक्तमनृतं द्विजैः. — *c*) K₃ नूनं कथं नु यास्यामि.

C. 3. 59
B. 3. 2. 13
K. 3. 2. 13

कथं द्रक्ष्यामि वः सर्वान्स्वयमाहृतभोजनान् ।
मद्भक्त्या क्लिश्यतोऽनर्हान्धिक्पापान्धृतराष्ट्रजान् ॥ १३

वैशंपायन उवाच ।

इत्युक्त्वा स नृपः शोचन्निषसाद महीतले ।
तमध्यात्मरतिर्विद्वाञ्शौनको नाम वै द्विजः ।
योगे सांख्ये च कुशलो राजानमिदमब्रवीत् ॥ १४
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ १५
न हि ज्ञानविरुद्धेषु बहुदोषेषु कर्मसु ।
श्रेयोघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १६
अष्टाङ्गां बुद्धिमाहुर्यां सर्वाश्रेयोविघातिनीम् ।
श्रुतिस्मृतिसमायुक्तां सा राजंस्त्वय्यवस्थिता ॥ १७
अर्थकृच्छ्रेषु दुर्गेषु व्यापत्सु स्वजनस्य च ।
शारीरमानसैर्दुःखैर्न सीदन्ति भवद्विधाः ॥ १८
श्रूयतां चाभिधास्यामि जनकेन यथा पुरा ।
आत्मव्यवस्थानकरा गीताः श्लोका महात्मना ॥ १९
मनोदेहसमुत्थाभ्यां दुःखाभ्यामर्दितं जगत् ।
तयोर्व्याससमासाभ्यां शमोपायमिमं शृणु ॥ २०
व्याधेरनिष्टसंस्पर्शाच्छ्रमादिष्टविवर्जनात् ।
दुःखं चतुर्भिः शारीरं कारणैः संप्रवर्तते ॥ २१
तदाशुप्रतिकाराच्च सततं चाविचिन्तनात् ।
आधिव्याधिप्रशमनं क्रियायोगद्वयेन तु ॥ २२
मतिमन्तो ह्यतो वैद्याः शमं प्रागेव कुर्वते ।
मानसस्य प्रियाख्यानैः संभोगोपनयैर्नृणाम् ॥ २३
मानसेन हि दुःखेन शरीरमुपतप्यते ।
अयःपिण्डेन तप्तेन कुम्भसंस्थमिवोदकम् ॥ २४
मानसं शमयेत्तस्माज्ज्ञानेनाग्निमिवाम्बुना ।
प्रशान्ते मानसे दुःखे शारीरमुपशाम्यति ॥ २५

---

13 [b]) K2 B D स्वयमाहृत्यभोजिनः; K3 ब्राह्मणान्कृतभोजिनः; T1 स्वयमाहृत्य भोजनान्. —[c]) Dc S (except M2) मद्भक्तान्. —[d]) S द्विषतो (for धिक्पापान्).

14 [a]) S नृपतिः (for स नृपः). —[b]) Dc D1. 2. 5 निपपात (for निषं°). —[c]) Ś1 K3 B3. 4 Dc D1–3 °गतिर्; K2 B1. 2. 3m Dn D4–6 °रतो (for °रतिर्). T1 तमध्यात्मा मुनिर्विद्वान्. —[d]) K3 B4 Dc2 D5 °को द्विजसत्तमः. —[e]) Ś1 K3 सांख्ये योगे (by transp.).

15 =B. 12. 330. 2. —Before 15, B4 Dc D5 G1. 2 M2 ins. शौनक उ°. —[b]) Ś1 D1–3 G1 हर्षं° (for भयं°). —[c]) Ś1 K3 मूढान्. —[d]) K3 पंडितान्.

16 [a]) T1 G2 M1. 2 च; T2 G3. 4 चेत् (for हि). —[b]) Ś1 K3 D1–3. 5 G2 M2 बह्वपायेषु; B4 Dc बहुपापेषु. —[c]) Ś1 B1 D1–3 मूलं° (for श्रेयो°). —[d]) T2 G3 बहुश्रुताः (for भव°). —After 16, D2 ins. 7*.

17 [a]) S हि (for यां). —[b]) K2 B1–3 Dn D4–6 G2 सर्वाश्रेयोभिं°; B4 Dc °विपाटनीं; T1 G4 सर्वश्रेयोविघातिनीं; T2 G1. 3 सर्वश्रेयोविधायिनीं. —[c]) Dc T2 G2–4 °समायुक्ता; T1 G1 M मतिस्मृतिसमायुक्ता (M1 °क्तां). —[d]) Dc2 Dn D6 transp. सा and राजन्. —D5 G2 ins. after 17 : D2, after 16 :

7* शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोऽपि विज्ञानं तत्त्वज्ञानं च धीगुणाः ।

18 [a]) S दुःखें (for दुर्गें). —[b]) T G2–4 ह्या° (for व्या°). B4 T G M1 स्व(G2 वि)जनेषु; M2 व्यसनेषु (for स्वजनस्य). S (except G4 M2) [अ]पि (for च). —[c]) B1 शारीरंर् (for शारीर-). S शारीरे मानसे चैव (G1 °सेष्वेव). —[d]) S (except M2) न सीदंत्यसुखे बुधाः.

19 [a]) =(var.) 3. 1. 21[a]. D1. 2 S om. च. —[c]) Ś1 °पराः; K3 धर्म°. —[d]) Ś1 B1. 4 Dc D1–3. 5 श्लोका गीताः (by transp.); K3 गाथा गीताः.

20 [a]) K3m °मोह° (for °देह°). —[c]) D1. 2 तयोश्चैव विनाशाय.

21 [a]) S (except G4) °संयोगाच्. —After 21[ab], K3 reads 23[c]–24[b]. —[c]) G2 M1 एतच् (for दुःखं). T1 एतच्छरीरं कौंतेय. —After 20, D1. 2 ins. :

8* व्याधयोऽत्र शरीरेऽस्मिन्वातपित्तकफोद्भवाः ।
अजीर्णप्रभवाः सर्वे दुःखाः पापोद्भवास्तथा ।

22 [a]) K2 Dn D4. 6 तदा तत्; B (except B4) सदा तत् (for तदाशु-). —[b]) Ś1 K3 B2. 4 Dc D1–3 च वि-(B2 परि)वर्जनात् (for चाविं°). —[d]) D5 °त्वमेव; T G °बलेन; M1 °फलेन (for °द्वयेन). Ś1 B4 Dc Dn1 D1 T1 G1 च (for तु).

23 [ab]) S (except M2) व्यथोपेताः (for ह्यतो वैद्याः), and प्रायेण (for प्रागेव). —K3 reads 23[cd] (with 24[ab]) after 21[ab]. —[c]) Dc D1–3 प्रियाख्यान-. S (except M2) मानसाख्यं °ख्यानात्. —[d]) Dc1 T2 G1. 3 संभोगापं°.

24 For sequence in K3 cf. v.l. 21. —[a]) S

मनसो दुःखमूलं तु स्नेह इत्युपलभ्यते ।
स्नेहात्तु सज्जते जन्तुर्दुःखयोगमुपैति च ॥ २६
स्नेहमूलानि दुःखानि स्नेहजानि भयानि च ।
शोकहर्षौ तथायासः सर्वं स्नेहात्प्रवर्तते ॥ २७
स्नेहात्कारणरागश्च प्रजज्ञे वैषयस्तथा ।
अश्रेयस्कावुभावेतौ पूर्वस्तत्र गुरुः स्मृतः ॥ २८
कोटराग्निर्यथाशेषं समूलं पादपं दहेत् ।
धर्मार्थिनं तथाल्पोऽपि रागदोषो विनाशयेत् ॥ २९
विप्रयोगे न तु त्यागी दोषदर्शी समागमात् ।
विरागं भजते जन्तुर्निर्वैरो निष्परिग्रहः ॥ ३०
तस्मात्स्नेहं स्वपक्षेभ्यो मित्रेभ्यो धनसंचयात् ।
स्वशरीरसमुत्थं तु ज्ञानेन विनिवर्तयेत् ॥ ३१
ज्ञानान्वितेषु मुख्येषु शास्त्रज्ञेषु कृतात्मसु ।
न तेषु सज्जते स्नेहः पद्मपत्रेष्विवोदकम् ॥ ३२

रागाभिभूतः पुरुषः कामेन परिकृष्यते ।
इच्छा संजायते तस्य ततस्तृष्णा प्रवर्तते ॥ ३३
तृष्णा हि सर्वपापिष्ठा नित्योद्वेगकरी नृणाम् ।
अधर्मबहुला चैव घोरा पापानुबन्धिनी ॥ ३४
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥
अनाद्यन्ता तु सा तृष्णा अन्तर्देहगता नृणाम् ।
विनाशयति संभूता अयोनिज इवानलः ॥ ३६
यथैधः स्वसमुत्थेन वह्निना नाशमृच्छति ।
तथाकृतात्मा लोभेन सहजेन विनश्यति ॥ ३७
राजतः सलिलादग्नेश्चोरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ ३८
यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वेण वित्तवान् ॥ ३९

C. 3. 86
B. 3. 2. 40
K. 3. 2. 41

(except T_2 G_3) [ग]व (for हि).

25 ^{b}) K_3 G_2 अंभसा (for अम्बुना). — ^{c}) N ($K_{1.4}$ missing) ह्यस्य (for दुःखे).

26 ^{a}) B_1 T_2 G_{2-4} M_2 हि (for तु). — ^{b}) G_1 अभिधीयते (for उपलभ्यते). — ^{c}) S_1 B_4 Dc D_1 G_2 M_1 च (for तु). — ^{d}) S_1 दुःखमोहम्; K_3 दुःखे सुखम्; B_4 दुःखमूलम्.

27 ^{c}) S शोको हर्षः. — ^{d}) T_1 G_2 M_1 स्नेहात्सर्वं (by transp.).

28 ^{a}) K_2 B D (except $D_{1-3.5}$) भावोनुरागश्च; S कारुण्यरागौ च (G_1 °ण्यभावाच्च). — ^{b}) K_2 B_{1-3} Dc Dn $D_{2.4-6}$ विषये; K_3 D_3 विषयस् (for वैषयस्). B_4 मित्रेषु च धनेषु च; S प्रजास्वीर्ष्यो(T_2 G_3 °स्विष्टो)दयस्तथा (M_2 °स्पृहा).

29 ^{c}) K_2 B (except B_1) D (except $D_{1-3.5}$) धर्मार्थौ तु (for °र्थिनं). — ^{d}) S_1 K_3 D_5 रागद्वेषौ; Dc_1 Dn_2 (before corr.) T_1 G_{2-4} रागद्वेषो. B_1 रागो द्वेषश्च नाशयेत्.

30 ^{b}) K_3 समागतान्; Dn_1 समागमे. — ^{c}) S_1 K_3 विकारं; M_2 वैराग्यं (for विरागं). — ^{d}) N ($K_{1.4}$ missing) निरवग्रहः.

31 ^{a}) N ($K_{1.4}$ missing) न लिप्सेत (D_5 सुपक्षेभ्यः) (for स्वपक्षेभ्यः). — ^{b}) B_2 मित्रेषु च धनेषु च; G_2 धनधान्यं च संचं°. — ^{c}) N (except K_3; $K_{1.4}$ missing) च (for तु). — ^{d}) T_1 G_2 M_1 परिवर्जं° (for विनिवर्तं°).

32 ^{a}) S_1 K_3 $D_{1-3.5}$ स्निद्धेषु; K_2 B Dc Dn $D_{4.6}$ युक्तेषु (for मुख्येषु). — ^{b}) Dc सूक्तेषु च (for शास्त्र°).

33 ^{b}) D_3 °क्लिश्यते; T_1 M_2 °तुष्यते; G_2 °शुष्यते; M_1 °तप्यते. — B_2 om. 33^{cd}. — ^{c}) S_1 K_3 $B_{1.4}$ Dc $D_{1-3.5}$ चास्य; B_3 ह्यस्य (for तस्य). — ^{d}) K_2 B_3 Dn $D_{4.6}$ विवर्धते; Dc D_5 प्रजायते (for प्रव°).

34 ^{a}) T $G_{3.4}$ [अ]पि (for हि). — ^{b}) T $G_{3.4}$ नित्योद्योग°. N ($K_{1.4}$ missing) स्मृता (for नृणाम्); cf. 36^b. — ^{d}) D_{1-3} घोररूपानु°.

35 = Ādi 840*, lines 5–6.

36 ^{b}) To avoid hiatus, S_1 Dc D_{1-3} ह्य° (for अ°)! — ^{c}) K_2 B D (except D_{1-3}) भूतानि (for संभूता). — ^{d}) S_1 K_3 D_3 अयोरज; B_3 आपो (m अयो)वज्र (m also as in text); $D_{1.2}$ लौहं रज; T_2 G_3 अयो घोर; G_1 अयोरुज; G_4 अयोराज; M_1 अयोजलम् (for अयोनिज). Nilp अयोनिजमिवानलं.

37 ^{a}) T G_3 यथा च; $G_{1.4}$ यथायः; G_2 यथैव; M_1 यथायं; M_2 यथाग[:] (for यथैधः). Dc सुसमिद्धेन (for स्वसमु°). — ^{b}) B_4 अर्हति; $D_{3.4.6}$ अर्छे° (for ऋच्छ°). — ^{c}) T_2 (by corr.) G_3 तथा तु स्वात्मलोभेन.

38 ^{b}) S_1 K_3 B (except B_2) Dc_2 Dn_2 D_{2-5} चौरतः. — After 38^{ab}, G_2 ins.:

9* अर्थिभ्यः कालतस्तस्मान्नित्यमर्थवतां भयम्।

C. 3. 87
B. 3. 2. 41
K. 3. 2. 42

अर्थ एव हि केषांचिदनर्थो भविता नृणाम् ।
अर्थश्रेयसि चासक्तो न श्रेयो विन्दते नरः ।
तस्मादर्थागमाः सर्वे मनोमोहविवर्धनाः ॥ ४०
कार्पण्यं दर्पमानौ च भयमुद्वेग एव च ।
अर्थजानि विदुः प्राज्ञा दुःखान्येतानि देहिनाम् ॥ ४१
अर्थस्योपार्जने दुःखं पालने च क्षये तथा ।
नाशे दुःखं व्यये दुःखं घ्नन्ति चैवार्थकारणात् ॥ ४२
अर्था दुःखं परित्यक्तुं पालिताश्चापि तेऽसुखाः ।
दुःखेन चाधिगम्यन्ते तेषां नाशं न चिन्तयेत् ॥ ४३
असंतोषपरा मूढाः संतोषं यान्ति पण्डिताः ।
अन्तो नास्ति पिपासायाः संतोषः परमं सुखम् ।
तस्मात्संतोषमेवेह धनं पश्यन्ति पण्डिताः ॥ ४४
अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
ऐश्वर्यं प्रियसंवासो गृध्येदेषु न पण्डितः ॥ ४५
त्यजेत संचयांस्तस्मात्तजं क्लेशं सहेत कः ।
न हि संचयवान्कश्चिद् दृश्यते निरुपद्रवः ॥ ४६
अतश्च धर्मिभिः पुंभिरनीहार्थः प्रशस्यते ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ ४७
युधिष्ठिरैवमर्थेषु न स्पृहां कर्तुमर्हसि ।
धर्मेण यदि ते कार्यं विमुक्तेच्छो भवार्थतः ॥ ४८

युधिष्ठिर उवाच ।

नार्थोपभोगलिप्सार्थमियमर्थेप्सुता मम ।

— [c]) T$_2$ G$_{1.\ 3.\ 4}$ °वतो (for °वतां).

39 [c]) Dc भुज्य° (for भक्ष्य°). — [d]) N (except Ś$_1$; K$_{1.\ 4}$ missing) सर्वत्र (for सर्वेण).

40 [b]) K$_2$ B (except B$_1$) D (except D$_{1-3}$) अनर्थं. Ś$_1$ D$_{1-3}$ जायते; K$_2$ B$_{2-4}$ Dc Dn D$_{4-6}$ भजते; K$_3$ भवते (for भविता). B$_1$ लोकेनर्थाय कल्पते. — [c]) S (except T$_1$ M$_2$) अर्थे (for अर्थ-). — [d]) Ś$_1$ K$_3$ B$_4$ परं (for नरः). — [f]) Ś$_1$ मनोदोष-; S (except G$_3$) मदमोह-. D$_{1.\ 3}$ -निबंधनाः.

41 [c]) Ś$_1$ K$_3$ B$_4$ D$_{1-3.\ 5}$ हि केषांचित् (for विदुः प्राज्ञा). — [d]) K$_3$ एव हि (for एतानि).

42 [a]) K$_2$ B (except B$_4$) Dn D$_{4.\ 6}$ अर्थस्योत्पादने चैव. — [b]) Ś$_1$ K$_3$ B$_{1.\ 4}$ Dc D$_{3.\ 5}$ [अ]थ (for च). D$_{1.\ 2}$ रक्षणे (for च क्षये). K$_3$ B$_{2.\ 3}$ Dn D$_{4.\ 6}$ तथा क्षये (by transp.). G$_2$ आर्जितानां तु रक्षणे. — [c]) Ś$_1$ D$_{1.\ 2}$ संगाच्चैव; K$_2$ B Dc Dn D$_{4.\ 6}$ सहंति (B$_4$ °ते) च; K$_3$ त्यागाश्चैव; D$_3$ संयोगाच्च; D$_5$ संगे चैव (for नाशे दुःखं). N (K$_{1.\ 4}$ missing) महद् (for व्यये). — [d]) Ś$_1$ K$_3$ D$_{1-3}$ चाप्यर्थे°; B$_1$ चाप्यन्य°; B$_3$ Dc चैवात्म°.

43 = (var.) B. 12. 330. 18. — [a]) Ś$_1$ K$_3$ D$_{1-3}$ T$_2$ G$_{3.\ 4}$ दुःखाः (for दुःखं). T$_2$ G$_{3.\ 4}$ °त्यक्ताः (for °त्यक्तुं). — [b]) N (K$_{1.\ 4}$ missing) चैव (for चापि). K$_2$ B (except B$_1$) D (except D$_{1-3.\ 5}$) शत्रवः (for तेऽसुखाः). — [d]) K$_2$ B (except B$_4$) Dn D$_{4.\ 6}$ तस्माच्चाशं; T$_1$ नाशं तेषां (by transp.).

44 44^{cdef} = (var.) B. 12. 330. 21. — [a]) Ś$_1$ °रता (for °परा). — Ś$_1$ om. (hapl.) 44^{cdef}. — [c]) S विविप्सायाः (for पिपासा°). — [f]) K$_2$ Dn परं; D$_{4-6}$ वरं (for धनं).

45 = (var.) B. 12. 330. 14. — [a]) T$_1$ M$_1$ परमं (for यौवनं). — [b]) Ś$_1$ K$_3$ Dc D$_3$ T$_1$ M$_1$ द्रव्यसंचयाः; K$_2$ B (except B$_4$) Dn D$_{4-6}$ रत्न(B$_2$ धन)संचयः; T$_2$ G$_{3.\ 4}$ द्रव्यमेत्र च. — B$_1$ om. 45^{cd}. — [c]) S आरोग्यं (for ऐश्वर्यं). — [d]) Ś$_1$ lacuna; K$_{2.\ 3}$ B$_{3.\ 4}$ Dn D$_{4.\ 6}$ तत्र (for एषु).

46 K$_2$ om. 46. — [a]) D$_{1.\ 2}$ त्यजेद्धि; D$_3$ °च (for °त). D$_{1.\ 2.\ 5}$ T$_2$ G$_{3.\ 4}$ संचयं. — [b]) T$_1$ सहेतुकः; G$_2$ सहेतुकं (for सहेत कः). Ś$_1$ तज्जः क्लेशान्सहेत्ततः; K$_3$ तत्क्लेशान्न सहेत च; B D तज्जान् (D$_{1-3}$ तज्जः; D$_5$ ऋजुः; D$_6$ जातान्) क्लेशान्सहेत च (Dc$_1$ D$_5$ वः; D$_2$ कः); M$_1$ तज्जः क्लेशः सहेतुकः. — [c]) Dc संचयकृत्. — [d]) B$_1$ जायते. Ś$_1$ निरुपप्लवः.

47 [a]) T$_2$ G$_{3.\ 4}$ पुन° (for अत°). K$_2$ B (except B$_4$) Dn D$_{4.\ 6}$ धार्मिकैः (for धर्मिभिः). G$_2$ सद्भिः (for पुंभिः). — [b]) K$_3$ D$_{1-3}$ G$_2$ M$_1$ अनीहार्थे. — After 47^{ab}, K$_2$ B (except B$_1$) D (except D$_3$) ins.:

10* धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।

[Dc धर्मार्था; D$_5$ °र्थः. D$_{1-3}$ यस्य चित्ते भवेदीहा (for the prior half). B$_4$ Dc D$_{1-3.\ 5}$ तस्यानीहा गरीयसी.]

— D$_2$ om. 47^{c}–48^{b}. — [cd]) Cited twice *verbatim* in the Śāṁkarabhāṣya on Brahmasūtra 3. 2. 22. T$_2$ G$_3$ तु (for हि). K$_2$ B$_{2.\ 3}$ Dn D$_4$ S (except T$_1$) श्रेयो (for दूराद्). B$_{2.\ 3}$ Dn D$_4$ न स्पर्शनं; S (except T$_1$) ह्यस्प°. K$_2$ B$_{1-3}$ Dn D$_4$ S नृणां (T परं) (for वरम्).

48 D$_2$ om. 48^{ab} (cf. v.l. 47). — [a]) D$_{1-3}$ त्वम् (for एवम्). K$_2$ B$_{2.\ 3}$ Dn D$_{4.\ 6}$ सर्वेषु (for अर्थेषु). — After 48, B$_4$ T$_2$ G$_{3.\ 4}$ ins. an addl. colophon

भरणार्थं तु विप्राणां ब्रह्मन्काङ्क्षे न लोभतः ॥ ४९
कथं ह्यस्मद्विधो ब्रह्मन्वर्तमानो गृहाश्रमे ।
भरणं पालनं चापि न कुर्यादनुयायिनाम् ॥ ५०
संविभागो हि भूतानां सर्वेषामेव शिष्यते ।
तथैवापचमानेभ्यः प्रदेयं गृहमेधिना ॥ ५१
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ५२
देयमार्तस्य शयनं स्थितश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥ ५३
चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
प्रत्युद्गम्याभिगमनं कुर्याक्रियायेन चार्चनम् ॥ ५४
अग्निहोत्रमनड्वांश्च ज्ञातयोऽतिथिबान्धवाः ।
पुत्रदारभृताश्चैव निर्दहेयुरपूजिताः ॥ ५५
नात्मार्थं पाचयेदन्नं न वृथा घातयेत्पशून् ।
न च तत्स्वयमश्नीयाद्विधिवद्यन्न निर्वपेत् ॥ ५६
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि ।
वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते ॥ ५७
विघसाशी भवेत्तस्मान्नित्यं चामृतभोजनः ।
विघसं भृत्यशेषं तु यज्ञशेषं तथामृतम् ॥ ५८
एतां यो वर्तते वृत्तिं वर्तमानो गृहाश्रमे ।
तस्य धर्मं परं प्राहुः कथं वा विप्र मन्यसे ॥ ५९

शौनक उवाच ।

अहो बत महत्कष्टं विपरीतमिदं जगत् ।
येनापत्रपते साधुरसाधुस्तेन तुष्यति ॥ ६०
शिश्नोदरकृतेऽप्राज्ञः करोति विघसं बहु ।
मोहरागसमाक्रान्त इन्द्रियार्थवशानुगः ॥ ६१

C. 3. 111
B. 3. 2. 65
K. 3. 2. 65

(*adhy. no.* : T_2 G_4 2).

49 M_1 om. 49^{ab}. — [a]) K_3 B (except B_1) **नात्मोप°**; Dc **आत्मोप°** (see below); D_{1-3} **न ब्रह्मन्**; S (M_1 om.) **नात्मत्पोषणलिप्सार्थं**. ❀ Cn : आत्मोपभोगेति पाठो निर्मूलः। ❀ —. [b]) Dc **नेयम्** (for **इयम्**). — [d]) B_2 **विधानतः** (for **न लो°**).

50 [a]) K_3 B_2 S (except T_2 G_3) om. **हि**. S **विप्र** (for **ब्रह्मन्**).

51 [b]) K_2 $B_{2.3}$ Dn D_{4-6} $G_{1.2.3}$ (m as in text) **इष्यते**; B_1 **सिध्यति**; B_4 Dc D_2 **शस्यते**; D_3 **इष्य°**; G_3 **जाय°** (for **शिष्य°**). — [c]) K_3 **तथैवापच**(*sup. lin.* °**स्तु**)-**मानेषु**; B **तथैव या**(B_4 **प**)**चमानेभ्यः**; Dc_2 (*sup. lin.*) T_1 G_1 **तथैवाद्याच्च°**; T_2 $G_{3.4}$ **तथैवापि च मान्येभ्यः**.

52 =5. 36. 32 (q. v.); =(var.) Manu. 3. 101.

53 [b]) $\acute{S}_1$ **तथा**; K_3 T_1 $G_{2.4}$ M_1 **स्थिति-** (T_1 M_1 **°तिः**); G_1 **पथि**; M_2 **परि-** (for **स्थित-**).

54 54^{ab}=B. 13. 7. 6^{ab}. — [b]) N (except $\acute{S}_1$ B_2; $K_{1.4}$ missing) **सुभाषितां** (for **च सूनृताम्**); cf. 12* (line 1). — After 54^{ab}, N ($K_{1.4}$ missing) ins. :

11* **उत्थाय चासनं दद्यादेष धर्मः सनातनः ।**

— [c]) N ($K_{1.4}$ missing) **प्रत्युत्थाया**(B_4 **°ना**)**भि°**. — [d]) B_2 **अर्घ्याक्रियायेन**. K_2 Dn_2 **चार्चनां**; Dn_1 **चार्चनात्**.

55 [b]) $\acute{S}_1$ Dc D_{1-3} **जामयो** (for **ज्ञातयो**). — [c]) $\acute{S}_1$ K_3 $D_{1.2}$ **पुत्र**(D_1 **°त्रा**)**दारा भृताश्चैव**; K_2 B Dn D_{4-6} T_2 $G_{1.3}$ **पुत्रा** (G_1 **°त्र-**) **दाराश्च भृत्याश्च**.

56 [a]) $D_{1.3}$ **नात्मार्थं**. T $G_{1.3.4}$ M **तु पचेद्** (for **पाचयेद्**). K_2 $B_{2.3}$ Dn $D_{4.6}$ **आत्मार्थं पाचयेन्नान्नं**; G_2 **आत्मार्थं न पचेदन्नं**. — [b]) T_1 $G_{1.2}$ M_1 **पशुं**. — [c]) T_1 $G_{1.2}$ M **एकः**; T_2 $G_{3.4}$ **एव** (for **तत्**). — [d]) T_1 $G_{1.2}$ M_1 **°वर्जं न**; T_2 $G_{3.4}$ **°वच्चैव** (for **°वद्यन्न**).

57 [c]) S (except T_2 G_3) **इदं** (for **एतत्**). — [d]) K_3 $B_{2.3}$ Dn D_{4-6} **च दीयते**; K_3 B_4 Dc **प्रदी°**; B_1 **प्रवर्तते** (for **विधी°**).

58 =(var.) Manu. 3. 285. — [a]) K_3 B_4 D_{1-3} **नित्यं** (for **तस्मान्**). — [c]) K_2 B (except B_2) D (except $D_{1-3.5}$) T_2 G_3 **विघसो**. $\acute{S}_1$ K_2 $B_{1.3}$ Dn D_{4-6} T_2 $G_{1.3}$ **भुक्तशेषं** (B_1 **°षस्**); B_4 **भृत्यशेषस्**. — [d]) $\acute{S}_1$ **यज्ञशिष्टं**; B_4 **यज्ञशेषस्**. — After 58, N ($K_{1.4}$ missing; K_3 om. lines 1–2) ins. :

12* **चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।**
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ।
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।
श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ।

[=B. 13. 7. 6–7. — (L. 1) =54^{ab}. $D_{1.2}$ **देवान्पितॄन्मनुष्यांश्च भिक्षूनतिथिपंचमान्**. — (L. 2) Dc **पंचयज्ञः सदक्षिणः** (for the posterior half). — (L. 3) $D_{1.3}$ **निष्ठ°** (for **वर्त°**).]

59 [a]) K_2 B_{1-3} Dn $D_{3.4.6}$ **एवं यो**; T_2 $G_{3.4}$ **य एतां** (for **एतां यो**).

61 [a]) B_4 M_2 **[अ]थाज्ञः**; D_5 **त्वज्ञः**; T_1 G (G_3

C. 3. 112
B. 3. 2. 66
K. 3. 2 66

ह्रियते बुध्यमानोऽपि नरो हारिभिरिन्द्रियैः ।
विमूढसंज्ञो दुष्टाश्वैरुद्भ्रान्तैरिव सारथिः ॥ ६२
षडिन्द्रियाणि विषयं समागच्छन्ति वै यदा ।
तदा प्रादुर्भवत्येषां पूर्वसंकल्पजं मनः ॥ ६३
मनो यस्येन्द्रियग्रामविषयं प्रति चोदितम् ।
तस्यौत्सुक्यं संभवति प्रवृत्तिश्चोपजायते ॥ ६४
ततः संकल्पवीर्येण कामेन विषयेषुभिः ।
विद्धः पतति लोभाग्नौ ज्योतिर्लोभात्पतंगवत् ॥ ६५
ततो विहारैराहारैर्मोहितश्च विशां पते ।
महामोहमुखे मग्नो नात्मानमवबुध्यते ॥ ६६
एवं पतति संसारे तासु तास्विह योनिषु ।
अविद्याकर्मतृष्णाभिर्भ्राम्यमाणोऽथ चक्रवत् ॥ ६७
ब्रह्मादिषु तृणान्तेषु भूतेषु परिवर्तते ।
जले भुवि तथाकाशे जायमानः पुनः पुनः ॥ ६८

अबुधानां गतिस्त्वेषा बुधानामपि मे शृणु ।
ये धर्मे श्रेयसि रता विमोक्षरतयो जनाः ॥ ६९
यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
तस्माद्धर्मानिमान्सर्वान्नाभिमानात्समाचरेत् ॥ ७०
इज्याध्ययनदानानि तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ ७१
तत्र पूर्वश्चतुर्वर्गः पितृयानपथे स्थितः ।
कर्तव्यमिति यत्कार्यं नाभिमानात्समाचरेत् ॥ ७२
उत्तरो देवयानस्तु सद्भिराचरितः सदा ।
अष्टाङ्गेनैव मार्गेण विशुद्धात्मा समाचरेत् ॥ ७३
सम्यक्संकल्पसंबन्धात्सम्यक्चेन्द्रियनिग्रहात् ।
सम्यग्व्रतविशेषाच्च सम्यक्च गुरुसेवनात् ॥ ७४
सम्यगाहारयोगाच्च सम्यक्चाध्ययनागमात् ।
सम्यक्कर्मोपसंन्यासात्सम्यक्चित्तनिरोधनात् ।

---

before corr.) M1 चाज्ञः (for ऽप्राज्ञः). — [b]) S (except M2) विघसं (T2 G3. 4 °घातं) कुरुते बहु. — [c]) K2 B D (except D1–3) °वशाक्रांतः (B1 °समापन्नः). — [d]) B1 D2 इंद्रियाणां व°.

62 [a]) D1 ज्ञान°; D2 ज्ञाय°; D3 जान° (for बुध्य°). — [b]) Dc S (except M2) मनो- (for नरो). — [d]) T G3. 4 उद्भ्रांत इव.

63 [bc]) T1 G1. 2 M1 transp. यदा and तदा. — [d]) Ś1 K2 D6 G1 M2 पूर्व (for पूर्व-).

64 [ab]) Ś1 °स्यैव; K3 °स्येह (for °ग्राम-). Ś1 K3 धावति (for चोदितम्). K2 B D मनो यस्येंद्रियस्येह विषयान्या(B1 D1–3 °यं या)ति सेवितुं (B1. 3. 4 Dc बोधितुं; D1–3 नोदितं). — [d]) Dc चैव जायते; D5 चैव विद्यते; G1 चापि जायते (for चोप°).

65 [a]) K2 B D (except D1–3) °बीजेन (for °वीर्येण). — [c]) K3 शोका° (for लोभा°).

66 G4 om. (hapl.) 66–67. — [a]) S (except M2; G4 om.) ततो दारैर्विहारैश्च. — [b]) Ś1 B1 K3 D1. 2 लोभितश्च; D3 क्षोभित°. Ś1 महेच्छया; K2 B Dn D4–6 यथेप्सया; K3 D1–3 महेप्सया; Dc यथेच्छया. — [c]) B2 D1. 3 °मोहे (D3 °मोह-) सुखे; Dn3 D6 °मोहे मुखे.

69 [c]) K3 D3 M2 धर्म- (for धर्मे). — [d]) D1–3 G2 °मतयो (for °रतयो). B2 T1 नराः (for जनाः).

70 70[ab] = B. 12. 241. 1[ab]; = (var.) 242. 3[ab]. — [a]) N (K1. 4 missing) तदिदं. K3 Dc1 Dn2 D1 देव° (for वेद°). In D3, the portion from जेति (in 70[b]) up to धि in 15[a] of the next adhy. is lost on a missing fol. (6). — [c]) T1 G1. 2 transp. धर्मान् and सर्वान्. — 70[d] = 72[d].

71 D3 missing (cf. v.l. 70). T1 G1 om. (hapl.) 71–72. — [b]) K3 D1. 2 दया (for दमः). — [d]) Ś1 मतः (for स्मृतः).

72 D3 missing (cf. v.l. 70). T1 G1 om. 72 (cf. v.l. 71). — [a]) K2 B (except B3) D (except D1–3) अत्र; M1 ततः (for तत्र). G2. 4 M1 चतुर्मार्गं; M2 चतुर्भागः. — [b]) Ś1 D1. 2 °यानपदे; B2. 3 Dn D4 G4 M2 °याणपथे. M1 हितः; M2 स्मृतः. K3 तत्सर्वमविशेषतः. — [c]) Ś1 K3 Dc D1. 2 तत् (for यत्). — [d]) = 70[d]. Ś1 K3 B3 D1. 2 न मत्सरात् (for समाचरेत्).

73 D3 missing (cf. v.l. 70). M1 om. (hapl.) 73. — [ab]) K3 (corrupt) उत्तरश्च चतुर्विज्ञो नामहात्मसुतिं सदा; S (M1 om.) उत्तरं °यानं तु °चरितं तदा (T2 G2–4 तथा).

74 D3 missing (cf. v.l. 70). — [a]) S °योगाच्च (for °संबन्धात्). — [b]) B1. 4 Dc S om. च. — [c]) T2 सत्य- (for सम्यग्). B4 Dc व्रतनिषेवाच्च; G2 प्रीतिविशेषाच्च. — B1 om. (hapl.) 74[d] – 75[a]. — [d]) D1. 2 सम्यग्गुरुनिषेवणात्; S (except G2 M2) सम्यग्गुरुषु सेवया.

75 D3 missing (cf. v.l. 70). B1 om. 75[a] (cf. v.l. 74). — [b]) B4 Dc1 D1. 2 T1 M1 om. च. G1 चाध्या°;

एवं कर्माणि कुर्वन्ति संसारविजिगीषवः ॥ ७५
रागद्वेषविनिर्मुक्ता ऐश्वर्यं देवता गताः ।
रुद्राः साध्यास्तथादित्या वसवोऽथाश्विनावपि ।
योगैश्वर्येण संयुक्ता धारयन्ति प्रजा इमाः ॥ ७६
तथा त्वमपि कौन्तेय शममास्थाय पुष्कलम् ।
तपसा सिद्धिमन्विच्छ योगसिद्धिं च भारत ॥ ७७
पितृमातृमयी सिद्धिः प्राप्ता कर्ममयी च ते ।
तपसा सिद्धिमन्विच्छ द्विजानां भरणाय वै ॥ ७८
सिद्धा हि यद्यदिच्छन्ति कुर्वते तदनुग्रहात् ।
तस्मात्तपः समास्थाय कुरुष्वात्ममनोरथम् ॥ ७९

इति श्रीमहाभारते आरण्यकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।
शौनकेनैवमुक्तस्तु कुन्तीपुत्रो युधिष्ठिरः ।
पुरोहितमुपागम्य भ्रातृमध्येऽब्रवीदिदम् ॥ १
प्रस्थितं मानुयान्तीमे ब्राह्मणा वेदपारगाः ।
न चास्मि पालने शक्तो बहुदुःखसमन्वितः ॥ २
परित्यक्तुं न शक्नोमि दानशक्तिश्च नास्ति मे ।
कथमत्र मया कार्यं भगवांस्तद्ब्रवीतु मे ॥ ३
मुहूर्तमिव स ध्यात्वा धर्मेणान्विष्य तां गतिम् ।
युधिष्ठिरमुवाचेदं धौम्यो धर्मभृतां वरः ॥ ४
पुरा सृष्टानि भूतानि पीड्यन्ते क्षुधया भृशम् ।

C. 3. 135
B. 3. 3. 5
K. 3. 3. 5

G4 स्वाध्या° (for चाध्य°). — c) Ś1 K3 Dc D1. 2. 5 सम्यक् (for एवं).

76 D3 missing (cf. v.l. 70). — b) S (except M2) ऐश्वर्यवशमागताः. — c) Ś1 K3 B4 Dc D2. 5 रु(Dc2 इ)द्रादित्यास्तथा साध्याः. — d) = 1. 1. 32d. Dc D2 [S]ष्टा° (for sथा°). K2 B1–3 Dn D4–6 तथाश्विनौ (for [अ]श्विनावपि). T1 अश्विनौ वसवस्तथा. — f) B4 D6 इमाः प्रजाः (by transp.).

77 D3 missing (cf. v.l. 70). — b) S (except M2) तप आ° (for शममा°). — K3 om. 77c–78b; D1 om. 77cd. — 77c = 78c.

78 D3 missing (cf. v.l. 70). Ś1 K3 om. 78ab (for K3 cf. v.l. 77). D1 transp. 78ab and 78cd. — c) = 77c. Ś1 यतस्व राजञ्छांतानां.

79 D3 missing (cf. v.l. 70). — b) K3 S अनुग्रहं.

Colophon. K1. 4 D3 missing. — *Major* (or *Sub-*) *parvan :* Ś1 Dn2. n3 T1 G2. 4 M आरण्य. — *Adhy. name :* Ś1 Dn1 D1. 5 शौनकवाक्यं; K2 B4 Dc Dn2. n3 D2. 4. 6 पांडवानां (Dc2 पांडव-) प्रव्रजनं; K3 सौनक्यं (sic); T2 G3. 4 शौनकसंवादः; G2 M2 युधिष्ठिरशौनकसंवादः. — *Adhy. no.* (figures, words or both) : Dn3 D1 T1 G1 M 2 (as in text); T2 G2–4 3. — *Śloka no. :* Dn 84 (Dn1 83).

3

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 In D3, the portion from 1 up to धि in 15c is lost on a missing fol. (cf. v.l. 3. 2. 70). — d) Ś1 Dc D1. 2. 5 भ्रातृभिः सहितोऽब्रवीत्; T2 G3 °मध्ये वचोऽब्रवीत्.

2 D3 missing (cf. v.l. 1). Before 2, B4 D2. 5 read युधिष्ठिर उ°. — a) S (except M2) प्रस्थितानुयातारो (T1 °ञ्जो). — c) K2 B Dn D4. 6 T2 G3 पोषणे (for पालने).

3 D3 missing (cf. v.l. 1). — a) Ś1 K3 B4 Dc D1 2. 5 परिमोक्तुं. K2 B (except B4) D (except D1. 2. 5; D3 missing) G1. 2 M1 न शक्नोस्मि; T1 न युक्तोस्मि. — B3 om. (hapl.) 3cd. — d) Ś1 नु; M2 प्र- (for तद्). G2 ब्रवीहि. K2 B1. 3 Dn D4. 6 तद्ब्रूहि भगवन्मम.

4 D3 missing (cf. v.l. 1). Before 4, all MSS. except Ś1 K3 D1 (K1. 4 D3 missing) ins. वैशं° उ° (resp. वैशं°). — a) Ś1 अपि स; K3 अथ स; S मनसा (for इव स). — b) S अन्वी(G1 उद्वी)क्ष्य (for अन्विष्य).

5 D3 missing (cf. v.l. 1). Before 5, N (except Ś1

C. 3. 135
B. 3. 3. 5
K. 3. 3. 5

ततोऽनुकम्पया तेषां सविता स्वपिता इव ॥ ५
गत्वोत्तरायणं तेजोरसानुद्धृत्य रश्मिभिः ।
दक्षिणायनमावृत्तो महीं निविशते रविः ॥ ६
क्षेत्रभूते ततस्तस्मिन्नोषधीरोषधीपतिः ।
दिवस्तेजः समुद्धृत्य जनयामास वारिणा ॥ ७
निषिक्तश्चन्द्रतेजोभिः स्रूयते भूगतो रविः ।
ओषध्यः षड्रसा मेध्यास्तदन्नं प्राणिनां भुवि ॥ ८
एवं भानुमयं ह्यन्नं भूतानां प्राणधारणम् ।
पितैष सर्वभूतानां तस्मात्तं शरणं व्रज ॥ ९
राजानो हि महात्मानो योनिकर्मविशोधिताः ।
उद्धरन्ति प्रजाः सर्वास्तप आस्थाय पुष्कलम् ॥ १०
भीमेन कार्तवीर्येण वैन्येन नहुषेण च ।
तपोयोगसमाधिस्थैरुद्धृता ह्यापदः प्रजाः ॥ ११
तथा त्वमपि धर्मात्मन्कर्मणा च विशोधितः ।
तप आस्थाय धर्मेण द्विजातीन्भर भारत ॥ १२
एवमुक्तस्तु धौम्येन तत्कालसदृशं वचः ।
धर्मराजो विशुद्धात्मा तप आतिष्ठदुत्तमम् ॥ १३
पुष्पोपहारैर्बलिभिरर्चयित्वा दिवाकरम् ।
योगमास्थाय धर्मात्मा वायुभक्षो जितेन्द्रियः ।
गाङ्गेयं वार्युपस्पृश्य प्राणायामेन तस्थिवान् ॥ १४

जनमेजय उवाच ।

कथं कुरूणामृषभः स तु राजा युधिष्ठिरः ।

K$_3$ D$_1$; K$_{1.4}$ D$_3$ missing) ins. धौम्य उ°. — [d]) Ś$_1$ K$_3$ B$_4$ Dc D$_{2.5}$ °पितेव हि (B$_4$ D$_5$ ह); K$_2$ B$_{1-3}$ Dn D$_{4.6}$ °पिता यथा (for °पिता इव). — For 5[d], D$_1$ reads सवितारं पितामहः, and cont. :

13* सान्त्वयित्वा ततो देवः प्राणिकार्ये युयोज च ।

6 D$_3$ missing (cf. v.l. 1). — [a]) Ś$_1$ K$_3$ D$_{1.5}$ देवो; T$_2$ G$_{3.4}$ तेषां (for तेजो°). — [b]) T G$_{2-4}$ लोकान्; G$_1$ M लोकाद् (for रसान्). — [d]) D$_5$ तु प्रावृषद्; M$_2$ प्रविशते (for निवि°). S महीं वर्षति वारिणा (T$_1$ M$_1$ °भिः).

7 D$_3$ missing (cf. v.l. 1). B$_2$ om. 7[ab]. — [a]) T$_2$ G$_{3.4}$ क्षेम° (for क्षेत्र°). — [b]) A few MSS. औषधी° (in both places). — [c]) S (except M$_2$) रवेस् (for दिवस्).

8 D$_3$ missing (cf. v.l. 1). — [a]) K$_3$ D$_2$ निषक्तश्च; T$_1$ निक्षितं; G$_2$ M$_1$ निषिक्तं. — [b]) K$_3$ श्रूयते (for स्रू°). D$_5$ [अ]त्र गतो; T$_2$ G M$_1$ जगतो (for भूगतो). K$_2$ B Dc Dn D$_{2.4.6}$ स्वयोनौ निर्गते (B$_{1.3.4}$ Dc D$_2$ °तो) रविः. — [c]) Ś$_1$ K$_3$ B$_4$ D$_{1.5}$ ओषधीः.

9 D$_3$ missing (cf. v.l. 1). — [b]) T$_2$ G$_3$ प्रजानां (for भूता°). — [c]) K$_3$ पितैवं; B$_4$ Dc D$_{2.5}$ पितेव; S (except M$_1$) नाथोऽयं (for पितैष).

10 D$_3$ missing (cf. v.l. 1). — [b]) Cf. 12[b]. D$_1$ शुभे कर्मणि संस्थिताः. — [c]) G$_4$ धारयंति (for उद्ध°).

11 D$_3$ missing (cf. v.l. 1). — [a]) B$_{1-3}$ धौम्येन (B$_{2m}$ हैमेन); T$_1$ G$_{1.2.4}$ भैमेन; T$_2$ G$_3$ M$_1$ भौमेन; M$_2$ गयेन. — [b]) A few MSS. वैण्येन. — [d]) K$_3$ चापदि; D$_1$ ह्यापदि.

12 D$_3$ missing (cf. v.l. 1). — [a]) Ś$_1$ धर्माशः; S कौंतेय (for धर्मात्मन्). — [d]) T$_1$ G$_{1.2}$ M$_1$ कौरव (for भारत).

13 D$_3$ missing (cf. v.l. 1). K$_2$ B Dc Dn D$_{2.4.6}$ read 13–14 after 33; Dc D$_2$ read 13 in its proper place *also*. Before 13, all MSS. ins. वैशं° उ°. — After 13[ab] (transposed), K$_2$ B$_2$.$_4$ Dn D$_{4.6}$ ins. :

14* विप्रत्यागसमाधिस्थः संयतात्मा दृढव्रतः ।;

while G$_2$ ins. :

15* ततस्त्वध्यापयामास मन्त्रं सर्वार्थसाधकम् ।
अष्टाक्षरं परं मन्त्रमार्तस्य सततं प्रियम् ।

14 D$_3$ missing (cf. v.l. 1). For the sequence of K$_2$ B D (except D$_{1.5}$; D$_3$ missing), cf. v.l. 13. — After 14[ab] (transposed), K$_2$ B Dc Dn D$_{2.4.6}$ ins. :

16* सोऽवगाह्य जलं राजा देवस्याभिमुखोऽभवत् ।

— [c]) B$_4$ Dc D$_2$ सं° (for [उ]प°). — After 14, K$_3$ B D (except D$_1$; D$_3$ missing) ins. a passage given in App. I (No. 1); while S reads adhy. 4 !

15 M$_2$ om. 15–33. D$_3$ missing up to धि in 15[c] (cf. v.l. 1). — After the ref., S (except M$_2$) ins. a variant of 14[abcd] :

17* पुष्पोपहारैर्बलिभिर्बहुशश्च यथाविधि ।
सर्वात्मभूतं संपूज्य यतप्राणो जितेन्द्रियः ।

— [a]) S (M$_2$ om.) स्तवेन (M$_1$ तेपेन) केन विप्रर्षे (T$_2$ G$_3$ °प्रेष). — [b]) G$_4$ स्तुत्वा (for स तु). — [d]) Ś$_1$ K$_3$ D$_{1.3}$ °विक्रमः; K$_2$ B Dc Dn D$_{2.4-6}$ °दर्शनं (for °विक्रमम्). — After 15, S (except M$_2$) ins. :

18* मयि स्नेहोऽस्ति चेद्ब्रह्मन्यद्यनुग्रहभागहम् ।
भगवन्नास्ति चेद्दुःखं तच्च मे ब्रूहि सांप्रतम् ।

विप्रार्थमाराधितवान्सूर्यमद्भुतविक्रमम् ॥ १५
वैशंपायन उवाच ।
शृणुष्वावहितो राजञ्शुचिर्भूत्वा समाहितः ।
क्षणं च कुरु राजेन्द्र सर्वं वक्ष्याम्यशेषतः ॥ १६
धौम्येन तु यथा प्रोक्तं पार्थाय सुमहात्मने ।
नाम्नामष्टशतं पुण्यं तच्छृणुष्व महामते ॥ १७
सूर्योऽर्यमा भगस्त्वष्टा पूषार्कः सविता रविः ।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥ १८
पृथिव्यापश्च तेजश्च खं वायुश्च परायणम् ।
सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥ १९
इन्द्रो विवस्वान्दीप्तांशुः शुचिः शौरिः शनैश्चरः ।
ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वैश्रवणो यमः ॥ २०
वैद्युतो जाठरश्चाग्निरिन्धनस्तेजसां पतिः ।
धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ॥ २१
कृतं त्रेता द्वापरश्च कलिः सर्वामराश्रयः ।
कला काष्ठा मुहूर्ताश्च पक्षा मासा ऋतुस्तथा ॥ २२
संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ।
पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ॥ २३
लोकाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ।
वरुणः सागरोंऽशुश्च जीमूतो जीवनोऽरिहा ॥ २४
भूताश्रयो भूतपतिः सर्वभूतनिषेवितः ।
मणिः सुवर्णो भूतादिः कामदः सर्वतोमुखः ॥ २५
जयो विशालो वरदः शीघ्रगः प्राणधारणः ।
धन्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः ॥ २६
द्वादशात्मारविन्दाक्षः पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ २७

C. 3. 156
B. 3. 3. 26
K. 3. 3. 79

---

16 M_2 om. 16 (cf. v.l. 15). — [d]) K_2 B_2 Dn $D_{1.\,4-6}$ संप्र- (for सर्वं). S (M_2 om.) गुह्यं वक्ष्यामि ते हितं.

17 M_2 om. 17 (cf. v.l. 15). — [a]) N ($K_{1.\,4}$ missing) -पूर्वं (for प्रोक्तं). — [c]) G_2 अष्टोत्तरं (for अष्टशतं). N ($K_{1.\,4}$ missing) नामाष्टशतमाख्यातं. — [d]) B_4 D_1 $G_{1.\,4}$ महाद्युते. G_3 शतं तच्छृणु भूपते.

18 M_2 om. 18 (cf. v.l. 15). — Before 18, K_2 B (except B_1) D (except $D_{1.\,3}$) T_2 G_2 ins. धौम्य उ° (resp. धौम्यः); K_3 सूर्याय नमः.

20 M_2 om. 20 (cf. v.l. 15). — [a]) Dc D_2 विश्वात्मा (for दीप्तांशुः). — [d]) Dc Dn_1. n_2 (before corr.). n_3 वै वरुणो (for वैश्र°).

21 M_2 om. 21 (cf. v.l. 15). — [b]) $\acute{S}_1$ B_2 निधिः (for पतिः).

22 M_2 om. 22 (cf. v.l. 15). — [a]) B_2 Dc $D_{1.\,2}$ $G_{2.\,4}$ द्वापरं च. — [b]) K_2 B D (except $D_{1.\,3}$) सर्वमलाश्रयः. — [d]) $\acute{S}_1$ पक्षो मास ऋतुश्च यः; K_3 Dc D_2 क्षणा यामा लवाः क्षपाः; K_3 पक्षमासा ऋतेशयः; $B_{1.\,3}$ Dn D_{4-6} क्षपा याम- (Dn$_3$ D_6 °मा)स्तथा क्षणः (D_6 °णाः); B_3 क्षपा यामा नवाः क्षणाः; B_4 पक्षा मासा क्षपाः क्षणाः; D_1 पक्षा मासास्त्वहर्निशौ; D_3 पक्षा मासस्त्वहर्निशं (sic).

23 M_2 om. 23 (cf. v.l. 15). — [b]) $\acute{S}_1$ D_{1-3} कालचक्रं. — 23^d = (var.) 1. 1. 20^d.

24 M_2 om. 24 (cf. v.l. 15). — [a]) K_2 $B_{1.\,2}$ D (except $D_{1.\,3.\,5}$) G_1 काला° (for लोका°). $\acute{S}_1$ K_3 D_1 G_2 सुरा° (for प्रजा°). — [c]) $\acute{S}_1$ K_2 B_2 Dn D_{4-6} [s]शश्च; D_1 [s]भश्च (for sशुश्च).

25 M_2 om. 25 (cf. v.l. 15). — [a]) $\acute{S}_1$ K_3 B_3 भूताशयो. — [b]) K_2 B Dn $D_{4.\,6}$ °लोकनमस्कृतः (B_4 °भूतहिते रतः); Dc D_2 °भूतपतिर्विभुः; D_5 °भूतनिषेवकः. — After 25^{ab}, N ($K_{1.\,4}$ missing) ins.:

19* स्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः ।
अनन्तः कपिलो भानुः.

[$\acute{S}_1$ K_3 $B_{3.\,4}$ D_5 °करोचलः; $D_{1.\,3}$ °करोमलः (for °रलोलुपः).]

— 19* is followed by 25^d, 26^a, 20*, 25^e and 26^b (with v.l.), etc. — [c]) N ($K_{1.\,4}$ missing) मनः ($D_{1.\,2}$ मनुः; D_5 कल्पः) सुपर्णो. — [d]) B_3 (m as in text) °दः कामगो विभुः.

26 M_2 om. 26 (cf. v.l. 15). — [a]) $\acute{S}_1$ K_3 B_3m $D_{1.\,2}$ विषादो; M_1 °धाता (for °शालो). — After 26^a, N ($K_{1.\,4}$ missing) ins.:

20* सर्वधातुनिषेवितः ।
[K_2 B_2 Dn $D_{4.\,6}$ °निषेविता; B_4 सर्वभूत°.]

— [b]) K_2 B_2 °धारकः.

27 M_2 om. 27 (cf. v.l. 15). — [b]) D_5 मही नभः (for पिता°). — [d]) B (except B_2) Dc_1 D_4 त्रिपिष्टपं.

C. 3. 157
B. 3. 3. 27
K. 3. 3. 80

देहकर्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्ष्मात्मा मैत्रेण वपुषान्वितः ॥ २८
एतद्वै कीर्तनीयस्य सूर्यस्यैव महात्मनः ।
नाम्नामष्टशतं पुण्यं शक्रेणोक्तं महात्मना ॥ २९
शक्राच्च नारदः प्राप्तो धौम्यश्च तदनन्तरम् ।
धौम्याद्युधिष्ठिरः प्राप्य सर्वान्कामानवाप्तवान् ॥ ३०
सुरपितृगणयक्षसेवितं
ह्यसुरनिशाचरसिद्धवन्दितम् ।
वरकनकहुताशनप्रभं
त्वमपि मनस्यभिधेहि भास्करम् ॥ ३१
सूर्योदये यस्तु समाहितः पठे-
त्स पुत्रलाभं धनरत्नसंचयान् ।
लभेत जातिस्मरतां सदा नरः
स्मृतिं च मेधां च स विन्दते पराम् ॥ ३२
इमं स्तवं देववरस्य यो नरः
प्रकीर्तयेच्छुचिसुमनाः समाहितः ।
स मुच्यते शोकदवाग्निसागरा-
ल्लभेत कामान्मनसा यथेप्सितान् ॥ ३३

इति श्रीमहाभारते आरण्यकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

---

28 M_2 om. 28 (cf. v.l. 15). — [d]) $Ś_1$ (m as in text) B D (except $D_{1.3}$) मैत्रेयः करुणान्वितः; T_1 मैत्रेण वपुरन्वितः.

29 M_2 om. 29 (cf. v.l. 15). — [b]) N ($K_{1.4}$ missing) सूर्यस्यामिततेजसः. — [c]) K_3 $D_{1.3.5}$ प्रोक्तं (for पुण्यं). $Ś_1$ अष्टोत्तरं शतं नाम्नां; K_2 B Dc Dn $D_{2.4.6}$ नामाष्टशतकं चेदं. — [d]) K_2 B Dc Dn $D_{2.4.6}$ प्रोक्तमेतत्स्वयंभुवा; K_3 $D_{1.3.5}$ शक्रेण सुमहात्मना.

30 K_3 M_2 om. 30 (for M_2 cf. v.l. 15). K_2 B (except B_2) D (except $D_{1.3.5}$) read 30 in the course of passage No. 2 of App. I. — [a]) $Ś_1$ D_1 प्राप; $D_{2.3}$ प्राप्य (for प्राप्तो). — [b]) N ($K_{1.4}$ missing) तु (for च). — [c]) $D_{1.4.5}$ प्राप (for प्राप्य). — [d]) Dc $D_{2.5}$ अवाप्नुयात्.

31 M_2 om. 31 (cf. v.l. 15). — [a]) K_2 B (except B_4) D (except $D_{1.3}$) G_3 (by transp.) सुरगणपितृयक्ष°; G_2 सुरपितृगणसिद्धवंदितं (cf. 31[b]). — [b]) D_{1-3} om. हि. $Ś_1$ K_3 B_4 दितिजनिशा°; T $G_{3.4}$ M_1 निशिचरगणसिद्ध°; $G_{1.2}$ निशिचरचारण(G_1 °चरगण)यक्षसेवितं (cf. [a]). — [d]) $Ś_1$ K_3 $D_{1.3}$ त्वमपि नमस्व हिताय भा°; K_2 B Dc Dn $D_{2.4-6}$ प्रणिपतितोस्मि हिताय भा°.

32 M_2 om. 32 (cf. v.l. 15). — [a]) K_2 B D (except D_1) सु- (for तु). — [b]) K_2 B D (except D_{1-3}) °दारान्; K_3 °कामान् (for °लाभं). — [c]) K_2 B D (except D_{1-3}) transp. सदा and नरः. — [d]) K_2 $B_{1.2}$ Dn D_{4-6} धृतिं (for स्मृतिं). $Ś_1$ $B_{1.2m.3}$ D (except D_5) पुमान् (for पराम्).

33 M_2 om. 33 (cf. v.l. 15). — [a]) S (M_2 om.) कीर्तयेत् (for यो नरः). — [b]) Hypermetric! S (M_2 om.) श्रृणोति वा यः (for प्रकीर्तयेच्छुचि-). $Ś_1$ K_3 $B_{3.4}$ Dc D_{1-3} शुद्धमनाः (for शुचिसुमनाः). — [c]) K_2 B Dn D_{4-6} वि-; Dc प्र- (for स). — [d]) S (except G_4; M_2 om.) मनसो. — After 33, K_2 B Dc Dn $D_{2.4.6}$ read 13–14.

Colophon om. in $Ś_1$ $K_{2.3}$ B_{1-3} Dn D_6 T_1 M_2. $K_{1.4}$ missing. — *Major* (or *Subr*)*parvan*: $G_{2.3}$ आरण्य. — *Adhy. name*: B_4 Dc_1 सूर्यनामाष्टशतकं (Dc_1 °ष्टशतं); Dc_2 D_2 सूर्यनामाष्टकं शतं (D_2 °ष्टकशतं); Dn_1 सूर्याराधनं; D_1 धौम्योक्तं सूर्यध्यानं; D_3 धौम्यकृतस्तवः; T_2 G_3 सूर्यनामाष्टोत्तरं; G_2 सूर्यप्रसादः; to it B_4 Dc $D_{2.3}$ add समाप्त. — *Adhy. no.* (figures, words or both): D_1 $G_{1.2}$ M_1 3 (as in text); T_2 G_3 4. — *Śloka no.*: D_1 35.

4

☞ This adhy. is missing in $K_{1.4}$ (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here. S reads the stanzas comprising this adhy. after 3. 3. 14; while K_2 B D (except $D_{1.3.5}$) read them after a passage given in App. I (No. 1), which these MSS. ins. after 3. 3. 14. Thus the sequence in K_2 B D (except $D_{1.3.5}$) is 3. 3. 1–12; 15–29; 31–33; 13–14 (with insertions); App. I (No. 1); 3. 4. 1–3; App. I (No. 2); 3. 4. 4–10.

४

वैशंपायन उवाच ।
ततो दिवाकरः प्रीतो दर्शयामास पाण्डवम् ।
दीप्यमानः स्ववपुषा ज्वलन्निव हुताशनः ॥ १
यत्तेऽभिलषितं राजन्सर्वमेतदवाप्स्यसि ।
अहमन्नं प्रदास्यामि सप्त पञ्च च ते समाः ॥ २
फलमूलामिषं शाकं संस्कृतं यन्महानसे ।
चतुर्विधं तदन्नाद्यमक्षय्यं ते भविष्यति ।
धनं च विविधं तुभ्यमित्युक्त्वान्तरधीयत ॥ ३
लब्ध्वा वरं तु कौन्तेयो जलादुत्तीर्य धर्मवित् ।
जग्राह पादौ धौम्यस्य भ्रातॄंश्चास्वजताच्युतः ॥ ४
द्रौपद्या सह संगम्य पश्यमानोऽभ्ययात्प्रभुः ।
महानसे तदान्नं तु साधयामास पाण्डवः ॥ ५
संस्कृतं प्रसवं याति वन्यमन्नं चतुर्विधम् ।
अक्षय्यं वर्धते चान्नं तेन भोजयते द्विजान् ॥ ६
भुक्तवत्सु च विप्रेषु भोजयित्वानुजानपि ।
शेषं विघससंज्ञं तु पश्चाद्भुङ्क्ते युधिष्ठिरः ।
युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ॥ ७
एवं दिवाकरात्प्राप्य दिवाकरसमद्युतिः ।
कामान्मनोभिलषितान्ब्राह्मणेभ्यो ददौ प्रभुः ॥ ८
पुरोहितपुरोगाश्च तिथिनक्षत्रपर्वसु ।
यज्ञियार्थाः प्रवर्तन्ते विधिमन्त्रप्रमाणतः ॥ ९
ततः कृतस्वस्त्ययना धौम्येन सह पाण्डवाः ।
द्विजसंघैः परिवृताः प्रययुः काम्यकं वनम् ॥ १०

C. 3. 218
B. 3. 3. 86
K. 3. 3. 63

इति श्रीमहाभारते आरण्यकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

---

1 K2. 3 B1–3 Dn D4. 6 S (which cont. the previous adhy.) om. the ref.; while B4 Dc D2. 3. 5 (which ins. the ref. before the last line of passage No. 1 of App. I) also om. the ref. here.

2 Before 2, Ś1 K2 B Dc Dn D4–6 M2 ins. **विवस्वानुवाच** (Ś1 om. उ°, but *not* M2); K3 D1–3 G2 **सूर्य उ°** (G2 om. उ°); T1 G1 M1 **आदित्यः**. — [a]) K2 B1. 2 Dn D4. 6 **किंचित्**; B3 **कामं** (for **राजन्**). — [b]) K2 B2 Dn D4. 6 **तत्त्वं सर्वम्**; B1 **तत्सर्वं त्वम्** (for **सर्वमेतद्**). B3 **तत्सर्वं समवा°**. — [d]) S **नव वर्षाणि त्रीणि च**. — After 2, K2 Dn D5. 6 (both latter marg.) ins. 21*.

3 [a]) Ś1 **यच्यं** (for **शाकं**). — D3 (marg. *sec. m.*) S ins. after 3[ab]: K2 Dn D5. 6 (both latter marg.), after 2:

21* **गृह्णीष्व पिठरं ताम्रं मया दत्तं नराधिप ।**
यावद्वाञ्छति पाञ्चाली पात्रेणानेन सुव्रत ।

[(L. 2) K2 Dn D5. 6 **वर्त्स्यति**; T1 **इच्छति** (for **वाञ्छति**). T1 **संभृता** (for **सुव्रत**).]

— After 3[cd], K2 B (except B1) Dn D4. 6 ins.:

22* **इतश्चतुर्दशे वर्षे भूयो राज्यमवाप्स्यसि ।**,

followed by **वैशं° उ°**.

— [ef]) D5 **चतुर्विधं** (for **च विविधं**). K2 B Dn D4. 6 **एवमुक्त्वा तु भगवांस्तत्रैवांतरधीयत**. — 3[f] = 1. 12. 3[d]. — After 3, N (except K3 D1; K1. 4 missing) ins. a passage given in App. I (No. 2).

4 Before 4, all MSS. (except D1 T2 G3; K1. 4 missing) ins. **वैशं° उ°** (resp. **वैशं°**). — [d]) Ś1 B4 Dc D1–3. 5 **भ्रातृभिः स्वजनेन च**; K2 B1–3 Dn D4. 6 **भ्रातॄंश्च परिषस्वजे**. — After 4, B3. 4 ins.:

23* **युधिष्ठिर उवाच ।**
त्वत्प्रसादाद् द्विजश्रेष्ठ यदिष्टं प्राप्तवानहम् ।,

followed by **वैशं° उ°**.

5 [a]) D1. 3 **°द्या समुपागम्य**. — [b]) N (K1. 4 missing) **वंद्यमानो**; G1 **पच्** (for **पश्य°**). K2 B (except B4) Dn D4–6 **तया**; K3 **ययौ**; T1 G1. 3 M1 **[अ]पयात्** (for **ऽभ्य°**). — [c]) N (K1. 4 missing) **तदानीं**; T2 G1. 3. 4 **तदन्नं** (for **तदान्नं**). — T1 om. (hapl.) 5[d]–7[c].

6 T1 om. 6 (cf. v.l. 5). — [a]) Ś1 **यच्च** (for **याति**). M2 **संस्कृतं तच्च भवति**. — [b]) Ś1 **धन्यम्**; K2 B Dn D4. 5 **स्वल्पम्**; D6 **पक्वम्** (for **वन्यम्**). — [d]) S (T1 om.) **[अ]भोजयत** (for **भोज**).

7 T1 om. 7[abc] (cf. v.l. 5). — [a]) K3 D3 **तु**; G1. 2. 4 M1 **[अ]थ** (for **च**). — [b]) Dc D2 **द्विजान्**; D1 **[अ]नुगान्**. — [f]) K3 (? orig. gloss) **द्रौपदी** (for **पार्षती**).

५

C. 3. 219
B. 3. 4. 1
K. 3. 4. 1

वैशंपायन उवाच ।
वनं प्रविष्टेष्वथ पाण्डवेषु
प्रज्ञाचक्षुस्तप्यमानोऽम्बिकेयः ।
धर्मात्मानं विदुरमगाधबुद्धिं
सुखासीनो वाक्यमुवाच राजा ॥ १
प्रज्ञा च ते भार्गवस्येव शुद्धा
धर्मं च त्वं परमं वेत्थ सूक्ष्मम् ।
समश्च त्वं संमतः कौरवाणां
पथ्यं चैषां मम चैव ब्रवीहि ॥ २
एवं गते विदुर यदद्य कार्यं
पौराश्चेमे कथमस्मान्भजेरन् ।
ते चाप्यस्मान्नोद्धरेयुः समूला-
न्न कामये तांश्च विनश्यमानान् ॥ ३

विदुर उवाच ।
त्रिवर्गोऽयं धर्ममूलो नरेन्द्र
राज्यं चेदं धर्ममूलं वदन्ति ।
धर्मे राजन्वर्तमानः स्वशक्त्या
पुत्रान्सर्वान्पाहि कुन्तीसुतांश्च ॥ ४
स वै धर्मो विप्रलुप्तः सभायां
पापात्मभिः सौबलेयप्रधानैः ।
आहूय कुन्तीसुतमक्षवत्यां
पराजैषीत्सत्यसंधं सुतस्ते ॥ ५
एतस्य ते दुष्प्रणीतस्य राज-
ञ्शेषस्याहं परिपश्याम्युपायम् ।
यथा पुत्रस्तव कौरव्य पापा-
न्मुक्तो लोके प्रतितिष्ठेत साधु ॥ ६

— *N. B.* After 7, most old printed ed. ins. a spurious line द्रौपद्यां भुज्यमानायां तदस्मं क्षयमेति च ।, which was found only on the marg. of one inferior MS. collated for the edition but not included in our apparatus !

8 [b]) K₂ B D (except D₁. ₃) °समप्रभः; M₂ पात्रं हैरण्यमुत्तमं. — [c]) T₂ (by corr.) G₃ आत्मा° (for मनो°). G₁ कामात्मानोभिलषितान्. — [d]) Dn D₃ S [अ]ददात् (for ददौ).

9 [c]) K₂ B Dc D₂. ₄. ₅ यज्ञे पार्थाः; D₁ यज्ञार्थाय; T₂ यज्ञार्थे सं-; G M इज्यार्थे स्म (G₁ च; G₂ -भ्यः; G₃ सं-) (for यज्ञि°). T₁ इज्यार्थे समवर्तते. — [d]) M₂ विधिवन्मंत्र-कोविदाः.

10 [d]) Dc D₂ °युः काम्यके पुनः. — After 10, S reads 3. 3. 15–33.

Colophon om. in T₂ G M₁. K₁. ₄ missing. — *Major* (or *Sub-*) *parvan:* T₁ M₂ आरण्य. — *Adhy. name:* Ś₁ K₃ सूर्यस्तवः; K₂ B₁–₃ Dc Dn D₂. ₄–₆ काम्यकवन(B₂ D₂ om. वन)प्रवेशः; B₄ युधिष्ठिरादीनां काम्यकवनप्रवेशः; M₂ अर्कसंवादः. — *Adhy. no.* (figures, words or both): Dn T₁ M₂ 3; D₁ 4 (as in text). — *Śloka no.:* Dn 83, D₁ 11.

5

☞ This adhy. is missing in K₁. ₄ (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 [d]) Ś₁ D₁. ₃ T₂ G₃–₆ सुखासीनं.

2 Dc₂ om. 2[a]–3[b]. Before 2, N (K₁. ₄ missing; Dc₂ om.) G₄ M ins. धृतराष्ट्र उ° (resp. धृतराष्ट्रः). — [a]) Ś₁ K₃ D₁ हि (for च). Ś₁ K₃ Dc₁ D₁–₃ वृद्धा (for शुद्धा). — [b]) B₃. ₄ वेत्सि; T G₃ वेद (for वेत्थ). — [c]) Dc₁ D₂ कामश्च (for सम°). — [d]) K₃ D₃ T₂ G₃. ₄ M₂ तेषां; G₂ चेदं (for चैषां). K₃ [इ]ह ब्रूहि (for ब्रवीहि).

3 Dc₂ om. 3[ab] (cf. v.l. 2). — [a]) T G₃ वीर (for विदुर). — [b]) K₃ त्वेते; B₂ Dc₁ D₄ च मे; T₂ G₃. ₄ च ते (for चेमे). — [d]) K₂ B (except B₁) Dn D₄. ₆ तत्त्वं ब्रूयाः साधु कार्याणि वेत्सि. — After 3, T₂ G₃–₄ ins.:

24* सौबलेनैव पापेन दुर्योधनहितैषिणा ।
क्रूरमाचरितं कर्म न मे प्रियमनुष्ठितम् ।
तथैवं हि कृते तत्र तद्भवान्क्षमार्हति ।
उत्तरं प्राप्तकालं च किमन्यन्मन्यते क्षमम् ।
नास्ति धर्मे सहायत्वमिति मे दीर्यते मनः ।
यत्र पाण्डुसुताः सर्वे क्लिश्यन्ति वनमागताः ।
[(L. 2) G₂ क्षत्तर् (for कर्म).]

4 [d]) K₂ B (except B₁) Dn D₄. ₆ पांडोः (for कुन्ती-).

तद्वै सर्वं पाण्डुपुत्रा लभन्तां
यत्तद्राजन्नतिसृष्टं त्वयासीत् ।
एष धर्मः परमो यत्स्वकेन
राजा तुष्येन्न परस्वेषु गृध्येत् ॥ ७
एतत्कार्यं तव सर्वप्रधानं
तेषां तुष्टिः शकुनेश्चावमानः ।
एवं शेषं यदि पुत्रेषु ते स्या-
देतद्राजंस्त्वरमाणः कुरुष्व ॥ ८
अथैतदेवं न करोषि राज-
न्ध्रुवं कुरूणां भविता विनाशः ।
न हि क्रुद्धो भीमसेनोऽर्जुनो वा
शेषं कुर्याच्छात्रवाणामनीके ॥ ९
येषां योद्धा सव्यसाची कृतास्त्रो
धनुर्येषां गाण्डिवं लोकसारम् ।
येषां भीमो बाहुशाली च योद्धा
तेषां लोके किं नु न प्राप्यमस्ति ॥ १०
उक्तं पूर्वं जातमात्रे सुते ते
मया यत्ते हितमासीत्तदानीम् ।
पुत्रं त्यजेममहितं कुलस्ये-
त्येतद्राजन्न च तत्त्वं चकर्थ ।
इदानीं ते हितमुक्तं न चेत्त्वं
कर्तासि राजन्परितप्तासि पश्चात् ॥ ११
यद्येतदेवमनुमन्ता सुतस्ते
संप्रीयमाणः पाण्डवैरेकराज्यम् ।
तापो न ते वै भविता प्रीतियोगा-
त्त्वं चेन्न गृह्णासि सुतं सहायैः ।
अथापरो भवति हि तं निगृह्य
पाण्डोः पुत्रं प्रकुरुष्वाधिपत्ये ॥ १२

C. 3. 232
B. 3. 4. 14
K. 3. 4. 17

— After 4, De reads 7^{ab}, and S (except T_1) reads 10^{cd} (for the first time).

5 [a]) K_2 B Dn $D_{4.6}$ T_2 G **विप्रल(G_2 °लु)ब्धः**; K_3 **°युक्तः**; D_5 **°नष्टः**. — [c]) K_3 (corrupt) **आत्मप्रधानसुतमक्ष°**.

6 [b]) De **शेषं नान्यं** (for **शेषस्याहं**). — [d]) B_1 **तिष्ठते साधुवृत्तः**. A few MSS. **साधुः**.

7 De reads 7^{ab} after 4, *repeating* it here. D_5 om. (hapl.) 7^{b}–8^{c}. — [b]) $Ś_1$ **इति**; B Dn **अभि-**; $D_{1.2}$ **विनि-**; T_1 **अग्नि-** (for **अति-**). — Dn ins. after 7^{cd}: $Ś_1$ K_3, which om. 7^{cd}, ins. after 7^{ab}:

25* **यशो न नश्येज्ज्ञातिभेदश्च न स्या-**
द्धर्मो न स्याच्चैव चैवं कृते स्वाम्।

[(L. 2) Ś K_3 **जह्याद्धर्मो** (for **धर्मो न स्यात्**).]

8 D_5 om. 8^{abc} (cf. v.l. 7). — [a]) B_4 De Dn_2 D_1 **सर्वं**; S **धर्म-** (for **सर्वं-**). — [b]) S **°वमानात्**. — [c]) S **एतच्छ्रेयस्तव** (for **एवं शेषं यदि**). D_{1-3} **पुत्रस्य** (for **पुत्रेषु**).

9 [a]) K_2 $B_{1.2}$ $Dn_{1.n_2}$ $D_{4.6}$ **तथै°** (for **अथै°**).

10 [a]) $Ś_1$ De D_5 **गोप्ता**; B_1 **यंता**; $D_{1.2}$ **आस्ते**; D_3 **शास्ता** (for **योद्धा**). — S (except T_1) reads 10^{cd} after 4, *repeating* it here. — [d]) $Dn_{1.n_3}$ $D_{4.6}$ M_2 **नाप्राप्य°**; T_1 G_1 **दुष्प्राप°** (for **न प्राप्य°**). — After 10, T G_{2-4} ins.:

26* **येषां राजा धर्मपुत्रो महात्मा**
तेषां लोके किं नु दुष्प्रापमस्ति।,

the posterior half being a variant of 10^{d}.

11 [b]) S **तद्** (for **ते**). — [c]) De_1 D_2 **एनम्** (for **इमम्**). — [d]) K_2 B D **हितं परं** (for [इ]**त्येतद्राजन्**). T_1 **तदा**; T_2 G_{2-4} **तथा** (for **च तत्**). De (by transp.) **त्वं तच्चकर्थ**; G_1 **नन्ववेत्थ**. — [e/f]) N ($K_{1.4}$ missing) **इदं च राजन्** (for **इदानीं ते**), and **एवं कर्ता** (for **कर्तासि राजन्**).

12 D_2 om. 12^{abc}. — [a]) T_2 G_{2-4} transp. **एतत्** and **एवं**. — [cd]) N ($K_{1.4}$ missing; D_2 om.) om. **वै**. The same MSS. with M_2 read for 12^{d} **न चे**(M_2 **तस्मा**)**न्निगृह्णीष्व सुतं सुखाय**. T_2 $G_{3.4}$ **नि-** (for **न**). — [e]) $Ś_1$ D_5 **अथापरं**; D_3 **तथोपकारो**; G_1 **यथापरो**. K_2 $B_{1.2}$ Dn $D_{4.6}$ **दुर्योधनं त्वहितं वै** (B_1 **तं**) **निगृह्य**; K_3 (corrupt) **यत्तापस्करं भवति हितं निगृह्णीष्व**; B_3 **दुर्योधनमहितं वै विसृज्य**; B_4 **दुर्योधनं सहितं संनिगृह्य**; De **दुर्योधनं वै त्वहितं** (De_2 **चैव हि तं**) **निगृह्य**; $D_{1.2}$ **अपज्वरो भवति** (D_1 **°सि**) **हि तं प्रगृह्य**; M_2 **निगृह्य पुत्रं मानिनं पापबुद्धिं**. — [f]) $Ś_1$ De $D_{1-3.5}$ **°राज्ये** (for **°पत्ये**). — After 12, G_2 ins.:

27* **ध्रुवं विनाशस्तव पुत्रेण धीम-**
न्सबन्धुवर्गेण सहैव राजभिः।
चतुर्दशे चैव वर्षे नरेन्द्र
कुलक्षयं प्राप्स्यसि राजसिंह।
तस्मात्कुरुष्वाधिपत्ये नरेन्द्र
युधिष्ठिरं धर्मवतां वरिष्ठम्।

13 [d]) B_1 S (except M_2) **उपतिष्ठंति**.

14 [b]) T_2 G_{2-4} **पांडुपुत्रं**. $K_{2.3}$ B Dn $D_{4.6}$ M_2 **भजंतु**.

C. 3. 232
B. 3. 4. 14
K. 3. 4. 19

अजातशत्रुर्हि विमुक्तरागो
धर्मेणेमां पृथिवीं शास्तु राजन् ।
ततो राजन्पार्थिवाः सर्व एव
वैश्या इवास्मानुपतिष्ठन्तु सद्यः ॥ १३
दुर्योधनः शकुनिः सूतपुत्रः
प्रीत्या राजन्पाण्डुपुत्रान्भजन्ताम् ।
दुःशासनो याचतु भीमसेनं
सभामध्ये द्रुपदस्यात्मजां च ॥ १४
युधिष्ठिरं त्वं परिसान्त्वयस्व
राज्ये चैनं स्थापयस्वाभिपूज्य ।
त्वया पृष्टः किमहमन्यद्वदेय-
मेतत्कृत्वा कृतकृत्योऽसि राजन् ॥ १५

धृतराष्ट्र उवाच ।

एतद्वाक्यं विदुर यत्ते सभाया-
मिह प्रोक्तं पाण्डवान्प्राप्य मां च ।
हितं तेषामहितं मामकाना-
मेतत्सर्वं मम नोपैति चेतः ॥ १६
इदं त्विदानीं कुत एव निश्चितं
तेषामर्थे पाण्डवानां यदात्थ ।
तेनाद्य मन्ये नास्ति हितो ममेति
कथं हि पुत्रं पाण्डवार्थे त्यजेयम् ॥ १७
असंशयं तेऽपि ममैव पुत्रा
दुर्योधनस्तु मम देहात्प्रसूतः ।
स्वं वै देहं परहेतोस्त्यजेति
को नु ब्रूयात्समतामन्ववेक्षन् ॥ १८
स मा जिह्मं विदुर सर्वं ब्रवीषि
मानं च तेऽहमधिकं धारयामि ।
यथेच्छकं गच्छ वा तिष्ठ वा त्वं
सुसान्त्व्यमानाप्यसती स्त्री जहाति ॥ १९

वैशंपायन उवाच ।

एतावदुक्त्वा धृतराष्ट्रोऽन्वपद्य-
दन्तर्वेश्म सहसोत्थाय राजन् ।
नेदमस्तीत्यथ विदुरो भाषमाणः
संप्राद्रवद्यत्र पार्था बभूवुः ॥ २०

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

---

15 [b]) $D_{1.2}$ G_4 M_1 स्थापयित्वा°. M_2 स्वराज्ये (for [अ]भि°). G_1 राजन्वचोभिः कुशलैः प्रपूज्य. — [d]) $Ś_1$ K_3 D_{1-3} भवाद्य (for ऽसि राजन्).

16 [a]) $Ś_1$ K_3 $D_{1-3.5}$ श्रुतं; Dc श्रुत्वा (for एतद्). D_5 सर्वं (for वाक्यं). S (except T_1) तत् (for ते). — [d]) N ($K_{1.4}$ missing) M_2 नावैति; G_2 नैवैति (for नोपैति); cf. 3. 6. 13[c].

17 [a]) B_1 Dn $D_{4.6}$ T_2 G_3 Cnp (!) गत एव; T_1 $G_{2.4}$ M_1 कृतमेव; M_2 मनसैव (for कुत एव). — [b]) $Ś_1$ K_3 G_2 यथात्थ; D_5 यदा तु; T_1 यदर्थः (for यदात्थ). — [c]) T_2 $G_{3.4}$ केना° (for तेना°). D_2 नाशहेतो; D_3 T_1 नास्ति हितो; T_2 G_3 नासि भीतो; G_1 नासि मनो; G_4 नासि भूतो; M_2 ह्यहितो (for नासि हितो). — [d]) $Ś_1$ D_{1-3} om. हि. T_2 $G_{3.4}$ पुत्रं नाहं; M_1 तथा हि पुत्रं; M_2 कथं नु पुत्रं.

18 [b]) $Ś_1$ K_3 Dc $D_{1-3.5}$ G_2 om. तु. — [c]) B_2 त्वं वै; $D_{1.2}$ त्वं चैव; $G_{1.2}$ त्वकं; M_1 त्वकं वै (for त्वं वै). B_4 आत्मोद्भूतं (for त्वं वै देहं). — [d]) K_2 B D (except D_{1-3}) अन्ववेक्ष्य.

19 [a]) $K_{2.3}$ B D (for D_3 see below) $G_{1.2}$ मां (for मा). K_3 $D_{1.2}$ transp. जिह्मं and सर्वं. T_2 G_{2-4} M_1 त्वं (for सर्वं). D_3 मतां मतं विदुर जिह्मं ब्रवीषि. — [b]) G_2 मन्युं (for मानं च). — With 19[cd], cf. 2. 57. 12[cd]. — [c]) $Ś_1$ T_1 G_2 यथेष्टकं; G_1 तस्माद्यथेच्छं (for यथेच्छकं). T_2 $G_{3.4}$ transp. गच्छ and तिष्ठ. $Ś_1$ साधो (for वा त्वं). — [d]) M_1 om. सु-. $Ś_1$ K_3 Dc D_5 सुमांस्विनापि (K_3 Dc om. -पि); T G संसांत्व- (T_2 G_3 °न्य)माना; M_2 साध्यमाना (for सुसान्त्व्यमाना). $Ś_1$ K_3 Dc $D_{1-3.5}$ हि (for [अ]पि).

20 S (except G_2) om. the ref. — [a]) $Ś_1$ $K_{2.3}$ Dc $D_{1-3.5}$ एवम् (for एतावद्). — [b]) K_3 Dc S राजा; B_4 तस्मात् (for राजन्). — [c]) Hypermetric! S om. अथ.

Colophon. $K_{1.4}$ missing. — *Major* (or *Sub-*)*parvan:* $Ś_1$ T_2 $G_{2.3}$ M_1 आरण्य; B_2 T_1 अरण्य. — *Adhy. name:* K_2 $B_{1.2}$ Dc Dn D_{4-6} विदुरवाक्यं; K_3 विदुरगमनं; $B_{3.4}$ विदुरवि(B_4 om. -वि)त्यागः; $D_{1.2}$ विदुरयानं; T_2 $G_{3.4}$ M_2 धृतराष्ट्रकोपः. — *Adhy. no.* (figures, words or both): K_2 Dn$_3$ D_5 T_1 $G_{1.2}$ M 4; D_1 T_2 $G_{3.4}$ 5 (as in text). — *Śloka no.:* Dn 22; D_1 21.

६

वैशंपायन उवाच ।
पाण्डवास्तु वने वासमुद्दिश्य भरतर्षभाः ।
प्रययुर्जाह्नवीकूलात्कुरुक्षेत्रं सहानुगाः ॥ १
सरस्वतीदृषद्वत्यौ यमुनां च निषेव्य ते ।
ययुर्वनेनैव वनं सततं पश्चिमां दिशम् ॥ २
ततः सरस्वतीकूले समेषु मरुधन्वसु ।
काम्यकं नाम ददृशुर्वनं मुनिजनप्रियम् ॥ ३
तत्र ते न्यवसन्वीरा वने बहुमृगद्विजे ।
अन्वास्यमाना मुनिभिः सान्त्व्यमानाश्च भारत ॥ ४
विदुरस्त्वपि पाण्डूनां तदा दर्शनलालसः ।
जगामैकरथेनैव काम्यकं वनमृद्धिमत् ॥ ५
ततो यात्वा विदुरः काननं त-
च्छीघ्रैरश्वैर्वाहिना स्यन्दनेन ।
ददर्शासीनं धर्मराजं विविक्ते
सार्धं द्रौपद्या भ्रातृभिर्ब्राह्मणैश्च ॥ ६
ततोऽपश्यद्विदुरं तूर्णमारा-
दभ्यायान्तं सत्यसंधः स राजा ।
अथाब्रवीद्भ्रातरं भीमसेनं
किं नु क्षत्ता वक्ष्यति नः समेत्य ॥ ७
कच्चिन्नायं वचनात्सौबलस्य
समाह्वाता देवनायोपयाति ।
कच्चित्क्षुद्रः शकुनिर्नायुधानि
जेष्यत्यस्मान्पुनरेवाक्षवत्याम् ॥ ८
समाहूतः केनचिदाद्रवेति
नाहं शक्तो भीमसेनापयातुम् ।
गाण्डीवे वा संशयिते कथंचि-
द्राज्यप्राप्तिः संशयिता भवेन्नः ॥ ९
तत उत्थाय विदुरं पाण्डवेयाः
प्रत्यगृह्णन्नृपते सर्व एव ।
तैः सत्कृतः स च तानाजमीढो
यथोचितं पाण्डुपुत्रान्समेयात् ॥ १०
समाश्वस्तं विदुरं ते नरर्षभा-
स्ततोऽपृच्छन्नागमनाय हेतुम् ।
स चापि तेभ्यो विस्तरतः शशंस

C. 3. 250
B. 3. 5. 11
K. 3. 5. 11

6

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 b) K3 B3 D1–3 T2 G3. 4 भरतर्षभ. — c) K2 G1 M जाह्नवीतीरात्; D1 T G2–4 °तीरे (cf. 3a).

3 a) T1 G1. 4 M1 सरस्वतीतीरे (cf. 1c). — b) B2 समेता; B4 °स्य (for °षु).

5 a) Ś1 K2. 3 Dn D1–3. 5 G2. 4 अथ (for अपि). — b) Ś1 तथा; K2 B Dn D2. 4. 6 सदा (for तदा).

6 a) Ś1 यातो; K2 B Dc Dn D4. 6 गत्वा (B1 Dc2 ययौ); K3 यात्वाथ; G1 यात्वा तु (for यात्वा). Ś1 कानने; B Dn D4. 6 काम्यकं (for काननं). — b) S वाहितः (for वाहिना). — c) B2 Dn D4. 6 धर्मात्मानं (for धर्मं°). — d) K3 D2. 3 T1 G2 M1 transp. भ्रातृभिः and ब्राह्मणैः.

7 a) B3. 4 Dc मन्युमंतम् (for तूर्णमारात्). S एकम् (for आरात्). — b) D1–3 तदायांतं; S अभ्यागतं. K3 B1. 4 D1–3 सत्यसंधं. — c) S भीमसेनं समीक्ष्य (for भ्रातरं भीम°).

8 a) D1–3 वचसा (for °नात्). — b) K2 D1–3 G2 °ह्वातुं. K2 B Dc Dn D4. 5 °यातः (for °यानि). — c) G1. 2. 4 M1 कुशली (for शकुनिर्). Dc वा°; S (except T1 M2) चा° (for ना°). — d) S अस्माकं (for अस्मान्).

9 a) Dc आव्रजेति; S आहवाय (for आद्रवेति). — b) Dn3 T2 G2–4 उपयातुं (for अप°). — c) Some MSS. गांजीवे. K3 D1–3 om. वा. K2 B Dn D4. 6 च; Dc चेत् (for वा). Ś1 B Dc2 D1–3 कथं नु; K2. 3 Dc1 Dn D4–6 कथं तु; G4 कदाचिद्; M2 कथं तद् (for कथंचिद्). — d) Ś1 D1–3 पुनः (for राज्य-).

10 c) S स तैः (G2 ततः) समेतैः (T2 G3. 4 °तः) सत्कृतः (G2 सहितैः) पांडवेयैः. — d) T1 G1. 2 M पांडुपुत्रैः; T2 G3. 4 पांडवेयैः.

11 a) Dc वै विदुरं (for विदुरं ते). Ś1 K3 D1–3 वै (for ते). — b) Ś1 M2 आगमनस्य.

C. 3. 250
B. 3. 5. 11
K. 3. 5. 11

यथावृत्तो धृतराष्ट्रोऽम्बिकेयः ॥ ११
विदुर उवाच ।
अवोचन्मां धृतराष्ट्रोऽनुगुप्त-
मजातशत्रो परिगृह्याभिपूज्य ।
एवं गते समतामभ्युपेत्य
पथ्यं तेषां मम चैव ब्रवीहि ॥ १२
मयाप्युक्तं यत्क्षमं कौरवाणां
हितं पथ्यं धृतराष्ट्रस्य चैव ।
तद्वै पथ्यं तन्मनो नाभ्युपैति
ततश्चाहं क्षममन्यन्न मन्ये ॥ १३
परं श्रेयः पाण्डवेया मयोक्तं
न मे तच्च श्रुतवानाम्बिकेयः ।
यथातुरस्येव हि पथ्यमन्नं
न रोचते स्मास्य तदुच्यमानम् ॥ १४
न श्रेयसे नीयतेऽजातशत्रो
स्त्री श्रोत्रियस्येव गृहे प्रदुष्टा ।
ब्रुवन्न रुच्यै भरतर्षभस्य
पतिः कुमार्या इव षष्टिवर्षः ॥ १५
ध्रुवं विनाशो नृप कौरवाणां
न वै श्रेयो धृतराष्ट्रः परैति ।
यथा पर्णे पुष्करस्येव सिक्तं
जलं न तिष्ठेत्पथ्यमुक्तं तथास्मिन् ॥ १६
ततः क्रुद्धो धृतराष्ट्रोऽब्रवीन्मां
यत्र श्रद्धा भारत तत्र याहि ।
नाहं भूयः कामये त्वां सहायं
13 a) D5 (before corr.) अपनीतेन, and (by corr.) अवनीपालान्; T2 G (except G2) अविनीयैव; M अनु(M2 °प)नीयैवं (for अभिनीयैवं). Ś1 K2 B Dc Dn D4. 6 अथैनमपनीतेन; K3 D1–3 ये चैनमन्ववर्तंत (K3 °प्रतीतेन). — c) Ś1 K3 D2. 3 °सदश्च सर्वांस्तान्; K2 B Dc Dn D4–6 °सदोनुवर्तेरन्. — d) Ś1 K3 D1–3 अथ सर्वान्; K2 B Dn D4. 6 तांश्च हन्यां; Dc D5 तान्निहन्यां (for भेदयेयं). S दुरोदरात्. — After 13, D1 ins.:

73* सर्वांस्ताननुगृह्णीम बद्ध्वा पाशैस्तु वारुणैः ।

14 a) Ś1 K3 D1–3 T1 कौंतेय (for कौरव्य). — b)

C. 3. 610
B. 3. 13. 14
K. 3. 13. 14

येनेदं व्यसनं प्राप्ता भवन्तो द्यूतकारितम् ॥ १४
सोऽहमेत्य कुरुश्रेष्ठ द्वारकां पाण्डुनन्दन ।
अश्रौषं त्वां व्यसनिनं युयुधानाद्यथातथम् ॥ १५
श्रुत्वैव चाहं राजेन्द्र परमोद्विग्नमानसः ।
तूर्णमभ्यागतोऽस्मि त्वां द्रष्टुकामो विशां पते ॥ १६
अहो कृच्छ्रमनुप्राप्ताः सर्वे स्म भरतर्षभ ।
ये वयं त्वां व्यसनिनं पश्यामः सह सोदरैः ॥ १७

इति श्रीमहाभारते आरण्यकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

१५

युधिष्ठिर उवाच ।
असांनिध्यं कथं कृष्ण तवासीद्वृष्णिनन्दन ।
क्व चासीद्विप्रवासस्ते किं वाकार्षीः प्रवासकः ॥ १
कृष्ण उवाच ।
शाल्वस्य नगरं सौभं गतोऽहं भरतर्षभ ।
विनिहन्तुं नरश्रेष्ठ तत्र मे शृणु कारणम् ॥ २
महातेजा महाबाहुर्यः स राजा महायशाः ।
दमघोषात्मजो वीरः शिशुपालो मया हतः ॥ ३
यज्ञे ते भरतश्रेष्ठ राजसूयेऽर्हणां प्रति ।
स रोषवशसंप्राप्तो नामृष्यत दुरात्मवान् ॥ ४
श्रुत्वा तं निहतं शाल्वस्तीव्ररोषसमन्वितः ।
उपायाद्द्वारकां शून्यामिहस्थे मयि भारत ॥ ५
स तत्र योधितो राजन्बालकैर्वृष्णिपुंगवैः ।
आगतः कामगं सौभमारुह्यैव नृशंसकृत् ॥ ६

D$_5$ समये मे स्वभूत्तदा.

15 ^{a}) K$_3$ Dc [s]यम् (for sहम्). Ś$_1$ K$_3$ Dc D$_{1-3.\ 5}$ अद्य (for एत्य). — ^{b}) Ś$_1$ K$_3$ D$_3$ एत्य भारत; Dc$_1$ यदुनंदनः; Dc$_2$ कुरुनंदन; D$_1$ एत्य सत्वरः; D$_3$ अभि भारत (for पाण्डु°). — ^{c}) Ś$_1$ M$_2$ त्वा (for त्वां).

16 ^{b}) T$_1$ G$_4$ परमुद्विग्न°. — ^{d}) K$_3$ D$_{1.\ 3}$ S (except G$_1$) महीपते; D$_2$ यथातथं.

17 ^{b}) T$_1$ च; G$_2$ ते (for स्म). — ^{cd}) T$_2$ G$_2$ ते (for ये). N यो(Ś$_1$ K$_2$ Dn D$_{1.\ 2.\ 4.\ 6}$ सो)हं त्वां व्यसने मग्नं पश्यामि etc.

Colophon. K$_{1.\ 4}$ missing. — *Major parvan:* Ś$_1$ T G$_{2-4}$ आरण्य; D$_4$ अरण्यक. — *Adhy. name:* K$_2$ B$_2$ Dn$_{2.\ n3}$ D$_{4.\ 6}$ वासुदेवसमागमः; B$_{1.\ 3.\ 4}$ Dc D$_{1.\ 2}$ कृष्ण-(D$_2$ श्रीकृष्ण)वाक्यं; Dc T$_2$ G$_{3.\ 4}$ M वासुदेव(M$_1$ केशव)-वाक्यं. — *Adhy. no.* (figures, words or both): Dn (Dn$_1$ *sup. lin.*) S 13; D$_1$ 14 (as in text). — *Śloka no.:* Dn 17; D$_1$ 18.

15

☞ This adhy. is missing in K$_{1.\ 4}$ (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 ^{d}) Dc Dn$_1$. n$_2$ D$_{2-4}$ G$_4$ चा°; T$_1$ त्वा° (for वा°). K$_2$ B Dn D$_{4-6}$ T$_2$ G प्रवास(G$_2$ °सि)तः; D$_3$ °सगः.

2 K$_3$ D$_{2.\ 3}$ M$_2$ वासुदेवः; D$_1$ T$_1$ M$_1$ भगवान् (for कृष्णः). — ^{a}) Here and below S (generally) shows the spelling साल्व (for शाल्व). — ^{b}) D$_3$ T$_1$ G$_{2.\ 4}$ पुरुषर्षभ. — ^{c}) S (except M$_2$) नृप° (for नर°). K$_2$ B D (except D$_{1-3}$) निहंतुं कौरव(B$_{2.\ 3}$ भरत)श्रेष्ठ; K$_3$ अभवं पुरुषश्रेष्ठ. — ^{d}) S (except G$_4$) transp. तत्र and शृणु.

3 ^{a}) K$_3$ S महाबाहो (M$_2$ °कायो). — ^{b}) Ś$_1$ M$_2$ स च (for यः स).

4 ^{b}) K$_3$ B$_{1.\ 2}$ D$_{1.\ 2}$ T$_1$ G$_{2.\ 4}$ [s]हंणं. — ^{c}) K$_2$ B$_{2.\ 3}$ Dc Dn D$_{2.\ 4-6}$ °वशमापन्नो (B$_{3m}$ °वशतां प्राप्तो). D$_3$ स तु रोषवशं प्राप्तो; T$_1$ G$_1$ M सरोष इव संप्राप्तो; T$_2$ G$_{2-4}$ स रोषमभिसंप्राप्तो.

5 ^{a}) Ś$_1$ K$_3$ D$_{1.\ 2}$ तु; D$_3$ [ए]वं (for तं). — ^{b}) S (except M$_2$) °कोप° (for °रोष°).

6 ^{a}) K$_2$ D$_{4.\ 6}$ तत्रायोधितो. Ś$_1$ K$_3$ D$_{1.\ 2}$ वीरैः; D$_3$ बालैः (for राजन्). G$_1$ स तत्र युद्धमकरोत्. — ^{b}) K$_2$ B Dc Dn D$_{4-6}$ कुमारैर् (for बालकैर्). D$_3$ वृष्णिभी राजपुंगवैः. — ^{c}) S निवृत्तः (for आगतः). — ^{d}) Dn D$_4$ आहत्य (for आरुह्य). K$_2$ B$_{1.\ 4}$ Dc Dn D$_{2.\ 4.\ 5}$ G$_1$ [ए]वं; K$_3$ D$_6$ [ए]नं (for [ए]व). K$_2$ Dn D$_{4.\ 6}$ T G नृशंसवत्. — After

ततो वृष्णिप्रवीरांस्तान्बालान्हत्वा बहूंस्तदा ।
पुरोद्यानानि सर्वाणि भेदयामास दुर्मतिः ॥ ७
उक्तवांश्च महाबाहो क्वासौ वृष्णिकुलाधमः ।
वासुदेवः सुमन्दात्मा वसुदेवसुतो गतः ॥ ८
तस्य युद्धार्थिनो दर्पं युद्धे नाशयितास्म्यहम् ।
आनर्ताः सत्यमाख्यात तत्र गन्तास्मि यत्र सः ॥ ९
तं हत्वा विनिवर्तिष्ये कंसकेशिनिषूदनम् ।
अहत्वा न निवर्तिष्ये सत्येनायुधमालभे ॥ १०
क्वासौ क्वासाविति पुनस्तत्र तत्र विधावति ।
मया किल रणे युद्धं काङ्क्षमाणः स सौभराट् ॥ ११
अद्य तं पापकर्माणं क्षुद्रं विश्वासघातिनम् ।
शिशुपालवधामर्षाद्गमयिष्ये यमक्षयम् ॥ १२
मम पापस्वभावेन भ्राता येन निपातितः ।
शिशुपालो महीपालस्तं वधिष्ये महीतले ॥ १३
भ्राता बालश्च राजा च न च संग्राममूर्धनि ।
प्रमत्तश्च हतो वीरस्तं हनिष्ये जनार्दनम् ॥ १४
एवमादि महाराज विलप्य दिवमास्थितः ।
कामगेन स सौभेन क्षिप्त्वा मां कुरुनन्दन ॥ १५
तमश्रौषमहं गत्वा यथा वृत्तः सुदुर्मतिः ।
मयि कौरव्य दुष्टात्मा मार्तिकावतको नृपः ॥ १६
ततोऽहमपि कौरव्य रोषव्याकुललोचनः ।
निश्चित्य मनसा राजन्वधायास्य मनो दधे ॥ १७
आनर्तेषु विमर्दं च क्षेपं चात्मनि कौरव ।
प्रवृद्धमवलेपं च तस्य दुष्कृतकर्मणः ॥ १८
ततः सौभवधायाहं प्रतस्थे पृथिवीपते ।
स मया सागरावर्ते दृष्ट आसीत्परीप्सता ॥ १९
ततः प्रध्माप्य जलजं पाञ्चजन्यमहं नृप ।
आहूय शाल्वं समरे युद्धाय समवस्थितः ॥ २०
मुमुहूर्तमभूद्युद्धं तत्र मे दानवैः सह ।
वशीभूताश्च मे सर्वे भूतले च निपातिताः ॥ २१

C. 3. 634
B. 3. 14. 21
K. 3. 14. 21

6, S (except M_3) ins.:

74* चिरजीवी नृपः सोऽपि प्रसादात्पद्मजन्मनः ।

8 ^{c}) $Ś_1$ Dn G_1 स (for सु-).

9 ^{b}) S विन° (for नाश°). K_3 हि (for [अ]स्मि). K_2 B_{2-4} $D_{4.6}$ ह (for [अ]हम्).

10 T_2 G_3 M_1 om. (hapl.) 10^{bc}. — ^{b}) $Ś_1$ शिशुपालनिषूदनं; D_3 कृष्णं देवकिनंदनं; some MSS. °निसूदनं. — ^{c}) $Ś_1$ K_3 $D_{1.2}$ नाहत्वा विनि°.

11 ^{b}) K_2 B D (except $D_{2.3}$) M_2 प्र- (for वि-). — ^{c}) Dn $D_{4.6}$ S योद्धुं (for युद्धं).

12 ^{a}) $Ś_1$ K_3 $D_{1.2}$ [अ]हं (for तं). — ^{b}) Dc D_3 कुद्धं. K_3 D_3 S विश्वस्तघातिनं. — K_3 om. (hapl.) from वधा° up to शिशुपालो (in 13^c).

13 K_3 om. up to शिशुपालो (cf. v.l. 12). — ^{a}) Dc गोप° (for पाप°). — ^{c}) $Ś_1$ $D_{1.2}$ महावीर्यस्; K_3 महाशत्रुस् (for मही°). — ^{d}) $Ś_1$ K_3 $D_{1.2}$ हनि° (for वधि°). $Ś_1$ K_3 $D_{1.2}$ महाहवे; K_2 B $Dn_{2.ns}$ $D_{4.6}$ महीपते; D_3 जनार्दनं.

14 D_3 om. (hapl.) 14. — ^{b}) $D_{1.2}$ मम (for न च). $Ś_1$ °पूर्वविद्; S °कोविदः (for °मूर्धनि). — ^{d}) T_1 M_1 वधिष्ये.

15 After 15, $D_{1.2}$ ins.:

75* गतः कौरव्य दुष्टात्मा मार्तिकावतिको नृपः ।
[= (var.) 16^{cd}.]

16 D_3 transp. 16^{ab} and 16^{cd}. — ^{a}) $Ś_1$ D_{1-3} हतो (for अहं). — ^{b}) $Ś_1$ K_3 $B_{1.2}$ Dn_1 $D_{2.3.6}$ T_1 M_1 स (for सु-). — ^{d}) A few MSS. मार्तिकावतिको. Several MSS. नृप.

17 M_1 transp. 17 and 18. — ^{a}) T_2 $G_{2.3}$ अथ (for अपि). — ^{b}) $Ś_1$ °चेतनः; K_2 B D (except D_{1-3}) °मानसः. — ^{c}) T_2 $G_{3.4}$ निश्चितं.

19 ^{b}) $Ś_1$ $D_{1.3}$ T_1 M_1 प्रस्थितः (for प्रतस्थे). — ^{c}) K_3 तन्; G_2 M_2 तं (for स). K_3 सागराभ्यासे; S सागरोपांते. — ^{d}) B_4 Dc T_2 G_3 परीप्सया; $D_{1.3}$ °प्सुना. K_3 दृष्टमासीत्पुरं पुरा.

20 ^{a}) $Ś_1$ K_3 M_1 प्रध्मा॰ $Ś_1$ °ध्मा)य. G_2 प्रध्माप्य जलजं शंखं. — ^{c}) D_3 आमाद्य (for आहूय). $Ś_1$ K_3 D_{1-3} transp. शाल्वं and समरे. — ^{d}) $Ś_1$ $K_{2.3}$ T_1 समुपस्थितः.

21 ^{a}) K_2 B Dn $D_{4.6}$ T G_{2-4} M_1 तन् (for सु-). Dc $D_{1.5}$ G_1 मुहूर्तमभवद्युद्धं. — ^{c}) T_2 G_3 शयीं°; G_1 M_1 शवीं°; G_2 क्षयीं°; G_4 वधीं° (for वशीं°). D_1 T_1 $G_{2.4}$ M_1 ते (for मे). — ^{d}) K_3 D_5 वि-; T_2 G (except G_1) तु (for च).

22 ^{a}) D_1 कृत्वा; G_1 कृतं (for कार्यं). Dc महाराज

C. 3. 635
B. 3. 14. 22
K. 3. 14. 22

एतत्कार्यं महाबाहो येनाहं नागमं तदा । | श्रुत्वैव हास्तिनपुरं द्यूतं चाविनयोत्थितम् ॥ २२

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

१६

युधिष्ठिर उवाच ।
वासुदेव महाबाहो विस्तरेण महामते ।
सौभस्य वधमाचक्ष्व न हि तृप्यामि कथ्यतः ॥ १
वासुदेव उवाच ।
हतं श्रुत्वा महाबाहो मया श्रौतश्रवं नृपम् ।
उपायाद्भरतश्रेष्ठ शाल्वो द्वारवतीं पुरीम् ॥ २
अरुन्धत्तां सुदुष्टात्मा सर्वतः पाण्डुनन्दन ।
शाल्वो वैहायसं चापि तत्पुरं व्यूह्य विष्ठितः ॥ ३
तत्रस्थोऽथ महीपालो योधयामास तां पुरीम् ।
अभिसारेण सर्वेण तत्र युद्धमवर्तत ॥ ४
पुरी समन्ताद्विहिता सपताका सतोरणा ।
सचक्रा सहुडा चैव सयन्त्रखनका तथा ॥ ५
सोपतल्पप्रतोलीका साट्टाट्टालकगोपुरा ।
सकचग्रहणी चैव सोल्कालातावपोथिका ॥ ६
सोष्ट्रिका भरतश्रेष्ठ सभेरीपणवानका ।
समित्तृणकुशा राजन्सशतघ्नीकलाङ्गला ॥ ७

— [b]) T1 M नागतः; G1 ह्यागतः. S पुरा (for तदा). — [c]) D3. 5 S ह(D3. 5 G1 हा)स्तिनपुरे. — [d]) D6 T2 G (except G1) चाप्यनयो°; D6 चाविनये स्थितं. — After 22, K2 B Dc Dn D2. 4–6 ins.:

76* द्रुतमागतवान्युष्मान्द्रष्टुकामः सुदुःखितान् ।;

while D1 ins.:

77* श्रुत्वैव तत्क्षणं वेगादागतोऽहं नराधिप ।

Colophon om. in B1. 4 Dc. K1. 4 missing. — *Major parvan:* Ś1 T G2–4 आरण्य. — *Sub-parvan:* Ś1 Dn D4. 6 T2 G2–4 M2 (all om. sub-parvan name) mention only सौभवध; B2 D6 likewise only शाल्ववध; and B3 only सौभवधोपाख्यान. — *Adhy. name:* D2 शाल्वगर्जनं; T2 G3. 4 वासुदेवसांनिध्यकथनं. — *Adhy. no.* (figures, words or both): Dn S 14; D1 15 (as in text). — *Śloka no.:* Dn2. n3 D6 22; Dn1 D1 23.

16

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 [b]) S (except M2) महाद्युते. — [d]) Ś1 कथ्यति; K3 D1 T G M1 कथ्यतां; D2 केशव. M2 न हि मे तृप्यते मनः.

2 Ś1 B2 D6 T2 G श्रीकृष्णः; D1 T1 M1 श्रीभगवान् (for वासुदेवः). — [b]) B Dc Dn1. n2 D2. 3 G1 नृप. D1 दमघोषसुतं नृपं; T1 शिशुपालं मया रणे.

3 [a]) Ś1 K3 Dn2 अरुधत्; G (except G3) M अ(M2 न्य)रुणत्. K3 D1. 3. 5. 6 M1 स; M2 तु (for सु-). — [d]) G2 वीक्ष्य (for व्यूह्य). Ś1 वेष्टितः; K2. 3 B1–3 Dn D1–3. 5 धिष्ठितः; B4 T1 G1 तिष्ठति (G1 °त).

4 [a]) T G तत्र सोथ (G1 सौध-). Ś1 K3 D1–3 G1 M1 महीपाल; M2 महाराज. — [b]) T1 रोधयामास.

5 [c]) B2 सहुला (m सगजा); B3 D4 T2 (after corr.) G3 सगुडा; Dc1 सद्रणा; Dc2 D6 समुडा; D3 सध्वजा; D5 (m as in text) सगंदा; T1 बहुळा; T2 (before corr.) G1. 2. 4 M सहुळा (for सहुडा).

6 [a]) Ś1 °तप्त°; K2 B Dn D4. 6 °शल्य°; G1 °कल्प° (for °तल्प°). — [b]) T1 प्रासादाट्टालगोपुरा; G2. 4 साट्टालकसगोपुरा. — [c]) N (except K3; K1. 4 missing) T1 सचक्र- (for सकच-). Ś1 -ग्राहणी; T1 G4 M2 -ग्रहिणी. — In Dc1 the portion of the text from 6[c] up to 3. 17. 3[a] is lost on a missing fol.; the MS. is ignored up to the end of the lacuna. — [d]) S सोल्कापाता (M2 सोल्का चैव) सपोथिका.

7 [a]) Ś1 D3 सोष्ट्रीका; B4 D5 सोष्णि(D5 °ष्णी)का; Cnp सष्टिका. — [c]) K2. 3 m B Dc2 Dn D4–6 सतोमरांकुशा; D3 सयंतृणांकुशा; S साष्टिका सां(G1 -श्वां)कुशा. B2 चैव (for राजन्). — [d]) D2 M सशतघ्नी सलांगला.

सभुशुण्ड्यश्मलगुडा सायुधा सपरश्वधा ।
लोहचर्मवती चापि साग्निः सहुडशृङ्गिका ॥ ८
शास्त्रदृष्टेन विधिना संयुक्ता भरतर्षभ ।
द्रव्यैरनेकैर्विविधैर्गदसाम्बोद्ववादिभिः ॥ ९
पुरुषैः कुरुशार्दूल समर्थैः प्रतिबाधने ।
अभिख्यातकुलैर्वीरैर्दृष्टवीर्यैश्च संयुगे ॥ १०
मध्यमेन च गुल्मेन रक्षिता सारसंज्ञिता ।
उत्क्षिप्तगुल्मैश्च तथा हयैश्चैव पदातिभिः ॥ ११
आघोषितं च नगरे न पातव्या सुरेति ह ।
प्रमादं परिरक्षद्भिरुग्रसेनोद्ववादिभिः ॥ १२
प्रमत्तेष्वभिघातं हि कुर्याच्छाल्वो नराधिपः ।
इति कृत्वाप्रमत्तास्ते सर्वे वृष्ण्यन्धकाः स्थिताः ॥ १३
आनर्ताश्च तथा सर्वे नटनर्तकगायनाः ।
बहिर्विवासिताः सर्वे रक्षद्भिर्वित्तसंचयान् ॥ १४
संक्रमा भेदिताः सर्वे नावश्च प्रतिषेधिताः ।
परिखाश्चापि कौरव्य कीलैः सुनिचिताः कृताः ॥ १५
उदपानाः कुरुश्रेष्ठ तथैवाप्यम्बरीषकाः ।
समन्तात्क्रोशमात्रं च कारिता विषमा च भूः ॥ १६
प्रकृत्या विषमं दुर्गं प्रकृत्या च सुरक्षितम् ।
प्रकृत्या चायुधोपेतं विशेषेण तदानघ ॥ १७
सुरक्षितं सुगुप्तं च सर्वायुधसमन्वितम् ।
तत्पुरं भरतश्रेष्ठ यथेन्द्रभवनं तथा ॥ १८
न चामुद्रोऽभिनिर्याति न चामुद्रः प्रवेश्यते ।
वृष्ण्यन्धकपुरे राजंस्तदा सौभसमागमे ॥ १९
अनु रथ्यासु सर्वासु चत्वरेषु च कौरव ।
बलं बभूव राजेन्द्र प्रभूतगजवाजिमत् ॥ २०

C. 3. 655
B. 3. 15. 20
K. 3. 15. 19

---

8 [a]) K2 Bt. 2. 4 Dn D4–6 सभुशुंड्यश्मगुडका; K3 D1. 2 सभुसंडी (D1 °मुषंढी; D2 °मुकुंठी) सलगुडा; D3 स तु सिंहस्वनभरा; S समुसुं(G2 °सं-; M °सुं)ढी सामिधारा. — [b]) K3 Dc1 Dn1 D1–5 °स्वधा; T2 G (except G4) °श्वथा (for °श्वधा). — [c]) A few MSS. °वर्मे (for °चर्मे). D1 साग्निः (for चापि). — [d]) K2 सगर्ल°; B1 सपट°; B2 सबहु°; B3 Dc1 Dn D4. 6 सगुड°; D5 साकुल°; S सहुळ (T1 समुल°; M2 स्वगळ°) (for सहुड°). D1 सहुडशृंगिका तथा.

9 [b]) Ś1 सयुक्ता; K2. 3 B Dn2. n3 D2. 4–6 सुयुक्ता. — [c]) K2 B Dc1 Dn D4–6 रथैर्; S दंसैर् (M2 तूसैर्) (for द्रव्यैर्). — [d]) K3 D5 गदसांबोल्मुकादिभिः; T1 गदाप्रासासियोधिभिः.

10 M2 om. (hapl.) 10–11. — [a]) T1 G (except G3) M1 राज° (for कुरु°). D1 पुरुषैः शार्दूलदर्पाभैः (hypermetric!). — [b]) S (M2 om.) समंतात् (for समर्थैः). K2 प्रतिचारणे; Dn D4–6 °वारणे; D1 °योधितः; D2 °बोधने; D3 °बोधनैः; T1 M1 परिवारिता; T2 G परिपालिता. — [c]) Ś1 B4 Dc1 Dn D4. 6 T2 G3 अति-; K2 अवि- (for अभि-). S -गुणैर् (for -कुलैर्).

11 M2 om. 11 (cf. v.l. 10). — [b]) K3 सारसंहिते; S सा पुरी तदा. K2 B2. 4 Dn D4. 6 रक्षिभिः सा सु(B4 साधु)रक्षिता. — [cd]) Ś1 T1 G1 तदा; Dc1 ततो; T2 G3–4 हयै (for तथा). D5 °गुल्मैश्चरतो. D5 प्रहैश्; T2 G3–4 रथैश् (for हयैश्). N (except D3) T1 G1 M1 च स- (for चैव). K2 B2 Dn D4. 6 -पताकिभिः (for पदातिभिः).

12 [b]) K2 B Dc2 Dn D4–6 चैः; D3 च; T1 हि (for ह). — K3 om. 12[c]–13[b].

14 [a]) D3 अनरण्यास्; T1 M1 आनर्तैश्च; G1 आगताश्च. Dc2 D5 ततः सर्वे. — [b]) K2 B1. 4 Dn D4. 6 G4 नटा (for नट-). D2 T1 G2 -नर्तन- (for -नर्तक-). K2 S (except T2 G3) -गायकाः. — [c]) K2 B D (except D2) M2 निवासिताः (B2 निःसारिताः). K2 B Dc2 Dn D4–6 क्षिप्रं; M2 चैव (for सर्वे). — [d]) B2 T1 G2. 4 रक्षिभिर्. K2 Dc2 Dn D4–6 G1 M2 °संचयं.

15 [d]) D3 तु (for सु-). K3 कीलकैः सुचिताः कृताः; S कीलकैः सुनिकीलिताः.

16 [a]) M1 च कौरव्य (for कुरुश्रेष्ठ). — [b]) K3 च (for [ण]त्र). T G2–4 M1 तथा (G4 °दा) वाप्यः करीषकाः; G1 तदा वाप्यः क्षितास्तदा; M2 तथा बाह्याश्च शोधिताः. — [d]) Ś1 K3 D1. 2 [अ]थ; D5 [आ]स- (for च). — After 16, T G3. 4 M1 ins.:

78* संक्रमा भेदिताः सर्वे प्राकाराश्च नवीकृताः ।

[Prior half = 15[a]. — After the prior half, G4 *repeats* 15[b] (v.l. नरा: for नाव:).]

17 [a]) S (except M2; G4 broken) सर्वं (for दुर्गं).

19 [a]) D3 न चाबुद्धो; S नामुद्रो हि (G1 [ऽ]भि-; M1 [ऽ]पि). D2 T G M2 वि-; D3 M1 हि (for [ऽ]भि-). — [b]) D3 चाबुद्धः (for चामुद्रः). — [d]) K2. 3 D3 T2 G (except G1) M2 तथा (for तदा).

20 [b]) T1 G2. 4 M1 [अ]थ; G1 [अ]पि (for च).

C. 3. 656
B. 3. 15. 21
K. 3. 15. 20

दत्तवेतनभक्तं च दत्तायुधपरिच्छदम् ।
कृतापदानं च तदा बलमासीन्महाभुज ॥ २१
न कुप्यवेतनी कश्चिन्न चातिक्रान्तवेतनी ।
नानुग्रहभृतः कश्चिन्न चादृष्टपराक्रमः ॥ २२
एवं सुविहिता राजन्द्वारका भूरिदक्षिणैः ।
आहुकेन सुगुप्ता च राज्ञा राजीवलोचन ॥ २३

इति श्रीमहाभारते आरण्यकपर्वणि षोडशोऽध्यायः ॥ १६ ॥

१७

वासुदेव उवाच ।
तां तूपयात्वा राजेन्द्र शाल्वः सौभपतिस्तदा ।
प्रभूतनरनागेन बलेनोपविवेश ह ॥ १
समे निविष्टा सा सेना प्रभूतसलिलाशये ।
चतुरङ्गबलोपेता शाल्वराजाभिपालिता ॥ २
वर्जयित्वा श्मशानानि देवतायतनानि च ।
वल्मीकांश्चैव चैत्यांश्च तन्निविष्टमभूद्बलम् ॥ ३
अनीकानां विभागेन पन्थानः षट्कृताभवन् ।
प्रवणा नव चैवासञ्शाल्वस्य शिबिरे नृप ॥ ४
सर्वायुधसमोपेतं सर्वशस्त्रविशारदम् ।
रथनागाश्वकलिलं पदातिध्वजसंकुलम् ॥ ५
तुष्टपुष्टजनोपेतं वीरलक्षणलक्षितम् ।

---

21 D_4 om. 21. — [c]) $Ś_1$ K_2 B Dc Dn $D_{1.\,5.\,6}$ कृतोपधा($Ś_1$ D_1 °दा)नं; K_3 कृतोपचारं; D_2 दृष्टावदानं; D_3 कृतावदानं; T_1 °पधानं. $Ś_1$ K_3 D_{1-3} तथा. — [d]) D_3 समाहितं; S विशां पते (for महाभुज).

22 [a]) B_2 G_1 M_1 न कुप्यवेतनः; D_3 न कूटवेननः; T_1 न कोपि वेतनः; T_2 G_{2-4} नादत्तवेतनः. — [b]) T G (except G_1) M_1 °वेतनः.

23 [b]) N °दक्षिणा (D_2 °दक्षणा; D_3 °लक्षणा). — [c]) D_1 M_2 सा (for च).

Colophon. $K_{1.\,4}$ Dc_1 missing. *Major parvan:* $Ś_1$ T G_{2-4} आरण्य. — *Sub-parvan:* $Ś_1$ D_{1-3} M_2 (all om. sub-parvan name) mention only सौभवध; K_2 likewise only सौभोपाख्यान; B Dc_2 Dn D_4 only सौभवधोपाख्यान; and D_5 only शाल्ववध. — *Adhy. name:* D_2 द्वारकावेष्टने शाल्वयुद्धं; T_2 $G_{3.\,4}$ M द्वारकाकरण(M °दुर्गकरण)कीर्तनं. — *Adhy. no.* (figures, words or both): Dn (Dn_1 *sup. lin.*) S 15; D_1 16 (as in text). — *Śloka no.:* Dn D_1 23; D_6 21.

17

☞ This adhy. is missing in $K_{1.\,4}$ (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 Dc_1 missing (cf. v.l. 3. 16. 6). — K_3 B_2 Dn_1 $D_{2.\,5}$ T_2 G कृष्णः (*or* श्रीकृष्णः); D_1 T_1 M_1 श्रीभगवान् (for वासुदेवः). — [a]) $Ś_1$ B_4 D_3 नान् (for तां). $Ś_1$ तूपायास्तु (sic); K_2 B Dc_2 Dn D_{4-6} तूपयातो; K_3 उपायाथ; D_1 उपेयाय; D_2 उपेय्याथ; D_3 तूपयाय (for तूपयात्वा). — [b]) Here and below S साल्व- (for शाल्व-).

2 Dc_1 missing (cf. v.l. 3. 16. 6). — [d]) $Ś_1$ K_3 D_{1-3} °रक्षिता.

3 Dc_1 resumes from 3[b] (cf. v.l. 3. 16. 6). — [c]) K_2 B D (except $D_{1.\,3}$) °कांश्चैत्यवृक्षांश्च. — [d]) $D_{1.\,2}$ S (except M_2) संनिविष्टम्.

4 [a]) T_2 $G_{2.\,3}$ विगाहेन. — [b]) K_3 बलेन (for पन्थानः). K_2 B Dc Dn $D_{4.\,6}$ संवृताः; K_3 पतता; D_5 संभृताः; T G सु(T_1 स)कृताः; M_1 संस्कृताः; M_2 प्रथिताः (for षट् कृताः). S तदा (for [अ]भवन्). — G_2 om. 4^{cd}. — [c]) K_2 Dn $D_{4.\,6}$ प्रवणाय च नैवासन्; B Dc_2 प्रवणानि च नैवा(B_2 न चैवा-; B_4 च मेवा)सन्; D_1 प्रवणा इव नैवा°; D_3 पणवानक वै शब्दः; D_5 प्रबला न च नैवा°; T G (G_2 om.) M_1 प्रथि(T_1 °ति-; G_1 °थ)मा नवमा चैव (T_1 G_1 °मांश्चैव; M_1 °माश्चैव); M_2 संस्तुता नवमाश्चैव.

5 [a]) $Ś_1$ K_3 B_2 D_{1-3} M_2 °बलोपेतं. — [b]) $Ś_1$ K_2 $B_{2.\,4}$ Dn_1 $D_{1.\,2.\,6}$ T $G_{1.\,3}$ °शास्त्र°. — [d]) B_3 पत्तिध्वजसमाकुलं; S (except M_2) प(T_2 G_3 पा)दातिजनसं°.

6 [a]) $Ś_1$ B_2 $D_{1.\,2}$ हृष्ट- (for तुष्ट-). $Ś_1$ K_2 B D (except $D_{1.\,2.\,5}$) -बलोपेतं. — [c]) T_2 G (except G_1) °संछन्नं. — [d]) S (except M_2) °शर°.

7 [a]) $Ś_1$ D_{1-3} M_2 [ए]व; T_1 G (except G_2) M_1 तु

विचित्रध्वजसंनाहं विचित्ररथकार्मुकम् ॥ ६
संनिवेश्य च कौरव्य द्वारकायां नरर्षभ ।
अभिसारयामास तदा वेगेन पतगेन्द्रवत् ॥ ७
तदापतन्तं संदृश्य बलं शाल्वपतेस्तदा ।
निर्याय योधयामासुः कुमारा वृष्णिनन्दनाः ॥ ८
असहन्तोऽभियानं तच्छाल्वराजस्य कौरव ।
चारुदेष्णश्च साम्बश्च प्रद्युम्नश्च महारथः ॥ ९
ते रथैर्दंशिताः सर्वे विचित्राभरणध्वजाः ।
संसक्ताः शाल्वराजस्य बहुभिर्योधपुंगवैः ॥ १०
गृहीत्वा तु धनुः साम्बः शाल्वस्य सचिवं रणे ।
योधयामास संहृष्टः क्षेमवृद्धिं चमूपतिम् ॥ ११
तस्य बाणमयं वर्ष जाम्बवत्याः सुतो महत् ।
मुमोच भरतश्रेष्ठ यथा वर्षं सहस्रदृक् ॥ १२
तद्बाणवर्षं तुमुलं विषेहे स चमूपतिः ।
क्षेमवृद्धिर्महाराज हिमवानिव निश्चलः ॥ १३

ततः साम्बाय राजेन्द्र क्षेमवृद्धिरपि स्म ह ।
मुमोच मायाविहितं शरजालं महत्तरम् ॥ १४
ततो मायामयं जालं माययैव विदार्य सः ।
साम्बः शरसहस्रेण रथमस्याभ्यवर्षत ॥ १५
ततः स विद्धः साम्बेन क्षेमवृद्धिश्चमूपतिः ।
अपायाज्जवनैरश्वैः साम्बबाणप्रपीडितः ॥ १६
तस्मिन्विप्रद्रुते क्रूरे शाल्वस्याथ चमूपतौ ।
वेगवान्नाम दैतेयः सुतं मेऽभ्यद्रवद्बली ॥ १७
अभिपन्नस्तु राजेन्द्र साम्बो वृष्णिकुलोद्वहः ।
वेगं वेगवतो राजंस्तस्थौ वीरो विधारयन् ॥ १८
स वेगवति कौन्तेय साम्बो वेगवतीं गदाम् ।
चिक्षेप तरसा वीरो व्याविध्य सत्यविक्रमः ॥ १९
तया त्वभिहतो राजन्वेगवानपतद्भुवि ।
वातरुग्ण इव क्षुण्णो जीर्णमूलो वनस्पतिः ॥ २०
तस्मिन्निपतिते वीरे गदानुन्ने महासुरे ।

C. 3. 679
B. 3. 16. 21
K. 3. 16. 21

(for च). Ś1 D1. 2 कौंतेय (for कौरव्य). — b) T1 G1. 2 द्वारकां भरतर्षभ. — c) Hypermetric! K3 अभिसारयत्स तदा; D1. 2 अभितः सारयामास; D5 (by corr.) आसारयामास तदा.

8 a) Dc तदापतत्तत्; Dn1. n2 D4 S (except G1 M2) °पतत्तु. Ś1 संवीक्ष्य; K3 D1. 3. 5. 6 M2 संप्रेक्ष्य; D2 संलक्ष्य. — b) D1. 2. 5. 6 सौभ° (for शाल्व°).

9 a) K2. 3 [S]भिसारं; D2 निपातं (for Sभियानं). T2 G1 (except G1) च (for तत्). — c) K2. 3 Dn3 D2. 3. 5 शांबश्च. —. d) A few MSS. महारथाः.

10 a) S (except T2 G3) दंसिताः. — b) D1 °भरणायुधाः; D3 (*sup. lin.* as in text). 5 °भरणस्रजः.

11 a) K2 B Dc Dn D4–6 T2 G3 कार्मुकं; D1. 2 [अ]थ धनुः (for तु धनुः). K2. 3 B (except B1) Dn3 D2–6 शांबः. — d) S क्षेमधू(T2 G2–4 °मू)र्तिं; cf. v.l. 13, 14, etc.

13 a) K3 विपुलं; Dc2 D2 तुमलं; M2 बहुलं. — b) D3 निषेध्य (for विषेहे). M1 om. 13c–14b. — c) S (M1 om.) °धू(T2 G2–4 °मू)र्तिर् (for °वृद्धिर्); cf. v.l. 11, 14, etc. — d) Ś1 हिमाचल इवाचलः (alliterative!).

14 M1 om. 14ab (cf. v.l. 13). — a) K3 B (except B1) Dc Dn1. n3 D2–6 शांबाय. — b) T G क्षेममू(T1 G1 °धू)र्तिर्; cf. v.l. 11, 13, etc. K2 B Dc Dn D2. 4–6 अपि स्वयं; D3 अपि स्मयन्; T G स्मयन्निव; M2 इव स्मयन् (for अपि स्म ह).

15 a) T1 राजन् (for जालं). — b) Ś1 K3 Dn1 D1–3. 5 निवार्य; K2 B D4. 6 विदीर्य. — c) K2. 3 B (except B1) Dc1 Dn1 D2–6 शांबः. — d) T2 G (except G1) रथमध्येभ्य°.

16 a) K2 B (except B1) Dc2 Dn1. n3 D3–6 शांबेन. — b) T1 G1. 4 (*inf. lin.*) M1 °धूर्तिं; T2 G2–4 °मूर्तिं (for °वृद्धिं). — d) K2. 3 B (except B1) Dc1 Dn1. n3 D2–6 शांब°.

17 a) D3 क्षेमे; T1 वीरे; T2 G M1 शूरे (for क्रूरे). — d) D2 मे प्राद्रवद्; D3 T2 G अभ्यद्रवद् (om. मे); T1 मे न्यपतद्.

18 a) T G °द्रुत°; M1 °श्रुत° (for °पन्न°). D1. 2 स (for तु). — b) K2. 3 Dc Dn1 D2–6 शांबो.

19 b) K3 B (except B1) Dc Dn1 D3–6 शांबो. — d) D2 भ्रामयन्; D3 व्याविशत्; S व्याविध्यन् (M2 °द्धा). Ś1 K2 D5 [अ]सह्य°; K3 [अ]सत्य° (for सत्य°).

20 b) K2 B1. 3 Dn D4. 6 न्यपतद्; G1 निपतद् (for अपतद्). B3 Dc वेपमानोपतद्भुवि. — c) K3 D1. 3 °भग्न; D5 °भुग्न (for °रुग्ण). Ś1 K3 D1–3. 5 क्षुद्रो; K2 छन्नो; G1 क्षिप्रं (for क्षुण्णो). — d) S शीर्ण° (for जीर्ण°).

C. 3. 679
B. 3. 16. 21
K. 3. 16. 21

प्रविश्य महतीं सेनां योधयामास मे सुतः ॥ २१
चारुदेष्णेन संसक्तो विविन्ध्यो नाम दानवः ।
महारथः समाज्ञातो महाराज महाधनुः ॥ २२
ततः सुतुमुलं युद्धं चारुदेष्णविविन्ध्ययोः ।
वृत्रवासवयो राजन्यथा पूर्वं तथाभवत् ॥ २३
अन्योन्यस्याभिसंक्रुद्धावन्योन्यं जघ्नतुः शरैः ।
विनदन्तौ महाराज सिंहाविव महाबलौ ॥ २४
रौक्मिणेयस्ततो बाणमग्न्यर्कोपमवर्चसम् ।
अभिमन्त्र्य महास्त्रेण संदधे शत्रुनाशनम् ॥ २५
स विविन्ध्याय सक्रोधः समाहूय महारथः ।
चिक्षेप मे सुतो राजन्स गतासुरथापतत् ॥ २६
विविन्ध्यं निहतं दृष्ट्वा तां च विक्षोभितां चमूम् ।
कामगेन स सौभेन शाल्वः पुनरुपागमत् ॥ २७

ततो व्याकुलितं सर्वं द्वारकावासि तद्बलम् ।
दृष्ट्वा शाल्वं महाबाहो सौभस्थं पृथिवीगतम् ॥ २८
ततो निर्याय कौन्तेय व्यवस्थाप्य च तद्बलम् ।
आनर्तानां महाराज प्रद्युम्नो वाक्यमब्रवीत् ॥ २९
सर्वे भवन्तस्तिष्ठन्तु सर्वे पश्यन्तु मां युधि ।
निवारयन्तं संग्रामे बलात्सौभं सराजकम् ॥ ३०
अहं सौभपतेः सेनामायसैर्भुजगैरिव ।
धनुर्भुजविनिर्मुक्तैर्नाशयाम्यद्य यादवाः ॥ ३१
आश्वसध्वं न भीः कार्या सौभराडद्य नश्यति ।
मयाभिपन्नो दुष्टात्मा ससौभो विनशिष्यति ॥ ३२
एवं ब्रुवति संहृष्टे प्रद्युम्ने पाण्डुनन्दन ।
विष्ठितं तद्बलं वीर युयुधे च यथासुखम् ॥ ३३

इति श्रीमहाभारते आरण्यकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥

---

21 [a]) K₂ B D (except D₁₋₃) G₂ विनिहते (for निपतिते). — [b]) S (except M₂) °रुग्ण (for °नुन्न).

22 [a]) Here and below Ś₁ uniformly चारुदोष्ण- (cf. v.l. सुदेष्णा : सुदोष्णा in the Virāṭa). K₂ B (except B₄) Dn₂ D₃. ₅ T₁ M₂ संयुक्तो. — [c]) Some MSS. °रथसमा°.

23 [c]) Ś₁ K₃ Dc D₁₋₃. ₅ M₂ आस्पीद् (for राजन्).

24 [a]) D₃. ₅ G₂ अपि (for अभि-). Ś₁ K₃ D₁₋₃ संरब्धौ. — [c]) K₂ B₂. ₃ Dc₂ Dn D₄. ₆ G₁ °रावान्; B₄ Dc₁ °नादान्; D₂ °नादं (for °राज). — [d]) K₃ बलोत्कटौ (for महा°).

25 [a]) Ś₁ K₃ D₁₋₃ T₂ G₃. ₄ तदा (for ततो). — [b]) K₃ D₁. ₂. ₅ T₁ G₁ M °कोरगवर्चसं; D₃ °कोरगसंनिभं; T₂ G₂₋₄ °कांगारवर्चसं.

26 [a]) K₃ D₃ M₂ संक्रुद्धः; D₂ सक्रोधं. Ś₁ विविंध्यायायतक्रोधः; D₅ विविंध्याय च संक्रुद्धः; T₂ G₂₋₄ स विव्याध स चुक्रोध (G₂ च क्रोधः). — [d]) S अवा° (for अथा°).

27 [b]) G₄ विक्षेपितां. — [d]) G₂. ₄ अवापतत् (for उपा°).

28 K₂ D₆ om. (hapl.) 28[c]–29[b]. — [d]) Ś₁ K₃ Dc D₅ M₂ भूपते तदा; B Dn D₄ नृपते तदा; D₁ भूपतिं तदा; D₂ पतितं तदा; T₁ पृथिवीगतः; M₁ पृथिवीपतिं. D₃ सौभस्तंभगतं सदा.

29 K₂ D₆ om. 29[ab] (cf. v.l. 28). — [ab]) B D (except D₁₋₃, D₆ om.) कौरव्य (for कौन्तेय), and अव° (for व्यव°).

31 [a]) K₃ B (except B₂) Dc₂ Dn D₄₋₆ G₂ अयं (K₃ m Dn₁ [by corr.] इमां); Dc₁ अथ; D₁ एष; D₃ एनां; T₁ अंगः (for अहं). — [b]) K₃ D₁₋₃ सायकैर् (for आयसैर्). S भुजगोपमैः. — [c]) B₄ Dc शरैर्धनुर्विनिर्मुक्तैर्; T₁ M₁ धनुर्मुक्तश्च नाराचैर्; T₂ G₂₋₄ धनुर्मुक्तैः शितै(G₂ शरै)र्भल्लैर्; G₁ निशितैश्चैव नाराचैर्; M₂ धनुर्विमुक्तैर्नाराचैर्. — [d]) B₁ सायकैः (for यादवाः).

32 [b]) D₁. ₂ नंक्ष्यति. K₃ सौभराजः प्रणश्यति; G₂ सौभराडद्य पश्यतु; M₂ सौभरावद्य संयुगे. — [d]) S (except M₂) सपदानुगः (for विन°).

33 [a]) D₅ G₄ वदति (for ब्रुवति). — [c]) Ś₁ वेष्टितं; K₂. ₃ Dn D₁₋₃. ₅ धिष्ठितं. T₁ G (except G₃) द्वारि (for वीर). — [d]) T₂ G₃ विविधं; G₄ विविधैश् (for युयुधे).

Colophon. K₁. ₄ missing. — *Major parvan*: Ś₁ T G₂₋₄ आरण्य. — *Sub-parvan*: Ś₁ B₁. ₂ D₁₋₃ M (all om. sub-parvan name) mention only सौभवध; K₂ likewise only सौभोपाख्यान; K₃ D₅ only शाल्ववध; and B₃. ₄ Dc Dn D₄. ₆ only सौभवधोपाख्यान. — *Adhy. name*: D₂ शांबुयुद्धं चारुदेष्णयुद्धं प्रद्युम्नयुद्धं; M विविन्ध्यवेगवधः. — *Adhy. no.* (figures, words or both): Dn S 16; D₁ 17 (as in text). — *Śloka no.*: Dn D₁ 33.

१८

वासुदेव उवाच ।
एवमुक्त्वा रौक्मिणेयो यादवान्भरतर्षभ ।
दंशितैर्हरिभिर्युक्तं रथमास्थाय काञ्चनम् ॥ १
उच्छ्रित्य मकरं केतुं व्यात्ताननमलंकृतम् ।
उत्पतद्भिरिवाकाशं तैर्हयैरन्वयात्परान् ॥ २
विक्षिपन्नादयंश्चापि धनुःश्रेष्ठं महाबलः ।
तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥ ३
स विद्युच्चलितं चापं विहरन्वै तलात्तलम् ।
मोहयामास दैतेयान्सर्वान्सौभनिवासिनः ॥ ४
नास्य विक्षिपतश्चापं संदधानस्य चासकृत् ।
अन्तरं ददृशे कश्चिन्निघ्नतः शात्रवान्रणे ॥ ५
मुखस्य वर्णो न विकल्पतेऽस्य
चेलुश्च गात्राणि न चापि तस्य ।
सिंहोन्नतं चाप्यभिगर्जतोऽस्य
शुश्राव लोकोऽद्भुतरूपमग्र्यम् ॥ ६
जलेचरः काञ्चनयष्टिसंस्थो
व्यात्ताननः सर्वतिमिप्रमाथी ।
वित्रासयन्राजति वाहमुख्ये
शाल्वस्य सेनाप्रमुखे ध्वजाग्र्यः ॥ ७
ततः स तूर्णं निष्पत्य प्रद्युम्नः शत्रुकर्शनः ।
शाल्वमेवाभिदुद्राव विधास्यन्कलहं नृप ॥ ८
अभियानं तु वीरेण प्रद्युम्नेन महाहवे ।
नामर्षयत संक्रुद्धः शाल्वः कुरुकुलोद्वह ॥ ९
स रोषमदमत्तो वै कामगादवरुह्य च ।

C. 3. 701
B. 3. 17. 10
K. 3. 17. 10

18

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 Ś1 B2 D5 G2 कृष्णः; D1 T1 M1 भगवान् (for वासुदेवः). — b) K3 D3 S (except M2) यादवर्षभः (for भर°). — c) K3 D2. 3 S दंसितैर् (D2 °तो); D5 दंशिभिर्. — d) D1. 2 आरुह्य (for आस्थाय).

2 a) D3 G1. 2 उद्धृत्य; T1 उच्छिद्य. — b) K2 B D (except D1–3) G2 (*sup. lin.*) इवांतकं (for अलंकृतम्). — c) Dc T2 G (except G1) आकाशे. — d) D1. 2 अन्वगात्; M2 अभ्ययात्. T G M1 हयैरभ्यपतत्परान्.

3 a) Ś1 विनदन्नभ्यद्; K3 इदमब्रूभ्य (sic); D1–3 विनदब्रूभ्य; S आददानश्च (M2 निनदन्नादं). — b) Ś1 °रथं; K2 °बलैः; K3 D1–3. 6 °रथः (for °बलः). S (except M2) धनुर्ज्यामाक्षिपन्मुहुः. — c) Ś1 खड्गतूण° (by transp.); K3 D1. 2 S (except T1 G1) तूणीखड्ग°.

4 D4 om. 4a–5b. — a) Ś1 K3 B3 Dc D1. 2. 5 °ञ्चरितं; K2 B1. 2 Dn D6 °च्छु (K2 °च्छ)रितं. — b) T2 G2. 3 विचरन्वै; G1 विकिरन्वै. D3. 5 बलांतरं (D5 °रे); G1 कराल्करं.

5 D4 om. 5ab (cf. v.l. 4). — a) K2 D6 (before corr.) तत (sic); B Dc Dn D3. 5. 6 (by corr.) G4 M2 तस्य; M1 अस्य (for नास्य). — b) D3 पंचधा नवधासकृत्. — c) Ś1 K3 T1 G1. 2 अंतरं (as in text); D3 नोत्तरं; the rest नान्तरं.

6 a) K3 विचाल्यते; B4 D1 विका(B4 °क)ल्यते; D2 विलुप्यते; S विकंपते (M2 विलिप्यते). T1 च; M1 स्म (for ऽस्य). — b) T2 G2–4 वेपुश्च. — c) T2 G3 °गर्जनं च; G2 °गर्जितस्य; G4 °गर्जितं च. D3 सिंहोन्नतांस्य हि गर्जितस्य; M2 सिंहोन्नतं गर्जितमस्य लोकः. — d) Ś1 D6 G2 लोकेऽद्भुत-; T G3. 4 लोका°; M2 चाल्यद्भुत- (for लोकोऽद्भुत-). K2 B Dc Dn D4–6 -वीर्यम्; D3 -शब्दम् (for -रूपम्). K3 D1–3 G2 M2 उग्रं (for अग्र्यम्).

7 a) D1 °संश्रितो; D2 °संस्थितो (for °संस्थो). — b) D1. 3. 5 सर्वरिपु°; S शत्रुबल° (for सर्वतिमि°). — c) S व्यत्रासयद् (G2 वित्रासयद्; M2 व्यद्रावयद्) दानवराजमुख्यान्. — d) K3 ध्वजोत्स्य; T2 G3 तथाग्र्यः; G2. 4 तदाग्र्यः.

8 a) K2 B D (except D1–3) ततस्तूर्णं विनिष्पत्य. — b) Ś1 K3 B Dn D1. 2. 5. 6 °कर्षणः; D3 °सूदनः. — d) K2 B Dc Dn D4. 6 विधित्सुः; D5 विधाय. S निवार्या(M °हत्या)रिबलं रुषा.

9 a) T1 M °यातस् (for °यानं). Ś1 D1. 2 प्र- (for तु). — b) K2 B D (except D1–3) °रणे; G1 °मृधे (for °हवे). — c) B2 नामर्षत सुसंरब्धः; D1 T1 G (except G3) M1 °यत्सु- D1 °यत्स)संक्रुद्धः. — d) S साल्वः सौभपतिस्तदा (G1 °था).

C. 3. 701
B. 3. 17. 10
K. 3. 17. 10

प्रद्युम्नं योधयामास शाल्वः परपुरंजयः ॥ १०
तयोः सुतुमुलं युद्धं शाल्ववृष्णिप्रवीरयोः ।
समेता ददृशुर्लोका बलिवासवयोरिव ॥ ११
तस्य मायामयो वीर रथो हेमपरिष्कृतः ।
सध्वजः सपताकश्च सानुकर्षः सतूणवान् ॥ १२
स तं रथवरं श्रीमान्समारुह्य किल प्रभो ।
मुमोच बाणान्कौरव्य प्रद्युम्नाय महाबलः ॥ १३
ततो बाणमयं वर्ष व्यसृजत्तरसा रणे ।
प्रद्युम्नो भुजवेगेन शाल्वं संमोहयन्निव ॥ १४
स तैरभिहतः संख्ये नामर्षयत सौभराट् ।
शरान्दीप्ताग्निसंकाशान्मुमोच तनये मम ॥ १५
स शाल्वबाणै राजेन्द्र विद्धो रुक्मिणिनन्दनः ।
मुमोच बाणं त्वरितो मर्मभेदिनमाहवे ॥ १६
तस्य वर्म विभिद्याशु स बाणो मत्सुतेरितः ।
विभेद हृदयं पत्री स पपात मुमोह च ॥ १७
तस्मिन्निपतिते वीरे शाल्वराजे विचेतसि ।
संप्राद्रवन्दानवेन्द्रा दारयन्तो वसुंधराम् ॥ १८
हाहाकृतमभूत्सैन्यं शाल्वस्य पृथिवीपते ।
नष्टसंज्ञे निपतिते तदा सौभपतौ नृप ॥ १९
तत उत्थाय कौरव्य प्रतिलभ्य च चेतनाम् ।
मुमोच बाणं तरसा प्रद्युम्नाय महाबलः ॥ २०
तेन विद्धो महाबाहुः प्रद्युम्नः समरे स्थितः ।
जत्रुदेशे भृशं वीरो व्यवासीदद्रथे तदा ॥ २१
तं स विद्ध्वा महाराज शाल्वो रुक्मिणिनन्दनम् ।
ननाद सिंहनादं वै नादेनापूरयन्महीम् ॥ २२
ततो मोहं समापन्ने तनये मम भारत ।
मुमोच बाणांस्त्वरितः पुनरन्यान्दुरासदान् ॥ २३
स तैरभिहतो बाणैर्बहुभिस्तेन मोहितः ।
निश्चेष्टः कौरवश्रेष्ठ प्रद्युम्नोऽभूद्रणाजिरे ॥ २४

इति श्रीमहाभारते आरण्यकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

---

10 [a]) S (except M_2) °मंमत्तः (for °मत्तो वै). — [b]) $Ś_1$ वै; K_3 D_2. 3. 6 M_2 ह; B_4 T_2 G (except G_1) सः (for च).

11 [a]) T_2 G (except G_1) ततः (for तयोः). $Ś_1$ Dc_2 G_2 सतुमुलं; D_2 सुतुमलं. — [d]) D_1 वृत्र°; D_2 T_1 बल°.

12 [c]) K_2 B_2 Dn D_4. 6 सपताकः सध्वजश्च. — [d]) $Ś_1$ D_3 च तूण°; Dc प्रताप°; G_1 सतूणि°.

14 [b]) K_3 D_3 विसृजत्; D_5 विसृजन्. — [d]) T_2 G (except G_1) °हर्ष° (for °मोह°).

15 [a]) Dc परिवृतः (for अभिहतः). S संख्ये (T_2 G_3 °घे). — [b]) D_1 नामर्षत स सौभ°. — [c]) D_2 शरान्दीप्तान्प्राक्षिपन्स. — After 15, $Ś_1$ K_2 B D (except D_{1-3}) ins.:

79* तानापतत (sic!) बाणौघान्स चिच्छेद महाबलः ।
ततश्चान्यान्शरान्दीप्तान्प्रचिक्षेप सुते मम ।

[(L. 1) K_2 तानापतंतो. $Ś_1$ तान्बाणौघानापतत:; D_5 तमापतंतं बाणौघं (evident emendations!). ❀ Cn: आपतंतेति विसर्गलोप आर्षः। ❀ Dc transp. स and चिच्छेद. — (L. 2) $Ś_1$ K_2 B Dc पुनः (for ततः). $Ś_1$ om. च. $Ś_1$ प्राक्षिपत्स (for प्रचिक्षेप). D_5 प्राक्षिपत्तनये मम.]

16 [c]) K_3 बाणान्त्वरितो; G_1 बाणाभिहतो.

17 [a]) $Ś_1$ (*sup. lin.*) K_3 B_2 D_3. 5 T_1 G_4 M_2 मर्म. $Ś_1$ D_3 विभेद्याशु. — [c]) K_2 B D (except D_{1-3}) विव्याध; S विवेश. — [d]) $Ś_1$ D_1 मुमोच ह; S (except M_2) भृशा-(G_1 °शं)हतः (for मुमोह च). K_2 B Dc Dn D_{4-6} transp. पपात and मुमोह.

18 [a]) $Ś_1$ अस्मिन् (*sup. lin.* त° as in text). K_2 वीर (for वीरे). — [cd]) T_2 G (except G_1) transp. दानवेन्द्रा and दारयन्तो.

19 [a]) Dc हाहाभूतम्. T_2 G_3 महत् (for अभूत्). — [b]) T_2 G (except G_1) च महीपतेः (G_2 °ते) (for पृथिवी°). — [d]) K_2 B D (except $D_{2.3.5}$) नृपे.

20 [a]) S (except M_2) राजेंद्र (for कौरव्य). — [c]) N (except D_1. 3; K_1. 4 missing) G_1 बाणान्. K_2 B D (except D_{1-3}) सह° (for तर°).

21 [a]) K_2 B D (except D_{1-3}) तैः स (for तेन). S तेन बाणेन महता (M_2 तेनातिविद्धो बलवान्). — [c]) S (except M_2) विद्धो (for वीरो). — [d]) D_5 भृशं (for तदा). D_3 अवसादं गतस्तदा; T G (except G_1) व्यथितो दृश्यते तदा.

22 [a]) $Ś_1$ (by transp.) स तं विद्ध्वा; K_2 तं विद्धो स; D_1. 2 तं तु (D_2 नु) विद्ध्वा; T_1 तं विद्ध्वा स; M_2 स च विध्य. S (except M_2) तु राजेंद्र (for महा°). — [c]) Dc °नादेन; S (except M_2) °नादं च. — [d]) D_3 आनादयन् (for आपूरयन्). K_3 दिशः (for महीम्).

१९

वासुदेव उवाच ।

शाल्वबाणार्दिते तस्मिन्प्रद्युम्ने बलिनां वरे ।
वृष्णयो भग्नसंकल्पा विव्यथुः पृतनागताः ॥ १
हाहाकृतमभूत्सर्वं वृष्ण्यन्धकबलं तदा ।
प्रद्युम्ने पतिते राजन्परे च मुदिताभवन् ॥ २
तं तथा मोहितं दृष्ट्वा सारथिर्जवनैर्हयैः ।
रणादपाहरत्तूर्णं शिक्षितो दारुकिस्ततः ॥ ३
नातिदूरापयाते तु रथे रथवरप्रणुत् ।
धनुर्गृहीत्वा यन्तारं लब्धसंज्ञोऽब्रवीदिदम् ॥ ४
सौते किं ते व्यवसितं कस्माद्यामि पराङ्मुखः ।
नैष वृष्णिप्रवीराणामाहवे धर्म उच्यते ॥ ५
कच्चित्सौते न ते मोहः शाल्वं दृष्ट्वा महाहवे ।
विषादो वा रणं दृष्ट्वा ब्रूहि मे त्वं यथातथम् ॥ ६

सूत उवाच ।

जानार्दने न मे मोहो नापि मे भयमाविशत् ।
अतिभारं तु ते मन्ये शाल्वं केशवनन्दन ॥ ७
सोऽपयामि शनैर्वीर बलवानेष पापकृत् ।
मोहितश्च रणे शूरो रक्ष्यः सारथिना रथी ॥ ८
आयुष्मंस्त्वं मया नित्यं रक्षितव्यस्त्वयाप्यहम् ।
रक्षितव्यो रथी नित्यमिति कृत्वापयाम्यहम् ॥ ९
एकश्चासि महाबाहो बहवश्चापि दानवाः ।
नसमं रौक्मिणेयाहं रणं मत्वापयाम्यहम् ॥ १०

C. 3. 726
B. 3. 18. 10
K. 3. 18. 10

---

23 [a]) De D1–3. 5 M2 मोहसमा°. — [d]) S दुरात्मवान् (for दुरासदान्).

Colophon om. in K3. K1. 4 missing. — *Major parvan:* Ś1 T G2–4 आरण्य. — *Sub-parvan:* Ś1 B D (all om. sub-parvan name) mention only सौभवधोपाख्यान (Ś1 B2. 4 D1–3. 6 सौभवध; D5 शाल्ववध); K2 likewise only सौभ. — *Adhy. name:* B4 De प्रद्युम्नसंमोहः; D2 शाल्वप्रद्युम्नयोर्युद्धं; T2 G3. 4 M1 प्रद्युम्नसाल्वयुद्धं. — *Adhy. no.* (figures, words or both): Dn S 17; D1 18 (as in text). — *Śloka no.:* Dn 25; D1 24.

19

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 K3 om. the ref. Ś1 K2 B2 श्रीकृष्णः; D1 T1 M1 श्रीभगवान् (for वासुदेवः). — [a]) T G2. 3 M1 °बाणार्पिते; M4 °चिते. — [b]) T1 M1 रतिवल्लभे (for बलिनां वरे)! — [cd]) K2 M2 transp. वृष्णयः and विव्यथुः. S (except M2) °मुखे (for °गताः).

2 [a]) Ś1 D1–3 पराङ्मुखम् (for हाहाकृतम्). De सैन्यं (for सर्वं). — [b]) De °मयं (for °बलं). N (K1. 4 missing) ततः (for तदा). — [c]) B D (except D1–3) मोहिते (for पतिते). K3 प्रद्युम्नो मोहितो राजन्. — [d]) B2 ते (for च). K2 B Dn D4. 6 भृशं (for [अ]भवन्). S (except M2) साल्वः प्रमुदितोभवत्.

3 [c]) T2 G (except G1) M2 शीघ्रं (for तूर्णं). — [d]) K2. 3 B2 Dn D4. 6 T2 G (except G1) M2 तदा; T1 तथा (for ततः).

7 K2 B (except B4) D (except D1–3. 5) सौतिः (for सूतः). — [b]) K2 B De Dn D4. 6 मां; T1 वा; M मा (for मे). — [c]) G2. 4 अहं (for तु ते). D2 अभिभवंतं वै मन्ये.

8 [a]) Śim K3 Dn3 (by corr.) सोपयाति; D6 °यासि; T2 G (except G1) सोभियाति. D5 T2 G (except G1) शरैर् (for शनैर्). — [c]) G3. 4 M2 वीरो (for शूरो). — [d]) T2 G3 रथे (for रथी).

9 [a]) Ś1 K3 D1–3 M2 हि (for त्वं). M1 रक्ष्यो (for नित्यं). — [b]) K3 D1–3 हि (for [अ]पि). — K3 B1. 2 om. (? hapl.) 9[cd]. — [c]) Ś1 D3 S रणे; B4 मया (for रथी). — [d]) D3 ज्ञात्वा°; M मत्वा° (for कृत्वा°); cf. v.l. 10.

10 [b]) Ś1 D1. 3 [अ]त्र; D2 [अ]स्य (for [अ]पि). Ś1 D1–3 शत्रवः (for दानवाः). — D1 om. 10[cd]. — [c]) G2. 4 रौक्मिणेयस्य; M2 °येदं. — [d]) B Dn D1. 4. 6 रणे; T G इति. Ś1 D2 त्यक्त्वा; K2 हित्वा; T2 G (except G2) कृत्वा (for मत्वा); cf. v.l. 9. K2. 3 B (except B2) D T1 G1 M1 वै (for [अ]हम्).

C. 3. 727
B. 3. 18. 11
K. 3. 18. 11

वासुदेव उवाच ।

एवं ब्रुवति सूते तु तदा मकरकेतुमान्
उवाच सूतं कौरव्य निवर्तय रथं पुनः ॥ ११
दारुकात्मज मैवं त्वं पुनः कार्षीः कथंचन ।
व्यपयानं रणात्सौते जीवतो मम कर्हिचित् ॥ १२
न स वृष्णिकुले जातो यो वै त्यजति संगरम् ।
यो वा निपतितं हन्ति तवास्मीति च वादिनम् ॥ १३
तथा स्त्रियं वै यो हन्ति वृद्धं बालं तथैव च ।
विरथं विप्रकीर्णं च भग्नशस्त्रायुधं तथा ॥ १४
त्वं च सूतकुले जातो विनीतः सूतकर्मणि ।
धर्मज्ञश्चासि वृष्णीनामाहवेष्वपि दारुके ॥ १५
स जानंश्चरितं कृत्स्नं वृष्णीनां पृतनामुखे ।
अपयानं पुनः सौते मैवं कार्षीः कथंचन ॥ १६
अपयातं हतं पृष्ठे भीतं रणपलायिनम् ।
गदाग्रजो दुराधर्षः किं मां वक्ष्यति माधवः ॥ १७
केशवस्याग्रजो वापि नीलवासा मदोत्कटः ।
किं वक्ष्यति महाबाहुर्बलदेवः समागतः ॥ १८
किं वक्ष्यति शिनेर्नप्ता नरसिंहो महाधनुः ।
अपयातं रणात्सौते साम्बश्च समितिंजयः ॥ १९
चारुदेष्णश्च दुर्धर्षस्तथैव गदसारणौ ।
अक्रूरश्च महाबाहुः किं मां वक्ष्यति सारथे ॥ २०
शूरं संभावितं सन्तं नित्यं पुरुषमानिनम् ।
स्त्रियश्च वृष्णिवीराणां किं मां वक्ष्यन्ति संगताः ॥ २१
प्रद्युम्नोऽयमुपायाति भीतस्त्यक्त्वा महाहवम् ।
धिगेनमिति वक्ष्यन्ति न तु वक्ष्यन्ति साध्विति ॥ २२
धिग्वाचा परिहासोऽपि मम वा मद्विधस्य वा ।
मृत्युनाभ्यधिकः सौते स त्वं मा व्यपयाः पुनः ॥ २३
भारं हि मयि संन्यस्य यातो मधुनिहा हरिः ।

---

11 All MSS. except B_4 (K_1. 4 missing) om. the ref. D_4 om. 11^{ab}. — [a]) K_2 स; B_1 [ऽ]पि; B_3 वै (for तु). — [b]) $Ś_1$ K_2. 3 D_2. 3 स्वयन् (for तदा). D_1 M_2 °केतनः. — [c]) D_3 सौतिं (for सूतं). — [d]) S (except T_2 G_3) संनिवर्त्य (for निवर्तय). T_1 (both) प्रति and पुनः (as in text).

13 [a]) $Ś_1$ K_2. 3 D_{1-3} नासौ; G_1 कः स (for न स). — [b]) T_1 संकरं; T_2 G_{2-4} M_1 संयुगं (for संगरम्). — [c]) D_3 S (except M_2) यश्च (for यो वा). K_3 D_{1-3} S [अ]पि for नि-).

14 [a]) B_1 D_n T_2 G_3 च; B_{2-4} Dc D_{4-6} वा (for वै). $Ś_1$ K_2. 3 D_{1-3} M_2 यो वै स्त्रियं (by transp.). — [b]) B D (except D_{1-3}) बालं वृद्धं (by transp.); S (except M_2) वृद्धान्बालान्. — [c]) K_2. 3 S मुक्तकेशं (for विप्र°).

15 [b]) T_1 G (except G_3) M_1 विदितः (for विनी°). — [c]) K_3 D_{1-3} [अ]पि (for [अ]मि).

16 [a]) K_3 जानंश्च; S (except G_2 M_2) विजानन् (for स जानन्). — D_5 om. (hapl.) 16^{cd}. — [cd]) D_{n2} M_2 रणात् (for पुनः). D_2 transp. सौते and कार्षीः.

17 [a]) $Ś_1$ K_3 अपयांतं. — [b]) K_3 D_2 T_1 G (except G_3) M_1 भीरुं; D_{n1}. n_2 भ्रांतं; D_3 भीक्ष्णं (for भीतं). $B_{1.3}$ D_{n1} D_4 °पलायितं; B_2 °पराङ्मुखं. — [d]) K_2 T_2 G (except G_1) M मा (for मां).

19 D_3 om. 19^{ab}. — [b]) K_3 D_1 S रण° (for नर°). $Ś_1$ $D_{1.2}$ मदोत्कटः (cf. 18^b); $K_{2.3}$ महाबलः; Dc °हनुः; S (except M_2) °रथः (for °धनुः). — [c]) B Dc Dn $D_{2.4.6}$ सूत; D_5 तत्र (for सौते). — [d]) $K_{2.3}$ B (except B_1) Dc D_{4-6} शांबश्च.

20 [d]) K_3 नो; D_5 M_2 वा; T_2 G (except G_1) M_1 मा (for मां); cf. v.l. 21.

21 [a]) T_1 $G_{1.2}$ M शूर-. G_2 M_2 -संभाविनं. K_2 $B_{1.3}$ Dn $D_{3.4.6}$ G_1 शांतं; T G_{2-4} M_2 नित्यं (for सन्तं). — [b]) T_1 संतः; T_2 G (except G_1) M_2 तथा (for नित्यं). — D_4 om. 21^c–22^d. — [d]) G_1 M मा; G_2 वा (for मां); cf. v.l. 20. B Dn Dc संह(B $_1$ °हि)ताः (for संगताः). T_2 G_3. 4 किं वक्ष्यंति समागताः.

22 D_4 om. 22 (cf. v.l. 21). — [a]) K_2 B_4 इहा°; Dc $D_{3.5}$ T_1 G_2 M अपा° (for उपा°). — [b]) D_1 S (except T_2 G_3) रणाजिरं (for महा°). — [c]) G_2 धिग्धिग्भयादपानीतो. — [d]) T_1. 3 (before corr.) G_1. 4 M_1 साधु; G_2 यदि (for न तु). K_2 T G (except G_2) M_1 साध्विति मां प्रति (K_2 सर्वतः; G_1 वादिनः) (for वक्ष्यन्ति साध्विति). — T_2 G_3. 4 *repeat* 22^{cd}, with v.l. as in G_2.

23 [a]) S धिग्वचः (G_1 °ग्वाचः; G_2 °कतथा). B_4 Dc T G वा; D_5 M [ऽ]यं (for ऽपि). — [c]) D_3 S (except G_2 M_2) मृत्युतो° (for °ना°). — [d]) $Ś_1$ $K_{2.3}$ $D_{3.5}$ मा

यज्ञं भरतसिंहस्य पार्थस्यामिततेजसः ॥ २४
कृतवर्मा मया वीरो निर्यास्यन्नेव वारितः ।
शाल्वं निवारयिष्येऽहं तिष्ठ त्वमिति सूतज ॥ २५
स च संभावयन्मां वै निवृत्तो हृदिकात्मजः ।
तं समेत्य रणं त्यक्त्वा किं वक्ष्यामि महारथम् ॥ २६
उपयातं दुराधर्षं शङ्खचक्रगदाधरम् ।
पुरुषं पुण्डरीकाक्षं किं वक्ष्यामि महाभुजम् ॥ २७
सात्यकिं बलदेवं च ये चान्येऽन्धकवृष्णयः ।
मया स्पर्धन्ति सततं किं नु वक्ष्यामि तानहम् ॥ २८
त्यक्त्वा रणमिमं सौते पृष्ठतोऽभ्याहतः शरैः ।
त्वयापनीतो विवशो न जीवेयं कथंचन ॥ २९
स निवर्त रथेनाशु पुनर्दारुकनन्दन ।
न चैतदेवं कर्तव्यमथापत्सु कथंचन ॥ ३०
न जीवितमहं सौते बहु मन्ये कदाचन ।
अपयातो रणाद्भीतः पृष्ठतोऽभ्याहतः शरैः ॥ ३१
कदा वा सूतपुत्र त्वं जानीषे मां भयार्दितम् ।
अपयातं रणं हित्वा यथा कापुरुषं तथा ॥ ३२
न युक्तं भवता त्यक्तुं संग्रामं दारुकात्मज ।
मयि युद्धार्थिनि भृशं स त्वं याहि यतो रणम् ॥ ३३

इति श्रीमहाभारते आरण्यकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वासुदेव उवाच ।
एवमुक्तस्तु कौन्तेय सूतपुत्रस्तदा मृधे ।
प्रद्युम्नमब्रवीच्छ्लक्ष्णं मधुरं वाक्यमञ्जसा ॥ १
न मे भयं रौक्मिणेय संग्रामे यच्छतो हयान् ।

C. 3. 751
B. 3. 19. 2
K. 3. 19. 2

(Ś1 [before corr.] K3 स) मा त्वं; D1 मैवं त्वं; D2 मां त्वं; S तस्मान्मा (for स त्वं मा). Ś1 अपयाः (for व्यं°).

24 a) T G (except G1) वि- (for सं-). — c) Ś1 B1. 2 Dn1 D6 भारत°. — d) Ś1 न तु शक्योद्य सीदितुं; K2. 3 D1 न स शक्ष्येद्य सीदितुं; B न हि शक्ये (B1 °क्ष्ये) त्यमर्षितुं; Dc Dn D4–6 न हि (Dc स न) शक्येद्य मर्षितुं; D2 न स रक्षेद्य जीवितं; D3 स न शक्षेद्य सीदितुं; M2 राजसूयं महाक्रतुं.

25 ab) T2 G3. 4 महा- (for मया), and निर्यास्यन्हि निवारितः.

26 a) Ś1 D1–3 स च संभाव्य मामेव (D1. 2 °वं).

27 a) Dn D1 T2 G1. 3 M2 उपयांतं; D2 उपागतं.

28 b) T1 G1 M1 तत्र; T2 G2–4 कुरु (for Sन्धक-). — c) Ś1 K2. 3 D1–3 स्पर्धते ये मया नित्यं.

29 a) D1 °मुखं; D3 °महं; T2 G (except G1) °मिदं (for °मिमं). — b) = 31d. Dn2 T2 G3 [S]प्याहतः; D3 [S]भिहतः; T1 [S]भ्यागतः. B2. 4 परैः (for शरैः). — D3 G2 om. (hapl.) 29c–31d. — d) D1. 2 न जीवेहं.

30 D3 G2 om. 30 (cf. v.l. 29). — a) K2 B (except B2) Dc Dn2 D1. 4 T G3. 4 M संनिवर्त (Dc1 M2 °वृत्त; T1 G4 °वर्त्य); D2 निवर्तैक-. — d) Ś1 D1. 2 ममापत्सु; K3 Dc2 D5. 6 M2 अप्यापत्सु; T G3. 4 M1 आपत्सु च (for अथापत्सु).

31 D3 G2 om. 31 (cf. v.l. 29); B1 om. (hapl.) 31ab. — b) K3 मंस्ये. B2 Dn D4. 6 G1 कथंचन. — d) = 29b. T2 G3 [S]भ्याहतः; M2 च हतः. B2 M2 परैः (for शरैः).

32 a) B2. 3 Dn1 D4. 6 च; Dn2. n3 [अ]पि; T2 G (G2 त्वं) (for वा). — b) T G (except G2) वा; M मा (for मां). — d) B (except B2) D5 S कापुरुषस्.

33 a) Ś1 न च युक्तं भवेत्त्यक्तुं; K3 अयुक्तं कृतवान्यस्त्वं; D1. 2 न च युक्तं तव त्यक्तुं; D3 अयुक्तं तु भवेत्त्य°; S अयुक्तं तु मया त्य°. — c) M2 सति (for भृशं). — d) Ś1 D3 यतो रणः; T1 M1 रणाजिरं; G2. 4 ततो रणं.

Colophon. K1. 4 missing. — *Major parvan:* Ś1 T G2–4 आरण्य. — *Sub-parvan:* Ś1 K2. 3 B D M (all om. sub-parvan name) mention only सौभवध (B1. 3. 4 सौभवधोपाख्यान; D5 शाल्ववध). — *Adhy. name:* B4 D2 प्रद्युम्नवाक्यं; T2 G2–4 M1 अपयानगर्हणं. — *Adhy. no.* (figures, words or both): Dn1. n2 S 18; D1 19 (as in text). — *Śloka no:* Dn D1 33; D6 32.

20

☞ This adhy. is missing in K1. 4 (cf. v.l. 3. 1. 1); the MSS. are mostly ignored here.

1 Ś1 B2 D6 श्रीकृष्णः; D1 T1 M1 श्रीभगवान् (for

C. 3. 751
B. 3. 19. 2
K. 3. 19. 2

युद्धज्ञश्चासि वृष्णीनां नात्र किंचिदतोऽन्यथा ॥ २
आयुष्मन्नुपदेशस्तु सारथ्ये वर्ततां स्मृतः ।
सर्वार्थेषु रथी रक्ष्यस्त्वं चापि भृशपीडितः ॥ ३
त्वं हि शाल्वप्रयुक्तेन पत्रिणाभिहतो भृशम् ।
कश्मलाभिहतो वीर ततोऽहमपयातवान् ॥ ४
स त्वं सात्वतमुख्याद्य लब्धसंज्ञो यदृच्छया ।
पश्य मे हयसंयाने शिक्षां केशवनन्दन ॥ ५
दारुकेणाहमुत्पन्नो यथावच्चैव शिक्षितः ।
वीतभीः प्रविशाम्येतां शाल्वस्य महतीं चमूम् ॥ ६
एवमुक्त्वा ततो वीर हयान्संचोद्य संगरे ।
रश्मिभिश्च समुद्यम्य जवेनाभ्यपतत्तदा ॥ ७
मण्डलानि विचित्राणि यमकानीतराणि च ।
सव्यानि च विचित्राणि दक्षिणानि च सर्वशः ॥ ८
प्रतोदेनाहता राजन्रश्मिभिश्च समुद्यताः ।
उत्पतन्त इवाकाशं विबभुस्ते हयोत्तमाः ॥ ९
ते हस्तलाघवोपेतं विज्ञाय नृप दारुकिम् ।
दह्यमाना इव तदा पस्पृशुश्चरणैर्महीम् ॥ १०
सोऽपसव्यां चमूं तस्य शाल्वस्य भरतर्षभ ।
चकार नातियत्नेन तदद्भुतमिवाभवत् ॥ ११
अमृष्यमाणोऽपसव्यं प्रद्युम्नेन स सौभराट् ।
यन्तारमस्य सहसा त्रिभिर्बाणैः समर्पयत् ॥ १२
दारुकस्य सुतस्तं तु बाणवेगमचिन्तयन् ।
भूय एव महाबाहो प्रययौ हयसंमतः ॥ १३
ततो बाणान्बहुविधान्पुनरेव स सौभराट् ।
मुमोच तनये वीरे मम रुक्मिणिनन्दने ॥ १४
तानप्राप्ताञ्शितैर्बाणैश्चिच्छेद परवीरहा ।
रौक्मिणेयः स्मितं कृत्वा दर्शयन्हस्तलाघवम् ॥ १५
छिन्नान्दृष्ट्वा तु तान्बाणान्प्रद्युम्नेन स सौभराट् ।

वासुदेवः). — [b]) K2 T G (except G1) तथा मृधे; B D (except D1–3) ततोब्रवीत्. — [cd]) B D (except D1–3) प्रद्युम्नं बलिनां श्रेष्ठं, and श्लक्ष्णम् (for वाक्यम्).

3 [a]) T2 G2. 3 उपदेशान्तु. — [b]) G4 शिक्षना; M2 शिक्षितः (for वर्तनां). Dc D3 श्रुतः; D2 मतः; T2 G2. 3 श्रुताः (for स्मृतः).

4 D4 om. 4[a]–5[b]. — [a]) T2 G3. 4 च (for हि). — [b]) B D (except D1–3; D4 om.) T2 G3 शरेण (for पत्रिणा). T2 G (except G1) भृशमाहतः (for [अ]भिहतो भृशम्). — [d]) K3 D3 M2 उपयातवान्.

6 [a]) Ś1 K3 Dc1 D1. 2 दारुकाच्चाहम् (K3 °च्चैवम्; D2 °द्योहम्) उत्पन्नो; T1 दारुकेण समुत्पन्नो. — [c]) Ś1 प्रतियास्ये तां; S (except T2 G3) प्रविशाम्येनां. — [d]) B D (except D1–3) प्रथितां चमूं.

7 Before 7, K2 B D (except D1–3) ins. वासुदेव (B2 श्रीकृष्ण) उ°. — [a]) D1–3 T2 G (except G1) M2 वीरो. — [b]) Ś1 संयुज्य; K2. 3 °नोद्य; D1. 2 °योज्य; D3 °नह्य. T1 G1 M2 संयुगे. — [c]) B D (except D1–3. 5) तु (for च).

8 [b]) T2 G या(G2 धा)वकानी°.

9 [a]) Ś1 K2. 3 Dc D1–3 हता (for [आ]हता). — [c]) Cf. 3. 18. 2[c]. Ś1 Dn D6 G1 आकाशे. — [d]) B (except B4) Dc Dn D4. 5 व्यचरंस्ते; D1 विविशुस्ते; D3 प्रवर्षंस्ते.

10 [a]) D1. 2 हया (for हस्त). — [c]) D6 T2 G ऊ(D6 उ)द्य° (for दह्य°). — [d]) K2 B D (except D1–3) T2 G3 नास्पृशन्; K3 [अ]पस्पृशन्; G4 [अ]पस्पृशय.

11 [a]) S (except T2 G3) सोपमव्यं. Ś1 K3 D2 तत्र; D1 कृत्वा; T2 G (except G1) तां च (for तस्य). — [b]) B पुरुषर्षभ; M2 समितिंजयः. — [d]) = 1. 1. 77[d]; 201. 9[d]; 4. 52. 15[d]; 53. 29[d] etc.

12 [b]) D2 प्रद्युम्नस्य. B Dn D1. 4. 6 च (for स). S साल्वः समितिदारुणः. — [d]) Ś1 B4 D3 समर्द°; K2 B1–3 Dc Dn D1. 2. 4. 6 समार्द°; K3 अमर्ष°; D5 अमर्द° (for समर्प°).

13 [a]) B D (except D1–3) तत्र (for तं तु). — [b]) Ś1 K2 D1. 2 °पातम्; K3 °घातम् (for °वेगम्). — [c]) T2 G (except G1) महाबाहुः. — [d]) K3 स (for प्र-). K2 B2. 3 Dn D4. 6 अपसव्यतः; D3 हयसंयुतः; T1 हरिसत्तमः; T2 G2–4 हयमार्गतः.

14 [a]) K2. 3 S बहुतरान्; D3 बहूञ्शाजन्. — [b]) T2 G भूय एव (for पुनरेव). — [c]) B1. 3. 4 Dn D2–4. 6 T1 वीर; B2 Dc1 M1 वीरो.

15 [d]) Ś1 K1. 2 D3 अस्त्र°; S (except M1) पाणि° (for हस्त°).

16 [a]) D3 दृष्ट्वा छिन्नान् (by transp.); T1 G2. 4 भिन्नान्दृष्ट्वा; G1 भग्नान्दृष्ट्वा. K2 D1. 2 ततो; D5 [अ]द्रुतान् (for

आसुरीं दारुणीं मायामास्थाय व्यसृजच्छरान् ॥ १६
प्रयुज्यमानमाज्ञाय दैतेयास्त्रं महाबलः ।
ब्रह्मास्त्रेणान्तरा छित्त्वा मुमोचान्यान्पतत्रिणः ॥ १७
ते तदस्त्रं विधूयाशु विव्यधू रुधिराशनाः ।
शिरस्युरसि वक्त्रे च स मुमोह पपात च ॥ १८
तस्मिन्निपतिते क्षुद्रे शाल्वे बाणप्रपीडिते ।
रौक्मिणेयोऽपरं बाणं संदधे शत्रुनाशनम् ॥ १९
तमर्चितं सर्वदाशार्हपूगै-
राशीर्भिरर्कज्वलनप्रकाशम् ।
दृष्ट्वा शरं ज्यामभिनीयमानं
बभूव हाहाकृतमन्तरिक्षम् ॥ २०
ततो देवगणाः सर्वे सेन्द्राः सहधनेश्वराः ।
नारदं प्रेषयामासुः श्वसनं च महाबलम् ॥ २१
तौ रौक्मिणेयमागम्य वचोऽब्रूतां दिवौकसाम् ।
नैष वध्यस्त्वया वीर शाल्वराजः कथंचन ॥ २२
संहरस्व पुनर्बाणमवध्योऽयं त्वया रणे ।
एतस्य हि शरस्याजौ नावध्योऽस्ति पुमान्क्वचित् ॥२३
मृत्युरस्य महाबाहो रणे देवकिनन्दनः ।
कृष्णः संकल्पितो धात्रा तन्न मिथ्या भवेदिति ॥ २४
ततः परमसंहृष्टः प्रद्युम्नः शरमुत्तमम् ।
संजहार धनुःश्रेष्ठात्तूणे चैव न्यवेशयत् ॥ २५
तत उत्थाय राजेन्द्र शाल्वः परमदुर्मनाः ।
व्यपायात्सबलस्तूर्णं प्रद्युम्नशरपीडितः ॥ २६
स द्वारकां परित्यज्य क्रूरो वृष्णिभिरर्दितः ।
सौभमास्थाय राजेन्द्र दिवमाचक्रमे तदा ॥ २७

C. 3. 776
B. 3. 19. 27
K. 3. 19. 27

इति श्रीमहाभारते आरण्यकपर्वणि विंशोऽध्यायः ॥ २० ॥

तु तान्). T_2 G (except G_1) बाणान्वै (for तान्बाणान्). — [b]) Dn $D_{3.6}$ च (for स). — [c]) $Ś_1$ B_2 D_3 M दारुणां; K_3 दानवीं. — [d]) $G_{2.4}$ [अ]वासृजं.

17 [c]) $Ś_1$ तं स्तुत्वा; $K_{2.3}$ B_{3m} D_{1-3} तं (D_3 स) ज्ञात्वा (for आज्ञाय). B_4 Dc तत्प्रयुज्यंतमाज्ञाय; S तां प्रयुक्तां (G_1 संप्रयुक्तं; M_2 तत्प्रयुक्तं) समाज्ञाय. — [b]) $K_{2.3}$ °हवे; B (except B_2) Dn D_{4-6} $G_{2.4}$ °बलं (for °बलः).

18 [a]) D_3 ततो हस्ताद्विनिःक्षिप्ता; S तस्य चास्त्रं (M_2 ते तदस्त्रं) विधूयाथ. — [b]) D_3 विधिवद्; T G विव्याथ; M_1 विव्याध; M_2 विविशू (for विव्यधू). B_1 रुधिराशनैः; T_1 G_1 M_1 °नान्; T_2 G_{2-4} °नं.

19 [c]) D_1 T_2 $G_{3.4}$ परं (for [अ]परं). — [d]) K_3 T_2 G_3 शत्रुतापनं; T_1 $G_{1.4}$ M_1 °तापनः; G_2 °शातनः.

20 [a]) $K_{2.3}$ B_2 $Dn_{1.ns}$ D_{1-5} G (except G_3) M_2 दशार्हैः. $Ś_1$ $K_{2.3}$ $D_{1-3.5}$ °मुख्यैर् (for °पूगैर्). — [b]) K_2 B D आशीविषाग्नि(B₂ Dc °र्क)ज्वलन(B₄ °ज्वलित)प्रकाशं; T_1 G_1 M आशीर्भिरग्नि(M_2 °हिम)ज्वलित(G_1 °ज्वलन)प्र°; T_2 G_{2-4} आशीर्भिराजज्ञनलप्र° (sic).

21 [b]) B_3 सहमहेश्वराः; D_3 सभुवनैः; T_2 G_3 सप्तदिगी°; $G_{2.4}$ सपतगै°. — [d]) B D (except D_{1-3}) मनोजवं (for महा°).

22 [a]) $Ś_1$ T $G_{3.4}$ आगत्य; G_1 M_1 आसाद्य.

23 K_3 om. 23. — [a]) $D_{1.2}$ महाबाणं. — [b]) Dc रणे त्वया (by transp.). — [c]) B D (except D_{1-3}) M_2 च (for हि).

24 [d]) Dn $D_{4.6}$ तन्मिथ्या न; D_3 M_2 न तन्मिथ्या (by transp). G_1 भविष्यति.

25 [d]) $K_{2.3}$ तूर्णं; S तूणौ. $Ś_1$ चैवं; K_3 B_2 Dc $D_{3.5}$ चैनं.

27 M_2 om. (hapl.) 27^{abc} (with 26^{bcd}). — [b]) T G (except G_3) M_1 साल्वो (for क्रूरो). B_1 Dn_2 T_2 G_3 आर्दितः.

Colophon om. in K_3. $K_{1.4}$ missing. — *Major parvan:* $Ś_1$ T G_{2-4} आरण्य. — *Sub-parvan:* $Ś_1$ K_2 B Dn Dc $D_{1.4.6}$ (all om. sub-parvan name) mention only सौभवध ($B_{1.3.4}$ Dc सौभवधोपाख्यान); D_5 likewise only शाल्ववध. — *Adhy. name:* D_2 प्रद्युम्नेन शाल्वपराजयः; M_1 साल्वापयानं. — *Adhy. no.* (figures, words or both): Dn S 19; D_1 20 (as in text). — *Śloka no.:* Dn $D_{1.6}$ 27.

21

☞ This adhy. is missing in $K_{1.4}$ (cf. v.l. 3.1.1); the MSS. are mostly ignored here.

1 B_2 $D_{2.5}$ T_2 G_{2-4} श्रीकृष्णः; D_1 T_1 M_1 श्रीभगवान्

२१

C. 3. 777
B. 3. 20. 1
K 3. 20. 1

वासुदेव उवाच ।

आनर्तनगरं मुक्तं ततोऽहमगमं तदा ।
महाक्रतौ राजसूये निवृत्ते नृपते तव ॥ १
अपश्यं द्वारकां चाहं महाराज हतत्विषम् ।
निःस्वाध्यायवषट्कारां निर्भूषणवरस्त्रियम् ॥ २
अनभिज्ञेयरूपाणि द्वारकोपवनानि च ।
दृष्ट्वा शङ्कोपपन्नोऽहमपृच्छं हृदिकात्मजम् ॥ ३
अस्वस्थनरनारीकमिदं वृष्णिपुरं भृशम् ।
किमिदं नरशार्दूल श्रोतुमिच्छामहे वयम् ॥ ४
एवमुक्तस्तु स मया विस्तरेणेदमब्रवीत् ।
रोधं मोक्षं च शाल्वेन हार्दिक्यो राजसत्तम ॥ ५
ततोऽहं कौरवश्रेष्ठ श्रुत्वा सर्वमशेषतः ।
विनाशे शाल्वराजस्य तदैवाकरवं मतिम् ॥ ६
ततोऽहं भरतश्रेष्ठ समाश्वास्य पुरे जनम् ।
राजानमाहुकं चैव तथैवानकदुन्दुभिम् ।
सर्ववृष्णिप्रवीरांश्च हर्षयन्नब्रुवं तदा ॥ ७
अप्रमादः सदा कार्यो नगरे यादवर्षभाः ।
शाल्वराजविनाशाय प्रयातं मां निबोधत ॥ ८
नाहत्वा तं निवर्तिष्ये पुरीं द्वारवतीं प्रति ।
सशाल्वं सौभनगरं हत्वा द्रष्टास्मि वः पुनः ।
त्रिसामा हन्यतामेषा दुन्दुभिः शत्रुभीषणी ॥ ९
ते मयाश्वासिता वीरा यथावद्भरतर्षभ ।
सर्वे मामब्रुवन्हृष्टाः प्रयाहि जहि शात्रवान् ॥ १०
तैः प्रहृष्टात्मभिर्वीरैराशीर्भिरभिनन्दितः ।
वाचयित्वा द्विजश्रेष्ठान्प्रणम्य शिरसाहुकम् ॥ ११
सैन्यसुग्रीवयुक्तेन रथेनानादयन्दिशः ।
प्रध्माप्य शङ्खप्रवरं पाञ्चजन्यमहं नृप ॥ १२
प्रयातोऽस्मि नरव्याघ्र बलेन महता वृतः ।

(for वासुदेवः). — a) D1 रम्यं (for मुक्तं). S °नगरीं मुक्तां (G1. 4 मुक्त्वा; M2 मुख्यां). — d) A few MSS. निर्वृत्ते. S (except M2) भरतर्षभ (for नृपते तव).

2 a) D3 चैनां; T1 G1 M1 चैव; T2 G2–4 चापि (for चाहं). — b) K2. 3 दूरादेव (for महा°). — d) Ś1 निर्भूषणमिव स्त्रियं; M2 निर्भूषामिव योषितं.

3 c) M2 दृष्ट्वाहं शंकमानो वै. — d) G1. 2 अपश्यं; G4 पप्रच्छ; M2 ह्यपृच्छं.

4 b) Dn T2 G3 °कुलं (for °पुरं). Ś1 वरं; D1. 2 महत् (for भृशम्). — d) = 1. 2. 1d; 31. 3d; 86. 8d; etc. Ś1 इच्छामि तेनघ; K2 B Dc Dn D4–6 °मि तत्त्वतः; K3 D1–3 °मि ते वचः (for इच्छामहे वयम्).

5 a) K2 B D (except D1–3) G2. 4 transp. तु and स. — d) Ś1 K3 Dc D1–3. 5 M2 वृष्णिसत्तमः (for राज°).

6 a) K2 B2 Dn D4. 6 T2 G3 भरतश्रेष्ठ. — b) K3 S श्रुत्वाप्रियमनुत्तमं; Dc D5 श्रुत्वा सुमहदप्रियं. — c) M1 सालराजविनाशाय.

7 e) K2 B D (except D1–3) M2 सर्वान् (for सर्व-). Ś1 K2. 3 D1–3 तान् (for च). — f) Dc D5 इदमब्रुवं (for अब्रुवं तदा).

8 d) K3 D1. 2 प्रायांतं मां; D3 [अ]भियातोस्मि.

9 a) T1 G1 M वि- (for तं). T2 G2–4 तं हत्वा विनिवर्तिष्ये. — e) Ś1 D1. 2 त्रि(Ś1 त्रिः)सामा ताड्यताम्; K2 B Dn3 D4. 6 T G1–3 M Cnp त्रिः समाहन्यताम्; Dc D5 त्रिः समा(D5 °मे) ताड्यताम्; Dn1. n2 G4 त्रिः सामाहन्यताम्; D3 भृशमावाद्यताम्. Cn cites त्रिःसामा (= त्रिस्वरा नीचमन्द्रतारभावेन). K2 D1. 3 S (except G1 M2) एष. K3 प्रशाम्य तान्यतामेषां. — f) K2 Dn D6 दुंदुभी. K2 B Dc Dn D4–6 °भीषणा; D1. 3 S (except G1 M2) °भीषणः.

11 a) K3 Dc1 D2. 4 प्रकृष्टा°. — d) Ś1 त्वहं; K2 B Dc Dn D1. 4–6 M भवं; K3 D3 च तान्; D2 तथा (for [आ]हुकं).

12 a) = 1. 212. 3c. K2 B D (except D1) शैब्य° (B3. 4 D5 सैब्य°). — b) D2 आनंद°; T G1. 3. 4 आच्छाद°; M1 उन्नाद°. — c) K3 प्रगृह्य; B1 Dn T2 G3 प्रध्माय. — d) K3 च भारत; S भयावहं (for अहं नृप).

13 a) Ś1 K3 D1–3 नरश्रेष्ठ; M2 महाराज (for नर°). — c) B2 G1 दसेन; M2 युक्तेन. — d) Ś1 K3 Dc Dn

क्लप्तेन चतुरङ्गेण बलेन जितकाशिना ॥ १३
समतीत्य बहून्देशान्गिरींश्च बहुपादपान् ।
सरांसि सरितश्चैव मार्तिकावतमासदम् ॥ १४
तत्राश्रौषं नरव्याघ्र शाल्वं नगरमन्तिकात् ।
प्रयातं सौभमास्थाय तमहं पृष्ठतोऽन्वयाम् ॥ १५
ततः सागरमासाद्य कुक्षौ तस्य महोर्मिणः ।
समुद्रनाभ्यां शाल्वोऽभूत्सौभमास्थाय शत्रुहन् ॥ १६
स समालोक्य दूरान्मां समयन्निव युधिष्ठिर ।
आह्वयामास दुष्टात्मा युद्धायैव मुहुर्मुहुः ॥ १७
तस्य शार्ङ्गविनिर्मुक्तैर्बहुभिर्मर्मभेदिभिः ।
पुरं नासाद्यत शरैस्ततो मां रोष आविशत् ॥ १८
स चापि पापप्रकृतिर्दैतेयापसदो नृप ।
मय्यवर्षत दुर्धर्षः शरधाराः सहस्रशः ॥ १९
सैनिकान्मम सूतं च हयांश्च समवाकिरत् ।
अचिन्तयन्तस्तु शरान्वयं युध्याम भारत ॥ २०
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
प्रपद्येऽहं वसून्रुद्रानादित्यान्मरुद्गणान् ।
विश्वेदेवांस्तथा साध्याञ्शान्त्यर्थं भरतर्षभ ।

[(L. 1) D4. 6 Cnp ज्येष्ठोपचार्यो. K4 B4 De D2 °मास्थितः (for °कारकः).]

— ^{c}) K2 स्वाम् (for तेऽस्तु). K2 B1. 3 तु (for ऽस्तु). Śi K2. 4 B1. 3 De D2. 3. 5 अंत° (for आन्त°). — ^{d}) Śi K1. 3 D1-3 सर्वशः; B3 पार्थिव (for भारत). — ^{e}) Śi देवेभ्यश्चैव; K4 पार्थिवेभ्यश्च. — After 25, K2 B De Dn D4-6 ins.:

151* एवमुक्त्वाशिषः कृष्णा विरराम यशस्विनी ।;

while G4 ins after 25^{ef} (transposed):

152* अवरोधाद्वने वासात्सर्वस्वहरणादपि ।
इदं दुःखतरं मन्ये पुत्रेभ्यश्च विवासनम् ।

☞ For stanzas 20-25, S subst. the foll. passage of 33 lines (with some v l. which have been ignored):

153* प्राञ्जलिः पाण्डवं कृष्णा देवानां कुर्वती नमः ।
वाग्भिः परमशक्ताभिर्मङ्गलाभिरभाषत ।
(25^{ab}) नमो धात्रे विधात्रे च स्वस्ति गच्छ वनाद्वनम् ।
धर्मस्त्वां जुषतां पार्थ भास्करश्च विभावसुः ।
ब्रह्मा त्वां ब्राह्मणाश्चैव पालयन्तु धनंजय । [5]
ज्येष्ठापचायी ज्येष्ठस्य भ्रातुर्वचनमास्थितः ।
प्रपद्येथा वसून्रुद्रानादित्यान्समरुद्गणान् ।
विश्वेदेवांस्तथादित्याञ्शान्त्यर्थं भरतर्षभ ।
(25^{cd}) स्वस्ति तेऽस्त्वान्तरिक्षेभ्यो दिव्येभ्यो भरतर्षभ ।
(25^{ef}) पार्थिवेभ्यश्च सर्वेभ्यो ये केचित्परिपन्थिनः । [10]
अवरोधाद्वने वासात्सर्वस्वहरणादपि ।
इदं दुःखतरं मन्ये पुत्रेभ्यश्च विवासनात् ।
(21^{ab}) मा स्माहं क्षत्रियकुले जातुचित्पुनराभवम् ।
(21^{cd}) ब्राह्मणेभ्यो नमस्यामि येषां नायुधजीविका ।
ध्वंसितः स्वगृहेभ्यश्च राष्ट्राच्च भरतर्षभ । [15]
वने प्रतिष्ठितो भूत्वा सौहार्दादवनिष्ठसे ।
जेता यः सर्वशत्रूणां यः पावकमतर्पयत् ।
जनस्त्वां पश्यतीदानीं गच्छन्तं भरतर्षभ ।
अस्मिन्नृते महारण्ये भ्रातरः सुहृदश्च ते ।
त्वत्कथाः कथयिष्यन्ति चारणा ऋषयस्तथा । [20]
(20^{ab}) यत्तत्कुन्ती महाबाहो जातस्यैच्छद्वनंजय ।
(20^{cd}) तत्ते सर्वं तथैवास्तु यथा च मनसेच्छसि ।
वसुदेवस्वसा देवी त्वामार्या पुनरागतम् ।
सा पश्यतु पृथा पार्थ सहस्राक्षमिवादितिः ।
(22^{ab}) नूनं ते भ्रातरः सर्वे त्वत्कथाभिः प्रजागरे । [25]
(22^{cd}) रंस्यन्ते तव कर्माणि कीर्तयन्तः पुनः पुनः ।
(23^{ab}) नैव नः पार्थ भोगेषु न धने नोत जीविते ।
(23^{cd}) तुष्टा बुद्धिर्भवित्री वा त्वयि दीर्घप्रवासिनि ।
आशा संजायते वीर त्वय्यरण्यं प्रपद्यति ।
(24^{ab}) त्वयि नः पार्थ सर्वेषां सुखदुःखे प्रतिष्ठिते । [30]
(24^{cd}) जीवितं मरणं चैव स्वर्गोऽथ नरकस्तथा ।
(24^{ef}) आपृष्टो मेऽसि कौन्तेय स्वस्ति प्रामुहि पाण्डव ।
कृतास्त्रं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतम् ।

— After 25, K2 B De Dn D4-6 ins.:

154* एवमुक्त्वाशिषः कृष्णा विरराम यशस्विनी ।

26 ^{a}) T G3. 4 M1 प्रदक्षिणं ततः (by transp°); G1 प्रदक्षिणं पुनः. — After 26^{ab}, K1 B4 De D1-3. 5 ins.:

155* कृष्णाकटाक्षपाथेयं हृदि कृत्वा ततोऽर्जुनः ।

— ^{d}) S सुमनाः प्रीतिमांस्तदा. — After 26, T G1. 3. 4 M1 ins.:

156* शनैरिव दिशं वीर उदीचीं भरतर्षभः ।
संहरंस्तरसा वृक्षाल्लतावल्लीश्च भारत ।
असज्जमानो वृक्षेषु जगाम सुमहाबलः ।

27 ^{a}) A few MSS. अप° (for अपा°). — T2 G3 om. 27^{cd}. — After 27, K2 B D (except D1-3) ins.:

157* सोऽगच्छत्पर्वतांस्तात तपोधननिषेवितान् ।

C 3. 1494
B. 3. 37. 39
K. 3. 37. 72

सोऽगच्छत्पर्वतं पुण्यमेकाह्नैव महामनाः ।
मनोजवगतिर्भूत्वा योगयुक्तो यथानिलः ॥ २८
हिमवन्तमतिक्रम्य गन्धमादनमेव च ।
अत्यक्रामत्स दुर्गाणि दिवारात्रमतन्द्रितः ॥ २९
इन्द्रकीलं समासाद्य ततोऽतिष्ठद्धनंजयः ।
अन्तरिक्षे हि शुश्राव तिष्ठेति स वचस्तदा ॥ ३०
ततोऽपश्यत्सव्यसाची वृक्षमूले तपस्विनम् ।
ब्राह्म्या श्रिया दीप्यमानं पिङ्गलं जटिलं कृशम् ॥ ३१
सोऽब्रवीद्दर्जुनं तत्र स्थितं दृष्ट्वा महातपाः ।
कस्त्वं तातेह संप्राप्तो धनुष्मान्कवची शरी ।
निबद्धासितलत्राणः क्षत्रधर्ममनुव्रतः ॥ ३२
नेह शस्त्रेण कर्तव्यं शान्तानामयमालयः ।
विनीतक्रोधहर्षाणां ब्राह्मणानां तपस्विनाम् ॥ ३३
नेहास्ति धनुषा कार्यं न संग्रामेण कर्हिचित् ।
निक्षिपैतद्धनुस्तात प्राप्तोऽसि परमां गतिम् ॥ ३४
इत्यनन्तौजसं वीरं यथा चान्यं पृथग्जनम् ।
तथा वाचमथाभीक्ष्णं ब्राह्मणोऽर्जुनमब्रवीत् ।
न चैनं चालयामास धैर्यात्सुदृढनिश्चयम् ॥ ३५
तमुवाच ततः प्रीतः स द्विजः प्रहसन्निव ।
वरं वृणीष्व भद्रं ते शक्रोऽहमरिसूदन ॥ ३६
एवमुक्तः प्रत्युवाच सहस्राक्षं धनंजयः ।
प्राञ्जलिः प्रणतो भूत्वा शूरः कुरुकुलोद्वहः ॥ ३७

दिव्यं हैमवतं पुण्यं देवजुष्टं परंतपः ।
[Cf. 28, 29.]

28 T_2 G_3 om. 28^{a}–29^{b}. — ^{a}) $Ś_1$ स गच्छन्; K_1 Dn_1 आगच्छत्; K_2 $B_{2.3}$ $Dn_{2.n5}$ D_{4-6} अगच्छत्. K_4 D_1 रम्यम् (for पुण्यम्). — ^{b}) S (T_2 G_3 om.) सु- (for [ए]व). K_4 °बलः (for °मनाः) — ^{c}) K_4 स तत्र जवगो भूत्वा. — ^{d}) $Ś_1$ K_1 महाबलाः; D_5 महा(m यथा as in text)निलः.

29 T_2 G_3 om. 29^{ab} (cf. v.l. 28). — ^{cd}) $Ś_1$ अनु°; K_3 अत्यक्रामत (om. स); K_4 अभ्य° (for अत्य°). K_1 Dc Dn_1 D_5 T_1 G_1 M सु- (for स). T_2 G_{2-4} दिवारात्रं (for स दुर्गाणि), and ध्यायन्नक्षाणि (for दिवारात्रम्). T_1 अरिंदमः (for अतन्द्रितः).

30 ^{a}) B (except B_1) इंद्रकीलकमासाद्य. — ^{b}) K_1 Dn_3 M_2 तत्रा° (for ततो°). — ^{c}) $K_{2.3}$ Dn D_{4-6} °रिक्षेति; B °रि($B_{2.3}$ °री)क्षे च (for °रिक्षे हि). D_2 ह; T_1 सु-; T_2 $G_{3.4}$ [स]थ; $G_{1.2}$ M स (for हि). — ^{d}) D_1 तिष्ठ तिष्ठ (for तिष्ठेति स). D_3 स्म; S च (for स). — After 30, $K_{2.4}$ B D (except $D_{1.3}$) ins.:

158* तच्छ्रुत्वा सर्वतो दृष्टिं चारयामास पाण्डवः ।

— K_4 D_2 (both om. lines 3–4) cont.: S (except G_2 M_2) ins. after 30:

159* गत्वा स षडहोरात्रान्सप्तमेऽहनि पाण्डवः ।
प्रस्थेन्द्रकीलस्य शुभे तपोयोगपरोऽभवत् ।
ऊर्ध्वबाहुर्न चाङ्गानि प्रास्पन्दयत किंचन ।
समाहितात्मा नियतः सहस्राक्षसुतोऽच्युतः ।

[(L. 4) T_2 G_3 सहस्राक्षं सारस्थितः (for the posterior half).]

31 ^{a}) K_1 इति; K_2 B Dn D_{4-6} अथ (for ततो). G_4 सव्यसाची तपोपश्यद्.

32 ^{c}) $Ś_1$ K_1 $B_{3.4}$ निबद्धासितनु°; M_2 बद्धासिः सतल°.

33 ^{b}) K_2 B_3 Dn $D_{4.6}$ एष (for अयम्).

34 ^{a}) $G_{3.4}$ नेहात्र. — ^{b}) $K_{2.3}$ B Dc Dn D_{4-6} न संग्रामोत्र (B3 °स्ति); D_{1-3} न च युद्धेन.

35 M_2 om. 35^{ab}. — ^{a}) $Ś_1$ $K_{1.3.4}$ D_4 अनन्या- (K_1 D_4 °नंता)मोजसा; K_2 Dn ओजसा तेजसा; B Dc D_6 अनंतमोजसा (B_4 अनिंद्यनौजसा); $D_{1.5}$ अनन्य(D_5 °न्या)-मोजसा; D_3 अनन्याश्चोजसाः D_5 अलभ्यमोजसा; T_2 G_3 इत्यलं तेजसा (for इत्यनन्तौजसं). N T_1 वीर (Dc वीरो). — ^{b}) N नान्यः; T_1 चान्यः (for चान्यं). $Ś_1$ K_{1-3} Dc Dn D_{1-5} पुमान्कचित्; K_4 B D_6 T_1 पृथग्जनः. — ^{cd}) $K_{1.4}$ Dc_1 $D_{2.3}$ यथा. $Ś_1$ $K_{1.2.4}$ D_{1-3} तत्त्वम्; K_3 B Dc Dn D_{4-6} हसन् (for वाचम्). N इवाभीक्ष्णं ($Ś_1$ °क्ष्णो); T $G_{3.4}$ अभीक्ष्णं स; M_2 तथाभीक्ष्णं (for अथाभीक्ष्णं). G_2 न चोवाच ततोभीक्ष्णं ब्राह्मणोत्तममर्जुनः. — ^{f}) D_5 वीर्यात् (for धैर्यात्). $Ś_1$ सुकृति°; $K_{1.2.4}$ B Dn $D_{1.4.6}$ सुधृत°; K_3 सुधृति°; $D_{2.3}$ सुकृत°; G_1 सुदृढनिश्चयः; M_1 °निश्चितं.

36 ^{a}) $Ś_1$ $K_{1.3}$ Dc D_{1-3} उवाच तं (by transp.). — $Ś_1$ om. 36^{b}–37^{a}. — After 36^{ab}, K_3 B $D_{4.6}$ read 39^{cd}, *repeating* it in its proper place. — ^{cd}) B_3 कामान्वृणीष्व लोकांस्त्वं प्राप्तोसि परमां गतिं (cf. 39^{ef}).

37 $Ś_1$ om. 37^{a} (cf. v.l. 36). — ^{ab}) K_3 B (except B_4) Dn $D_{4.6}$ transp. प्रत्युवाच and सहस्राक्षं. K_1 महा

ईप्सितो ह्येष मे कामो वरं चैनं प्रयच्छ मे ।
त्वत्तोऽद्य भगवन्नस्त्रं कृत्स्नमिच्छामि वेदितुम् ॥ ३८
प्रत्युवाच महेन्द्रस्तं प्रीतात्मा प्रहसन्निव ।
इह प्राप्तस्य किं कार्यमस्त्रैस्तव धनंजय ।
कामान्वृणीष्व लोकांश्च प्राप्तोऽसि परमां गतिम् ॥ ३९
एवमुक्तः प्रत्युवाच सहस्राक्षं धनंजयः ।
न लोकान्न पुनः कामान्न देवत्वं कुतः सुखम् ॥ ४०
न च सर्वामरैश्वर्यं कामये त्रिदशाधिप ।
भ्रातॄंस्तान्विपिने त्यक्त्वा वैरमप्रतियात्य च ।
अकीर्तिं सर्वलोकेषु गच्छेयं शाश्वतीः समाः ॥ ४१
एवमुक्तः प्रत्युवाच वृत्रहा पाण्डुनन्दनम् ।
सान्त्वयञ्श्लक्ष्णया वाचा सर्वलोकनमस्कृतः ॥ ४२
यदा द्रक्ष्यसि भूतेशं त्र्यक्षं शूलधरं शिवम् ।
तदा दातास्मि ते तात दिव्यान्यस्त्राणि सर्वशः ॥ ४३
क्रियतां दर्शने यत्नो देवस्य परमेष्ठिनः ।
दर्शनात्तस्य कौन्तेय संसिद्धः स्वर्गमेष्यसि ॥ ४४
इत्युक्त्वा फल्गुनं शक्रो जगामादर्शनं ततः ।
अर्जुनोऽप्यथ तत्रैव तस्थौ योगसमन्वितः ॥ ४५

इति श्रीमहाभारते आरण्यकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

जनमेजय उवाच ।
भगवञ्श्रोतुमिच्छामि पार्थस्याक्लिष्टकर्मणः ।
विस्तरेण कथामेतां यथास्त्राण्युपलब्धवान् ॥ १
कथं स पुरुषव्याघ्रो दीर्घबाहुर्धनंजयः ।
वनं प्रविष्टस्तेजस्वी निर्मनुष्यमभीतवत् ॥ २
किं च तेन कृतं तत्र वसता ब्रह्मवित्तम ।

C. 3. 1518
B. 3. 38. 3
K. 3. 38. 3

भुजः (for धनं°). — [c]) Śi K4 B3 Dc D1–3 T1 प्रयतो (for °णं°).

38 [a]) K2 B Dn D1. 4. 6 वै (for मे). — [b]) K4 B4 S चैव (M2 स्वेनं); B2 चेमं; D5 श्रेष्ठं (for चैनं). Śi K1. 3 D1–3 वरश्चैष प्रदीयतां; Dc वरश्रेष्ठं प्रयच्छति.

39 K4 D1 om. (hapl.) 39c–40b. — 39f = 34d. — [e f]) B2 Dn D4. 6 त्वं (for च). For 39e f, K2 subst. a v.l. of 36cd.

40 K4 D1 om. 40ab (cf. v.l. 39); T1 om. 40–41. — 40a = 42a. — [c]) Śi K2 B4 Dn D3–6 लोभान्न (for लोकान्न). — [d]) B1 Dn पुनः (for कुतः).

41 T1 om. 41 (cf. v.l. 40). — [c]) G (except G3) M विजने (for विपिने).

43 [b]) Śi K1 रुद्रं; K3 (? gloss) त्र्यंबकं (for त्र्यक्षं). B3 हरं (for शिवम्). B4 त्र्यंबकं शूलपाणिनं. — [c]) K3 कौंतेय (for ते तात).

44 [c]) Śi K1. 3 Dc Dn3 D1–3. 5 M1 देवस्य (for कौन्तेय).

45 [a]) N G1 फाल्गुनं (Śi K1 भगवान्; K3 अर्जुनं [? gloss]) (for फल्गुनं). — [b]) K2 B Dc Dn D4–6 T2 G3 पुनः; D1 गतः (for ततः). — [c]) Dc एकस् (for एव). — [d]) Śi K1 D1–3 योगबलान्वितः.

Colophon om. in B1 D4. 6. G4 partly broken. — *Major parvan:* Śi K1 Dn2 T G2. 3 आरण्य; M2 अरण्यक. — *Sub-parvan:* K1 कैरात; T2 G1. 3 M2 किरातार्जुनीय. — *Adhy. name:* K4 अर्जुनयोगाश्रयः; Dc इन्द्रकीलानुगमने इन्द्रदर्शनं; D1. 3. 5 इन्द्रकीलगमनं (D3 °गमः); D2 इन्द्रकीलगमने इंद्रागमनः (sic); T1 G1 M शक्र(T1 इन्द्र)-दर्शनं; G2 इन्द्रार्जुनसमागमः. — *Adhy. no.* (figures, words or both): Dn S 37; D1 38 (as in text). — *Śloka no.:* Dn 59; D1 53.

39

2 D3 om. 2. — [a]) K2 B Dn D4–6 T2 G3 यथा च (for कथं स).

3 [a]) S [अ]नेन (for तेन). K4 तात; D3. 5 कर्म (for तत्र). — Śi om. (hapl.) 3c–4b. — [c]) S रुद्रो (for स्थाणुर्).

C. 3. 1518
B. 3. 38. 3
K. 3. 38. 3

कथं च भगवान्स्थाणुर्देवराजश्च तोषितः ॥ ३
एतदिच्छाम्यहं श्रोतुं त्वत्प्रसादाद्द्विजोत्तम ।
त्वं हि सर्वज्ञ दिव्यं च मानुषं चैव वेत्थ ह ॥ ४
अत्यद्भुतं महाप्राज्ञ रोमहर्षणमर्जुनः ।
भवेन सह संग्रामं चकाराप्रतिमं किल ।
पुरा प्रहरतां श्रेष्ठः संग्रामेष्वपराजितः ॥ ५
यच्छ्रुत्वा नरसिंहानां दैन्यहर्षातिविस्मयात् ।
शूराणामपि पार्थानां हृदयानि चकम्पिरे ॥ ६
यद्यच्च कृतवानन्यत्पार्थस्तदखिलं वद ।
न ह्यस्य निन्दितं जिष्णोः सुसूक्ष्ममपि लक्षये ।
चरितं तस्य शूरस्य तन्मे सर्वं प्रकीर्तय ॥ ७

वैशंपायन उवाच ।

कथयिष्यामि ते तात कथामेतां महात्मनः ।
दिव्यां कौरवशार्दूल महतीमद्भुतोपमाम् ॥ ८
गात्रसंस्पर्शसंबन्धं त्र्यम्बकेण सहानघ ।
पार्थस्य देवदेवेन शृणु सम्यक्समागमम् ॥ ९
युधिष्ठिरनियोगात्स जगामामितविक्रमः ।
शक्रं सुरेश्वरं द्रष्टुं देवदेवं च शंकरम् ॥ १०
दिव्यं तद्धनुरादाय खड्गं च पुरुषर्षभः ।
महाबलो महाबाहुरर्जुनः कार्यसिद्धये ।
दिशं ह्युदीचीं कौरव्यो हिमवच्छिखरं प्रति ॥ ११
ऐन्द्रिः स्थिरमना राजन्सर्वलोकमहारथः ।
त्वरया परया युक्तस्तपसे धृतनिश्चयः ।
वनं कण्टकितं घोरमेक एवान्वपद्यत ॥ १२
नानापुष्पफलोपेतं नानापक्षिनिषेवितम् ।
नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ १३
ततः प्रयाते कौन्तेये वनं मानुषवर्जितम् ।
शङ्खानां पटहानां च शब्दः समभवद्दिवि ॥ १४
पुष्पवर्षं च सुमहन्निपपात महीतले ।
मेघजालं च विततं छादयामास सर्वतः ॥ १५

---

4 Ś1 om. 4^{ab} (cf. v.l. 3). — [c]) Ś1 K1 हि (for च). K2 Dn1. n3 त्वं हि सर्वं भविष्यंति. — [d]) Ś1 K1 मानुष्यं. Ś1 K1 किं न; T2 G2–4 चापि (for चैव). T2 G2–4 हि (for ह).

5 [a]) Ś1 K1. 3. 4 महाब्रह्मन्; B4 Dc D1–3. 5. 6 इदं (B4 अहं; D1. 3. 5 इह) ब्रह्मन् (for महाप्राज्ञ). K2 B1–3 Dn D4 अत्यद्भुततमं ब्रह्मन्. — [b]) K3. 4 (by corr.) B Dc D1. 4–6 लोम° (for रोम°).

6 [a]) B2 Dc D5 S (except T2 G3 M2) तच्छ्रुत्वा. — [c]) K4 D1 शूराणां पार्थिवानां च.

7 [a]) Ś1 K1. 3. 4 Dc D1–3. 5 यच्चापि कृ°. — [b]) Ś1 K1. 3 Dc D1–3. 5 अपि मे (for अखिलं). — [c]) M1 कर्म (for जिष्णोः). — [e]) K4 शौर्यं च (for शूरस्य). — [f]) T1 transp. तन्मे and सर्वं. Ś1 K1. 3. 4 Dc D1–3. 5 तस्मात्त्वमपि कीर्तय.

8 [a]) Ś1 K1. 3 Dc D1–3. 5 राजन् (for तात). K4 अहं ते कथयिष्यामि. — [c]) K2 Dn D4. 6 T2 G3 पौरव° (for कौ°).

9 [a]) N (K4 marg.) G1 M1 °संस्पर्शसंबद्धां (Ś1 B2 D2 °बद्धं; Dc M1 °बंधां); K2 M2 °स्पर्शनसंभाषं (M2 °बंधां). — [b]) K2 B Dn S (except T1 G1 M1) त्र्यंबकेण (as in text); the rest °न. K2 Dc1 D5 महानघ; S (except G4) महाहवे. — [d]) Dc D5 राजन् (for सम्यक्).

10 Ś1 K1 om. 10^{ab}. — [a]) K3 D1 T2 G (except G1) च; M2 तु (for स).

11 [a]) G2. 4 च (for तद्). — [b]) K2 B Dn D4. 6 कनकरसरुं; K3. 4 Dc2 D1. 3 T2 G1. 3 पुरुषर्षभ. — [d]) Ś1 K3 Dc D5 प्रागुदीचीमरिंदम; K1 D1–3 प्रागुदीचीं धनंजयः. — [e]) Ś1 K1. 3 Dc D1–3. 5 प्रतस्थे (for ह्युदीचीं).

12 T2 G (except G1) ऐंद्रिः स्थिरो महाराज (for [a]), श्रिया परमया युक्तः (for [c]), and कृत° (for धृत° in [d]). — [e]) Ś1 K2. 3 B (except B3) D5 कंटकिनं. Ś1 K (except K2) Dc D2. 3. 5 दुर्गं (for घोरं). — [f]) G2 M2 एकमेकोन्व°.

13 [b]) S °नि(G1 M1. 2 °वि)नादितं. — After 13, M1 ins.:

160* गन्धर्वैरप्सरोभिश्च क्रीडद्भिरुपशोभितम् ।
मत्तैः किंपुरुषैश्चैव पानभूमिगतैस्तथा ।
तत्प्रियाभिः समन्ताच्च व्यावृत्य परिवीक्षितः ।
जगाम नरशार्दूलो देवं द्रष्टुं पिनाकिनम् ।

— 13^{c} = 1. 173. 6^{c}.

14 Ś1 K1 om. (hapl.) 14^{ab}. — [a]) S बीभत्सौ (for कौन्तेये).

15 [a]) K2. 4 B3 Dn D1. 6 [अ]नु- (for सु-). — [c])

अतीत्य वनदुर्गाणि संनिकर्षे महागिरेः ।
शुशुभे हिमवत्पृष्ठे वसमानोऽर्जुनस्तदा ॥ १६
तत्रापश्यद् द्रुमान्फुल्लान्विहगैर्वल्गु नादितान् ।
नदीश्च बहुलावर्ता नीलवैडूर्यसंनिभाः ॥ १७
हंसकारण्डवोद्गीताः सारसाभिरुतास्तथा ।
पुंस्कोकिलरुताश्चैव क्रौञ्चबर्हिणनादिताः ॥ १८
मनोहरवनोपेतास्तस्मिन्नतिरथोऽर्जुनः ।
पुण्यशीतामलजलाः पश्यन्प्रीतमनाभवत् ॥ १९
रमणीये वनोद्देशे रममाणोऽर्जुनस्तदा ।
तपस्युग्रे वर्तमान उग्रतेजा महामनाः ॥ २०
दर्भचीरं निवस्याथ दण्डाजिनविभूषितः ।
पूर्णे पूर्णे त्रिरात्रे तु मासमेकं फलाशनः ।
द्विगुणेनैव कालेन द्वितीयं मासमत्यगात् ॥ २१
तृतीयमपि मासं स पक्षेणाहारमाचरन् ।
शीर्णं च पतितं भूमौ पर्ण समुपयुक्तवान् ॥ २२
चतुर्थे त्वथ संप्राप्ते मासि पूर्णे ततः परम् ।
वायुभक्षो महाबाहुरभवत्पाण्डुनन्दनः ।
ऊर्ध्वबाहुर्निरालम्बः पादाङ्गुष्ठाग्रविष्ठितः ॥ २३
सदोपस्पर्शनाच्चास्य बभूवुरमितौजसः ।
विद्युदम्भोरुहनिभा जटास्तस्य महात्मनः ॥ २४
ततो महर्षयः सर्वे जग्मुर्देवं पिनाकिनम् ।
शितिकण्ठं महाभागं प्रणिपत्य प्रसाद्य च ।
सर्वे निवेदयामासुः कर्म तत्फल्गुनस्य ह ॥ २५
एष पार्थो महातेजा हिमवत्पृष्ठमाश्रितः ।
उग्रे तपसि दुष्पारे स्थितो धूमाययन्दिशः ॥ २६
तस्य देवेश न वयं विद्मः सर्वे चिकीर्षितम् । C. 3. 1545 B. 3. 38. 30 K. 3. 38. 31

S सततं (for वि°). — [d]) Ś1 K1 B4 D1–3 सर्वशः.

16 [a]) K2. 4 B Dn D4. 6 T1 G1. 4 M सोतीत्य.

17 [a]) T1 G1 पुण्य-; T2 G2–4 M2 तत्र; M1 पुण्यान् (for [अ]पश्यद्). — [b]) Dc1 D1. 3 विहंगैर्. K4 corrupt. — [c]) K2 Dn D4 S विपुलावर्ता. — [d]) Ś1 K1. 3 Dc D1–3. 5 °सप्रभाः; K2. 4 B Dn D4. 6 वैदू(*or* °डू)र्यविम(K4 °सलि)लप्रभाः.

18 [d]) Ś1 K1 हंस°.

20 Ś1 om. 20^{ab} (along with 19^{cd}). — [b]) T2 G (except G1) °रथस्ततः.

21 After 21^{ab}, K2 B Dn D4. 6 read 22^{cd}. — [c]) Ś1 K1. 3. 4 Dc D1. 3. 5 तु; K2 B2 Dn D2. 4. 6 हि; B1. 3. 4 T1 च (for °[ण]च). — [f]) Ś1 K1. 3. 4 B1. 4 Dc Dn3 D1–3. 5 अभ्यगात्; B3 Dn1 अत्ययात्; Dn2 D4. 6 अभ्ययात्. K3 द्वितीयं च समभ्ययात्.

22 [b]) T2 G (except G1) क्रमेण (for पक्षेण). Ś1 B D5 T1 G1 आचरत्. — K2 B Dn D4. 6 read 22^{cd} after 21^{ab}. — [c]) S जीर्णं (for शी°). — [d]) Ś1 K1 T2 G (except G1) °भुक्तवान्.

23 [a]) Ś1 K3 Dc1 D1–3. 5 [ऽ]पि; M2 हि (for तु). Ś1 अत्र-; T1 अति- (for अथ). K1 चतुर्थे प्रथमं प्राप्तौ. — [b]) K2. 4 B Dn D4. 6 मासे भरतसत्तमः (K2 B2. 3 °म). — [cd]) K4 निराहारः (for महा°), and स तदा (for अभवत्). — [f]) B2 Dc2 D3 G4 पदांगुष्ठाग्र-. Ś1-निष्ठितः; K B Dn1. n2 D3. 5. 6 -धिष्ठितः; T2 G3 -पीडिताः.

24 [a]) Ś1 K1 Dc2 D5 चैव; K3 तस्य; K4 D1–3 तत्र; M2 चापि (for चास्य). — [c]) Ś1 Dc °दर°; K1. 3 D1–3. 5 °धर° (for °रुह°).

25 [b]) Ś1 K1 transp. जग्मुः and देवं. — After 25^{ab}, K (except K3) B Dn D4. 6 M1 (most of which om. 25^{cd}) ins.:

161* निवेदयिषवः पार्थं तपस्युग्रे समास्थितम् ।
[K4 व्यवस्थितं; B2 समाहितं.]

— K2. 4 B Dn D4. 6 om. 25^{cd}. — [c]) T2 G नीलकंठ. S महादेवं. — [d]) Dc D5 S अ(Dc D5 ते)भिवाद्य प्रणम्य च. — [cf]) Dc D1–3. 5 फाल्गुनस्य. K2. 4 B Dn D4. 6 तं (K2 B2–4 ते) प्रणम्य महादेवं शशंसुः पार्थकर्म तत्.

26 [a]) S (except M1) एकः (for एष). — [b]) B3 G4 °पार्श्वम् (for °पृष्ठम्). K1. 2 B4 Dn D4 G4 आस्थितः; K4 आगतः (for आश्रितः). — [d]) K4 Dc1 Dn3 D1. 3 S धूमापयन्. K4m धूममुत्पादयन्दिशः.

27 [b]) Dc D5 कर्म (for सर्वे). S (except T1 M) विजानीमो मनीषितं. — After 27, K1. 2 B D (except D1–3) ins.:

162* तेषां तद्वचनं श्रुत्वा मुनीनां भावितात्मनाम् ।
उमापतिर्भूतपतिर्वाक्यमेतदुवाच ह ।

28 Ś1 देवदेव आह; K1. 3 Dn महादेव उ°; K3. 4 D1 ईश्वर उ°; D2 G4 श्रीमहेश्वर उ° (G4 om. उ°). — After

C. 3. 1546
B. 3. 38. 31
K. 3. 38. 31

संतापयति नः सर्वानसौ साधु निवार्यताम् ॥ २७

महेश्वर उवाच ।

शीघ्रं गच्छत संहृष्टा यथागतमतन्द्रिताः ।
अहमस्य विजानामि संकल्पं मनसि स्थितम् ॥ २८
नास्य स्वर्गस्पृहा काचिन्नैश्वर्यस्य न चायुषः ।
यत्त्वस्य काङ्क्षितं सर्वं तत्करिष्येऽहमद्य वै ॥ २९

वैशंपायन उवाच ।

ते श्रुत्वा शर्ववचनमृषयः सत्यवादिनः ।
प्रहृष्टमनसो जग्मुर्यथास्वं पुनराश्रमान् ॥ ३०

इति श्रीमहाभारते आरण्यकपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

वैशंपायन उवाच ।

गतेषु तेषु सर्वेषु तपस्विषु महात्मसु ।
पिनाकपाणिर्भगवान्सर्वपापहरो हरः ॥ १
कैरातं वेषमास्थाय काञ्चनद्रुमसंनिभम् ।
विभ्राजमानो वपुषा गिरिर्मेरुरिवापरः ॥ २
श्रीमद्धनुरुपादाय शरांश्चाशीविषोपमान् ।
निष्पपात महार्चिष्मान्दहन्कक्षमिवानलः ॥ ३
देव्या सहोमया श्रीमान्समानव्रतवेषया ।
नानावेषधरैर्हृष्टैर्भूतैरनुगतस्तदा ॥ ४
किरातवेषप्रच्छन्नैः स्त्रीभिश्चानु सहस्रशः ।
अशोभत तदा राजन्स देवोऽतीव भारत ॥ ५
क्षणेन तद्वनं सर्वं निःशब्दमभवत्तदा ।

---

the ref., K1. 2 B D (except D1–3) T2 G (except G1) ins.:

163* न वो विषादः कर्तव्यः फल्गुनं प्रति सर्वशः ।

[Some MSS. फाल्गुनं. T2 G (except G1) सर्वथा.]

29 [a]) Ś1 D3 T1 स्वर्गे (for स्वर्ग-). — [b]) K2 B Dn D4. 6 तथा˚; D1–3 च ना˚ (for न चा˚). — [c]) K2 B1. 3. 4 Dn D4. 6 T2 G M2 तस्य; B2 M1 अस्य (for स्वस्य). T1. 2 (before corr.) G2. 4 M1 प्राप्तुं; G1 M2 प्राप्तं (for सर्वं). — [d]) Ś1 K1. 3. 4 Dc D1–3. 5 तदद्य (Dc तदस्य; D5 तत्सर्वं) करवाण्यहं.

30 Ś1 om. 30. Most MSS. om. वैशं˚ उ˚. — [a]) K2. 4 B Dn D1. 4–6 तच्छ्रुत्वा. K1. 4 Dc D1–3. 5 भगवद्वाक्यं; K2 तस्य वचनं; K3 ऋषयो वाक्यं; M1 सत्यवचनं. — [d]) N (except K1 Dc; Ś1 om.) यथास्वान्. K1 Dc T G पुनराश्रमं (T1 G1 ˚मात्); K2 B Dn D4. 6 ˚लयान्.

Colophon. — *Major parvan:* Ś1 K1 Dn2 T2 G2–4 आरण्य. — *Sub-parvan:* K1. 3 B4 Dc कैरात; K2 B2 Dn1. n3 D4. 6 T G1. 3 किरातार्जुनीय; D3 कैरातार्जुन. — *Adhy. name:* B4 D5 शंभु(D5 महादेव)वाक्यं; D1 G3 M1 अर्जुनतपश्चरणं (D1 ˚श्चर्या); D3 इंद्रकील अर्जुनतपश्चर्या; D3 तपश्चर्या; T2 G3 तपश्चरणं. — *Adhy. no.* (figures, words or both): K1 Dn T2 G M 38; D1 39 (as in text); T1 36. — *Śloka no.:* Dn 35; D1 33.

40

2 Ś1 om. 2. — [a]) D2 T1 G2. 4 रूपम् (for वेषम्). — [b]) Dc T G2. 3 M2 ˚संनिभः. — [c]) K2 B1. 4 Dn D4. 6 विपुलो (for वपुषा).

3 [a]) Ś1 K1 D1–3 चित्रं; K4 D5 श्रीमान् (for श्रीमद्). — 3[b] = 9[b]. — [c]) Ś1 K3 Dn D1–3 महावेगो (for महार्चिष्मान्). — [d]) Ś1 K1. 3 D1. 3 T1 दहनः कक्षवानिव; K2 B Dc Dn D4–6 दहनो देहवानिव.

4 [a]) Ś1 K2 D6 (before corr.) दिव्या (for देव्या). — [c]) T1 नानाचराचरैर्हृष्टैः. — [d]) B1. 4 D1. 6 अनुगतैस्. K1. 3 B1. 4 D4. 6 तथा; Dc D5 प्रभुः; D1 सदा (for तदा).

5 [a]) K1. 2 B Dn D4. 6 T2 G3 ˚संछन्नाः. — [b]) K2. 4 B D (except D5) T1 अपि (for अनु). — [c]) Ś1 M1 महाराज (for तदा राजन्). — [d]) N (except Ś1 K1) M2 देशो (for देवो).

6 [a]) K3 D1 बलं (for वनं). — [d]) D1 om. च. K1 D1. 3. 5 च व्युपारमत्; K3 चाथ सारसान् (for चाप्युपा˚) — After 6, K4 D2 ins.:

नादः प्रस्रवणानां च पक्षिणां चाप्युपारमत् ॥ ६
स संनिकर्षमागम्य पार्थस्याक्लिष्टकर्मणः ।
मूकं नाम दितेः पुत्रं ददर्शाद्भुतदर्शनम् ॥ ७
वाराहं रूपमास्थाय तर्कयन्तमिवार्जुनम् ।
हन्तुं परमदुष्टात्मा तमुवाचाथ फल्गुनः ॥ ८
गाण्डीवं धनुरादाय शरांश्चाशीविषोपमान् ।
सज्यं धनुर्वरं कृत्वा ज्याघोषेण निनादयन् ॥ ९
यन्मां प्रार्थयसे हन्तुमनागसमिहागतम् ।
तस्मात्त्वां पूर्वमेवाहं नेष्यामि यमसादनम् ॥ १०
तं दृष्ट्वा प्रहरिष्यन्तं फल्गुनं दृढधन्विनम् ।
किरातरूपी सहसा वारयामास शंकरः ॥ ११
मयैष प्रार्थितः पूर्वं नीलमेघसमप्रभः ।
अनादृत्यैव तद्वाक्यं प्रजहाराथ फल्गुनः ॥ १२
किरातश्च समं तस्मिन्नेकलक्ष्ये महाद्युतिः ।
प्रमुमोचाशनिप्रख्यं शरमग्निशिखोपमम् ॥ १३
तौ मुक्तौ सायकौ ताभ्यां समं तत्र निपेततुः ।
मूकस्य गात्रे विस्तीर्णे शैलसंहनने तदा ॥ १४
यथाशनिविनिष्पेषो वज्रस्येव च पर्वते ।
तथा तयोः संनिपातः शरयोरभवत्तदा ॥ १५
स विद्धो बहुभिर्बाणैर्दीप्तास्यैः पन्नगैरिव ।
ममार राक्षसं रूपं भूयः कृत्वा विभीषणम् ॥ १६
ददर्शाथ ततो जिष्णुः पुरुषं काञ्चनप्रभम् ।
किरातवेषप्रच्छन्नं स्त्रीसहायममित्रहा ।
तमब्रवीत्प्रीतमनाः कौन्तेयः प्रहसन्निव ॥ १७
को भवानटते शून्ये वने स्त्रीगणसंवृतः ।
न त्वमस्मिन्वने घोरे बिभेषि कनकप्रभ ॥ १८
किमर्थं च त्वया विद्धो मृगोऽयं मत्परिग्रहः ।
मयाभिपन्नः पूर्वं हि राक्षसोऽयमिहागतः ॥ १९
कामात्परिभवाद्वापि न मे जीवन्विमोक्ष्यसे ।
न ह्येष मृगयाधर्मो यस्त्वयाद्य कृतो मयि । C. 3. 1571 B. 3. 39. 21 K. 3. 39. 21

164* प्रेषयित्वा तु दितिजं मूकं वा पार्थनिश्चितम् ।
मयेप्सितं मदीयैस्तु वस्तुं सह महाबलः ।
तस्मादर्जुनबाणैस्त्वं निर्विद्धो हि ममैव च ।
देहं त्यक्त्वा महाबाहो मामेवैष्यसि दानव ।

7 a) Śi Ki T2 G3 आगत्य. — c) K2 B Dc2 Dn D4–6 दनोः (for दितेः). — d) Ki T G (except G1) अद्भुतविक्रमं; D6 अमितविक्रमं.

8 b) D2 S (except T2 G3 M2) तर्ज° (for तर्क°). — c) B2. 3 तूर्णं (for हंतुं). — d) N (except Śi Ki) फाल्गुनः.

9 a) K4 D2 गांजीवं. — 9b = 3b. — Śi om. 9cd. — d) Ki. 3 B3 Dc2 D1–3. 5 T1 M2 विनादयन्.

10 b) Śi K3 मनागपि मृगाधमं; D1–3 मृगाधमनिरागसं. — d) Śi नयामि; K B D नेताद्य (K4 D5 °स्मि) (for नेष्यामि).

11 a) K2 B2 Dn D4. 6 transp. तं and दृष्ट्वा. — b) Ki अर्जुनं; K2–4 B D फाल्गुनं. — c) Śi Ki. 3 Dc D1–3. 5 M2 भगवान् (for सहसा).

12 a) Śi सर्वं (for पूर्वं). — b) K2 B Dn D4. 6 इंद्रकी(B2–4 °नी)लसमप्रभः. — c) Śi Ki. 4 B4 Dc D5 तु; K2. 3 B1–3 Dn D1–4. 6 च (for [ए]व). — d) Śi K3. 4 Dc D1–3 [ए]व (for [अ]थ). K2–4 B D फाल्गुनः.

Ki फल्गुनः परवीरहा. — After 12, Ki ins.:

165* मुमोच निशितं बाणं वज्राशनिसमं बलम् ।

13 b) Śi K4 B (except B3) D5 T1 G2. 4 M एकलक्षे; Dc °लक्ष्यः. — c) Śi K3 Dc D1–3. 5 प्रजहारा°.

14 c) Ki (? gloss) संनिपातः अभिघातः (cf. 15c). — d) S शैलपृष्ठनिभे तदा.

15 a) Śi Ki. 3 B4 Dc D1. 5 यथा(K3 महा)शनिविनिर्घोषो; K2. 4 B1–3 Dn D3. 4. 6 यथाशनेर्विनिर्घोषो (B3 °निष्पेषो); D2 अशनेरिव निर्घोषो. — c) Śi Dc D2. 5 स निर्घातः; D1. 3 विनिर्घातः (for संनिपातः). — d) Śi Ki. 3 Dc D1–3. 5 श्रूयते शरयोर्भुवि.

16 d) S सुदारुणं (for विभी°).

17 a) K2 B Dn D4. 6 स ददर्श (for ददर्शाथ). — c) Cf. 5a. Śi Ki B1 Dn D1 °संछन्नं; K4 किरातं धर्मवंतं वै.

18 a) D3 रमते; M2 आगतः (for अटते). — b) Śi Ki वने स्त्रीगणसेवितः; Dc वारस्त्रीगणसंवृतः. — d) MSS. °प्रभः, °प्रभं also.

19 b) K2 B Dc Dn D4. 6 वराहो मत्; D6 मृगो ह्यस्मत्.

20 a) K4 Dc S चापि (for वापि). — 20b = 23d. — c) Śi T2 G2. 3 त्वा (for त्वां). K6 एवं च ते वधिष्यामि, and marg. तेन त्वां ध्वंसयिष्यामि. — f) MSS.

C. 3. 1571
B. 3. 39. 21
K. 3. 39. 21

तेन त्वां भ्रंशयिष्यामि जीवितात्पर्वताश्रय ॥ २०
इत्युक्तः पाण्डवेयेन किरातः प्रहसन्निव ।
उवाच श्लक्ष्णया वाचा पाण्डवं सव्यसाचिनम् ॥ २१
ममैवायं लक्ष्यभूतः पूर्वमेव परिग्रहः ।
ममैव च प्रहारेण जीविताद्व्यवरोपितः ॥ २२
दोषान्स्वान्नार्हसेऽन्यस्मै वक्तुं स्वबलदर्पितः ।
अभिषक्तोऽस्मि मन्दात्मन्न मे जीवन्विमोक्ष्यसे ॥ २३
स्थिरो भवस्व मोक्ष्यामि सायकानशनीनिव ।
घटस्व परया शक्त्या मुञ्च त्वमपि सायकान् ॥ २४
ततस्तौ तत्र संरब्धौ गर्जमानौ मुहुर्मुहुः ।
शरैराशीविषाकारैस्ततक्षाते परस्परम् ॥ २५
ततोऽर्जुनः शरवर्षं किराते समवासृजत् ।
तत्प्रसन्नेन मनसा प्रतिजग्राह शंकरः ॥ २६
मुहूर्तं शरवर्षं तत्प्रतिगृह्य पिनाकधृक् ।
अक्षतेन शरीरेण तस्थौ गिरिरिवाचलः ॥ २७
स दृष्ट्वा बाणवर्षं तन्मोघीभूतं धनंजयः ।
परमं विस्मयं चक्रे साधु साध्विति चाब्रवीत् ॥ २८
अहोऽयं सुकुमाराङ्गो हिमवच्छिखरालयः ।
गाण्डीवमुक्तान्नाराचान्प्रतिगृह्णात्यविह्वलः ॥ २९
कोऽयं देवो भवेत्साक्षाद्रुद्रो यक्षः सुरेश्वरः ।

°श्रयं, °श्रयः, °श्रयात् also.

21 T_1 om. 21–22. — After 21. K_1 (om. lines 5–8). $_2$ B D (except D_{1-3}) ins.:

166* न मत्कृते त्वया वीर भीः कार्या वनमन्तिकात् ।
इयं भूमिः सदास्माकमुचिता वसतां वने ।
त्वया तु दुष्करः कस्मादिह वासः प्ररोचितः ।
वयं तु बहुसत्त्वेऽस्मिन्निवसामस्तपोधन ।
भवांस्तु कृष्णवर्त्मभिः सुकुमारः सुखोचितः । [5]
कथं शून्यमिमं देशमेकाकी विचरिष्यति ।
अर्जुन उवाच ।
गाण्डीवमाश्रयं कृत्वा नाराचांश्चाग्निसंनिभान् ।
निवसामि महारण्ये द्वितीय इव पावकिः ।
एष चापि मया जन्तुर्मृगरूपं समाश्रितः ।
राक्षसो निहतो घोरो हन्तुं मामिह चागतः । [10]
किरात उवाच ।
मयैष धनुर्निर्मुक्तैस्ताडितः पूर्वमेव हि ।
बाणैरभिहतः शेते नीतश्च यमसादनम् ।

[(L. 3) $B_{2.3}$ प्रचोदितः; D_c D_5 प्रयोजितः (for प्रयो°). — (L. 4) D_c D_{n3} D_5 °स्तपोवने. — (L. 7) B_2 शरांश्चाग्नि-समप्रभान्. — (L. 8) B (except B_2) D_c $D_{4.5}$ पावकः. — (L. 9) $B_{3.4}$ D_c D_5 °स्थितः (for °श्रितः). — (L. 11) D_{n2} धन्व° (for धनु°). B_4 D_c D_6 मयैवैष धनुर्मुक्तैस्.]

22 T_1 om. 22 (cf. v.l. 21). — [a]) $Ś_1$ $K_{2.3}$ D_c $D_{1-3.5}$ **ममैष लक्ष्य**(*or* °क्ष)**भूतो वै**; K_1 **ममैष लक्ष्यते भूतो**; B D_n $D_{4.6}$ **ममैष लक्ष्य**(*or* °क्ष)**भूतो हि**. — [b]) B D_n $D_{4.6}$ **मम पूर्वपरिग्रहः**. — [c]) $Ś_1$ K_1 **मम चैक**°; $K_{2.3}$ D_{1-3} **मम चैव**; D_c D_5 **मम चैष** (for **ममैव च**). — [d]) $K_{3.4}$ D_2 **अव**°; B (except B_4) D_n $D_{1.3.4.6}$ G_1 **व्यप**° (for **व्यव**°).

23 [a]) $Ś_1$ K_1 [S]**न्यस्य** (for **ऽन्यस्मै**). — [c]) K_1 B D_c D_n D_{4-6} **अवलिप्तोसि**; K_4 **अभिपन्नोसि**; D_{1-3} $G_{1.3}$ (before corr.) M_1 **अभिषिक्तोस्मि** (D_{1-3} °**पि**); T_2 G_3 (after corr.) **अधिक्षिप्तोस्मि**. — $23^d = 20^b$.

24 [a]) $Ś_1$ **स्थितो** (for **स्थिरो**). $Ś_1$ **भव त्वं**; $K_{3.4}$ D_2 T_2 $G_{2.3}$ M_1 **भव वि**- (for **भवस्व**). — [b]) $K_{2.3}$ $D_{1-3.5}$ M_2 **अशनीरिव**; K_4 **अशनिप्रभान्**. — After 24, K_1 B D (except D_{1-3}) T_2 G_3 (both latter om. lines 3–6) ins.:

167* तस्य तद्वचनं श्रुत्वा किरातस्यार्जुनस्तदा ।
रोषमाहारयामास ताडयामास चेषुभिः ।
ततो हृष्टेन मनसा प्रतिजग्राह सायकान् ।
भूयो भूय इति प्राह मन्द मन्देत्युवाच ह ।
प्रहरस्व शरैरेतान्नाराचान्मर्मभेदिनः । [5]
इत्युक्तो बाणवर्षं स मुमोच सहसार्जुनः ।

[(L. 5) K_1 D_{n1}. n_2 शरान् (for शरैर्).]

25 [b]) B_1 D_n $D_{4.6}$ **राज**° (for **गर्ज**°). — [c]) K_4 °**विषप्रख्यैः** (for °**विषाकारैः**). — [d]) K_4 D_5 **युयुधाते** (for **ततक्षाते**).

26 [a]) K_1 D_5 **बाणवर्षं**; D_{c1} T_2 (before corr.) **शरं वर्षं**; T_2 (by corr.) G_3 **शरान्घोरान्**. — [c]) B (except B_2) **तं** (for **तत्**).

27 [a]) $Ś_1$ K (except K_4) D_c $D_{1-3.5}$ **बाण**° (for **शर**°). K_3 S (except G_2) **तु**; K_4 **तं**; B_1 **च** (for **तत्**). — [b]) K_2 **प्रगृह्य च** (for **प्रति**°). $Ś_1$ °**भृत्**; K_1 °**धृत्** (for °**धृक्**). — $27^d = 1.179.14^d$; 181.4^d: $4.54.13^d$.

28 [a]) K_4 $B_{1.3}$ T_2 G M_2 **तं**; $B_{2.4}$ D_n $D_{4.6}$ T_1 M_1 **तु** (for **तत्**).

29 [b]) $Ś_1$ K_{1-3} D_c $D_{1-3.5}$ °**वत्पर्वताश्रयः**; K_4 B (except B_3) D_n $D_{4.6}$ °**वच्छिखराश्रयः**. — [d]) $Ś_1$ K_4 B_4

विद्यते हि गिरिश्रेष्ठ त्रिदशानां समागमः ॥ ३०
न हि मद्बाणजालानामुत्सृष्टानां सहस्रशः ।
शक्तोऽन्यः सहितुं वेगमृते देवं पिनाकिनम् ॥ ३१
देवो वा यदि वा यक्षो रुद्रादन्यो व्यवस्थितः ।
अहमेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् ॥ ३२
ततो हृष्टमना जिष्णुर्नाराचान्मर्मभेदिनः ।
व्यसृजच्छतधा राजन्मयूखानिव भास्करः ॥ ३३
तान्प्रसन्नेन मनसा भगवाँल्लोकभावनः ।
शूलपाणिः प्रत्यगृह्णाच्छिलावर्षमिवाचलः ॥ ३४
क्षणेन क्षीणबाणोऽथ संवृत्तः फल्गुनस्तदा ।
वित्रासं च जगामाथ तं दृष्ट्वा शरसंक्षयम् ॥ ३५
चिन्तयामास जिष्णुस्तु भगवन्तं हुताशनम् ।
पुरस्तादक्षयौ दत्तौ तूणौ येनास्य खाण्डवे ॥ ३६
किं नु मोक्ष्यामि धनुषा यन्मे बाणाः क्षयं गताः ।
अयं च पुरुषः कोऽपि बाणान्ग्रसति सर्वशः ॥ ३७
अहमेनं धनुष्कोट्या शूलाग्रेणेव कुञ्जरम् ।
नयामि दण्डधारस्य यमस्य सदनं प्रति ॥ ३८
संप्रायुध्यद्धनुष्कोट्या कौन्तेयः परवीरहा ।
तदप्यस्य धनुर्दिव्यं जग्रास गिरिगोचरः ॥ ३९
ततोऽर्जुनो ग्रस्तधनुः खड्गपाणिरतिष्ठत ।
युद्धस्यान्तमभीप्सन्वै वेगेनाभिजगाम तम् ॥ ४०
तस्य मूर्ध्नि शितं खड्गमसक्तं पर्वतेष्वपि ।
मुमोच भुजवीर्येण विक्रम्य कुरुनन्दनः ।
तस्य मूर्धानमासाद्य पफालासिवरो हि सः ॥ ४१
ततो वृक्षैः शिलाभिश्च योधयामास फल्गुनः ।
यथा वृक्षान्महाकायः प्रत्यगृह्णादथो शिलाः ॥ ४२
किरातरूपी भगवांस्ततः पार्थो महाबलः ।
मुष्टिभिर्वज्रसंस्पर्शैर्धूममुत्पादयन्मुखे ।

C. 3. 160B
B. 3. 39. 5K
K. 3. 39. 5

D$_3$ विव्यथः; D$_{1.5}$ निर्विषः; D$_2$ चाव्यथः (for [अ]विह्वलः).

30 ^{a}) G$_{2.4}$ भवः (for भवेत्). — ^{b}) D$_2$ देवः; M$_2$ इंद्रः (for यक्षः). Ś$_1$ K$_1$ [अ]थ वासुरः; K$_{2.3}$ Dc D$_{1-3.5}$ [अ]थ वा पुनः; K$_4$ [अ]सुरोपि वा; Dn$_{1.n2}$ D$_4$ सुरोसुरः. B$_1$ रुद्रो यक्षेश्वरेश्वरः. — ^{c}) Dc D$_5$ [स]त्र; G$_1$ च (for हि).

32 ^{a}) Dc कुबेरो (for देवो वा). K$_1$ transp. वा and यक्षः. K$_2$ शोटशक्तो(sic)तिदेवो वा; K$_4$ देवो वा दानवो वापि. — ^{b}) S रुद्रो वान्यो (T$_1$ रक्षो) (for रुद्रादन्यो). Ś$_1$ K$_{1-3}$ Dc D$_{2.3.5}$ यदि (for व्यव-). K$_4$ रुद्रो वापि स्वयं स्थितः.

33 ^{a}) Ś$_1$ K$_1$ प्रीतं (for हृष्टं). — ^{c}) K$_2$ व्यसृज्य; T$_2$ G$_3$ असृजत्. K$_4$ M$_2$ शतशः (for °धा). Ś$_1$ K Dc D$_{1-3.5}$ तत्र (for राजन्). G$_2$ असृजच्च महाराज; G$_3$ अवासृजत्तथा राजन्.

35 ^{b}) N (except Ś$_1$ K$_1$) फाल्गुनः. T$_{1.2}$ (before corr.) G$_{2.4}$ तथा (for तदा). — ^{c}) K$_3$ विषादं (for वित्रासं). K$_{1.2}$ D$_{1-3}$ तु; K$_4$ वि- (for च). Ś$_1$ स वित्रासं जगामाथ; B Dn D$_{4.6}$ भीमसेनमाविशत्तीव्रा. — ^{d}) K$_4$ (m as in text) यन्मे बाणाः क्षयं गताः (= 37^b).

36 ^{c}) Ś$_1$ K Dc D$_{1-3.5}$ पुरा तावक्षयौ. — ^{d}) S मे येन (for येनास्य).

37 ^{d}) K$_4$ गृह्णाति (for ग्रसति).

38 ^{a}) Ś$_1$ K (except K$_2$) D$_3$ M$_2$ अयमेनं; B Dn D$_{4.6}$ हत्वा चैनं; K$_{4m}$ D$_1$ अयमेव. — K$_1$ om. (hapl.) 38^b–39^a. — ^{b}) Ś$_1$ तोत्रां (for शूलां). — After 38, B D (except D$_{1-3}$) ins.:

168* प्रगृह्याथ धनुष्कोट्या ज्यापाशेनावकृष्य च ।
मुष्टिभिश्चापि हतवान्वज्रकल्पैर्महाद्युतिः ।

39 K$_1$ om. 39^a (cf. v.l. 38). — ^{a}) Ś$_1$ B$_2$ स प्रयुद्धो; K$_{3.4}$ B$_{3m}$ स (K$_4$ B$_3$ सं) प्रबुद्धो; K$_{4m}$ B$_{1.4}$ D संप्रयुद्धो (Dc$_1$ D$_{1.5}$ °क्षो); G$_1$ M$_1$ सं(M$_1$ स)प्राविध्यद्. — ^{d}) K$_4$ Dc D$_{1.3.6}$ M जग्रास (as in text); the rest जग्राह (cf. 40^a). K$_4$ वनगोचरः.

40 ^{a}) Ś$_1$ K$_1$ स्रस्तं (for ग्रस्तं). — ^{b}) K$_1$ व्यदृश्यत; K$_4$ (m as in text) D$_1$ अदृश्यत (for अतिष्ठत). — D$_1$ om. 40^{cd}. — ^{c}) K (except K$_1$) D$_{2.3}$ G$_1$ M स (for वै).

41 ^{e}) K$_2$ G$_1$ तस्य मूर्ध्नि (G$_1$ °र्ध्ना) समासाद्य. — ^{f}) M$_1$ विलीनोसिवरो; M$_2$ विफलोसिवरो. K$_3$ Dc T G (except G$_2$) M$_2$ [स]थ; M$_1$ [स]पि (for हि).

42 ^{b}) N (except Ś$_1$) फाल्गुनः. — ^{c}) N (except Ś$_1$) T$_2$ (by corr.) G$_{1.3}$ M य(Dn$_2$ त)दा (for यथा). K$_2$ D$_1$ T$_1$ G$_{2.4}$ M महाकायान्. — ^{d}) Ś$_1$ K Dc D$_{1-3.5.6}$ प्रतिगृह्णात्यथो.

43 ^{c}) Ś$_1$ K$_{1.4}$ B Dn D$_{1.4.6}$ °संकाशैर् (for °संस्प-

C. 3. 1605
B. 3. 39. 55
K. 3. 39. 55

प्रजहार दुराधर्षे किरातसमरूपिणि ॥ ४३
ततः शक्राशनिसमैर्मुष्टिभिर्भृशदारुणैः ।
किरातरूपी भगवानर्दयामास फल्गुनम् ॥ ४४
ततश्चटचटाशब्दः सुघोरः समजायत ।
पाण्डवस्य च मुष्टीनां किरातस्य च युध्यतः ॥ ४५
सुमुहूर्तं महद्युद्धमासीत्तल्लोमहर्षणम् ।
भुजप्रहारसंयुक्तं वृत्रवासवयोरिव ॥ ४६
जहाराथ ततो जिष्णुः किरातमुरसा बली ।
पाण्डवं च विचेष्टन्तं किरातोऽप्यहनद्बलात् ॥ ४७
तयोर्भुजविनिष्पेषात्संघर्षेणोरसोस्तथा ।
समजायत गात्रेषु पावकोऽङ्गारधूमवान् ॥ ४८
तत एनं महादेवः पीड्य गात्रैः सुपीडितम् ।
तेजसा व्याक्रमद्रोषाच्चेतस्तस्य विमोहयन् ॥ ४९
ततो निपीडितैर्गात्रैः पिण्डीकृत इवाबभौ ।
फल्गुनो गात्रसंरुद्धो देवदेवेन भारत ॥ ५०
निरुच्छ्वासोऽभवच्चैव संनिरुद्धो महात्मना ।

शैर्).

44 [a]) K3 °स्पर्शैर्; Dc D5 °प्रख्यैर् (for °समैर्). — [d]) Ś1 K1 धर्षं°; K4 G1 मर्दं°; Dc2 D1 दर्शं°; G4 ताड° (for अर्द°). N (except Ś1 K1) फाल्गुनं.

45 [b]) K4 B Dn D4. 6 समपद्यत. — [cd]) K4 transp. पाण्ड° and किरा°. Ś1 K1 युध्यतोः.

46 [a]) K4 B1. 2. 4 Dn D4. 6 तु (K4 हि) तद्युद्धं; Dc D5 अभूद्युद्धं; S तयोर्युद्धं (for महद्युद्धं). K2 D1. 3 मुहूर्तं सुमहद्युद्धं; B3 मुहूर्तमिव तद्युद्धं; D2 मुहूर्तं समभवद्युद्धं (hypermetric). — [b]) D2 आसीत्सु-; K4 B Dn D4. 6 अभवत् (for आसीत्तत्). S आसील्लोक (G1 °द्रोम-; M2 °ल्लोम)-प्रहर्षणं. — Dc2 om. 46[cd]. — [c]) K3 Dc1 D5 भुजाभ्यामेव संसक्तं; K4 भुजप्रहारान्संरब्धं; T2 G M2 भुजप्रहारसंसक्तं (M2 °भूतं).

47 [a]) K1. 3 B D (except D2. 3. 5) M1 जघानाथ; T G1-3 महाराज; G4 अताडयत्; M2 प्रजहार (for जहाराथ). — [c]) K2 स; K4 Dc2 G1 तं; Dc1 तु (for च). K1 पांडवं चापि निष्टंतं; D2. 3 पांडवं चैव चेष्टंतं. — [d]) Ś1 K1 [s]प्यहरद्; Dc2 S (except M1) [s]भ्य (G2 ह्य)हनद्; D2 प्यहरद्; D3 [s]थ हरद्; K2 B Dn D1. 4-6 M1 बली.

48 [a]) T2 G (except G1) युद्धं° (for भुजं°). — [b]) Ś1 K1 Dc D1-3 [उ]रसस् (D1 °सान्); T1 [उ]रसा. K4 T2 G2-4 तदा; T1 तयोः (for तथा).

49 [a]) K1 ततस्तं च; T1 तत एतं; G4 ततोर्जुनं. — [b]) K2 B1-4 Dc D5 गात्रैः प्रपी (B4 सुता)डितं; K3 T2 G (except G1) गात्रेषु पीडितं. — [c]) K2 D3 T1 [अ]त्याक्रमत्; B Dn D4. 6 व्यक्रमत्; T2 G M [अ]त्यक्रमत्. — [d]) T2 G3 तेजस्तस्य. Ś1 K1. 4 व्यमोहयत्.

50 [a]) B1. 2 Dn [s]भि-; B3. 4 D5 T2 G3 [s]ति- (for नि-). — After 50[ab], K2 ins.:

169* सुमुहूर्तं तथा ध्यात्वा सचेताः पुनरुत्थितः ।
ततः प्रीतो भवस्तस्य भगवान्कामनाशनः ।

[Line 1 = (var.) line 1 of 171*.]

— [c]) N (except K1) फाल्गुनो. — [d]) Ś1 K Dc2 D1-3. 5 महा° (for देव°).

51 [a]) D1 पार्थः; G1 M1 चैष (for चैव). G4 निरुच्छ्वासः कृत इव. — [b]) T1 om. from महात्मना up to भगवन्तं in line 3 of 171*. K2 D2. 3 G1. 2 महामनाः (for °त्मना). — After 51[ab], K1 reads line 1 of 173* (*repeating* it after 54); while D1 ins.:

170* आत्मानं दर्शयामास फाल्गुनः परवीरहा ।
धृतिमास्थाय महतीं तोलयामास शंकरम् ।
तावदास्थाय रूपं स्वमुवाच भगवान्भवः ।

— K1 reads 51[cd] first as in text and then as in B D (except D2. 3). — [cd]) B D (except D2. 3) पपात भूम्यां निश्चेष्टो गतसत्त्व इवाभवत्. — After 51, K1 B D (except D2. 3) S ins.:

171* स मुहूर्तं तथा भूत्वा सचेताः पुनरुत्थितः ।
रुधिरेणाप्लुताङ्गस्तु पाण्डवो भृशदुःखितः ।
शरण्यं शरणं गत्वा भगवन्तं पिनाकिनम् ।
मृन्मयं स्थण्डिलं कृत्वा माल्येनापूजयद्भवम् ।
तच्च माल्यं तदा पार्थः किरातशिरसि स्थितम् । [5]
अपश्यत्पाण्डवश्रेष्ठो हर्षेण प्रकृतिं गतः ।
पपात पादयोस्तस्य ततः प्रीतोऽभवद्भवः ।

[T1 om. up to भगवन्तं in line 3. — (L. 4) D5 G2. 4 मृण्मयं. S (except T2 G2. 4) स्थंडिले. T1 हरं (for भवम्). — (L. 5) T2 G (except G1) तथा (for तदा). — (L. 7) The posterior half = 51[d].]

— K1 (om. line 2) B D (except D2. 3; D1 om. line 2) cont.: K2 ins. after 51:

172* उवाच चैनं वचसा मेघगम्भीरगीर्हरः ।
जातविस्मयमालोक्य ततः क्षीणाङ्गसंहतिम् ।

ततः पपात संमूढस्ततः प्रीतोऽभवद्भवः ॥ ५१
भगवानुवाच ।
भो भो फल्गुन तुष्टोऽस्मि कर्मणाप्रतिमेन ते ।
शौर्येणानेन धृत्या च क्षत्रियो नास्ति ते समः ॥ ५२
समं तेजश्च वीर्यं च ममाद्य तव चानघ ।
प्रीतस्तेऽहं महाबाहो पश्य मां पुरुषर्षभ ॥ ५३
ददानि ते विशालाक्ष चक्षुः पूर्वऋषिर्भवान् ।
विजेष्यसि रणे शत्रूनपि सर्वान्दिवौकसः ॥ ५४
वैशंपायन उवाच ।
ततो देवं महादेवं गिरिशं शूलपाणिनम् ।
ददर्श फल्गुनस्तत्र सह देव्या महाद्युतिम् ॥ ५५
स जानुभ्यां महीं गत्वा शिरसा प्रणिपत्य च ।
प्रसादयामास हरं पार्थः परपुरंजयः ॥ ५६
अर्जुन उवाच ।
कपर्दिन्सर्वभूतेश भगनेत्रनिपातन ।
व्यतिक्रमं मे भगवन्क्षन्तुमर्हसि शंकर ॥ ५७
भगवद्दर्शनाकाङ्क्षी प्राप्तोऽस्मीमं महागिरिम् ।
दयितं तव देवेश तापसालयमुत्तमम् ॥ ५८

C. 3. 1631
B. 3. 39. 81
K. 3. 39. 81

[(L. 1) K1 प्रणतं; K2 मनसि; Dc2 भगवान् (for वत्सला). — (L. 2) K2 B (except B2) Dc आलक्ष्य (for आलोक्य). K2 B2. 3 Dc D1. 5. 6 तपः (for ततः).]

52 K1. 4 D2 M2 (!) श्रीभगवानुवाच; K2. 3 रुद्र उ°; B (except B1) D1 D4. 6 भव उ°; D1 ईश्वर उ°; T1 G1. 4 महेश्वरः. — [a]) N (except Ś1 K1) फाल्गुन.

53 [b]) D1–3. 5 मम चाद्य तवानघ. — [c]) S प्रीतस्तेन (for °स्तेऽहं). — [d]) K4 B D (except D1–3. 5) S (except T1 G1 M1) भरतर्षभ.

54 T2 G3. 4 om. 51^{ab}. — [a]) N (except Ś1 K1 Dc1) T1 G2 ददामि. — [b]) K2 दिव्यान्यस्त्राणि यैर्भवान्; K4 चक्षुः पूर्वविभावनं; S (T2 G3. 4 om.) चक्षुः पूर्वं मुनिर्भवान्. — [c]) T1 G1 °व्यसे; G2. 4 °व्यते. — [d]) T1 G2 देवा; T2 G1. 3. 4 M2 देवान् (for सर्वान्). — After 54, K2 reads 57^{ab}, followed by line 2 of 174*. — B D (except D1–3) ins. after 54: K1 ins. after 51^{ab} (*repeating* line 1 only after 54):

173* प्रीत्या च तेऽहं दास्यामि यदस्त्रमनिवारितम् ।
त्वं हि शक्तो मदीयं तच्छस्त्रं धारयितुं क्षणात् ।

[(L. 1) K1 B4 Dc D5 अवधां (for अनिवा°). — (L. 2) K1 Dn अस्त्रं (for शस्त्रं). K1 D6 क्षमः (for क्षणात्).]

55 [b]) Many MSS. गिरीशं. — [c]) N (except Ś1 K1) फाल्गुनस्. — [d]) D1 T G2. 3 M2 महाद्युतिः.

56 [a]) D1 जानुभ्यां धरणीं गत्वा. — [b]) Ś1 च प्रणम्य; K (except K4) Dc D1–3. 5 [अ]भिप्रणम्य (for प्रणिपत्य). Ś1 K1. 2 D2. 3 वै (for च).

57 K2 reads 57^{ab} (with line 2 of 174*) after 54. — [a]) K3 B (except B2) Dn D4. 6 सर्वदेवेश. — N T2 G3. 4 ins. after 57^{ab} (Ś1 K2–4 D2. 3 om. line 1; K2 transp. line 2; see above):

174* देवदेव महादेव नीलग्रीव जटाधर ।
कारणानां च परमं जाने त्वां त्र्यम्बकं विभुम् ।
देवानां च गतिं देवं त्वत्प्रसूतमिदं जगत् ।
अजेयस्त्वं त्रिभिर्लोकैः सदेवासुरमानुषैः ।
शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे । [5]
दक्षयज्ञविनाशाय हरिरुद्राय वै नमः ।
ललाटाक्षाय शर्वाय मीढुषे शूलपाणये ।
पिनाकगोप्त्रे सूर्याय मार्जालीयाय वेधसे ।
प्रसादये त्वां भगवन्सर्वभूतमहेश्वर ।
गणेशं जगतः शंभुं लोककारणकारणम् । [10]
प्रधानपुरुषातीतं परं सूक्ष्मतरं हरम् ।

[(L. 1) K1 D5 °कंठ (for °ग्रीव). — (L. 2) K2–4 Dc D1–3. 5 अपि परं (for च परमं). Ś1 K1 कारणं च परं जाने. Ś1 K1 हरं (for जाने). D2 भुवि; T2 G2. 3 प्रभुं (for विभुम्). — (L. 3) Ś1 K1. 3 त्वं (for च). Ś1 K1. 3. 4 Dc D1–3 T2 G3 गतिर्देवं; K2 B1. 3. 4 Dn1. n2 D4. 5 गतिं देव. — (L. 4) Ś1 K2. 3 D1 °मानवैः (for °मानुषैः). — (L. 5) K (except K1) Dc D1–3. 5 T2 G2. 3 शिवरूपाय विष्णवे. — (L. 6) K4 (marg. *sec. m.*) B1 हरिभद्राय वै; B2 Dc T2 G2. 3 हरिरूपाय वै (T2 G2. 3 ते). — D2 om. lines 7–8. — (L. 7) K3 D1. 3 शूलपाणिने. — (L. 8) K2 B (except B2) D1 मार्जनीयाय; T2 G2. 3 मंगल्याय च. — (L. 9) Om. in K4 D5. Ś1 K3 त्वां (for त्वां). — K2 om. (hapl.) from the posterior half of line 9 up to 57[c]. Ś1 K1. 3 Dc D1–3 सर्वभूत(Ś1 °देव)नमस्कृतं (°त *or* °तः); T2 G2. 3 सर्वलोकमहेश्वर. — (L. 10) Dc महेश्वरमुमापतिं (for the posterior half). — (L. 11) Ś1 K3 °पुरुषादित्यः (K3 °त्यं); K1. 4 D1–3 °पादिभ्यः.]

— [d]) Ś1 प्रसीद क्षंतुमर्हसि.

58 [a]) N (except K4 D1. 3. 5) भगवन्. — [b]) G4

C. 3. 1632
B. 3. 39. 81
K. 3. 39. 81

प्रसादये त्वां भगवन्सर्वभूतनमस्कृत ।
न मे स्यादपराधोऽयं महादेवातिसाहसात् ॥ ५९
कृतो मया यदज्ञानाद्विमर्दोऽयं त्वया सह ।
शरणं संप्रपन्नाय तत्क्षमस्वाद्य शंकर ॥ ६०

वैशंपायन उवाच ।
तमुवाच महातेजाः प्रहस्य वृषभध्वजः ।
प्रगृह्य रुचिरं बाहुं क्षान्तमित्येव फल्गुनम् ॥ ६१

इति श्रीमहाभारते आरण्यकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

भगवानुवाच ।
नरस्त्वं पूर्वदेहे वै नारायणसहायवान् ।
बदर्यां तप्तवानुग्रं तपो वर्षायुतान्बहून् ॥ १
त्वयि वा परमं तेजो विष्णौ वा पुरुषोत्तमे ।
युवाभ्यां पुरुषाभ्यां तेजसा धार्यते जगत् ॥ २

शक्राभिषेके सुमहद्धनुर्जलदनिस्वनम् ।
प्रगृह्य दानवाः शस्तास्त्वया कृष्णेन च प्रभो ॥ ३
एतत्तदेव गाण्डीवं तव पार्थ करोचितम् ।
मायामास्थाय यद्भस्तं मया पुरुषसत्तम ।
तूणौ चाप्यक्षयौ भूयस्तव पार्थ यथोचितौ ॥ ४

संप्राप्तोऽहं महा°. — [c]) Ś1 K1 देव- (for तव).

59 [a]) Ś1 S (except G1) त्वा (for त्वां). — [b]) Ś1 K1 D1 सर्वभूतगुरुं विभुं; K2 D2. 3 °विभुं गुरुं; K3 °नमस्कृतं; K4 Dc T1 °देवनमस्कृतं (T1 °तं); B Dn D4. 6 G2 °लोकनमस्कृतं (B2 G2 °तं); D5 °भूतमहेश्वरं.

60 [ab]) B Dn D4–6 [अ]यम् (for यद्), and यस् (for स्यं). — [c]) B Dn D4. 6 प्रतिपन्नाय; G1 मे प्रप°; G4 M1 त्वां (M1 सं-) प्रपन्नोस्मि. — [d]) Ś1 K1. 2 D1–3 प्रसीदस्वाद्य.

61 Dn3 om. 61. — [b]) T G (except G1) प्रहसन् (for °स्य). — [d]) K2 D1–3 कौरव; K3 भारत; K4 B Dc Dn (Dn3 om.) D4–6 फाल्गुनं. — After 61, all MSS. except Ś1 K1. 3 D1. 3 ins.:

175* परिष्वज्य च बाहुभ्यां प्रीतात्मा भगवान्हरः ।
पुनः पार्थं सान्त्वपूर्वमुवाच वृषभध्वजः ।

[(L. 1) D2 युज्य सांत्वमिदं वचः (for the posterior half). — (L. 2) Om. in D2. K4 उवाचेदं (for सान्त्वपूर्वम्). K5 सांत्वपूर्वमिदं वचः; Dc D5 उवाचेदं वृषध्वजः.]

— S (except M2) cont.:

176* गङ्गाङ्कितजटः शर्वः पार्थस्यामिततेजसः ।
प्रगृह्य रुचिरं बाहुं वृत्तं ताम्रतलाङ्गुलिम् ।
[(L. 2) Prior half = 61c.]

Colophon. K4 reads it in marg. — *Major parvan:* Ś1 K1 T G आरण्य. — *Sub-parvan:* K1. 2 B3. 4 Dc D3. 5 कैरात; B2 Dn D4. 6 T1 G2 किरातार्जुनीय; T2 G3. 4 किरातार्जुन. — *Adhy. name:* D1 शिवार्जुनयुद्धं; D2 M1 किरातार्जुनीययुद्धं (D2° युद्धे मूकवधः). — *Adhy. no.* (figures, words or both): Dn S 39; D1 40 (as in text). — *Śloka no.:* Dn 84; D1 74.

41

1 Ś1 K1 M2 श्रीभगवान्; K2 D1 महादेव उ°; K3 Dc Dn D2–4. 6 देवदेव उ°; K4 ईश्वर उ°; B देव (B2 शिव) उ°; T1 रुद्रः; T2 G शंकरः; M1 देवः. — 1b = 3. 37. 29b.

2 [b]) Ś1 Dc G1 पुरुषोत्तम. — [d]) Ś1 K2. 3. 4m Dc D1–3. 5 transp. तेजसा and धार्यते. K4 जगद्व्याप्यातितेजसा.

3 [b]) Some MSS. निःस्वनं. — [c]) Ś1 K1 (before corr.) शक्षास्; K2 B1. 4 D3 शास्तास्; K3 न्यस्तास्; M1 शांतास् (for शस्तास्).

4 [a]) B1. 3 Dn D4. 6 transp. एतत् and तत्. B3 तदेव देवगांडीवं; B4 T2 G3. 4 एतत्ते देवगांडीवं. — [c]) K3 च; T2 G (except G4) तद् (for यद्). Ś1 K1 गुप्तं (for ग्रस्तं). K4 तदिदं ग्रसितं तात. — [d]) Cnp त्वया (for मया). — Ś1 om. 4ef. — [e]) G (except G3) तूणी (for तूणौ). K4 चैव (for चापि). K3 तूणिरावक्षयौ भूयः. — [f]) K3 तथोचितौ; Dc2 T2 G M1 करों; T1 वधों. — After 4, B D (except D1–3) S ins.:

177* भविष्यति शरीरं च नीरुजं कुरुनन्दन ।

प्रीतिमानस्मि वै पार्थ तव सत्यपराक्रम ।
गृहाण वरमस्मत्तः काङ्क्षितं यन्नरर्षभ ॥ ५
न त्वया सदृशः कश्चित्पुमान्मर्त्येषु मानद ।
दिवि वा विद्यते क्षत्रं त्वत्प्रधानमरिंदम ॥ ६

अर्जुन उवाच ।

भगवन्ददासि चेन्मह्यं कामं प्रीत्या वृषध्वज ।
कामये दिव्यमस्त्रं तद्घोरं पाशुपतं प्रभो ॥ ७
यत्तद्ब्रह्मशिरो नाम रौद्रं भीमपराक्रमम् ।
युगान्ते दारुणे प्राप्ते कृत्स्नं संहरते जगत् ॥ ८
दहेयं येन संग्रामे दानवान्राक्षसांस्तथा ।
भूतानि च पिशाचांश्च गन्धर्वानथ पन्नगान् ॥ ९
यतः शूलसहस्राणि गदाश्चोग्रप्रदर्शनाः ।
शराश्चाशीविषाकाराः संभवन्त्यनुमन्त्रिताः ॥ १०
युध्येयं येन भीष्मेण द्रोणेन च कृपेण च ।
सूतपुत्रेण च रणे नित्यं कटुकभाषिणा ॥ ११
एष मे प्रथमः कामो भगवन्भगनेत्रहन् ।
त्वत्प्रसादाद्विनिर्वृत्तः समर्थः स्यामहं यथा ॥ १२

भगवानुवाच ।

ददानि तेऽस्त्रं दयितमहं पाशुपतं महत् ।
समर्थो धारणे मोक्षे संहारे चापि पाण्डव ॥ १३
नैतद्वेद महेन्द्रोऽपि न यमो न च यक्षराट् ।
वरुणो वाथ वा वायुः कुतो वेत्स्यन्ति मानवाः ॥ १४
न त्वेतत्सहसा पार्थ मोक्तव्यं पुरुषे क्वचित् ।
जगद्विनिर्दहेत्सर्वमल्पतेजसि पातितम् ॥ १५

C. 3. 1652
B. 3. 40. 17
K. 3. 40. 17

---

5 [a]) Śi K1. 2 D1–3. 5 राजर्षे; K3 Dc देवर्षे; B Dn D4. 6 ते पार्थ. K4 प्रीतोहं शौर्यभावेन. — [b]) B Dn D4. 6 भवान् (for तव). N (except Śi Dc2 D1. 2) M1 °पराक्रमः. — [c]) Śi K1 वचनं मत्तः; K2 D1–3 च वरं मत्तः; K3 वरमस्त्रं तं (for वरमस्मत्तः). K4 वरं गृहाण मत्तस्त्वं; G4 वरं गृहाण चास्मत्तः. — [d]) Śi K Dc D1–3. 5 पुरुषर्षभ (K4 मुनिसत्तम); B Dn D4. 6 पुरुषोत्तम (for यन्नरर्षभ).

6 [a]) B Dn D4 पुरुषः (for सदृशः). — [b]) S भारत (for मानद). — [c]) B (except B3) Dn T2 G3 वर्तते (for विद्यते).

7 [a]) Hypermetric! Śi K1 प्रभो; D2. 5 S (except T1 G1 M2) वरं (for भगवन्). — [cd]) T2 G transp. दिव्यं and घोरं., Śi K1 विभो (for प्रभो).

8 [a]) Śi K1 यत्ते; K2 यत्र; B (except B3) यत्तु (for यत्तद्). — After 8, K1. 4 B D (except D1–3) ins.:

178* कर्णभीष्मकृपद्रोणैर्भविता तु महाहवः ।
त्वत्प्रसादान्महादेव जयेयं तान्यथा युधि ।

[(L. 1) B2 सु-; B4 Dc2 D5 मे (for तु). K4 तथान्यैर्योधसत्तमैः. — After line 1, K4 ins.:

179* ब्रह्मास्त्रज्ञानसंपन्नैर्भविता मे महाहवः ।]

9 [a]) S जयेयं (for दहें). K4 संग्रामे दानवांश्चैव. — [b]) G1 transp. दानवान् and राक्षसान्. Śi K1 तदा (for तथा). K4 राक्षसांश्च महाप्रभो. — [c]) K4 यक्षांश्चापि; S राज्ञश्चैव (for भूतानि च).

10 [a]) B Dn D4. 6 M2 यस्मिन्; T G M1 यत्र (for यतः). — [d]) K1 [उ]त मंत्रिते; K2 D2 [अ]नुमंत्रितान्; K4 B Dn D4. 6 M2 [अ]नु(M2 °भि)मंत्रिते; Dc D5 [अ]ग्निसंनिभाः.

11 [a]) Śi K1 यदि (for येन). G4 दुर्योधनेन भीं.

12 [a]) K3 परमः (for प्रथमः). — [c]) Śi K1. 3 Dc D5 विमर्दे वै; K2. 4m B3 D1–3 विमर्देषु; B1 विनिर्वृत्तं; B4m रिपून्हंतुं; G4 विनिर्मुक्तः; M2 हि निर्वृत्ते.

13 Śi T G2–4 M2 श्रीभगवान्; K1. 4 G1 श्रीभगवानुवाच; K2 रुद्र उं; K3 D2. 3 देवदेव उं; B Dc1 Dn D4. 6 भव उं; D1 महादेव उं. — [a]) N (except Śi K1) T1 M2 ददामि. — [b]) Śi K2 D1 परं; K1 D3 वरं; K3 प्रभो; B Dc Dn D4–6 विभो (for महत्). — [d]) Śi K1 B (except B3) D (except D1–3. 5) M1 चासि; G4 [ऽ]पि च (for चापि).

14 [a]) K3 S (except G4) तद् (for [ए]तद्). Śi K1 सहस्राक्षः (for महेन्द्रोऽपि). — [b]) Śi K1 नापि (for न च). — [c]) K2. 3 D3 च; B (except B3) Dn D4. 6 [अ]पि (for the first वा). Śi K (except K4) D1–3 वापि देवानां; T1 वासवो वायुः (for वाथ वा वायुः). — [d]) T1 न तद् (for कुतो). Śi K (except K4) D1–3. 5 ज्ञास्यंति; Dc ज्ञास्यसि (for वेत्स्यन्ति). K2 D2. 3 T2 G मानुषाः (for मानवाः).

15 [a]) T G1–3 M त्वया (for त्वेतत्). Śi K (except K4) Dc D2. 3. 5 वीर; D1 तात (for पार्थ). G4 नाल्पतेजसि वै पार्थ. — K3 om. 15c–16b. — [c]) M2 एतद् (for जगद्). B Dn D4. 6 M2 वि(M2 हि)नाशयेत्; T G हि निर्दहेत्. Śi K1. 2 Dc D1–3. 5 एतद् (for सर्वम्).

C. 3. 1653
B. 3. 40. 18
K. 3. 40. 18

अवध्यो नाम नास्त्यस्य त्रैलोक्ये सचराचरे ।
मनसा चक्षुषा वाचा धनुषा च निपात्यते ॥ १६

वैशंपायन उवाच ।

तच्छ्रुत्वा त्वरितः पार्थः शुचिर्भूत्वा समाहितः ।
उपसंगृह्य विश्वेशमधीष्वेति च सोऽब्रवीत् ॥ १७
ततस्त्वध्यापयामास सरहस्यनिवर्तनम् ।
तदस्त्रं पाण्डवश्रेष्ठं मूर्तिमन्तमिवान्तकम् ॥ १८
उपतस्थे महात्मानं यथा त्र्यक्षमुमापतिम् ।
प्रतिजग्राह तच्चापि प्रीतिमानर्जुनस्तदा ॥ १९
ततश्चचाल पृथिवी सपर्वतवनद्रुमा ।
ससागरवनोद्देशा सग्रामनगराकरा ॥ २०
शङ्खदुन्दुभिघोषाश्च भेरीणां च सहस्रशः ।
तस्मिन्मुहूर्ते संप्राप्ते निर्घातश्च महानभूत् ॥ २१
अथास्त्रं जाज्वलद्घोरं पाण्डवस्यामितौजसः ।
मूर्तिमद्विष्ठितं पार्श्वे ददृशुर्देवदानवाः ॥ २२
स्पृष्टस्य च त्र्यम्बकेन फल्गुनस्यामितौजसः ।
यत्किंचिदशुभं देहे तत्सर्वं नाशमेयिवत् ॥ २३
स्वर्गं गच्छेत्यनुज्ञातस्त्र्यम्बकेन तदार्जुनः ।
प्रणम्य शिरसा पार्थः प्राञ्जलिर्देवमैक्षत ॥ २४

ततः प्रभुस्त्रिदिवनिवासिनां वशी
महामतिर्गिरिश उमापतिः शिवः ।
धनुर्महद्दितिजपिशाचसूदनं
ददौ भवः पुरुषवराय गाण्डिवम् ॥ २५

ततः शुभं गिरिवरमीश्वरस्तदा
सहोमया सिततटसानुकन्दरम् ।
विहाय तं पतगमहर्षिसेवितं
जगाम खं पुरुषवरस्य पश्यतः ॥ २६

इति श्रीमहाभारते आरण्यकपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

---

16 K₃ om. 16^{ab} (cf. v.l. 15); D₄ om. 16^{a}–17^{b}. — [a]) D (except D₁₋₃. ₆; D₄ om.) G₄ अत्र (for अस्य). — [c]) Ś₁ K₁ चैव (for वाचा). — [d]) K₂ B₄ D₆ निपातिते; some printed ed. (erroneously) निपातयेत्.

17 D₄ om. 17^{ab} (cf. v.l. 16). — [c]) Ś₁ K₁. ₃ B D (except D₁₋₃) T₂ G₃ M₂ उपसंगम्य. Ś₁ देवेशम् (for विश्वेशम्). — [d]) Ś₁ K₁. ₃ Dc T₂ G₃ वचो; K₂. ₄ B Dn D₁₋₄. ₆ [अ]थ मो (for च मो).

19 [a]) K₄ (m as in text) B Dn D₄. ₆ च तत्पा(K₄ तं पा)र्थं (for महा°). — [b]) K₄ (m as in text) तदस्त्रं त्र्यंबके पुरा. — [cd]) Ś₁ K (K₄ marg.) Dc D₁₋₃. ₅ पार्थः (for चापि), and अरिमर्दनः (for अर्जुनस्तदा).

21 [a]) Ś₁ B₂ Dn₂ D₁. ₅ °निर्घोषा; K₁. ₄ G₂ °निर्घोषो; Dc T G₁. ₃ M₁ °घोषश्च; D₃. ₄. ₆ °घोषांश्च. — [c]) M₂ निर्घातः (for संप्राप्ते). — [d]) K₄ भुवि (for अभूत्). B Dn D₄. ₆ निर्घाताश्चापतन्मुहुः; M₂ तदा ममभवद् भृशं.

22 [a]) D₁. ₃ प्राज्वलद्. — [b]) Ś₁ K₁ महात्मनः; K₂. ₃ Dc D₁₋₃. ₅ महौजसः (for [अ]मितौजसः). — Ś₁ K₁ om. (hapl.) 22^{c}–24^{b}; K₃ om. (hapl.) 22^{c}–23^{b}. — [c]) B Dn D₄. ₆ वै स्थितं; D₁₋₃. ₅ धिष्ठितं (for विष्ठितं). K₄ Dc₁ D₁. ₂ T₂ G₂ पार्थे (for पार्श्वे). K₃ मूर्तिमंतस्थितं पार्श्वे.

23 Ś₁ K₁ om. 23; K₂ om. 23^{ab} (cf. v.l. 22). — [a]) B Dn D₄. ₆ स्पृष्टस्य त्र्यंबकेनाथ. — [b]) N (Ś₁ K₁ om.) फाल्गुन°. — [d]) K₃. ₄ Dc₂ Dn₃ T G₂. ₃ नाशमेयिवान्; B (except B₂) Dn₁ D₄ °मीयिवत् (Dn₁ °वान्); D₆ °भागतं. G₄ तत्सर्वं द्राग्विनीनशत्.

24 Ś₁ K₁ om. 24^{ab} (cf. v.l. 22). — [a]) S (except M₂) स्वर्गच्छेत्यभ्यनुज्ञातः. — [b]) K₃. ₃ Dc D₁₋₃. ₅ T₁ महात्मना; B₂ T₂ G M₂ त(G₂. ₄ य)थार्जुनः. — [c]) K₄ Dn D₅. ₆ T G M₂ राजन्; B D₄ M₁ देवं (for पार्थः). — [d]) S भवम् (for देवम्).

25 K₁ D₂ om. 25. — [a]) K₄ B (except B₂) Dc D₁. ₄ G₁ त्रिदश° (for त्रिदिव°). — [b]) K₄ B₂ M °द्युतिर् (for °मतिर्). — [c]) T₂ G₃. ₄ दीप्त°; G₁ मत्त°; G₂ दैत्य° (for दितिज°). — [d]) K₄ B₂ हरः; T₂ G₂₋₄ वरं; G₁ M₁ पुनः (for भवः).

26 [a]) Ś₁ K (except K₄) D₂. ₃ अव्ययस्; D₁ अगात् (for ईश्वरस्). — [c]) Ś₁ K₁ प्रवर°; K₂ ज्वलन°; K₃. ₄ D₂. ₃ पवन° (for पतग°).

Colophon. — *Major parvan:* Ś₁ K₁ Dn₃ T G₂₋₄ आरण्य. — *Sub-parvan:* K₁ B₁. ₃. ₄ Dc D₅ कैरात; B₂ Dn₁. ₂ D₄. ₆ T G₁₋₃ M₁ किरातार्जुनीय. — *Adhy. name:*

४२

वैशंपायन उवाच ।

तस्य संपश्यतस्त्वेव पिनाकी वृषभध्वजः ।
जगामादर्शनं भानुर्लोकस्येवास्तमेयिवान् ॥ १
ततोऽर्जुनः परं चक्रे विस्मयं परवीरहा ।
मया साक्षान्महादेवो दृष्ट इत्येव भारत ॥ २
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मया त्र्यम्बको हरः ।
पिनाकी वरदो रूपी दृष्टः स्पृष्टश्च पाणिना ॥ ३
कृतार्थं चावगच्छामि परमात्मानमात्मना ।
शत्रूंश्च विजितान्सर्वान्निर्वृत्तं च प्रयोजनम् ॥ ४
ततो वैडूर्यवर्णाभो भासयन्सर्वतो दिशः ।
यादोगणवृतः श्रीमानाजगाम जलेश्वरः ॥ ५
नागैर्नदैर्नदीभिश्च दैत्यैः साध्यैश्च दैवतैः ।
वरुणो यादसां भर्ता वशी तं देशमागमत् ॥ ६
अथ जाम्बूनदवपुर्विमानेन महार्चिषा ।
कुबेरः समनुप्राप्तो यक्षैरनुगतः प्रभुः ॥ ७
विद्योतयन्निवाकाशमद्भुतोपमदर्शनः ।
धनानामीश्वरः श्रीमानर्जुनं द्रष्टुमागतः ॥ ८
तथा लोकान्तकृच्छ्रीमान्यमः साक्षात्प्रतापवान् ।
मूर्त्यमूर्तिधरैः सार्धं पितृभिर्लोकभावनैः ॥ ९
दण्डपाणिरचिन्त्यात्मा सर्वभूतविनाशकृत् ।
वैवस्वतो धर्मराजो विमानेनावभासयन् ॥ १०
त्रीँल्लोकान्गुह्यकांश्चैव गन्धर्वांश्च सपन्नगान् ।
द्वितीय इव मार्तण्डो युगान्ते समुपस्थिते ॥ ११
भानुमन्ति विचित्राणि शिखराणि महागिरेः ।
समास्थायार्जुनं तत्र ददृशुस्तपसान्वितम् ॥ १२
ततो मुहूर्ताद्भगवानैरावतशिरोगतः ।
आजगाम सहेन्द्राण्या शक्रः सुरगणैर्वृतः ॥ १३
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।

C. 3. 1677
B. 3. 41. 14
K 3. 41. 14

K₂ B₁ D₁ पाशुपतास्त्रप्राप्तिः ; K₄ कैरातवरप्रदानं ; D₂ इंद्रकीले देवदेवात्पाशुपतास्त्रप्राप्तिः ; D₃ अर्जुनस्य पाशुपतास्त्रप्राप्तिः ; T₂ G₁₋₃ M दिव्यास्त्रलाभः (M₁ दिव्यास्त्रदानं). — *Adhy. no.* figures, words or both): Dn S 40; D₁ 41 (as in text). — *Śloka no.:* Dn₁. n₃ 29; Dn₂ D₁ 28.

42

1 [a]) T₁ G₂ तं (for सं-). Śi K₁ D₂. ₃ त्वेवं; K₃ तत्र (for त्वेव). — [b]) T₁. ₂ (before corr.) G₃. ₄ M गोवृष° (for वृषभ°). — [d]) K B Dn D₄. ₆ ईयिवान् (for एयि°).

2 [d]) S इत्यसकृत्प्रभुः (G₄ °कृद् भुवन्).

4 [a]) K₃. ₄ (*sup. lin.* as in text) कृतास्त्रं. — [b]) B Dn D₄. ₆ आहवे (for आत्मना). D₂ यस्स्पृष्टः परमात्मना. — [c]) T₁ विनिवृत्य तु तान्सर्वान्. — [d]) K₁ निसिद्धि (sic); K₃. ₄ D₁. ₂. ₄. ₅ T₁ G₂ M निवृत्तं. — After 4, K₁ B D (except D₁₋₃) T₂ (marg. *sec. m.*) ins.:

180* इत्येवं चिन्तयानस्य पार्थस्यामिततेजसः ।

5 [a]) Some MSS. वैदूर्य°. — [b]) Śi शम°; S द्योत° (for भास°). T₁ G₂. ₄ M₁ दिशं.

6 [b]) S मरुद्गणैः (for च दैवतैः). — [d]) Śi K₁ आगतं; B₃ D₁ आगतः (for आगमत्).

7 [d]) K₄ यक्षरक्षोगणैर्वृतः.

8 [c]) T₂ G (except G₁) अधिपः (for ईश्वरः). K₄ साक्षात् (for श्रीमान्). — [d]) T₁ द्रुतम् (for द्रष्टुम्). Śi K₂. ₃ D₁₋₃ आगमत्; K₁ आययौ (for आगतः).

9 [a]) K₁. ₂ D₃ M₂ ततो (for तथा). K₂. ₃ D₁. ₃ T₂ G (except G₁) लोकांतकः (for °कृत्). — [c]) Śi K₁. ₂. ₄ B₄ Dn D₂. ₆ मर्त्यमूर्तिं°; K₃ मूर्तामूर्तं°; B₁₋₃ मृत्युमूर्तिं°; D₁ मूर्त्यमूर्तं°; D₅ मूर्त्यमूर्त्य°.

10 [d]) D₂ T₂ G₁. ₃. ₄ [ण]व (for [अ]व-).

11 [b]) K₂. ₃ De अथ; T G चैव; M₁ अपि (for च स-). — [c]) Śi K₁ S (except G₁) मार्तांडो.

12 [a]) Śi च (for वि-). K₃. ₄ B D (except D₁₋₃) M ते भानुमंति चित्राणि.

13 [b]) Śi K₁. ₂ D₂. ₃ ऐरावण°. — [c]) Śi D₁ महेंद्राण्या.

14 [a]) = 3. 44. 17[a]. S पांडरेणा°. — [c]) K₂ तारकाराज्ञः; K₃ °इंदुः; K₄ (marg. *sec. m.*) °चंद्रः (orig. gloss)

C. 3. 1678
B. 3. 41. 14
K. 3. 41. 14

शुशुभे तारकाराजः सितमभ्रमिवाश्रितः ॥ १४
संस्तूयमानो गन्धर्वैर्ऋषिभिश्च तपोधनैः ।
शृङ्गं गिरेः समासाद्य तस्थौ सूर्य इवोदितः ॥ १५
अथ मेघस्वनो धीमान्व्याजहार शुभां गिरम् ।
यमः परमधर्मज्ञो दक्षिणां दिशमास्थितः ॥ १६
अर्जुनार्जुन पश्यास्मांल्लोकपालान्समागतान् ।
दृष्टिं ते वितरामोऽद्य भवानर्हो हि दर्शनम् ॥ १७
पूर्वर्षिरमितात्मा त्वं नरो नाम महाबलः ।
नियोगाद्ब्रह्मणस्तात मर्त्यतां समुपागतः ।
त्वं वासवसमुद्भूतो महावीर्यपराक्रमः ॥ १८
क्षत्रं चाग्निसमस्पर्शं भारद्वाजेन रक्षितम् ।
दानवाश्च महावीर्या ये मनुष्यत्वमागताः ।
निवातकवचाश्चैव संसाध्याः कुरुनन्दन ॥ १९
पितुर्ममांशो देवस्य सर्वलोकप्रतापिनः ।
कर्णः स सुमहावीर्यस्त्वया वध्यो धनंजय ॥ २०
अंशाश्च क्षितिसंप्राप्ता देवगन्धर्वरक्षसाम् ।
त्वया निपातिता युद्धे स्वकर्मफलनिर्जिताम् ।
गतिं प्राप्स्यन्ति कौन्तेय यथास्वमरिकर्शन ॥ २१
अक्षया तव कीर्तिश्च लोके स्थास्यति फल्गुन ।
दमयन्तीति विख्यातां भर्तृदर्शनलालसाम् ॥ ७९
सा वनानि गिरींश्चैव सरांसि सरितस्तथा ।
पल्वलानि च रम्याणि तथारण्यानि सर्वशः ॥ ८०
अन्वेषमाणा भर्तारं नलं रणविशारदम् ।
महात्मानं कृतास्त्रं च विचरामीह दुःखिता ॥ ८१
कच्चिद्भगवतां पुण्यं तपोवनमिदं नृपः ।
भवेत्प्राप्तो नलो नाम निषधानां जनाधिपः ॥ ८२
यत्कृतेऽहमिदं विप्राः प्रपन्ना भृशदारुणम् ।
वनं प्रतिभयं घोरं शार्दूलमृगसेवितम् ॥ ८३
यदि कैश्चिदहोरात्रैर्न द्रक्ष्यामि नलं नृपम् ।
आत्मानं श्रेयसा योक्ष्ये देहस्यास्य विमोचनात् ॥८४
को नु मे जीवितेनार्थस्तमृते पुरुषर्षभम् ।
कथं भविष्याम्यद्याहं भर्तृशोकाभिपीडिता ॥ ८५
एवं विलपतीमेकामरण्ये भीमनन्दिनीम् ।
दमयन्तीमथोचुस्ते तापसाः सत्यवादिनः ॥ ८६

C. 3. 2491
B. 3. 64. 91
K. 3. 61. 90

परः; M₂ गुरुपादार्चनरतः. — [b]) K₄ (before corr.) B₃ D₃ °वल्लभः. — K₃ om. (hapl.) 74[cd]. — [d]) Ś₁ K₁. ₄ Dn D₁–₃. ₅ महातेजा महाबलः.

75 K₂ om. 75 (cf. v.l. 72). — [a]) K₁ B₂. ₄ Dn D₅ T₁ G₁ सत्यवान्. B (except B₄) Dc D₄. ₆ अस्त्र° (for धर्म°).

76 K₂ om. 76 (cf. v.l. 72); T₂ G₂–₄ om. 76[ab]. — [a]) Dc₂ D₆ M₁ नर° (for नृप°). — [c]) K₄ B (except B₄) Dc D₁. ₄. ₆ स मे (for मम).

77 K₂ om. 77[ab] (cf. v.l. 72). — [c]) B₁ (? gloss) रणे (for मृधे). — [d]) B₁. ₃ Dc D₁ °सोमसमद्युतिः; B₂ D₄. ₆ °सोमानलद्युतिः.

78 [a]) T₁ G₁ M₂ धूर्तैर् (for कैश्चिन्). B₄ D₃ निकृतप्रज्ञैः. — [b]) Ś₁ K₁. ₃. ₄ D₁ नृपोत्तमः; B₁. ₄ T₁ नराधिपः; B₃ M नराधिपैः. K₂ Dn D₅ अनार्यैरकृतात्मभिः; D₂. ₃ वंचयित्वा महायशाः (D₃ °मनाः). — [f]) K₂ Dn D₅ G₄ हृतं; T₂ G₃ हृतो (for जितो). K₁ (? gloss) धनानि (for वसूनि) — After 78, S ins.:

274* विवासितश्च नगराद्वनवासमुपेयिवान् ।

79 [b]) Ś₁ G₁ च; K₁ ह (for वै). — [d]) K₂ Dn D₅ M₂ भर्तुर्दर्शनलालसां; B Dc D₄. ₆ भर्तृव्यसनकर्षितां. Cf. Hopkins, *Great Epic*, Parallel Phrases, No. 165 (p. 424).

80 K₁ om. 80[bc]. — [c]) T₁ पर्वतानां च; G₁ तपोवनानि (for पल्वलानि च). Ś₁ K₂. ₄ Dn D₁–₃. ₅ च सर्वाणि; K₃ गिरींश्चैव; B₂ विचित्राणि; M₁ च पुण्यानि (for च रम्याणि).

81 [a]) Cf. 49[c]. T₁ G₁ M₂ अन्वेषनी तु (T₁ म); T₂ G₃ M₁ अन्वेषंती तु; G₂. ₄ अन्वेषयंती (for °माणा). B₁. ₃ तं वीरं (for भर्तारं). — [b]) G₁ वीरं (for रण-). — [c]) D₂ वै (for च). B₂ Dc D₄. ₆ धर्मात्मानं कृतज्ञं च (D₆ कृतप्रज्ञं). — [d]) D₂. ₃ सु- (for [ह्]ह). T₁ चरामीह सुदुःखिता.

82 [a]) K₂ Dn D₅ रम्यं (for पुण्यं). — [b]) T₁ G₁. ₂ M₂ महत् (for नृपः). — G₄ om. (hapl.) 82[c]–84[b]. — [c]) G₁ transp. भवेत् and प्राप्तः. — [d]) S (except M₂; G₄ om.) नरा° (for जना°).

83 G₄ om. 83 (cf. v.l. 82). — [a]) T₂ G₂. ₃ M₁ तत्कृते°. K₂ अहो (for हृदं). K₂. ₃ B D (except D₁–₃) M₂ ब्रह्मन्; T₁ दुर्गं; G₁ दुःखं (for विप्राः). — [b]) K₁ संप्राप्ता भृश°; G₁ प्राप्तं नाभृश°. — [c]) B₁ रौद्रं (for घोरं). — [d]) D₆ सिंहशार्दूल°; G₁ शार्दूलवृक°.

84 G₄ om. 84[ab] (cf. v.l. 82). — [b]) B (except B₃) D₄. ₆ पश्यामि (for द्रक्ष्या°). — [d]) Ś₁ K (except K₂) समापनात्; D₂. ₃ S विमोक्षणात्. — After 84, K₄ D₁ ₂ ins.:

275* नारीणामधमा नारी या भर्तुः प्राणसंक्षये ।
पश्चाज्जीवति निस्तेजाः कलेव शशिनो दिवा ॥

85 [a]) B₂ न (for को). B Dn₃ D₄. ₆ हि (for नु). — [b]) K₃ G₂ पुरुषोत्तमं.

86 [a]) Ś₁ K D (except D₆) G₁ तथा (for एवं). — [d]) Ś₁ K D (except D₂–₄. ₆) सत्यदर्शिनः.

C. 3. 2491
B. 3. 64. 92
K. 3. 61. 91

उदर्कस्तव कल्याणि कल्याणो भविता शुभे ।
वयं पश्याम तपसा क्षिप्रं द्रक्ष्यसि नैषधम् ॥ ८७
निषधानामधिपतिं नलं रिपुनिघातिनम् ।
भैमि धर्मभृतां श्रेष्ठं द्रक्ष्यसे विगतज्वरम् ॥ ८८
विमुक्तं सर्वपापेभ्यः सर्वरत्नसमन्वितम् ।
तदेव नगरश्रेष्ठं प्रशासन्तमरिंदमम् ॥ ८९
द्विषतां भयकर्तारं सुहृदां शोकनाशनम् ।
पतिं द्रक्ष्यसि कल्याणि कल्याणाभिजनं नृपम् ॥ ९०
एवमुक्त्वा नलस्येष्टां महिषीं पार्थिवात्मजाम् ।
अन्तर्हितास्तापसास्ते साग्निहोत्राश्रमास्तदा ॥ ९१
सा दृष्ट्वा महदाश्चर्यं विस्मिता *अभवत्तदा ।
दमयन्त्यनवद्याङ्गी वीरसेननृपस्नुषा ॥ ९२
किं नु स्वप्नो मया दृष्टः कोऽयं विधिरिहाभवत् ।
क्व नु ते तापसाः सर्वे क्व तदाश्रममण्डलम् ॥ ९३
क्व सा पुण्यजला रम्या नानाद्विजनिषेविता ।
नदी ते च नगा हृद्याः फलपुष्पोपशोभिताः ॥ ९४
ध्यात्वा चिरं भीमसुता दमयन्ती शुचिस्मिता ।
भर्तृशोकपरा दीना विवर्णवदनाभवत् ॥ ९५
सा गत्वाथापरां भूमिं बाष्पसंदिग्धया गिरा ।
विललापाश्रुपूर्णाक्षी दृष्ट्वाशोकतरुं ततः ॥ ९६
उपगम्य तरुश्रेष्ठमशोकं पुष्पितं तदा ।
पल्लवापीडितं हृद्यं विहंगैरनुनादितम् ॥ ९७
अहो बतायमगमः श्रीमानस्मिन्वनान्तरे ।
आपीडैर्बहुभिर्भाति श्रीमान्द्रमिडराडिव ॥ ९८

---

87 [d]) D1–3 पश्य° (for द्रक्ष्य°).

88 [a]) T2 G2–4 M1 भर्तारं तु (M1 ते) महाभागे. — [b]) Ś1 D1 °विघातिनं; K1 D2. 3 °विनाशनं; K2 Dn D5 °निपातिनं. — [c]) Ś1 नृपं धर्मवतां; K1 सर्वधर्मभृतां. — [d]) Dc S (except G1) द्रष्टासि (for द्रक्ष्यसे).

89 [b]) B1 Dc °समावृतं; B3 D1 T1 G1 M2 °विभूषितं. — [c]) Ś1 तदेको; G1 स्वमेव; G2 M1 नमेव. K1. 2 Dn D2. 3. 5 G1 नगरं श्रेष्ठं; B Dc D4. 6 °रं भूयः; D1 च नरश्रेष्ठं. — [d]) D3 द्रक्ष्यसे विगतज्वरं (= 88[d]); G1 प्रविशंतमरिंदमं.

90 [c]) T G एष्यसि (for द्रक्ष्यसि). — [d]) M2 कल्याणजननं नृपं.

91 [a]) D2. 3 नरश्रेष्ठ; T2 G नलस्यैनां (G1 °स्येमां). — [c]) Ś1 ****स्तापसास्ते; K D (except D4. 6) तापसांतर्हिताः सर्वे. — [d]) K1 ततः; K2. 4 Dn D1. 5 तथा (for तदा). D2. 3 साग्निहोत्रसमाश्रमाः.

92 [a]) B1. 3. 4 प्रहृष्टा (for सा दृष्ट्वा). — [b]) Ś1 K B1. 3. 4 Dc Dn D1–3. 5 ह्यभवत्; S स्व(G1 चा)भवत् (for *अभवत्). Dc T2 G2. 3 M ततः (for तदा). B2 D4. 6 प्रहृष्टा विस्मयान्विता. — [d]) Ś1 K1. 3 °सुतप्रिया; T1 G1 M2 °स्नुषा नृप. — After 92, T1 G1 M ins.:

276* चिन्तयामास वैदर्भी किमेतद्दृष्टवत्यहम् ।

93 [b]) Dc अथाभवत्; T1 G1 हृहागतः.

94 [b]) K1 नानापक्षि°; K2 Dc Dn D1. 5 नदीद्विज°; B4 नानाजन°. — [c]) K2 Dc Dn D4. 5 क्व नु (for नदी). K2 B2 Dn D5 ते ह; K4 D6 च ते (by transp.); Dc तेद्य. B2–4 पुण्याः; D2. 3 दिव्याः (for हृद्याः). K1 नदी सुमहती हृद्या. — [d]) Ś1 K1. 4 D1–3 सा(D1–3 शा)लवृक्षोपशोभिताः (K1 °ता). — After 94, S (except M1) ins.:

277* इत्येवं नरशार्दूल विस्मिता कमलेक्षणा ।

95 Dc transp. 95[ab] and 95[cd]. — [b]) K2. 3 B2 सुविस्मिता (for शुचि°). — [c]) Ś1 K1 °पराधीना; T G2–4 °वशा दीना; G1 M °कृशा दीना. — [d]) S विवर्णा परुषाभवत् (G1 °र्णाभरणा तथा).

96 [a]) K4 T1 G1 M2 च (for [अ]थ). Ś1 K (except K2) D1. 3 T1 परां (for [अ]परां). — [d]) K3 B2 तदा (for ततः).

97 [a]) Ś1 K4 D1 तरुं सा च; K1 तरुं तं च; D2. 3 तरुं साथ (for तरुश्रेष्ठम्). — [b]) Ś1 K1 [अ]प्यशोकं (for अशोकं). Ś1 K Dn D1–3. 5 M2 वनं; B2 ततः; Dc वनं; G (except G3) तथा (for तदा). — [c]) K3 B3 T2 G (except G1) M1 °पीडनं. T1 रम्यं (for हृद्यं). — [d]) Ś1 K2. 4 Dc T1 G (except G3) M1 विहगैर् (for विहंगैर्). K3 उप°; B1. 3 D4. 6 T1 M अभि° (for अनु°).

98 D1 om. 98[ab]. — [d]) Ś1 प्रमिडराड्; K1 द्रसिणराड्; K2 B4 Dn D5 पर्वतराड्; K3 Dc D2. 6 T2 G3 द्रविडराड्; K4 B1–3 D4 D1. 3 स द्रुमराड्. G1 श्रीमद्भिर्पादपैर्वृतः. — After 98, K4 D2 ins.:

278* तमुवाच ततोऽशोकं विदर्भाधिपनन्दिनी ।
कृताञ्जलिपुटा दीना भर्तृदर्शनलालसा ।
[(L. 1) D2 समीपमुपसंगम्य विदर्भा°.]

On the other hand, D1 ins. after 98:

279* तमुवाच महावृक्षं दमयन्ती तथागता ।

विशोकां कुरु मां क्षिप्रमशोक प्रियदर्शन ।
वीतशोकभयाबाधं कच्चित्त्वं दृष्टवान्नृपम् ॥ ९९
नलं नामारिदमनं दमयन्त्याः प्रियं पतिम् ।
निषधानामधिपतिं दृष्टवानसि मे प्रियम् ॥ १००
एकवस्त्रार्धसंवीतं सुकुमारतनुत्वचम् ।
व्यसनेनार्दितं वीरमरण्यमिदमागतम् ॥ १०१
यथा विशोका गच्छेयमशोकनग तत्कुरु ।
सत्यनामा भवाशोक मम शोकविनाशनात् ॥ १०२
एवं साशोकवृक्षं तमार्ता त्रिः परिगम्य ह ।
जगाम दारुणतरं देशं भैमी वराङ्गना ॥ १०३
सा ददर्श नगान्नैकान्नैकाश्च सरितस्तथा ।
नैकांश्च पर्वतान्रम्यान्नैकांश्च मृगपक्षिणः ॥ १०४
कन्दरांश्च नितम्बांश्च नदांश्चाद्भुतदर्शनान् ।
ददर्श सा भीमसुता पतिमन्वेषती तदा ॥ १०५
गत्वा प्रकृष्टमध्वानं दमयन्ती शुचिस्मिता ।
ददर्शाथ महासार्थं हस्त्यश्वरथसंकुलम् ॥ १०६
उत्तरन्तं नदीं रम्यां प्रसन्नसलिलां शुभाम् ।
सुशीततोयां विस्तीर्णां ह्रदिनीं वेतसैर्वृताम् ॥ १०७
प्रोद्घुष्टां क्रौञ्चकुररैश्चक्रवाकोपकूजिताम् ।
कूर्मग्राहझषाकीर्णां पुलिनद्वीपशोभिताम् ॥ १०८
सा दृष्ट्वैव महासार्थं नलपत्नी यशस्विनी ।
उपसर्प्य वरारोहा जनमध्यं विवेश ह ॥ १०९
उन्मत्तरूपा शोकार्ता तथा वस्त्रार्धसंवृता ।
कृशा विवर्णा मलिना पांसुध्वस्तशिरोरुहा ॥ ११०

C. 3. 2514
B. 3. 64. 115
K. 3. 61. 115

Finally, T1 G1 M2 ins. after 98:

280* अशोक शोकापनुद शोकोपहतचेतसम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियसंदर्शनाद्धि माम् ।

[= Lines 5–6 of passage No. 791* of Adi (p. 318)! — (L. 2) M2 कुरुष्वत्वं (for कुरु क्षिप्रं). T1 °संदर्शनेन मां.]

99 a) K1 S (except T2 G3) अशोकां (for वि°). K4 T1 मे; De1 मा (for मां). — c) K1 °भयाबा*; K4 Dn3 (by corr.) °भयाबाध; B3 °भयक्रोधं; D1 °भया चापि; T1 °भयाबाधः; M2 °भयां चैव. — d) D1–3 कचित्त्वं; D4. 6 कदाचित्; G4 कच्चित्तं. De T1 G1 नलं; D2 असि (for नृपम्).

100 b) B (except B2) D4. 6 T1 G1 M2 प्रभुं (for पतिम्). — d) B2 D4. 6 मत्प्रियं; T2 G (except G1) मे पतिं.

101 c) B D4. 6 दीनम्; M1 भीमम् (for वीरम्). — d) D2. 3 °ण्यं सहसागतं.

102 b) K4 D1 अशोक मम; D2. 3 T1 M अशोकवर. De अशोक क्रमतः कुरु; G1 अशोक कुरु मां तथा. — d) K2 Dn De अशोकः शोकनाशनः; K3. 4 B D1–6 मम शोकविनाशन (B4 D1–3 °नः); M1 मम शोकं विनाशय.

103 b) K2 Dn D5 वै (for त्रिः). T1 G1 उपगम्य; T2 G2–4 परिगृह्य (for परिगम्य). Ś1 K1 T2 G (except G1) M1 च (for ह). De परिगम्य जगाम ह; D2 आर्ताभ्यर्च्य गतान्यतः. — c) B D4. 6 दारुणतमं; T1 G1 M2 दारुणं देशं. — d) D2. 3 transp. देशं and भैमी. T1 G1 M2 वैदर्भी (G1 वैदेही) कमलेक्षणा.

104 a) D2 वनानि (for नगान्). Ś1 D2. 4 एकान्; G4 एकं (for नैकान्). — b) Ś1 एकाश्च; D1 अनेकाः; D2 पर्वतान्; D3 सरांसि (for नैकाश्च). — c) D2. 3 °श्च वनखंडांश्च. — d) D1 अनेकान्; D2. 3 रम्यांश्च (for नैकांश्च).

105 a) D2. 3 गुहान्रम्यान् (for नितम्बांश्च). — b) K3 corrupt; De नदीं°; D3 ह्रदां°; G1 नगां° (for नदीं°). D1 om च. K2 B2 Dn D5. 6 T2 (before corr.) G2. 4 M1 नदीश्चाद्भुतदर्शनाः. — c) K2 ता; B1–3 D (except D1–3. 5) G1 तान्; T2 G2–4 M1 [ए]का (for सा). — d) B D4. 6 सती; T1 M2 शुभा; G1 सदा (for तदा).

106 a) S (except G1 M1) सा गत्वा दूरमध्वानं. — b) K3 D4 सुविस्मिता (for शुचि°).

107 b) T2 G2–4 शिवां (for शुभाम्). — d) Ś1 क्रंदिनी; K1 क्रदंतीं (sic); De Dn3 T1 M ह्लादिनीं; T2 (by corr.) G2. 4 ह्लादिनीं; G1 ह्लादनैः (for ह्रदिनीं). Ś1 K1. 3 तापसैर्वृतां; T1 G1 M2 पादपैः; T2 G3 वैतसैः; M1 पक्षिसंकुलां.

108 a) D2. 3 क्रौंचमिथुनैश्च; G1 °कारंडैश्च. — b) K4 B3 De D1–3. 5 S चक्रवाकोप(S °कैश्च)शोभितां. — c) B De D2–4. 6 °समां (for °झषां). — d) K2 Dn D5 विपुलद्वीपं; T2 G (except G1) M2 पुलिनद्वीपराजितां.

109 a) G1 सु- (for [ए]व) — b) G1 M2 दमयंती (for नल°). T2 G तपस्विनी (G1 शुचिस्मिता) (for यश°). — c) K1 T1 G1 M2 उपसृत्य; K2 De Dn D1. 4–6 उपसर्प (sic); K4 D3 उपासर्पद्. ❀ Cn: उपसर्प उपसस्मर्प। अभ्यासलोप आर्षः। ❀

110 a) Ś1 K1. 3. 4 D1–3 उन्मत्तवद्भीमसुता. — c)

C. 3. 2515
B. 3. 64. 116
K. 3. 61. 116

तां दृष्ट्वा तत्र मनुजाः केचिद्भीताः प्रदुद्रुवुः ।
केचिच्चिन्तापरास्तस्थुः केचित्तत्र विचुक्रुशुः ॥ १११
प्रहसन्ति स्म तां केचिदभ्यसूयन्त चापरे ।
चक्रुस्तस्यां दयां केचित्पप्रच्छुश्चापि भारत ॥ ११२
कासि कस्यासि कल्याणि किं वा मृगयसे वने ।
त्वां दृष्ट्वा व्यथिताः स्मेह कच्चित्त्वमसि मानुषी ॥११३
वद सत्यं वनस्यास्य पर्वतस्याथ वा दिशः ।
देवता त्वं हि कल्याणि त्वां वयं शरणं गताः ॥ ११४
यक्षी वा राक्षसी वा त्वमुताहोऽसि वराङ्गना ।
सर्वथा कुरु नः स्वस्ति रक्षस्वास्माननिन्दिते ॥ ११५

यथायं सर्वथा सार्थः क्षेमी शीघ्रमितो व्रजेत् ।
तथा विधत्स्व कल्याणि त्वां वयं शरणं गताः ॥११६
तथोक्ता तेन सार्थेन दमयन्ती नृपात्मजा ।
प्रत्युवाच ततः साध्वी भर्तृव्यसनदुःखिता ।
सार्थवाहं च सार्थं च जना ये चात्र केचन ॥११७
यूनः स्थविरबालाश्च सार्थस्य च पुरोगमाः ।
मानुषीं मां विजानीत मनुजाधिपतेः सुताम् ।
नृपस्नुषां राजभार्यां भर्तृदर्शनलालसाम् ॥ ११८
विदर्भराण्मम पिता भर्ता राजा च नैषधः ।
नलो नाम महाभागस्तं मार्गाम्यपराजितम् ॥ ११९

Ks कृशां विवर्णां मलिनां; De2 D1–4 कृशा विवर्णमलिना (D2. 3 °वदना).

111 b) G1 विरूपां केपि दुद्रुवुः. — c) T1 तापपरा°; M2 भीताः परा° (for चिन्तापरा°). K2 Dn D5 जग्मुः (for तस्थुः).

112 ab) D2. 3 केचित्तत्राभ्यसूयंति केचिन्निंदंति चापरे. — c) Ś1 Ks B1. 2 De D1 चक्रुस्तस्या; K2 Dn D5 अकुर्वन; D2. 3 चक्रुः केचिद्; S कुर्वत्यस्यां (G1 °त्यन्ये; G2 °त्यस्या; M1 °तोस्यां). D2 तस्यां; D3 तत्र (for केचित्). — d) K1 तां च; D3 चैव (for चापि).

113 c) T1 चैने; G1 सर्वे; M2 चैव (for स्मेह). — d) T1 M2 नराः सार्थनि(T1 स्वार्थवि)वासिनः; T2 G2–4 वयं भीताश्च शोभने.

114 a) T2 G3 देवता त्वं (for वद सत्यं). G4 देवता मीह सुभगे. — b) G4 त्वं वनस्य (for पर्वतस्य). K3 [अ]पि; B3 D2 T G2–4 [अ]स्य; G1 च (for [अ]थ). — d) K4 transp. त्वां and वयं. K2 D1 किं वा मृगयसे वने (= 113b).

115 T1 om. 115–116. — a) De पन्नगी (for राक्षसी). B D4. 6 वासि; M2 वापि (for वा त्वम्). — b) K4 उताहो स्विद्; M2 त्वमुताहो (for उताहोऽसि). De सुरांगना. B3 D4. 6 T2 G M1 उताहो (G2. 4 °त वा) स्वित्सुरांगना. — d) K3 Dn2 D2. 5. 6 G1 रक्ष वा°; K4 De Dn1. n3 T2 G2–4 M2 रक्ष चा°; D1 रक्षया° (for रक्षस्वा°). B2 वरांगने (for अनिन्दिते). M1 त्वां वयं शरणं गताः (= 114d, 116d).

116 T1 om. 116 (cf. v.l. 115). — a) T2 G2. 3 M1 सर्वशः; G1 सर्वतः; G4 सदशः. G1 स्वार्थं (for सार्थः). D2. 3 यथायं सर्वसार्थश्च. — b) K3 D1 क्षेमः; D3 °मं (for °मी). B D4. 6 सर्वं; M2 क्षिप्रम् (for शीघ्रम्). T2 G क्षेमं गच्छेदशंकितः. — c) T2 G (except G1) त्रायस्व (for विधत्स्व). — d) = 114d. K D (except D4. 6) यथा श्रेयो हि नो भवेत् (K3 यथा श्रेयो भवेच्च नः).

117 a) Ś1 D3 यथोक्ता. — b) K1 शुभानना; G1 शुचिस्मिता (for नृपा°). — c) Ś1 K (except K2) D1–3 सार्थं (for साध्वी). — d) K2 De Dn D5 °व्यसनपीडिता; B D3. 4. 6 G1 °व्यसनकर्शि(or °र्षि)ता; T1 M2 °शोकनिपीडिता; T2 G2–4 °दर्शनलालसा (cf. 118f). — e) D1. 3 S (except G1) °वाहश्च सार्थश्च. — f) De जना वा; D3 ये चान्ये (for जना ये). B D4. 6 तत्र; De येत्र; D3 वात्र; T2 G3 चास्य (for चात्र).

118 a) Ś1 युवानः स्थविरबालाः; K1–3 De Dn D1. 5 T2 G2–4 युवस्थविरबाला(De °लां)श्च; K4 B3 D2. 4. 6 M यूनः स्थविरबालांश्च; D3 युवा स्थविरबालाश्च. — b) K4 [ण]त्र; S (except G1) [अ]स्य (for च). K3. 4 B De D2. 4. 6 M पुरोगमान्. — c) D2. 3 G1 विजानीध्वं. — e) D1 राजस्नुषां. G1 राजपत्नीं. — 118f = (var.) 3. 62. 1d.

119 b) Ś1 K1 च मम (for राजा च). — After 119ab, K4 ins.:

281* क्व नु मां कितवश्छित्त्वा वस्त्रार्धं प्रस्थितो मम ।
उत्सृज्य विपिने सुप्तामनुरक्तां प्रियां प्रिय ।
वैषम्यमपि संप्राप्तो गोपायन्ति कुलस्त्रियः ।
आत्मानमात्मना सत्योत्थितसर्गा न संशयः ।
क्व नु सा क्षुत्पिपासार्ता श्रान्ताराते तपस्विनी । [5]
स्मरन्ती तस्य मन्दस्य क्व वामायोपतिष्ठति ।

[L. 1-2 = (var.) 3. 67. 9. — L. 3-4 = (var.) 3. 68. 8abcd. — L. 5-6 = (var.) 3. 64. 10.]

— c) T1 G1 महाराज (for °भागस्). — d) Ś1 मृग्या°; D3 मृगा° (for मार्गा°). K3 corrupt.

यदि जानीत नृपतिं क्षिप्रं शंसत मे प्रियम् ।
नलं पार्थिवशार्दूलममित्रगणसूदनम् ॥ १२०
तामुवाचानवद्याङ्गीं सार्थस्य महतः प्रभुः ।
सार्थवाहः शुचिर्नाम शृणु कल्याणि मद्वचः ॥ १२१
अहं सार्थस्य नेता वै सार्थवाहः शुचिस्मिते ।
मनुष्यं नलनामानं न पश्यामि यशस्विनि ॥ १२२
कुञ्जरद्वीपिमहिषशार्दूलर्क्षमृगानपि ।
पश्याम्यस्मिन्वने कष्टे अमनुष्यनिषेविते ।
तथा नो यक्षराडद्य मणिभद्रः प्रसीदतु ॥ १२३
साब्रवीद्वणिजः सर्वान्सार्थवाहं च तं ततः ।
क्व नु यास्यति सार्थोऽयमेतदाख्यातुमर्हथ ॥ १२४

सार्थवाह उवाच ।

सार्थोऽयं चेदिराजस्य सुबाहोः सत्यवादिनः ।
क्षिप्रं जनपदं गन्ता लाभाय मनुजात्मजे ॥ १२५

इति श्रीमहाभारते आरण्यकपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

बृहदश्व उवाच ।

सा तच्छ्रुत्वानवद्याङ्गी सार्थवाहवचस्तदा ।
अगच्छत्तेन वै सार्धं भर्तृदर्शनलालसा ॥ १
अथ काले बहुतिथे वने महति दारुणे ।
तडागं सर्वतोभद्रं पद्मसौगन्धिकं महत् ॥ २
ददृशुर्वणिजो रम्यं प्रभूतयवसेन्धनम् ।

C. 3. 2534
B. 3. 65. 3
K. 3. 62. 3

---

120 [a]) B_2 $D_{4.6}$ M_1 **जानीथ** (for **°त**). — [b]) D_6 **शंसथ**. D_{c1} **मत्**; D_{c2} **मां** (for **मे**). D_3 **पतिं** (for **प्रियम्**). — [c]) $D_{2.3}$ **नृपं** (for **नलं**). $Ś_1$ K D (except $D_{4.6}$) **पुरुष°**. — [d]) T_2 G_3 **°मर्दनं**.

121 [d]) T_1 G_1 M_2 **दमयंतीं नराधिप**.

123 M_2 om. 123 (along with 122[bcd] and 124[a]). — [ab]) $Ś_1$ $K_{1.4}$ D_1 G_4 **कुंजरद्वीप°**; $B_{1.2}$ De $D_{2-4.6}$ **°द्वीपिमहिषाऽऽशा**(De **°षं शा**)**र्दूल°**; T_1 G_1 **गोमायुकुंजरद्वीपिमहिषर्क्षमृगान्**. S (M_2 om.) **अहं** (for **अपि**). — [cd]) K_2 Dn D_5 **कृच्छ्रे**; K_4 D_3 **घोरे**; T_2 G (except G_1) **शून्ये** (for **कष्टे**). To avoid the hiatus, all MSS. except T_2 $G_{3.4}$ M_1 ins. **हि** between the two halves of the line! — After 123[cd], K_1 B D (except $D_{1-3.5}$) ins.:

282* **ऋते त्वां मानुषीं मर्त्यं न पश्यामि महावने ।**;

while T_2 G_{2-4} M_1 ins.:

283* **यतो वयं न पश्यामो नलं पार्थिवमत्र वै ।**

— [e]) $Ś_1$ K_1 **यथा नो**; T G **ततोस्य** (T_1 **°यं**; G_1 **°नो**). — [f]) K_2 D_{c1} D_2 T_1 $G_{2.4}$ M_1 **माणिभद्रः**.

124 M_2 om. 124[a] (cf. v.l. 123). — [a]) G_1 **व्रजतः** (for **वणिजः**). K_3 **सार्थं** (for **सर्वान्**). — [b]) K_1 **तद्वचः**; T_1 $G_{1.2.4}$ **तत्वतः** (for **तं ततः**). — [d]) $K_{2.4}$ Dn D_5 **अर्हसि** (for **अर्हथ**).

125 [b]) $Ś_1$ K Dn $D_{2.3.5.6}$ **सत्यदर्शिनः**; D_1 **प्रियदर्शनः**. — [d]) B De $D_{4.6}$ **नृवरा°**; G_1 **जनपा°** (for **मनुजा°**).

Colophon om. in $Ś_1$ K_1. — *Major parvan:* Dn_2 T G_{2-4} **आरण्य**. — *Sub-parvan:* N ($Ś_1$ K_1 om.) T_1 G_1 M_1 (all om. sub-parvan name) mention only **नलोपाख्यान**. — *Adhy. name:* D_2 **नलावलोकने दमयंतीविलापः**. — *Adhy. no.* (figures, words or both): Dn 64; D_1 66; T G M_2 (after corr.) 61 (as in text); M_1 62; M_2 (before corr.) 63. — *Śloka no.:* Dn 134.

62

☞ For stanzas 1–17, K_4 D_{1-3} subst. a passage of 96 lines (forming by itself a separate adhy.) given in App. I (No. 10), a passage which is totally different in wording from the constituted text, but has on the other hand many lines in common with the K_2 Dn passage (in other words, with the Vulgate version); cf. passages No. 11–12 of the same App.

1 M_2 om. 1[c]–17[d]. — [c]) $Ś_1$ K_{1-3} De Dn D_5 **जगाम सह तेनैव**; B $D_{4.6}$ **जगाम तेन** (B_4 **°मानेन**) **सार्थेन**; T_1 **अगच्छद्राजशार्दूल**; G_1 **अगच्छत्तेन राजेंद्र**. — [d]) $Ś_1$ K_{1-3} De Dn D_5 **सार्थेन पतिलालसा**; T_1 M_1 **दुःखशोकसमन्विता** (M_1 **°परायणा**).

2 M_2 om. 2 (cf. v.l. 1); M_1 om. 2–17. — [c]) $Ś_1$ K_1 **तडाकं**; T G **तटाकं**. — [d]) T G **°सौगंधिकायुतं**.

C. 3. 2534
B. 3. 65. 3
K. 3. 62. 3

बहुमूलफलोपेतं नानापक्षिगणैर्वृतम् ॥ ३
तं दृष्ट्वा मृष्टसलिलं मनोहरसुखावहम् ।
सुपरिश्रान्तवाहास्ते निवेशाय मनो दधुः ॥ ४
संमते सार्थवाहस्य विविशुर्वनमुत्तमम् ।
उवास सार्थः सुमहान्वेलामासाद्य पश्चिमाम् ॥ ५
अथार्धरात्रसमये निःशब्दस्तिमिते तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ।
पानीयार्थं गिरिनदीं मदप्रस्रवणाविलाम् ॥ ६
मार्गं संरुध्य संसुप्तं पद्मिन्याः सार्थमुत्तमम् ।
सुप्तं ममर्द सहसा चेष्टमानं महीतले ॥ ७
हाहारवं प्रमुञ्चन्तः सार्थिकाः शरणार्थिनः ।
वनगुल्मांश्च धावन्तो निद्रान्धा महतो भयात् ।
केचिद्दन्तैः करैः केचित्केचित्पद्भ्यां हता नराः ॥ ८
गोखरोष्ट्राश्वबहुलं पदातिजनसंकुलम् ।
भयार्तं धावमानं तत्परस्परहतं तदा ॥ ९
घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले ।

3 M om. 3 (cf. v.l. 1, 2). — [c]) Ś1 K1–3 B De Dn D5 °पुष्प° (for °मूल°). — [d]) Ś1 K1–3 De Dn D5 °पक्षिनिषेवितं; G1 °मृगगणैर्वृतं.

4 M om. 4 (cf. v.l. 1, 2). — [a]) Ś1 K1–3 De Dn D5 निर्मलस्वादु°; B4 तं दृष्ट्वारण्य°. — [b]) Ś1 K2. 3 De Dn D5 मनोहारि सुशीतलं; K1 सुमनोहारि शीतलं; B1. 3. 4 D4. 6 मनोरमसुखावहं; B2 (m as in text) मनोहरसुखावृतं.

5 M om. 5 (cf. v.l. 1, 2). — [b]) B3 G1 दद्युर् (for विविशुर्). — [c]) B D4. 6 उवास स महासार्थः. — [d]) K1 गिरिम् (for वेलाम्). Ś1 शैलमासाद्य पश्चिमं; T G निशामासाद्य पद्मिनीं.

☞ For 6–10[cd], D5 subst. a passage given in App. I (No. 11), which is a variant version of lines 13–96 of passage No. 10 of the same App.

6 M om. 6 (cf. v.l. 1, 2). — [b]) Ś1 तथा; B D4 [s]नघ (for तदा). T G निःशब्दे (T1 °ब्द-) तिमिरे तदा. — [d]) Ś1 K1 हस्तियूथ उपा°. — [e]) T G °तटात् (for °नदीं). Ś1 K1. 3 अथ सार्थं गिरिनिभा (Ś1 °भं). — [f]) Ś1 K1 मदप्रस्रवणा (K1 °विणो) गजाः; K3 °प्रश्रावणाविलाः; B1. 3 D4 T1 G1 °प्रस्रव(G1 °वि)णाविलं; T2 G2–4 °प्रस्रवणोल्बणं (G2. 4 °ढलं). — Dn1. n2 ins. after 6: D5, after 10:

284* अथापश्यत सार्थं तं सार्थजान्सुबहून्गजान् ।
ते तान्ग्राम्यगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ।
तेषामापततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृङ्गाणां पततां क्षितौ ।
स्पन्दतामपि नागानां मार्गा नष्टा वनोद्भवैः ।,

which in D5 is followed by passage No. 12 of App. I.

7 M om. 7 (cf. v.l. 1, 2). — [a]) Ś1 K1 सार्थं (for मार्गं). T2 G1. 3. 4 निरुध्य (for सं°). G2 सुप्तं तं (for संसुप्तं). — [b]) Ś1 K1. 3 तीरमुत्तमं (K3 °रे); K2 De तीर उत्तरे (for सार्थमुत्तमम्). — [c]) K2 B2. 3 Dn1 D4. 6 सतं; G1 सुप्तान्. Ś1 K3 Dn ममर्दुः; K1 मम*. T2 G3. 4 तरसा. — [d]) Ś1 K1 T G (except G1) वेष्ट° (for चेष्ट°).

8 M om. 8 (cf. v.l. 1, 2). — [a]) Ś1 K3 De2 हाहारावं; K2 B3. 4 Dn G1 हाहाकारं; De1 दाहाहाराः; T G2–4 महारवं. K3 De1 विमुंचतः; D4. 6 वियुंजंतः. — T1 om. (haplol.) 8[b]–10[a]. — [b]) T2 G3. 4 बुध्यंत; G1 वणिजः; G2 वध्यंते (for सार्थिकाः). K1 साक्षिकाः शरणैषिणः. — [d]) T2 G निद्रया (for निद्रान्धा). Ś1 K1–3 De Dn बहवो (for महतो). Dn [s]भवन् (for भयात्)! — [e]) G1 नखैः (for करैः). — [f]) De गजैर् (for हता). Ś1 K1–3 B2 Dn1. n2 गजैः; De हताः (for नराः). T2 G केचित्पद्मिनैरा हताः.

9 T1 M om. 9 (cf. v.l. 1, 2, 8). — [a]) Ś1 K1. 3 Dn निहतोष्ट्राश्वबहुलाः; K2 गोखरोष्ट्रांश्च बहुलान्; De गोखरोष्ट्राश्वबहुलाः. — [b]) Ś1 °जनवत्सलाः; K1–3 De Dn °जन(De °ध्वज)संकुलाः; B1. 3. 4 D4. 6 °नरसंकुलं. — [c]) Ś1 K3 भयार्ता धावमानाश्च; K1. 2 B4 De Dn भयादाधावमानाश्च (B4 °स्ते); B1. 2 D4 भयार्तमाद्रवत्सार्थः (D4 °न्सर्वे); B3 D6 °र्तमद्रवत्सर्वं. — [d]) Ś1 K1–3 B4 De Dn °हतास्. T2 G तथा (for तदा).

10 M om. 10 (cf. v.l. 1, 2); T1 om. 10[a] (cf. v.l. 8). — [a]) B1. 4 D4. 6 कष्टां वाचं; B2. 3 कष्टा वाचो; T2 G (except G1) घोरं नादं. G4 प्र° (for वि°). — [c]) K2 (corrupt) वृक्षेथासज्य संतुष्टाः; B Dn D4. 6 वृक्षमा(Dn वृक्षेष्वा)रुह्य संरब्धाः; De वृक्षेथारुह्य संविग्नाः. — K2 Dn ins. after 10[cd]: D5, before 10[e/]:

285* एवं प्रकारैर्बहुभिर्दैवेनाक्रम्य हस्तिभिः ।

— [e]) K2 Dn D5 राजन् (for तथा). K2 Dn T G विनिहतं (for तत्रि°). — [f]) K3 समस्तं (for समृद्धं). G1 सार्थ-

वृक्षेष्वासज्य संभग्नाः पतिता विषमेषु च ।
तथा तन्निहतं सर्वं समृद्धं सार्थमण्डलम् ॥ १०
अथापरेद्युः संप्राप्ते हतशिष्टा जनास्तदा ।
वनगुल्माद्विनिष्क्रम्य शोचन्तो वैशसं कृतम् ।
भ्रातरं पितरं पुत्रं सखायं च जनाधिप ॥ ११
अशोचत्तत्र वैदर्भी किं नु मे दुष्कृतं कृतम् ।
योऽपि मे निर्जनेऽरण्ये संप्राप्तोऽयं जनार्णवः ।
हतोऽयं हस्तियूथेन मन्दभाग्यान्ममैव तु ॥ १२
प्राप्तव्यं सुचिरं दुःखं मया नूनमसंशयम् ।
नाप्राप्तकालो म्रियते श्रुतं वृद्धानुशासनम् ॥ १३
यन्नाहमद्य मृदिता हस्तियूथेन दुःखिता ।
न ह्यदैवकृतं किंचिन्नराणामिह विद्यते ॥ १४
न च मे बालभावेऽपि किंचिद्व्यपकृतं कृतम् ।
कर्मणा मनसा वाचा यदिदं दुःखमागतम् ॥ १५
मन्ये स्वयंवरकृते लोकपालाः समागताः ।
प्रत्याख्याता मया तत्र नलस्यार्थाय देवताः ।
नूनं तेषां प्रभावेन वियोगं प्राप्नुवत्यहम् ॥ १६
एवमादीनि दुःखानि सा विलप्य वराङ्गना ।
हतशिष्टैः सह तदा ब्राह्मणैर्वेदपारगैः ।
अगच्छद्राजशार्दूल दुःखशोकपरायणा ॥ १७
गच्छन्ती सा चिरात्कालात्पुरमासादयन्महत् ।
सायाह्ने चेदिराजस्य सुबाहोः सत्यवादिनः ।
वस्त्रार्धकर्तसंवीता प्रविवेश पुरोत्तमम् ॥ १८
तां विवर्णां कृशां दीनां मुक्तकेशीममार्जनाम् ।

C. 3. 2577
B. 3. 65. 46
K 3. 62. 47

वाह मसंडलं. — After 10, D_6 ins. 284*. — A passage of 37 lines given in App. I (No. 12) is ins. in K_2 Dn after 10; in D_6, after 284*. Cf. Holtzmann, *Das Mahābhārata*, 3. 70.

11 M om. 11 (cf. v.l. 1, 2). — [a]) De Dn_3 तथा° (for अथा°). — [b]) K_2 B $D_{4.6}$ T_1 G_2 हतशिष्टो जन(° K_2 °ष्टजन-; T_1 °ष्टा जन-; G_2 °ष्टजना)स्तदा. — [c]) $Ś_1$ $K_{1.3}$ D_5 तस्माद्देशाद्; K_2 De देशात्तस्माद्; B $D_{4.6}$ वनदुर्गाद् (for वनगुल्माद्). $D_{4.6}$ विनिःसृत्य. — [d]) $Ś_1$ K_3 शोचंस्ते; K_1 ह्यशोचन्; K_2 $B_{1.4}$ De_1 Dn_1 D_5 G_4 शोचंते; $B_{2.3}$ $D_{4.6}$ शुशोच; De_2 प्रोचुस्ते (for शोचन्तो). — [e/f]) G_1 दयितं (for पितरं), and पितरं (for सखायं). $Ś_1$ K_{1-3} Dn D_5 T G_3 नरा° (for जना°). — After 11, T G ins.:

286* हन्यमाने तथा सार्थे दमयन्ती शुचिस्मिता ।
ब्राह्मणैः सहिता तत्र वने तु न विनाशिता ।

12 M om. 12 (cf. v.l. 1, 2). — [b]) T_1 एतद् (for नु मे). K_1 वैशसं (for दुष्कृतं). — G_1 om. (hapl.) 12^c–15^b. — [d]) $Ś_1$ [s]स्मि (for ऽयं). — [e]) $Ś_1$ K_{1-3} De Dn D_5 स हतो (for हतोऽयं). — [f]) B $D_{4.6}$ T_2 G_3 मंदभाग्यं. K_2 B Dn $D_{4.6}$ तत्; K_3 च (for तु).

13 G_1 M om. 13 (cf. v.l. 12, 1, 2). — [b]) $Ś_1$ K_{1-3} De Dn D_5 नूनमद्यापि वै मया. — [c]) De_1 T_2 G (G_1 om.) °काले; Dn_1. n_3 (by corr.) $D_{4.6}$ T_1 °कालं.

14 G_1 M om. 14 (cf. v.l. 12, 1, 2). — [a]) Dn D_6 या (for यन्). — [c]) T G (G_1 om.) नान्यद् (for न हि). $Ś_1$ K_2 [अ]दैवकृतं; T G (G_1 om.) दै(T_1 दे)वकृतात्. — [d]) K_3 B $D_{4.6}$ दृश्य° (for विद्य°).

15 M om. 15 (cf. v.l. 1, 2); G_1 om. 15^{ab} (cf. v.l. 12). — [a]) K_3 हि (for च). — [b]) $Ś_1$ अप°; K_2 Dn D_5 पाप° (for व्यप°).

16 M om. 16 (cf. v.l. 1, 2). — [c]) De नेषां नूनं (by transp.).

17 M_1 om. 17; M_2 om. 17^{abcd} (cf. v.l. 1, 2). — [a]) $Ś_1$ K_{1-3} De Dn $D_{4.5}$ दुःखार्ता; T_1 दुःखेन (for दुःखानि). — [b]) De विलप्य च (for सा विलप्य). K_1 वरानना. — After 17^{ab}, K_2 Dn D_5 ins.:

287 प्रलापानि तदा तानि दमयन्ती पतिव्रता ।

— [c]) $Ś_1$ K_{1-3} De Dn D_5 हतशेषैः. — [e]) B_1 अगमद्; M_2 आगच्छद्. — [f]) $Ś_1$ K_{1-3} B De Dn D_{4-6} चंद्रले(° $B_{1.3.4}$ $D_{4.6}$ विद्युले)खेव शारदी; M_2 दुःखशोकसमन्विता.

18 Before 18, D_{1-3} ins.:

288* बृहदश्व उवाच ।
एवं सा दुःखसंतप्ता भर्तृव्यसनकर्शिता ।

— [a]) K_4 Dn_3 M_1 गच्छती. K_4 D_{1-3} न (for सा). $K_{2.4}$ Dn $D_{1-3.5}$ बाला (for कालात). — [b]) D_2 बृहत (for महत्). — [c]) De चेदिराष्ट्रस्य. — [d]) $Ś_1$ K (except K_3) Dn $D_{1-3.5}$ सत्यदर्शिनः. — For 18^{cd}, cf. 3. 61. 125^{ab}. — After 18^{cd}, S ins.:

289* सा तु तच्चारुसर्वाङ्गी सुबाहोस्तुङ्गगोपुरम् ।

— [e]) K_1 M वस्त्रावकर्त°; K_2 Dn D_5 अथ वस्त्रार्ध°; K_3 De एकवस्त्रार्ध°; K_4 D_{1-3} कृत्तवस्त्रार्ध°; B $D_{4.6}$ वस्त्रार्धकाय°; T G वस्त्रार्धेन च (T_1 सु-) संवीता.

C. 3. 2578
B. 3. 65. 47
K. 3. 62. 47

उन्मत्तामिव गच्छन्तीं ददृशुः पुरवासिनः ॥ १९
प्रविशन्तीं तु तां दृष्ट्वा चेदिराजपुरीं तदा ।
अनुजग्मुस्ततो बाला ग्रामिपुत्राः कुतूहलात् ॥ २०
सा तैः परिवृतागच्छत्समीपं राजवेश्मनः ।
तां प्रासादगतापश्यद्राजमाता जनैर्वृताम् ॥ २१
सा जनं वारयित्वा तं प्रासादतलमुत्तमम् ।
आरोप्य विस्मिता राजन्दमयन्तीमपृच्छत ॥ २२
एवमप्यसुखाविष्टा बिभर्षि परमं वपुः ।
भासि विद्युदिवाभ्रेषु शंस मे कासि कस्य वा ॥ २३
न हि ते मानुषं रूपं भूषणैरपि वर्जितम् ।
असहाया नरेभ्यश्च नोद्विजस्यमरप्रभे ॥ २४
तच्छ्रुत्वा वचनं तस्या भैमी वचनमब्रवीत् ।
मानुषीं मां विजानीहि भर्तारं समनुव्रताम् ॥ २५
सैरन्ध्रीं जातिसंपन्नां भुजिष्यां कामवासिनीम् ।
फलमूलाशनामेकां यत्रसायंप्रतिश्रयाम् ॥ २६
असंख्येयगुणो भर्ता मां च नित्यमनुव्रतः ।
भर्तारमपि तं वीरं छायेवानपगा सदा ॥ २७
तस्य दैवात्प्रसङ्गोऽभूदतिमात्रं स्म देवने ।
द्यूते स निर्जितश्चैव वनमेकोऽभ्युपेयिवान् ॥ २८
तमेकवसनं वीरमुन्मत्तमिव विह्वलम् ।

---

19 [a]) K₂ Dn D₅ विह्वलां (for विवर्णां). — [b]) K₃ M₁ मुक्तकेशाम्. Ś₁ K Dc Dn D₁₋₃. ₅ अमार्जितां; B₁. ₃. ₄ वरांगनां; B₂ D₄. ₆ वराननां (for अमार्जनाम्). T₁ G₂ M₂ मलिनां मुक्तमूर्धजां.

20 [a]) M₁ निर्विशतीं. K₄ तदा (for तु तां). T₂ G (except G₁) तां तु प्रविशन्तीं दृष्ट्वा. — [b]) Ś₁ K (except K₂) D₁₋₃ °पुरं. — [c]) Ś₁ K D (except D₅) तत्र (for ततो). — [d]) Ś₁ राजपुत्र्यः; K₁₋₃ राजपुत्राः; K₄ D₁₋₃ राजपुत्रीं; D₄ T₁ M₁ ग्रामपुत्राः; T₂ (by corr.) G₃ पौरपुत्राः; G₁ राजपुत्रां; G₂. ₄ M₂ ग्राम्यपुत्राः.

21 [d]) B D₄. ₆ transp. जनैः and वृतां. — After 21. K₁₋₃ B D (except D₁. ₂) ins.:

290* धात्रीमुवाच गच्छैनामानयेह ममान्तिकम् ।
जनेन क्लिश्यते बाला दुःखिता शरणार्थिनी ।
याद्यग्रपां च पश्यामि विद्योतयति मे गृहम् ।
उन्मत्तवेषप्रच्छन्ना श्रीरिवायतलोचना ।

[(L. 1) K₂ D₅ चैवैनाम्; Dc च इमाम्; D₃ गच्छेमाम् (for गच्छैनाम्). K₃ [ए]नां; B D₄. ₆ [इ]नि (for [इ]ह). — (L. 2) K₁. ₃ क्लिश्यते; B₂ क्लिष्यते; B₃ कृष्यते (for क्लिश्यते). B₁₋₃ Dc₂ D₄. ₆ [स]नाथा (for बाला). B₄ Dc₁ जनैरा (Dc₁ °नैना) क्लिश्यतेनाथा. — (L. 3) K₂ B₂ Dc Dn D₅ तादृग्रूपं (B₂ Dc °पां). — (L. 4) K₁ B उन्मत्तवेश°; K₂ Dn D₅ उन्मत्तवेषा कल्याणी. Dc श्रीरिवोत्पललोचना.]

22 [a]) Ś₁ K₄ D₁₋₃ तं; K₁ तां (for सा). Ś₁ K₁ D₁. ₂ [अ]थ; K₂ तु; K₄ च; Dc तत्; S नां (for तं). — [c]) K₂ D₄. ₆ आरोह्य; B₃. ₄ आरुह्य (for आरोप्य).

23 [a]) K₂ D₅ एवमप्यशुभे काले. — [c]) D₅ नभो- (for भासि). — [d]) D₁ कस्य कस्य; T₂ G₁. ₃. ₄ (by transp.) कस्य कासि. K₂ D₅ भाविनि; D₁ कन्यके (for कस्य वा).

24 [a]) B D₅ S (except G₁) च (for हि). — [c]) D₂. ₃ असह्यं यं नरेभ्यस्त्वं. — [d]) D₁₋₃ °र्षभे (for °प्रभे).

25 [a]) K₃ transp. श्रुत्वा and तस्याः. — [c]) Ś₁ मानुष्यहं विजा°.

26 [a]) K (except K₄) D₂. ₅. ₆ T₂ (before corr.) G₂. ₄ M₁ सैरंध्री-; B Dc D₄ सैरिंध्रीं (spelling seen in the Virāṭa also). Ś₁ K (except K₂) D₁₋₃. ₅ व्रतसंपन्नां. — [b]) Ś₁ यथार्हा; K₄ D₁ यथार्हं; D₂. ₃ यथार्हं (for भुजिष्यां). B₂ कामचारिणीं. K₃ भुजिष्या °वासिनी. — [c]) B₁. ₃ D₄. ₆ °शिनीम् (for °शनाम्). — [d]) Ś₁ °प्रतिश्रयात्; G₁ °तनाश्रयां.

27 [c]) Ś₁ भर्तारम्; K₁ तथाहम्; K₂ B Dn D₄. ₆ M₁ (*inf. lin.*) भक्ताहम् (for भर्तारम्). K₁ अनु (for अपि). T₂ G₂₋₄ अहं चानुगता वीरं. — [d]) G₁ सीतेव (for छायेव). K₂. ₄ B₃ Dn D₁. ₂. ₅ G₁ M₁ [अ]नुगता (for [अ]नपगा). K₂ Dn D₅ पथि (for सदा). K₃ छायेव अनुगा सदा; B₁. ₂. ₄ D₄. ₆ छायेवानपगामिनी. — M₂ (which om. 28[a]–29[b]) ins. 291* after 27.

28 M₂ om. 28[a]–29[b]. — [b]) K₂ B₁ Dn D₅ सु-; D₁₋₃ S (M₂ om.) हि (for स्म). — [c]) Dc वि- (for स). — [d]) K₂ Dn D₅ °मेक उपेयिवान्.

29 M₂ om. 29[ab] (cf. v.l. 28). — [a]) T₂ G₂₋₄ छन्नम् (for वीरम्). G₁ तमेकमवनीवीरं. — [b]) T₂ G (except G₁) अति- (for इव). — T₁ G₁ ins. after 29[ab]: M₂ (which om. 28[a]–29[b]) ins. after 27:

291* स केनचिदमेयात्मा कारणेन वराङ्गने ।
दुःखितः सर्वमुत्सृज्य प्रविवेश महावनम् ।
ततस्तं दुःखितं दृष्ट्वा प्रविशन्तं च काननम् ।

आश्वासयन्ती भर्तारमहमन्वगमं वनम् ॥ २९
स कदाचिद्वने वीरः कस्मिंश्चित्कारणान्तरे ।
क्षुत्परीतः सुविमनास्तदप्येकं व्यसर्जयत् ॥ ३०
तमेकवसनं नग्नमुन्मत्तं गतचेतसम् ।
अनुव्रजन्ती बहुला न स्वपामि निशाः सदा ॥ ३१
ततो बहुतिथे काले सुप्तामुत्सृज्य मां क्वचित् ।
वाससोऽर्धं परिच्छिद्य त्यक्तवान्मामनागसम् ॥ ३२
तं मार्गमाणा भर्तारं दह्यमाना दिनक्षपाः ।
न विन्दाम्यमरप्रख्यं प्रियं प्राणधनेश्वरम् ॥ ३३
तामश्रुपरिपूर्णाक्षीं विलपन्तीं तथा बहु ।
राजमाताब्रवीदार्तां भैमीमार्ततरा स्वयम् ॥ ३४
वसस्व मयि कल्याणि प्रीतिर्मे त्वयि वर्तते ।
मृगयिष्यन्ति ते भद्रे भर्तारं पुरुषा मम ॥ ३५
अथ वा स्वयमागच्छेत्परिधावन्नितस्ततः ।
इहैव वसती भद्रे भर्तारमुपलप्स्यसे ॥ ३६
राजमातुर्वचः श्रुत्वा दमयन्ती वचोऽब्रवीत् ।
समयेनोत्सहे वस्तुं त्वयि वीरप्रजायिनि ॥ ३७
उच्छिष्टं नैव भुञ्जीयां न कुर्यां पादधावनम् ।
न चाहं पुरुषानन्यान्संभाषेयं कथंचन ॥ ३८
प्रार्थयेद्यदि मां कश्चिद्दण्ड्यस्ते स पुमान्भवेत् ।
भर्तुरन्वेषणार्थं तु पश्येयं ब्राह्मणानहम् ॥ ३९
यद्येवमिह कर्तव्यं वसाम्यहमसंशयम् ।

C. 3. 2601
B. 3. 65. 79
K. 3. 62. 71

— [d]) K2 B2 Dn D5 G1 अभ्यगमं; T2 G2–4 M1 अभ्यागता (for अन्व°). B D4 पतिं; D5 प्रति; T1 M2 तदा (for वनम्).

30 [a]) B2–4 D4. 6 T1 G1 M पुनर् (for वने). T2 G2–4 महारण्ये (for वने वीरः). — [c]) Ś1 K2 Dn D2. 3. 5 T1 G1. 2 M2 तु; K1. 3 B4 स (for सु-). — [d]) K1 D4 तदाप्येकं; K3 वस्त्रमेकं; D1 तदा मां स; D5 मामप्येकं; S (except M1) वासश्चैकं. K1 विसर्जयेत्; K3. 4 G1 विसर्जयत्; D3 व्यसर्जयेत्. D2 तदाप्येनो विनिर्गतः.

31 [a]) K1 D5 S (except G1 M2) तमेकवसना. D1 वीरम् (for नग्नम्). — [b]) Ś1 lacuna; K De Dn D1–3. 5 उन्मत्तवदचेतसं (K1 D3 °नं); B3. 4 G1 M1 उन्मत्तं ग(M1 °त्ता ह)तचेतनं. — [d]) D3 अनुयामि; D3 न स्वपिमि; D5 ह्यनुयामि (for न स्वपामि). K3. 4 निशां. K2. 3 Dc2 Dn D5 तदा (for सदा).

32 [b]) K1 मा; K3 D2. 3 स (for मां). — [d]) S (except G1) अनागसीं.

33 [b]) K1 गणयंती (for दह्य°). K2 D5 दिनक्षयं; K4 °क्षिपां; B2 Dn D4. 6 T2 G M1 दिवानिशं; B3 T1 दिनक्षपं; D1. 2 °क्षिपं; M2 °क्षपां. — After 33[ab], K1 B D (except D1–3. 5) ins.:

292* साहं कमलगर्भाभमपश्यन्ती हृदि प्रियम् ।

— [d]) Ś1 K D (except D4. 6) प्रियं प्राणेश्वरं प्रभुं. — After 33, S (except M1) ins.:

293* इत्युक्त्वा सानवद्याङ्गी राजमातरमप्युत ।
स्थिताश्रुपरिपूर्णाक्षी वेपमाना सुदुःखिता ।

34 [c]) Ś1 K1–3 B2–4 Dn D1. 3. 4. 6 आर्ता (for आर्तां). — [d]) K2 D (except D4. 6) आर्तस्वरां; K3. 4 T1 M2 °स्वरा; B3. 4 °तरां. D1 भृशं (for स्वयम्). Ś1 K1 भैमीमार्ततरस्वनां; T2 G (except G1) आर्तां भैमीं स्वयं तदा.

35 [a]) K4 D1–3 वस त्वं मयि; T2 G (except G1) वस त्वमिह. — [b]) Ś1 K D (except D4. 6) परमा त्वयि; B2 त्वयि वर्धते. — D3 om. (haplʼ) 35[d]–36[c].

36 D3 om. 36[abc] (cf. v.l. 35). — [a]) K2 B D (except D1. 3; D3 om.) M1 अपि (for अथ). B3 D4. 6 च (for वा). G1 सोयम् (for स्वयम्). — [b]) B (except B3) D4. 6 M1 अचेतनः; G1 ततस्ततः (for इत°). — [c]) G इह वै वसितं भद्रे. — [d]) D1–3 भर्तारमनु(D2 °मुप)लप्स्यसि; G1 लब्ध्वा भर्तारमाप्स्यसि.

38 Cf. 4. 8. 29, 32. — [a]) K2 D3. 4 उत्सृष्टं (for उच्छिष्टं). T2 G2. 3 न च; G4 न तु (for नैव). — [d]) Ś1 आभाष्येयं; K1. 3. 4 De D1. 4 आभाषेयं; K2 Dn D2. 3. 5 प्रभाषेयं. K1 S कदाचन.

39 [a]) K4 (m as in text) प्रब्रवीद् (for प्रार्थयेद्). — [b]) K3 दृप्य°; D1 M1 वध्य° (for दण्ड्य°). D2. 3 पुनर् (for पुमान्). Ś1 क्वचित् (for भवेत्). — After 39[ab], K1. 2 B D (except D1–3) ins.:

294* वध्यश्च नेऽसकृन्मन्द इति मे व्रतमाहितम् ।

— [c]) Ś1 K1 D1 °र्थं च; K3 °र्थे च; K4 °र्थं हि; G2 °र्थाय. — [d]) K1 पृच्छेयं; B1 2 Dc2 पश्येहं; B4 यजेयं; D2. 3 प्रेषये.

40 [a]) Ś1 अद्येव° (for यद्येव°). K2 Dn D5 वत्स्यामि; S वस्तव्यं (for कर्तव्यं). — [b]) B D4. 6 वत्स्यां (for वसा°). K2 Dn D5 स्वत्सकाशे न संशयः. — [c]) B3 ततोन्यथा; Dc2

C. 3. 2602
B. 3. 65. 71
K. 3. 62. 71

अतोऽन्यथा न मे वासो वर्तते हृदये क्वचित् ॥ ४०
तां प्रहृष्टेन मनसा राजमातेदमब्रवीत् ।
सर्वमेतत्करिष्यामि दिष्ट्या ते व्रतमीदृशम् ॥ ४१
एवमुक्त्वा ततो भैमीं राजमाता विशां पते ।
उवाचेदं दुहितरं सुनन्दां नाम भारत ॥ ४२
सैरन्ध्रीमभिजानीष्व सुनन्दे देवरूपिणीम् ।
एतया सह मोदस्व निरुद्विग्नमनाः स्वयम् ॥ ४३

इति श्रीमहाभारते आरण्यकपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

बृहदश्व उवाच ।
उत्सृज्य दमयन्तीं तु नलो राजा विशां पते ।
ददर्श दावं दह्यन्तं महान्तं गहने वने ॥ १
तत्र शुश्राव मध्येऽग्नौ शब्दं भूतस्य कस्यचित् ।
अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत् ॥ २
मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम् ।
ददर्श नागराजानं शयानं कुण्डलीकृतम् ॥ ३
स नागः प्राञ्जलिर्भूत्वा वेपमानो नलं तदा ।

M₂ अथोन्यथा. B₂ D₄. ₆ वासे. — [d]) G₂ गेच° (for वर्त°). B₁. ₂ Dc D₄. ₆ हृदयं.

41 [a]) T G (except G₁) इत्युक्ता दमयंत्या तु.

43 [a]) B (as usual) सैरिंध्रीम्. K₄ B₁–₃ D₁–₄. ₆ अभि(K₄ D₁ °नु)जानीहि; Dc₂ अवजानीषे. — After 43[ab], K₁ ins. 296*. — K₂ B D (except D₁–₃) ins. after 43[ab]: K₁, after 43[cd]:

295* वयसा तुल्यतां प्राप्ता सखी तव भविष्यति ।
[K₁ भविष्यति (for भवत्रियम्).]

— K₁ reads 43[cd] after 296*. — [d]) K₂. ₃ Dc Dn D₅ सदा (for स्वयम्). Ś₁ K₄ D₁–₃ निरुद्विग्नमनामयं; K₁ °द्वेगमनाः सदा; B₄ D₄. ₆ °द्विग्ना यथासुखं. — K₂ B Dn D₄. ₆ ins. after 43: K₁, after 43[ab]:

296* ततः परमसंहृष्टा सुनन्दा गृहमागमत् ।
दमयन्तीमुपादाय सखीभिः परिवारिता ।
सा तत्र पूज्यमाना वै दमयन्ती व्यनन्दत ।
सर्वकामैः सुविहितैर्निरुद्वेगावसत्तदा ।

On the other hand, Dc (Dc₂ om. lines 3–4) D₅ ins. after 43:

297* ततः सुनन्दा राजेन्द्र संप्रहृष्टमनाकृती ।
सैरन्ध्रीसहितागच्छत्स्वमेवावसथं तदा ।
ततः सुनन्दया सार्धं दमयन्त्यवसत्सुखम् ।
सर्वकामैः समुदिता पतिदर्शनलालसा ।

And finally, S ins. after 43:

298* सह सा न्यवसद्राजन्राजपुत्र्या सुनन्दया ।
चिन्तयन्ती नलं वीरमनिशं वामलोचना ।

Colophon om. in D₂. ₃. Dn₂ has a lacuna in place of it. — *Major parvan*: Ś₁ K₁ T G₂–₄ आरण्य. — *Sub-parvan*: N (except Dn₂; D₂. ₃ om.) T G₁. ₃ (all om. sub-parvan name) mention only नलोपाख्यान. — *Adhy. no.* (figures, words or both): Dn₁ (*inf. lin.*). n₃ 65; D₁ 68; T G M₂ (after corr.) 62 (as in text); M₁ 63; M₂ (before corr.) 64. — *Śloka no.*: Dn 74.

63

1 After the ref., D₁ ins.:

299* नलस्य चरितं राजञ्छृणु मे वदतोऽद्भुतम् ।

— [ab]) T₁ विसृज्य (for उत्सृज्य). T₂ G₂–₄ उत्सृज्य तु नलो राजा दमयन्तीं विशां पते. — [d]) T₂ G₂–₄ विजने (for गहने).

2 [a]) K₂ T₁ ततः; B D₄. ₆ अथ (for तत्र). K₃ Dn D₅ शब्दं वै; D₁. ₃ T₁. ₂ (by corr.) G₁. ₂. ₄ M मध्येग्नेः (for मध्येऽग्नौ). — [b]) K₂ Dn D₅ मध्ये; T₁ इदं (for शब्दं). S (except G₁ M₁) सत्व° (for भूत°). — [c]) Ś₁ K₂. ₃ अभिधावन्; K₁ D₃ अभ्यधावन्; G₁. ₄ अभिधाय (for अभिधाव).

3 K₁ om. 3. — [a]) G₁ नलेनोक्तः (for नलश्चोक्त्वा). — [b]) Ś₁ प्रविश्य तत्; K₃ G₄ प्रविश्य तां; K₄ प्रजाधिप; Dc T₁ G₁ M प्रविश्य सः; D₄. ₆ प्रतिश्रुतं. D₂. ₃ मध्येग्नेः प्रविवेश ह. — [c]) T₁ M₁ नागराजं तु; G₁ M₂ °राजं तं. — [d]) T₁ G₁ M₂ पर्वतोपमं; M₁ मंडलीकृतं.

4 [a]) M₁ पन्नगः (for स नागः). — [c]) K₂ Dn D₅

उवाच विद्धि मां राजन्नागं कर्कोटकं नृप ॥ ४
मया प्रलब्धो ब्रह्मर्षिरनागाः सुमहातपाः ।
तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप ॥ ५
तस्य शापान्न शक्नोमि पदाद्विचलितुं पदम् ।
उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान् ॥ ६
सखा च ते भविष्यामि मत्समो नास्ति पन्नगः ।
लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम् ॥ ७
एवमुक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः ।
तं गृहीत्वा नलः प्रायादुद्देशं दाववर्जितम् ॥ ८
आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना ।
उत्स्रष्टुकामं तं नागः पुनः कर्कोटकोऽब्रवीत् ॥ ९
पदानि गणयन्गच्छ स्वानि नैषध कानिचित् ।
तत्र तेऽहं महाराज श्रेयो धास्यामि यत्परम् ॥ १०
ततः संख्यातुमारब्धमदशद्दशमे पदे ।
तस्य दष्टस्य तद्रूपं क्षिप्रमन्तरधीयत ॥ ११
स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः ।
स्वरूपधारिणं नागं ददर्श च महीपतिः ॥ १२
ततः कर्कोटको नागः सान्त्वयन्नलमब्रवीत् ।
मया तेऽन्तर्हितं रूपं न त्वा विद्युर्जना इति ॥ १३
यत्कृते चासि विकृतो दुःखेन महता नल ।
विषेण स मदीयेन त्वयि दुःखं निवत्स्यति ॥ १४
विषेण संवृतैर्गात्रैर्यावत्त्वां न विमोक्ष्यति ।
तावत्त्वयि महाराज दुःखं वै स निवत्स्यति ॥ १५
अनागा येन निकृतस्त्वमनर्हो जनाधिप ।

C. 3. 2624
B. 3. 66. 17
K. 3. 63. 17

---

transp. विद्धि and मां. B3. 4 S नाम्ना (for राजन्). — d) Here and below, S (as usual) कार्को° (for कर्को°).

5 a) K2 प्रदृष्टो; K3 (marg. *sec. m.* as in text) °दग्धो; D5 °दष्टो. K3m B Dn D3. 6 महर्षिर्; K4 विप्रर्षिर्; G1 राजर्षिर् (for ब्रह्मर्षिर्). — b) K2 D5 नीरागः; K3m B D (except D1. 2) नारदः (for अनागाः). G1 वीरनागा महातपाः. ※ C1: मया प्रलब्धो ब्रह्मर्षिर्नारद इति पाठान्तरम्। ※ — c) K4 तेनेमां प्रापितोवस्थां. — After 5, K1. 2 B D (except D1–3. 5) ins.:

300* तिष्ठ त्वं स्थावर इव यावदेव नलः क्वचित् ।
इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि मत्कृतात् ।

[(L. 1) B1m Dc एति (for एव). K1 B3. 4 D4 नरः (for नलः).]

6 a) Ś1 वि- (for न). K1. 2 Dn D5 शक्तोस्मि (for शक्नोमि). — b) Ś1 मंदाद् (for पदाद्). — c) K4 D1. 2 उपदेक्ष्यामि. G1 भूयस् (for श्रेयस्). — d) K3 D1 T2 G2–4 अर्हसि. B1. 3. 4 D4. 6 नो; T1 तत्; M1 मा (for मां). T G2–4 प्रभो (for भवान्).

8 d) K2 B1 Dn D5 देशं दाववर्जितं.

9 a) D1 आक्रोशादेशम्; D3 (*sup. lin.*) आक्रोशदेशम्; T G3. 3 M आकाशं देशम्. T2 (marg. *sec. m.*) अन्यं देशं समासाद्य. — c) D2 G1 तं नागं; T1 M2 नृपतिं. — d) T1 M2 नागो वचनमब्रवीत्.

10 a) Dc नागं (for गच्छ). — c) Ś1 K B2. 4 Dn D1–3. 5 महाबाहो. — d) G1 भूयो (cf. v.l. 6). Ś1 K1. 3 T G (except G4) दास्यामि. T1 G1. 2 M1 तत्परं.

12 a) G1 तस्माद् (for तस्थौ). — d) Ś1 K1–3 Dn D5 G1 ददर्श स; D3 स ददर्श (for ददर्श च).

13 a) K1 S कार्को°. — b) T1 G1. 4 इदम् (for नलम्). — d) Ś1 K1 D4 G2. 4 M1 त्वा (for त्वां). — After 13, D1 ins.:

301* कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ।,

repeating the phalaśruti after 3. 78. 9 (q.v.).

14 a) Ś1 K4 D1. 5 चापि (for चासि). Ś1 संसक्तो; K1–3 D2. 5 संयुक्तो; K3m. 4 B Dc Dn D4. 6 निकृतो; D1 संतप्तो. D3 यत्कृते दंशसंयुक्तो. — c) Ś1 K1 D3 G1 च; D5 तन् (for स). — d) B1. 3 S (by transp.) दुःखं त्वयि. Ś1 K1 Dc निवर्स्यति.

15 Ś1 K1. 4 D5 om. (haplʼ.) 15. — a) K2 संवृतं गात्रं. — b) B1 T2 G1. 3 त्वं (for त्वां). K2 विमोक्षसि; K3 B1 T2 G3 °क्ष्यसे; B2 D4 विमुंचति; Dc D1 T1 G1. 2. 4 M विमोक्ष्यते; Dn2 °क्ष्यसि. — c) T G1. 3. 4 तु त्वां; G2 त्वां न; M1 तु त्वा; M2 कृत्वा (for त्वयि). — d) S क्लेशेस्मिन् (for दुःखं वै). B2 त्वयि (for वै स). K2 समवत्स्यति; B4 संनिवत्स्यति; Dc स निवत्स्यते; T G2. 3 स नियोक्ष्यति; G1 संनियोक्ष्यते; G4 M1 संनियोक्ष्यति; M2 स नियोक्ष्यते.

16 a) Dc2 निष्क्रांतस्; D5 M2 विकृतस् (for निकृतस्). — b) T1 M अनेन; G1 मया हि (for अनर्हो). B D4. 6 S नराधिप. — c) K2 D5 त्वं; B2 T1 त्वां; G2 [अ]थ (for तं). D1 क्रोधादव्यग्रचित्ता त्वं; G1 क्रोधादसूयता राजन्. — d)

C. 3. 2624
B. 3. 66. 17
K. 3. 63. 17

क्रोधादसूययित्वा तं रक्षा मे भवतः कृता ॥ १६
न ते भयं नरव्याघ्र दंष्ट्रिभ्यः शत्रुतोऽपि वा ।
ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप ॥ १७
राजन्विषनिमित्ता च न ते पीडा भविष्यति ।
संग्रामेषु च राजेन्द्र शश्वज्जयमवाप्स्यसि ॥ १८
गच्छ राजन्नितः सूतो बाहुकोऽहमिति ब्रुवन् ।
समीपमृतुपर्णस्य स हि वेदाक्षनैपुणम् ।
अयोध्यां नगरीं रम्यामद्यैव निषधेश्वर ॥ १९
स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै ।
इक्ष्वाकुकुलजः श्रीमान्मित्रं चैव भविष्यति ॥ २०
भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा ।
समेष्यसि च दारैस्त्वं मा स्म शोके मनः कृथाः ।
राज्येन तनयाभ्यां च सत्यमेतद्ब्रवीमि ते ॥ २१
स्वरूपं च यदा द्रष्टुमिच्छेथास्त्वं नराधिप ।
संस्मर्तव्यस्तदा तेऽहं वासश्चेदं निवासयेः ॥ २२
अनेन वाससाच्छन्नः स्वरूपं प्रतिपत्स्यसे ।
इत्युक्त्वा प्रददावस्मै दिव्यं वासोयुगं तदा ॥ २३
एवं नलं समादिश्य वासो दत्त्वा च कौरव ।
नागराजस्ततो राजंस्तत्रैवान्तरधीयत ॥ २४

इति श्रीमहाभारते आरण्यकपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

बृहदश्व उवाच ।
तस्मिन्नन्तर्हिते नागे प्रययौ नैषधो नलः ।
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि ॥ १
स राजानमुपातिष्ठद्बाहुकोऽहमिति ब्रुवन् ।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः ॥ २
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च ।

D1 वै; G1 नु; M2 ते (for मे).

17 a) K3 मा (for न). B De D4. 6 महावीर (for नर°). — b) D1 सर्पतो (for शत्रुतो). B De D4. 6 शत्रुभ्यो दंष्ट्रिणोपि वा. — c) K1 B (except B4) De D4. 6 ब्रह्मर्षिभ्यश्च; K2 °विद्भिश्च; D1 M °विद्भ्यो; D2. 3m T G (except G1) °विश्वं च.

19 a) D2 स्थानाद् (for सूतो). — c) B1–3 समीपं ऋतु° (sic). — d) K2 B4 Dm1. n2. n3 (before corr.). D5 चैवाक्ष° (for वेदाक्ष°). — f) B2. 4 Dm1 अद्य वै (for अद्यैव). Ś1 निषधेष्विव; D4. 6 T1 M1 निषधाधिप; M2 वसुधाधिप.

20 d) G1 स ते मित्रं भवि°.

21 c) K2 B2. 4 Dm1. n2 D5 समेष्यसि (for समेष्यसि च). K4 स; D1 हि (for च). G1 संयोक्ष्यसे सदारैश्च. — d) D3 T2 G च (for स्म).

22 a) Ś1 K2–4 B3 Dn2 D2–5 T1 G1 स्वं रूपं च; G4 स्वस्वरूपं. — c) B De D4. 6 स्मर्तव्यश्च; D3 स्मर्तव्यस्तु (for संस्मर्तव्यस्). T1 G1 M2 त्वया चाहं (for तदा तेऽहं). — d) M1 इदं वासो (for वासश्चेदं). K4 विवासय; D1. 4 T G निवासय; M2 निवासकृत.

23 b) Ś1 K3. 4 B2. 4 D (except Dm1 D1. 2. 5) T1 M2 स्वं रूपं. D3 प्रतिलप्स्यसि. — c) K2. 3 Dn D5 T2 G3. 4 तस्मै; D1. 2 चास्मै (for अस्मै).

24 a) K2 Dn D5 च संदिश्य; T1 समुद्दिश्य (for समा°). — c) G1 कर्कोटकस्तदा राजन्. — 24d = 1. 92. 16b; 93. 43b; 94. 27d; etc., etc.

Colophon. — *Major parvan:* Ś1 K1 Dn2 T G3–4 आरण्य. — *Sub-parvan:* N T1 G1 (all om. sub-parvan name) mention only नलोपाख्यान. — *Adhy. name:* B4 कर्कोटकसमागमः. — *Adhy. no.* (figures, words or both): Dn 66; D1 69; T G M2 (after corr.) 63 (as in text); M1 64; M2 (before corr.) 65. — *Śloka no.:* Dn D6 26; D1 27.

64

2 d) Ś1 K1 B2 G1 मे (for मत्).

अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः ॥ ३
यानि शिल्पानि लोकेऽस्मिन्यच्चाप्यन्यत्सुदुष्करम् ।
सर्वं यतिष्ये तत्कर्तुमृतुपर्ण भरस्व माम् ॥ ४

ऋतुपर्ण उवाच ।

वस बाहुक भद्रं ते सर्वमेतत्करिष्यसि ।
शीघ्रयाने सदा बुद्धिर्धार्यते मे विशेषतः ॥ ५
स त्वमातिष्ठ योगं तं येन शीघ्रा हया मम ।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः ॥ ६
त्वामुपस्थास्यतश्चेमौ नित्यं वार्ष्णेयजीवलौ ।
एताभ्यां रंस्यसे सार्धं वस वै मयि बाहुक ॥ ७

बृहदश्व उवाच ।

एवमुक्तो नलस्तेन न्यवसत्तत्र पूजितः ।
ऋतुपर्णस्य नगरे सहवार्ष्णेयजीवलः ॥ ८
स तत्र निवसन्राजा वैदर्भीमनुचिन्तयन् ।
सायं सायं सदा चेमं श्लोकमेकं जगाद ह ॥ ९
क्व नु सा क्षुत्पिपासार्ता श्रान्ता शेते तपस्विनी ।
स्मरन्ती तस्य मन्दस्य कं वा साद्योपतिष्ठति ॥ १०
एवं ब्रुवन्तं राजानं निशायां जीवलोऽब्रवीत् ।
कामेनां शोचसे नित्यं श्रोतुमिच्छामि बाहुक ॥ ११
तमुवाच नलो राजा मन्दप्रज्ञस्य कस्यचित् ।
आसीद्बहुमता नारी तस्या दृढतरं च सः ॥ १२
स वै केनचिदर्थेन तया मन्दो व्ययुज्यत ।
विप्रयुक्तश्च मन्दात्मा भ्रमत्यसुखपीडितः ॥ १३
दह्यमानः स शोकेन दिवारात्रमतन्द्रितः ।

C. 3. 2647
B. 3. 67. 14
K. 3. 64. 15

---

4 [b]) Ś1 K1 यच्चाप्यन्यस्य दुष्करं; K2 Dn D5 यच्चैवान्यत्सुदु°; K3. 4 D2 यद्यच्चान्यत्सु(D2 °च्च)दु°; D1. 3 यच्चान्यच्च सु(D3 °न्यत्सर्व)दु°; T1 M2 यच्चाप्यन्यैः सुदु°. — [c]) B1 सर्वं यदि यतिष्ये तत्. — [d]) Ś1 K D1–3. 5 G2 M1 (*unf. lin.* as in text) भज° (for भर°). — After 4, S (except M1) ins.:

302* इत्युक्तः स नलेनाथ ऋतुपर्णो नराधिपः ।
उवाच सुप्रीतमनास्तं प्रेक्ष्य च महीपते ।

[(L. 2) T1 G1 M2 नलं प्रेक्ष्य (for तं प्रेक्ष्य च).]

5 K4 T1 G1. 4 M2 om. the ref. B2–4 ऋत° (for ऋतु°). — [b]) Ś1 K1 G1 भविष्यति (for करिष्यसि). — [d]) Ś1 B1. 2. 4 Dn D2. 4. 6 G1. 2. 4 म्रियते; Dc धार्यते (Dc1 °ति); D1 दीयतां; M1 नीयतां (for धीयते).

6 [a]) Ś1 B4 योगत्वं; K3. 4 D2 संयोगं; G4 योगं त्वं; M1 शीघ्रं त्वं (for योगं तं). — [b]) Ś1 K2. 4 Dn1 D1. 2 T2 G3 शीघ्रहया. — After 6[ab], B1 (which om. 6[cd]) reads 3. 65. 21[cd], repeating it in its proper place. — [d]) K2 D1. 3. 5 S शतं (for शताः).

7 [a]) K2 Dn1. n3 D5 चैव (for चेमौ). — [b]) K1 °जीविनः; K2 °जीवनैः; Dn1 (before corr.). n3 D3. 4. 6 °जीवनौ. — K1 om. (hapl.) 7[c]–8[d]. — [c]) G1 ताभ्यां च (for एताभ्यां). — [d]) Ś1 D2 G1 त्वं (for वै).

8 K1 om. 8 (cf. v.l. 7). Ś1 K3. 4 D1. 2. 4. 6 G4 om. the ref. — [a]) G1 तत्र (for तेन). — [b]) B Dc D4. 6 नित्य (for तत्र). K3 वसंस्तेन सुपूजितः; G1 न्यवसत्तेन वै सदा. — [d]) K2 °जीवनौ; B4 Dn2. n3 D3. 4. 6 °जीवनः.

9 [a]) K2. 4 T2 G न्यवसद् (for निवसन्). Ś1 मा स्म तत्राभवद्राजा; K1. 3 Dn D1–3. 5 स स्म (Dn स वै; D1 स तु; D2 शश्वत्; D5 समं) तत्रावसद्राजा. — [b]) B1 अन्वचिन्तयत्. — [c]) T1. 3 (before corr.) G (except G3) M साये साये. Ś1 K4 G2 तदा; Dc यदा; D2 तथा (for सदा). D1 महाराज (for सदा चेमं). K4 D2 राजा; B (except B1) D4. 6 चैतं; S स्मैवं (T1 G1 M2 °नं) (for चेमं). — [d]) T2 G2. 3 च (for ह).

10 [d]) B (except B2) Dc T1 G1 °तिष्ठते.

11 [b]) K4 D1 निशम्य; Dc निर्जने (for निशायां). K2 B4 Dn3 D3. 4. 6 जीवनो. — [c]) K4 B1. 3. 4 D4. 6 एतां; Dc इमां; D1 एकां; T2 G2–4 M1 एवं (for एनां). — After 11, K2. 4 B Dc Dn D4–6 ins.:

303* आयुष्मन्कस्य वा नारी यामेवमनुशोचसि ।

[K4 B3 Dc सा (for वा). Dc वै त्वम् (for एवम्).]

12 [a]) T1 अवोचत् (for उवाच). S (except G1) ततो (for नलो). — [d]) D1 S (except T2 G3 M2) तस्यां. S दृढतरश्. K2 Dn D2. 4 वचः (for च सः); then reading probably तस्यादृढतरं (= तस्य+अदृढ°). ❋ Cn: अदृढतरं दमयन्त्यां मिथ्याप्रतिज्ञातं स्वस्यानुसंधायेयमुक्तिः । ❋

13 [a]) K4 स वै केनापि दोषेण. — [c]) Ś1 K2 Dc1 Dn D2. 5 G1 विप्रयुक्तः स; K3 Dc2 D1 °स्तु; K4 °स्य. — [d]) K4 वस° (for भ्रम°).

14 D2 om. 14[ab]. — [c]) K2 D5 अस्याः (for तस्याः). — [d]) B3 D4 एनं; G4 एवं (for एकं). B1–3 D1. 4. 6 T2 G2. 3 स (for स्म).

C. 3. 2648
B. 3. 67. 15
K. 3. 64. 15

निशाकाले स्मरंस्तस्याः श्लोकमेकं स्म गायति ॥ १४
स वै भ्रमन्महीं सर्वां क्वचिदासाद्य किंचन ।
वसत्यनर्हस्तद्दुःखं भूय एवानुसंस्मरन् ॥ १५
सा तु तं पुरुषं नारी कृच्छ्रेऽप्यनुगता वने ।
त्यक्ता तेनाल्पपुण्येन दुष्करं यदि जीवति ॥ १६
एका बालानभिज्ञा च मार्गाणामतथोचिता ।
क्षुत्पिपासापरीता च दुष्करं यदि जीवति ॥ १७
श्वापदाचरिते नित्यं वने महति दारुणे ।
त्यक्ता तेनाल्पपुण्येन मन्दप्रज्ञेन मारिष ॥ १८
इत्येवं नैषधो राजा दमयन्तीमनुस्मरन् ।
अज्ञातवासमवसद्राज्ञस्तस्य निवेशने ॥ १९

इति श्रीमहाभारते आरण्यकपर्वणि चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

बृहदश्व उवाच ।
हृतराज्ये नले भीमः सभार्ये प्रेष्यतां गते ।
द्विजान्प्रस्थापयामास नलदर्शनकाङ्क्षया ॥ १
संदिदेश च तान्मीमो वसु दत्त्वा च पुष्कलम् ।
मृगयध्वं नलं चैव दमयन्तीं च मे सुताम् ॥ २
अस्मिन्कर्मणि निष्पन्ने विज्ञाते निषधाधिपे ।
गवां सहस्रं दास्यामि यो वस्तावानयिष्यति ।
अग्रहारं च दास्यामि ग्रामं नगरसंमितम् ॥ ३

---

15 [a]) K2. 3 Dn D5 वि- (for वै). M1 कृत्स्नां (for सर्वां). — [b]) S नासाद्य (for आसाद्य). K4 वेतनं (for किंचन). — [c]) D3 दुःखं तु (for तद्दुःखं). — [d]) T1 M2 अभि- (for अनु-). Dc भूय एवेत्यनुस्मरन्.

16 K4 om. (hapl.) 16^a–19^b. — [a]) M1 च (for तु). — [b]) D2 कृच्छ्रेष्वनु°. — [c]) = 18^c. B3 D4. 6 S (except T1 M2) °भाग्येन. — [d]) = 17^d. D2 सुदुःखं (for दुष्करं).

17 Ś1 K3. 4 D4 om. 17 (Ś1 K D4 hapl.; for K4 cf. v.l. 16). — [a]) G1 एकात्मा न लभेत्तां च. — [b]) D3 दुःखाणाम् (for मार्गाणाम्). B2. 3 अयथोचिता; D1 एव शोचते. G1. 2 मार्गमाणां तथोचितां. — [c]) B Dc Dn D6 °परीतांगी; G1 °परीतां च. — [d]) = 16^d. G1 स तु (for यदि).

18 K4 M1 om. 18 (for K4 cf. v.l. 16); D6 om. 18^{ab}. — [c]) = 16^c. Ś1 K (K4 om.) B D (except D1) °भाग्येन. — [d]) Ś1 मंदभाग्येन; K1 मंदपुण्येन; D3 तां तु शोचामि.

19 K4 om. 19^{ab} (cf. v.l. 16). — [a]) B2 D4. 6 एष (for एवं). — [c]) K2 Dn D5 न्यवसत् (for अवसत्). — [d]) D5 transp. राज्ञः and तस्य.

Colophon. Dn2 has a lacuna in place of it. — *Major parvan:* Ś1 K1 T G2–4 आरण्य. — *Sub-parvan:* N (except Dn2) T1 G1 M1 (all om. sub-parvan name) mention only नलोपाख्यान. — *Adhy. name:* D2 ऋतुपर्णनगरे नलनिवासः. — *Adhy. no.* (figures, words or both): Dn1 (*sup. lin.*). n3 67; D1 70; T G M2 (after corr.) 64 (as in text); M1 65; M2 (before corr.) 66. — *Śloka no.:* K2 20; Dn D1 19.

65

1 [b]) K1 च वनं; S [S]दर्शनं (M1 [S]प्रख्यतां) (for प्रेष्यतां). — [c]) D3 (marg. *sec. m.*) संप्रेष° (for प्रस्थाप°). — [d]) Ś1 K1 Dc °लालसः.

2 [a]) T2 G2. 3 स (for च). — [b]) K1 B2–4 D4 M2 सु-; K4 D6 तु; D2 [अ]ति- (for च). M1 दत्त्वा च वसु पु°. — [c]) B D4. 6 यूयं (for चैव).

3 [a]) B1 T2 G3 तस्मिन्. K2 B2 D (except D1–3) संपन्ने (for निष्पन्ने). — [b]) Dc वसुधाधिपे. — [c]) T2 G3 सहसा वसु दास्यामि. — K1 om. (hapl.) 3^d–4^c; Ś1 D2 om. (hapl.) 3^{de}. — [d]) K2 D5 transp. यः and वः. S (except G1 M1) वा (for वस्). D1 यो वस्तां चानयिष्यति. — [e]) K2 B2 Dn D4. 6 अग्रहारांश्च. — [f]) K3 ग्रामं नगरसंनिभं; B3. 4 ग्रामान्नगरसंमितान्. — After 3, S ins.:

304* हिरण्यं च सुवर्णं च दासीदासं तथैव च ।

न चेच्छक्याविहानेतुं दमयन्ती नलोऽपि वा ।
ज्ञातमात्रेऽपि दास्यामि गवां दशशतं धनम् ॥ ४
इत्युक्तास्ते ययुर्हृष्टा ब्राह्मणाः सर्वतोदिशम् ।
पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया ॥ ५
ततश्चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः ।
विचिन्वानोऽथ वैदर्भीमपश्यद्राजवेश्मनि ।
पुण्याहवाचने राज्ञः सुनन्दासहितां स्थिताम् ॥ ६
मन्दप्रख्यायमानेन रूपेणाप्रतिमेन ताम् ।
पिनद्धां धूमजालेन प्रभामिव विभावसोः ॥ ७
तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ।
तर्कयामास भैमीति कारणैरुपपादयन् ॥ ८

सुदेव उवाच ।

यथेयं मे पुरा दृष्टा तथारूपेयमङ्गना ।
कृतार्थोऽस्म्यद्य दृष्ट्वेमां लोककान्तामिव श्रियम् ॥ ९
पूर्णचन्द्राननां श्यामां चारुवृत्तपयोधराम् ।
कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ १०
चारुपद्मपलाशाक्षीं मन्मथस्य रतीमिव ।
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ ११
विदर्भसरसस्तस्माद्दैवदोषादिवोद्धृताम् ।
मलपङ्कानुलिप्ताङ्गीं मृणालीमिव तां भृशम् ॥ १२
पौर्णमासीमिव निशां राहुग्रस्तनिशाकराम् ।
पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव ॥ १३
विध्वस्तपर्णकमलां वित्रासितविहंगमाम् ।
हस्तिहस्तपरिक्लिष्टां व्याकुलामिव पद्मिनीम् ॥ १४

C. 3. 2669
B. 3. 68. 15
K. 3. 65. 20

---

4 K1 om. 4^{abc} (cf. v.l. 3). — [a]) Ś1 B D4. 6 T G शक्यमिह (for शक्याविह). Ś1 [आ]गंतुं (for [आ]नंतुं). — [b]) Ś1 K4 B2. 3 D1 G2. 4 दमयंती. Ś1 च मे सुतां; D1 नलं च वा; G2. 4 नलं तथा (for नलोऽपि वा). — [c]) T1 M2 प्र- (for ऽपि). Ś1 गवां सहस्रं दास्यामि; K3 ज्ञातेपि च प्रदास्यामि. — [d]) K3 चैव शतं; K4 शतशतं; G1 शतदशं (for दशशतं). B2 गवां दशगुणं शतं.

5 [c]) T2 G (except G1) M1 °राष्ट्रेषु. — [d]) K4 transp. सह and भार्यया. — After 5, Dn D1 ins.:

305* नैव क्वापि प्रपश्यन्ति नलं वा भीमपुत्रिकाम् ।

6 After 6^{cd}, S ins.:

306* कृशां विवर्णां मलिनां भर्तृशोकपरायणाम् ।

☞ Some of the stanzas from 7 to 25 agree, in part almost verbatim, with parts of adhy. 18, 19, 21, 29 of the Sundarakāṇḍa of the Rāmāyaṇa (ed. Gorresio).

7 = (var.) Rām. 5. 18. 4. — [a]) K2 B Dn D4–6 मंदं (for मन्द-). — [c]) K2. 3 B1. 2 D (except D1. 2) निबद्धां; B4 विबद्धां (for पिनद्धां).

8 = (var.) Rām. 5. 18. 22. — [c]) T1 वैदर्भीं (for भैमीति). — [d]) D2 G1 कारणैरुपपादिभिः. — After 8, K4 reads an addl. colophon.

9 = (var.) Rām. 5. 18. 23^{cd}, 27^{ab}. — M2 om. the ref. — G4 द्विजः (for सुदेव उ°). — [a]) S (except T1 M2) वै (for मे). — [b]) G1 दिव्य° (for तथा°). — [c]) K4 [ए]वं; D3 [ए]नां (for [इ]मां). — [d]) K4 नल° (for लोक°).

10 = (var.) Rām. 5. 18. 24. — [a]) K2 Dn1. n2 पूर्णचंद्रनिभां. — [c]) Ś1 K1 D2. 3 कुर्वंती; K3. 4 B2–4 D1. 4. 6 M2 कुर्वतीं; De कुर्वती. De1 D1 देवी; M2 तत्र.

नारदस्य च राजेन्द्र देवर्षेः पर्वतस्य च ॥ २४
धौम्येन सहिता वीरास्तथान्यैर्वनवासिभिः ।
मार्गशीर्ष्यामतीतायां पुष्येण प्रययुस्ततः ॥ २५

C. 3. 8484
B. 3. 93. 26
K. 3. 91. 27

---

12 [a]) M तु (for हि). — [b]) Ś1 K1 G1 सह (for सदा). — [c]) Ś1 K1. 2 अव° (for अनु°).

13 [a]) Ś1 K1. 2 तानि ह्युक्तानि; K4 तथान्यु°; D1 तथाप्यु°; D3 तथेत्यु° (for तीर्थान्यु°). — After 13[ab], B3 ins.:

472* नारदस्य च राजेन्द्र देवर्षेः पर्वतस्य च ।
[Cf. 17[ab].]

— [c]) K3 यान्युवाचाथ; D1–3. 5 यानि वक्ता च. T1 यान्यान्युवाच देवर्षिर्.

14. B4 transp. 14[ab] and 14[cd]. — [b]) Ś1 K D1–3. 5 महीपते (for नरा°). — After 14[ab], K1. 4 D1–3 ins.:

473* ऋषिकुल्याश्च कात्स्न्र्येन लोडयस्व युधिष्ठिर ।

— [d]) K2 B D (except D1–3. 5) T1 G1 M [अ]भि- (for च).

15 [a]) K3 तदा; B D (except D1–3. 5) राजा (for तथा). — D4 om. (hapl.) 15[d]–16[c]. — [e]) Ś1 K1. 2. 4 D1. 2. 5. 6 भरतर्षभ (D5. 6 °भः) (for पाण्ड°).

16 D4 om. 16[abc] (cf. v.l. 15). — [a]) K2 T G3. 4 °प्राप्य (for °ज्ञाप्य).

17 [b]) B2–4 Dn D4 पर्वतनारदौ (by transp.). — [c]) Ś1 K Dc D1–3. 5 M1 पांडवान्. K2 प्रष्टुं; T1 द्रष्टा (for द्रष्टुं).

19 Before 19, B4 Dc Dn D4. 6 ins. ऋषय ऊचुः. — K1 om. 19[ab]. — [b]) Ś1 °सेन सु°; K4 D1. 5 T1 M1 मनःसु; D2 मनस्य; D3 मानसं; T2 G2–4 M2 मनसः (for मनसा). — [d]) = 21[d]. N M1 यास्यथ (Ś1 Dc2 Dn1 °त); M2 गच्छथ (for गच्छत).

20 G1 om. (hapl.) 20–21. — [a]) K1. 2 शारीरं नियमं. Ś1 K1. 2 B2 Dn प्राहुर्; D5 त्वाहुर् (for ह्याहुर्). — K3 om. 20[b]–21[d], and (erroneously) *repeats* instead 3. 90. 9[d]–19[b]. — [b]) Ś1 B1. 3. 4 T2 (after corr.) G3 मानसं (for मानुषं). B3 महत् (for व्रतम्). B2 D4. 6 ब्राह्मणानां च सांप्रतं; D5 °णानां महद्व्रतं. — [c]) K (K3 om.) B2 D1–3 M2 मनोविशुद्धिं; Dc °शुद्ध्या; T1 °शुद्धं. — [d]) D3. 5 बुधाः (for द्विजाः).

21 K3 G1 om. 21 (cf. v.l. 20). — [a]) B1. 3. 4 Dn D4. 6 शौचाय (Dn2 °र्थं) (for शूराणां). — Ś1 K1. 2 om. 21[cd]. — [d]) = 19[d]. K4 M2 गच्छथ; B Dn D4. 6 द्रक्ष्यथ (B2 यास्यथ) (for गच्छत).

22 [a]) Ś1 मनसः; K1. 2 मनुषैः; K4 D2. 3 M1 मानुषैः (for मानसैः). K3 ये चाप्यनुगताः पौराः.

23 [d]) T2 G2–4 देव° (for दिव्य°).

25 [b]) B Dn D4. 6 तथा तैर्.

26 [a]) B3 कांचनानि; G1 कार्मुकाणि (for कठि°). — [c]) T2 G2–4 M2 अभेद्य° (for °द्यैः). — [d]) Ś1 B4 Dc D3. 5

C. 3. 8484
B. 3. 93. 27
K. 3. 91. 28

कठिनानि समादाय चीराजिनजटाधराः ।
अभेद्यैः कवचैर्युक्तास्तीर्थान्यन्वचरंस्तदा ॥ २६
इन्द्रसेनादिभिर्भृत्यै रथैः परिचतुर्दशैः ।
महानसव्यापृतैश्च तथान्यैः परिचारकैः ॥ २७
सायुधा बद्धनिस्त्रिंशास्तूणवन्तः समार्गणाः ।
प्राङ्मुखाः प्रययुर्वीराः पाण्डवा जनमेजय ॥ २८

इति श्रीमहाभारते आरण्यकपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

युधिष्ठिर उवाच ।
न वै निर्गुणमात्मानं मन्ये देवर्षिसत्तम ।
तथास्मि दुःखसंतप्तो यथा नान्यो महीपतिः ॥ १
परांश्च निर्गुणान्मन्ये न च धर्मरतानपि ।
ते च लोमश लोकेऽस्मिन्नृध्यन्ते केन हेतुना ॥ २

लोमश उवाच ।
नात्र दुःखं त्वया राजन्कार्यं पार्थ कथंचन ।
यदधर्मेण वर्धेरन्नधर्मरुचयो जनाः ॥ ३
वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति ।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥ ४
मया हि दृष्टा दैतेया दानवाश्च महीपते ।
वर्धमाना ह्यधर्मेण क्षयं चोपगताः पुनः ॥ ५
पुरा देवयुगे चैव दृष्टं सर्वं मया विभो ।
अरोचयन्सुरा धर्मं धर्मं तत्यजिरेऽसुराः ॥ ६
तीर्थानि देवा विविशुर्नाविशन्भारतासुराः ।
तानधर्मकृतो दर्पः पूर्वमेव समाविशत् ॥ ७
दर्पान्मानः समभवन्मानात्क्रोधो व्यजायत ।
क्रोधाद्ह्रीस्ततोऽलज्जा वृत्तं तेषां ततोऽनशत् ॥ ८

अनुचरन्; K₃ उपच°; T₂ G₂₋₄ अभ्यच°. Ś₁ K₁. ₂. ₄ Dc तथा; B₂ Dn D₄. ₆ ततः (for तदा)

28 ᵇ) T G₂. ₃ तूणावंतः. T₂ G₃ समार्गणैः.

Colophon. — *Major parvan:* Ś₁ K₁. ₂ Dn₂ T G₂₋₄ M₁ आरण्य. — *Sub-parvan:* B₁₋₃ Dc₁ Dn₁. n₂ D₄. ₆ T₁ तीर्थयात्रा (B₂ cont. लोमशतीर्थयात्रा); K₃. ₄ B₄ Dc₂ Dn₃ D₁₋₃. ₅ T₂ G₁. ₃ (all om. sub-parvan name) mention only लोमशतीर्थयात्रा. — *Adhy. name:* T₂ G₃ पाण्डवप्रस्थानं; G₁ पाण्डवप्रस्थापनं. — *Adhy. no.* (figures, words or both): Dn₁ (*sup. lin.*). n₂ 93; Dn₃ M₂ 94; D₁ 97; T G M₁ 92. — *Śloka no.:* Dn 29; D₁ 30.

92

2 ᵇ) T₁ G₁ M तानधर्म- (M₂ °में); T₂ G₂₋₄ तथाधर्म- (for न च धर्म-). Ś₁ K₃ B₂ Dn D₂₋₄. ₆ -गतान्; K₄ -परान् (for -रतान्). — ᵈ Ś₁ K₃ तप्यंते; K₁ स्पृश्यं°; K₂ नंदं°; K₄ दृश्यं°; B₁. ₄ Dc D₅ तृप्यं°; D₁. ₂ वर्ध°; D₃ दीप्यं°; T₁ बुध्यं° (for ऋध्यन्ते).

3 ᵃᵇ) K₃ G₂. ₄ transp. राजन् and कार्यं. Dc कर्तव्यं तत् (for कार्यं पार्थ). K₃. ₄ D₁₋₃ कदा° (for कथं°). — ᶜ) Dn D₄. ₆ वर्धेयुर्; T₂ G₂₋₄ सिध्येरन्. — ᵈ) Ś₁ K D₁₋₃. ₅ तेधर्मरु°; B₁ अधर्मरतयो; B₂ °मतयो. Dc D₃. ₅ T₂ G₃. ₄ नराः.

4 ᵃ) K₄ अधर्मेणैव ते तावत्; Dc D₃. ₅ अधर्मेणैधते राजन्. — ᵈ) Ś₁ K₁₋₃ D₅ समूलं. Ś₁ K D₁. ₂. ₅ च (for तु). — After 4, S (except M₂) ins.:

474* यत्र धर्मेण वर्धन्ते राजानो राजसत्तम ।
सर्वान्सपत्नान्बाधन्ते राज्यं चैषां विवर्धते ।

6 ᵃ) Ś₁ K D₁. ₂ M₂ चैतत्; G₄ सर्वं (for चैव). — ᵇ) Ś₁ K B₁. ₂ D₁. ₂ सर्वं दृष्टं (by transp.). Dc चैवं; G₄ चैव (for सर्वं). K₄ Dn₂ D₁. ₂ प्रभो (for विभो). — ᶜ) T₂ G₃ धर्मान् (for धर्मं). — ᵈ) Ś₁ K₁. ₂ अधर्मं भेजिरे; G₁ धर्मं तं भेजिरे (for धर्मं तत्यजिरे).

7 Ś₁ om. (hapl.) 7ᵃᵇ. — ᵃ) D₅ देवास्तीर्थानि (by transp.). — ᵇ) G₂ पार्थिवा° (for भारता°). — ᵈ) K₃ सर्वान् (for पूर्वम्).

8 K₃ om. 8. — ᵃ) K₄ transp. मानः and समभवत्. — ᵇ) B₃ [s]स्य जायते; Dn₁. n₂ G₄ [s]म्यजायत; D₃ [s]भ्यजायते; T₁ ह्यजायत; T₂ G₃. ₃ [s]भिजायते; G₁ [s]व्य-

तानलज्जान्गतह्रीकान्हीनवृत्तान्वृथाव्रतान् ।
क्षमा लक्ष्मीश्च धर्मश्च नचिरात्प्रजहुस्ततः ।
लक्ष्मीस्तु देवानगमदलक्ष्मीरसुरान्नृप ॥ ९
तानलक्ष्मीसमाविष्टान्दर्पोपहतचेतसः ।
दैतेयान्दानवांश्चैव कलिरप्याविशत्ततः ॥ १०
तानलक्ष्मीसमाविष्टान्दानवान्कलिना तथा ।
दर्पाभिभूतान्कौन्तेय क्रियाहीनानचेतसः ॥ ११
मानाभिभूतानचिराद्विनाशः प्रत्यपद्यत ।
निर्यशस्यास्ततो दैत्याः कृत्स्नशो विलयं गताः ॥ १२
देवास्तु सागरांश्चैव सरितश्च सरांसि च ।
अभ्यगच्छन्धर्मशीलाः पुण्यान्यायतनानि च ॥ १३
तपोभिः क्रतुभिर्दानैराशीर्वादैश्च पाण्डव ।
प्रजहुः सर्वपापानि श्रेयश्च प्रतिपेदिरे ॥ १४

एवं हि दानवन्तश्च क्रियावन्तश्च सर्वशः ।
तीर्थान्यगच्छन्विबुधास्तेनापुर्भूतिमुत्तमाम् ॥ १५
तथा त्वमपि राजेन्द्र स्नात्वा तीर्थेषु सानुजः ।
पुनर्वेत्स्यसि तां लक्ष्मीमेष पन्थाः सनातनः ॥ १६
यथैव हि नृगो राजा शिबिरौशीनरो यथा ।
भगीरथो वसुमना गयः पूरुः पुरूरवाः ॥ १७
चरमाणास्तपो नित्यं स्पर्शनादम्भसश्च ते ।
तीर्थाभिगमनात्पूता दर्शनाच्च महात्मनाम् ॥ १८
अलभन्त यशः पुण्यं धनानि च विशां पते ।
तथा त्वमपि राजेन्द्र लब्धासि विपुलां श्रियम् ॥ १९
यथा चेक्ष्वाकुरचरत्सपुत्रजनबान्धवः ।
मुचुकुन्दोऽथ मान्धाता मरुत्तश्च महीपतिः ॥ २०
कीर्तिं पुण्यामविन्दन्त यथा देवास्तपोबलात् ।

C. 3. 8507
B. 3. 94. 21
K. 3. 92. 23

जायत. — [c]) D1. 2 मोहस्; D5 नश्यत्; T1 G2 अश्रीस्; G1 अभीस् (for अह्रीस्). Ś1 राज्ञां; K1. 2 राजन् (for ऽलज्जा). K4 D3 क्रोधोद्भवात्तथा तेषां. — [d]) Ś1 K (K3 om.) लज्जा वृत्तं; D3 प्रज्ञा वृत्तं; M2 वृत्तमेषां (for वृत्तं तेषां).

9 [a]) K4 D1 G1 विलज्जान्; T G2–4 M2 निर्लज्जान् (for अलज्जान्). K4 Dc D3 नष्टवृत्तान्; B Dn1. n2 अनह्रीकान्; D1 T G2–4 गतश्रीं; M2 हतश्रीं (for गतह्रीं). D5 तान्नष्टलज्जान्निवृत्तान्. — [b]) K4 D3 वृथाचारान्; Dc पापाचारान्; D5 वृथादानान् (for हीनवृत्तान्). Ś1 K1. 2 D1. 2 वृथामतीन्; K3 तथामतीन्; B2 गतव्रतान्; G1 तथागतान्; G4 वृथा स्थितान् (for वृथा°). — [c]) K3. 4 D5 समं (for क्षमा). D3 सत्यं (for लक्ष्मीश्). K1. 2 च दर्पश्च; D4 स्वधर्मश्च. — [d]) K3. 4 D1–3. 5 च (for तु).

11 Ś1 K1. 2. 4 om. (hapl.) 11[a] (with 10[bcd]); G4 om. 11[ab]. — 11[a] = 10[a]. — [b]) Ś1 K D3. 5 भृशं; B Dc Dn D1. 2. 4. 6 हतान् (B2 सह); T1 तदा (for तथा). — K3 om. 11[cd]; Dn3 D3. 5 om. (hapl.) from कौन्तेय (in 11[c]) up to °भूतान् (in 12[a]).

12 K3 reads 12[ab] after 10[ab]. Dn3 D3. 5 om. मानाभिभूतान् (cf. v.l. 11). — [b]) Dn D3. 4. 6 S (except M2) समं (for प्रत्य°). — K3 om. 12[cd]. — [c]) Dn1 S निर्यशस्कास्. B1 Dn D5 तथा; D4. 6 तदा (for ततो). — After 12, S ins.:

475* अधर्मरुचयो राजन्नलक्ष्म्या समधिष्ठिताः ।

13 [a]) Dn1. n2 D3. 5. 6 M2 देवांस्तु (for देवा°). K3 D1. 2 च (for तु). T G M1 ततो देवाः सागरांश्च. — [c]) T2 G2–4 पुण्य° (for धर्म°).

14 [c]) K3. 4 D1. 2 M2 प्राजहुः. Ś1 K Dc D1 M1 सर्वदुःखानि (K3 °दुष्टानि).

15 [ab]) N M2 आदान° (K3 ते दान°) (for हि दान°), and निरादाना° (for क्रियावन्त°). — [d]) T1 धृतिम्; G4 धर्मम् (for भूतिम्). G4 उत्तमम् (for उत्तमाम्).

17 [d]) G2. 4 यथा (for गयः). Ś1 K1. 2 गयः पूरूरवा यथा.

18 [a]) K4 D1–3 -नित्याः; T G -युक्ताः (for नित्यं).

19 [a]) T2 G2–4 तेलभंत (for अलभन्त). — [d]) Ś1 K1–3 B Dn D2. 3. 6 लब्ध्वा सु- (Ś1 K1. 2 च); D4 लब्ध्वाशु; D5 लप्स्यसे (for लब्धासि).

20 [a]) K4 B Dc Dn D4. 6 अभवत्; D5 -कुरवः (for अचरत्).

21 [d]) K4 T G लप्स्यसे; B Dn D3–6 M2 वेत्स्यसि (for °से).

22 [ab]) K1 G1 धार्तराष्ट्रः. Ś1 K1. 2 च (for तु). B Dn D4. 6 G4 [अ]धर्मेण (for दर्पेण). D3. 5 transp. दर्पेण and मोहेन. K1 G1 वशीकृतः. — [c]) N नचिराद्धि (B Dc Dn D4. 6 °द्वै) विनंक्ष्यंति (D3. 5 नशिष्यंति).

Colophon. — *Major parvan:* Ś1 K1. 2 Dn2 T G2–4

C. 3. 8508
B. 3. 94. 22
K. 3. 92. 23

देवर्षयश्च कात्स्न्र्येन तथा त्वमपि वेत्स्यसे ॥ २१
धार्तराष्ट्रास्तु दर्पेण मोहेन च वशीकृताः ।
नचिराद्विनशिष्यन्ति दैत्या इव न संशयः ॥ २२

इति श्रीमहाभारते आरण्यकपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

वैशंपायन उवाच ।

ते तथा सहिता वीरा वसन्तस्तत्र तत्र ह ।
क्रमेण पृथिवीपाल नैमिषारण्यमागताः ॥ १
ततस्तीर्थेषु पुण्येषु गोमत्याः पाण्डवा नृप ।
कृताभिषेकाः प्रददुर्गाश्च वित्तं च भारत ॥ २
तत्र देवान्पितॄन्विप्रांस्तर्पयित्वा पुनः पुनः ।
कन्यातीर्थेऽश्वतीर्थे च गवां तीर्थे च कौरवाः ॥ ३
वालकोट्यां वृषप्रस्थे गिरावुष्य च पाण्डवाः ।
बाहुदायां महीपाल चक्रुः सर्वेऽभिषेचनम् ॥ ४
प्रयागे देवयजने देवानां पृथिवीपते ।
ऊषुरापॢत्य गात्राणि तपश्चातस्थुरुत्तमम् ॥ ५
गङ्गायमुनयोश्चैव संगमे सत्यसंगराः ।
विपाप्मानो महात्मानो विप्रेभ्यः प्रददुर्वसु ॥ ६
तपस्विजनजुष्टां च ततो वेदीं प्रजापतेः ।
जग्मुः पाण्डुसुता राजन्ब्राह्मणैः सह भारत ॥ ७
तत्र ते न्यवसन्वीरास्तपश्चातस्थुरुत्तमम् ।
संतर्पयन्तः सततं वन्येन हविषा द्विजान् ॥ ८
ततो महीधरं जग्मुर्धर्मज्ञेनाभिसत्कृतम् ।
राजर्षिणा पुण्यकृता गयेनानुपमद्युते ॥ ९
सरो गयशिरो यत्र पुण्या चैव महानदी ।

M1 आरण्य. — *Sub-parvan:* B1–3 T1 तीर्थयात्रा; K3. 4 B4 D G1 (all om. sub-parvan name) mention only लोमशतीर्थयात्रा. — *Adhy. name:* Ś1 K1. 2 B4 लोमशवाक्यं. — *Adhy. no.* (figures, words or both): Dn1 (*sup. lin.*) 94; Dn3 M2 95; D1 98; T G M1 93. — *Śloka no.:* Dn 22.

93

1 a) T2 G2–4 नदा (for तथा). — b) B2 T1 हि (for ह). — c) K1. 2 G1. 2 °पालाः. — d) S (except T1 G4) नैमिशा°.

3 a) D3. 5 चैव (for विप्रान्). — c) B3 D5 (with hiatus) °तीर्थे अश्वतीर्थे; D2 °तीर्थे च श्वतीर्थे; G1 °तीर्थे ये च भक्त्या; G4 M1 °तीर्थे च तीर्थे च. — d) D2 स्नातास्तीर्थे; D5 महातीर्थे (for गवां तीर्थे). K3 च कौरव; Dn D3. 5. 6 M2 च भारत. D1 स्नाताः सर्वे तु पांडवाः.

4 a) Ś1 K1–3 कालकूट्यां; D कालकोट्यां; G2. 4 पाल°. N G1. 2 M2 विषप्रस्थे (D3 रवि°; D5 विषप्रस्थैः). — b) Dn कौरवाः (for पाण्डवाः)!

5 c) K B3 Dc D1. 2. 5 T1 G1 M2 आप्लाव्य; T2 G2–4 चाप्लाव्य (for आप्लुत्य).

6 G1 om. (hapl.) 6a–8b. — a) T G (G1 om.) चापि (for चैव). — T1 om. 6c–8b.

7 T1 G1 om. 7 (cf. v.l. 6). — a) D1 °संजुष्टाः; D2 °संघुष्टाः; M1 °संजुष्टां (for °जुष्टां च). Ś1 वा (for च). — b) K4 (m as in text) देशान्; T2 G3 वेदिं (for वेदीं). Ś1 K3. 4 Dc D1–3. 5 विशां पते (for प्रजा°).

8 T1 G1 om. 8ab (cf. v.l. 6); G4 om. 8. — a) Ś1 K Dc D1. 2 राजन् (for वीराः). — b) D3. 5 om. च.

9 b) D3. 5 [अ]नु-; T G3 [अ]पि (for [अ]भि-). B Dn D1. 2. 4. 6 -संस्कृतं; D3. 5 -पालितं; T2 G -सत्कृताः (G1 -रक्षितं) (for -सत्कृतम्). — d) D1 G4 °द्युता (for °द्युते). — After 9, K1 ins. 476* (om. line 2).

10 a) B Dn D4. 6 नगो (for सरो). B3 नाम (for यत्र). — b) Ś1 K1. 2 यत्र पुण्या; B2 D5 पुण्या यत्र (for पुण्या चैव). — B D (except D1–3. 5) ins. after 10ab: K1 (om. line 2) ins. after 9:

476* वानीरमालिनी रम्या नदी पुलिनशोभिता ।
दिव्यं पवित्रकूटं च पवित्रधरणीधरम् ।

ऋषिजुष्टं सुपुण्यं तत्तीर्थं ब्रह्मसरोत्तमम् ॥ १०
अगस्त्यो भगवान्यत्र गतो वैवस्वतं प्रति ।
उवास च स्वयं यत्र धर्मो राजन्सनातनः ॥ ११
सर्वासां सरितां चैव समुद्भेदो विशां पते ।
यत्र संनिहितो नित्यं महादेवः पिनाकधृक् ॥ १२
तत्र ते पाण्डवा वीराश्चातुर्मास्यैस्तदेजिरे ।
ऋषियज्ञेन महता यत्राक्षयवटो महान् ॥ १३
ब्राह्मणास्तत्र शतशः समाजग्मुस्तपोधनाः ।
चातुर्मास्येनायजन्त आर्षेण विधिना तदा ॥ १४
तत्र विद्यातपोनित्या ब्राह्मणा वेदपारगाः ।
कथाः प्रचक्रिरे पुण्याः सदसिस्था महात्मनाम् ॥ १५
तत्र विद्याव्रतस्नातः कौमारं व्रतमास्थितः ।
शमठोऽकथयद्राजन्नामूर्तरयसं गयम् ॥ १६
अमूर्तरयसः पुत्रो गयो राजर्षिसत्तमः ।
पुण्यानि यस्य कर्माणि तानि मे शृणु भारत ॥ १७
यस्य यज्ञो बभूवेह बह्वन्नो बहुदक्षिणः ।
यत्रान्नपर्वता राजञ्शतशोऽथ सहस्रशः ॥ १८
घृतकुल्याश्च दध्नश्च नद्यो बहुशतास्तथा ।
व्यञ्जनानां प्रवाहाश्च महार्हाणां सहस्रशः ॥ १९
अहन्यहनि चाप्येतद्याचतां संप्रदीयते ।
अन्यत्तु ब्राह्मणा राजन्भुञ्जतेऽन्नं सुसंस्कृतम् ॥ २०
तत्र वै दक्षिणाकाले ब्रह्मघोषो दिवं गतः ।

C. 3. 8532
B. 3. 95. 22
K. 3. 93. 24

[(L. 2) B1 पवित्रं चित्रकूटं च (for the prior half). B1. 2 De पवित्रे धरणीधरे (for the posterior half).]

— c) K1. 2 स्वर्गपुण्यं; B1 De Dn3 सुपुण्यं च; B3 सुपुण्यं तु; G4 सुपूर्णं तत्. — d) Ś1 K1 ब्रह्मसरो नृप; K3 D1 °सरोत्तुलं; K4 °सरोमलं; D2 °सरो अलं; D3. 5 °सरोभवत्; S पुण्य- (M ब्रह्म)सरोत्तुलं (T1 °जलं).

11 a) S (except M2) यत्र भगवान् (by transp.). — c) Ś1 K1. 2. 4 B1. 2. 4 Dn D4. 6 G4 तत्र (for यत्र). — d) K4 B D (except D1–3. 5) धर्मराजः; T1 राजधर्मः; T2 G2. 3 M राजन्धर्मः (by transp.); G1 राजा धर्मः; G4 राजधर्म.

12 a) K3 D3. 5 यत्र (for चैव). — b) T2 G1. 3. 4 समुद्भेदे. D5 [s]पि दृश्यते (for विशां पते). — d) Ś1 °धृत् (for °धृक्).

13 a) S (except M2) राजन् (for वीराः). — b) Ś1 K1. 2 तथेजिरे; K3 च भेजिरे (for तदेजिरे). D1. 2. 5 चातुर्मास्येन ईजिरे. — d) Ś1 K1. 2 G2 तत्र (for यत्र). K B1. 2 D1. 2 T1 M अक्षय्य-; T2 G2–4 अक्षय्यो (for अक्षय-). T2 G2–4 महावटः (for -वटो महान्). — After 13, B De Dn D4. 6 ins.:

477* अक्षये देवयजने अक्षयं यत्र वै फलम् ।
ते तु तत्रोपवासांस्तु चक्रुर्निश्चितमानसाः ।

[(L. 1) De तत्र (for यत्र). — (L. 2) De नियत° (for निश्चित°).]

14 cd) S वर्तमानेषु वै तस्य चातुर्मास्येषु भारत.

15 Ś1 om. (hapl.) 15. — a) D5 यत्र (for तत्र). K1 (corrupt) °वर्णा; K3 B Dn D4. 6 °वृद्धा; K3. 4 De D1–3. 5 T1 °युक्ता. — c) K1. 2 B Dn D4. 6 T G2–4 कथां (for कथाः). K1 पुत्राः; K3 पुण्यं; B Dn D4. 6 पुण्यां; T2 G2–4 सर्वे (for पुण्याः). — d) D3. 5 सर्व एव; M सदस्याढ्या (for °सिस्था).

16 a) Ś1 B2 (m as in text) °तप°; K1. 2 °उप° (sic) (for °व्रत°). — b) Ś1 K1. 2 M1 कौमार-. — B3 om. from 16cd up to 3. 94. 6. — d) T G आधूतरजसं; M आसूतरय(M2 °ज)सं.

17 B3 om. 17 (cf. v.l. 16). Before 17, K3. 4 B (B3 om.) D G2 M ins. शमठ उ° (G2 M om. उ°). — a) S आधू(T2 G3 अधू-; G1 नाधू-; M आसू)तरजसः पुत्रो. — b) Ś1 K2 D1 G1 °सत्तम. — c) De S (except M2) तस्य (for यस्य). — d) D3. 5 पांडव (for भारत).

18 B3 om. 18 (cf. v.l. 16). — a) K3. 4 De G4 M तस्य (for यस्य). — b) T2 G3. 4 वसतो. D1 T2 G3. 4 भूरिदक्षिणः. — d) S (except T1) आसञ्शतसह°.

19 B3 T1 (hapl.) om. 19 (for B3 cf. v.l. 16). — c) K4 D1. 2 प्रकाराश्च; G2. 4 प्रवाहश्च. — d) Ś1 K1. 2 च सर्वशः (for सह°).

20 B3 om. 20 (cf. v.l. 16). — a) B (B3 om.) Dn D4. 6 T2 G3 एवं (for एतद्). — b) Ś1 K D1 च (for सं-). — c) Ś1 K1. 2 ततः स्म; K3 तत्र स्म; K4 अन्यत्र; B (B3 om.) Dn D4. 6 अन्ये च; De अन्ये तत्; D1. 2 तत्र स्म; D3. 5 अन्यं तु; G1 अभ्यंतु (for अन्यत्तु).

21 B3 om. 21 (cf. v.l. 16). — a) K1. 2 T2 G3. 4 तत्रैव (for तत्र वै). — G4 om. 21cd. — c) B2 D (except D1. 2) च; T2 G3 सं- (for स्म). — d) K4 D5 ब्रह्मघोषेण.

C. 3. 8532
B. 3. 95. 22
K. 3. 93. 24

न स्म प्रज्ञायते किंचिद्ब्रह्मशब्देन भारत ॥ २१
पुण्येन चरता राजन्भूर्दिशः खं नभस्तथा ।
आपूर्णमासीच्छब्देन तदप्यासीन्महाद्भुतम् ॥ २२
तत्र स्म गाथा गायन्ति मनुष्या भरतर्षभ ।
अन्नपानैः शुभैस्तृप्ता देशे देशे सुवर्चसः ॥ २३
गयस्य यज्ञे के त्वद्य प्राणिनो भोक्तुमीप्सवः ।
यत्र भोजनशिष्टस्य पर्वताः पञ्चविंशतिः ॥ २४
न स्म पूर्वे जनाश्चक्रुर्न करिष्यन्ति चापरे ।
गयो यदकरोद्यज्ञे राजर्षिरमितद्युतिः ॥ २५
कथं नु देवा हविषा गयेन परितर्पिताः ।
पुनः शक्ष्यन्त्युपादातुमन्यैर्दत्तानि कानिचित् ॥ २६
एवंविधाः सुबहवस्तस्य यज्ञे महात्मनः ।
बभूवुरस्य सरसः समीपे कुरुनन्दन ॥ २७

इति श्रीमहाभारते आरण्यकपर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

वैशंपायन उवाच ।
ततः संप्रस्थितो राजा कौन्तेयो भूरिदक्षिणः ।
अगस्त्याश्रममासाद्य दुर्जयायामुवास ह ॥ १
तत्र वै लोमशं राजा पप्रच्छ वदतां वरः ।

---

22 B₃ om. 22 (cf. v.l. 16). — [a]) Ś₁ K₁. ₂ **पुण्येनाचरता**; T₂ G₃ °**नोच्चारिता**; G₂. ₄ °**नोच्चरिता**. — [b]) K₂ **नभस्तदा**; K₃ **दिवस्तथा**; D₃. ₅ **वियत्तदा**; T G₂–₄ M **तथा** (T₂ G₂. ₃ °**दा**) **नृप**. — [d]) K₄ D₁. ₂ T G₃ M₁ **अस्यासीन्**; D₃. ₅ **अस्य च** (for **अप्यासीन्**). Ś₁ K₁–₃ **तदासीन्महदद्भुतं**; G₁ **तत्तदासीन्महाद्भुतं**.

23 B₃ om. 23 (cf. v.l. 16). — [a]) Ś₁ K₁. ₂ **ततः**; Dn₂ G₁ **यत्र** (for **तत्र**). — [b]) Ś₁ K₁. ₂ **गयस्य** (for **मनुष्या**). — [c]) S (except T₂ G₃) **गुणैस्** (for **शुभैस्**).

24 B₃ om. 24 (cf. v.l. 16). — [a]) K₂ B (B₃ om.) **त्वद्य**; D₃ **त्वङ्ग**; D₆ **त्वत्र**; M₁ **त्वस्य** (for **त्वद्य**). — [b]) K₁. ₂ Dc **इच्छवः** (for **ईप्सवः**). — [c]) B₁ Dn D₄–₆ **तत्र**. Ś₁ K₁. ₂ °**शिष्टाश्च**; S °**शेषस्य**.

25 B₃ om. 25 (cf. v.l. 16). — [a]) K₃ **पुरा स्म**; B (B₃ om.) Dn D₄. ₆ **तत्पूर्वे**; Dc **स्म पृष्ठे** (for **स्म पूर्वे**). T₂ G₃. ₄ **नरा**° (for **जना**°). — [c]) Ś₁ K₁. ₂ **यथा**° (for **यद**°).

26 B₃ om. 26 (cf. v.l. 16). — [a]) K₄ D (except D₃. ₅) **तु** (for **नु**). — After 26, N (except D₃. ₅) ins.:

478* **सिकता वा यथा लोके यथा वा दिवि तारकाः ।**
यथा वा वर्षतो धारा असंख्येयाः स्म केनचित् ।
तथा गणयितुं शक्या गययज्ञे न दक्षिणाः ।

[(L. 1) Ś₁ K₁. ₂ **च** (for the first **वा**). — (L. 2) Ś₁ K₁. ₂ **वर्षाभसां** (for **वा वर्षतो**). B₄ **च काश्चन** (for **स्म केनचित्**).]

27 B₃ om. 27 (cf. v.l. 16). — [a]) T₂ G M₂ **स्युर्** (G₁ **तु**; M₂ **सु**-) **बहुशः** (for **सुबहवः**). Ś₁ K Dc D₁–₃. ₅ **एवं बहुविधा वाचः**. — [b]) B (B₃ om.) Dn D₄. ₆ T₁ G₁ **यज्ञा** (for **यज्ञे**). Ś₁ K B₂ Dn D₂. ₄. ₆ **महीपतेः**; B₁. ₄ Dc D₁. ₃. ₅ **महीपतेः**. — [c]) K₃. ₄ D₃ **तस्य** (for **अस्य**). G₁ **गाथाश्च** (for **सरसः**).

Colophon om. in B₃. — *Major parvan:* Ś₁ K₁. ₂ Dn₂ T G₂–₄ M₁ **आरण्य**. — *Sub-parvan:* B₂ Dn₁. n₂ D₄. ₆ T₁ **तीर्थयात्रा** (B₂ cont. **लोमशतीर्थयात्रा**); K₃. ₄ B₄ Dc Dn₃ D₁–₃. ₅ G₁ (all om. sub-parvan name) mention only **लोमशतीर्थयात्रा**. — *Adhy. name:* K₃ **गयवृत्तांतं**; Dc₂ **गययज्ञाख्यानं**; T₂ G₃ **गययज्ञस्तुतिः**. — *Adhy. no.* (figures, words or both): Dn₁. n₂ 95; Dn₃ M₂ 96; D₁ 99; T G M₁ 94. — *Śloka no.:* Dn 29.

94

2 B₃ om. 2–6 (cf. v.l. 3. 93. 16). — [a]) K₃. ₄ B (B₃ om.) Dn D₁. ₃–₆ **तत्रैव** (for **तत्र वै**). — [b]) T₂ G₂–₄ **द्विपदां**; G₁ M₂ **गदतां** (for **वदतां**). K₃ D₃. ₅ **वरः**; K₃ M₁ °**रं** (for °**रः**).

अगस्त्येनेह वातापिः किमर्थमुपशामितः ॥ २
आसीद्वा किंप्रभावश्च स दैत्यो मानवान्तकः ।
किमर्थं चोद्वृतो मन्युरगस्त्यस्य महात्मनः ॥ ३

लोमश उवाच ।

इल्वलो नाम दैतेय आसीत्कौरवनन्दन ।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः ॥ ४
स ब्राह्मणं तपोयुक्तमुवाच दितिनन्दनः ।
पुत्रं मे भगवानेकमिन्द्रतुल्यं प्रयच्छतु ॥ ५
तस्मै स ब्राह्मणो नादात्पुत्रं वासवसंमितम् ।
चुक्रोध सोऽसुरस्तस्य ब्राह्मणस्य ततो भृशम् ॥ ६
समाह्वयति यं वाचा गतं वैवस्वतक्षयम् ।
स पुनर्देहमास्थाय जीवन्न्म प्रतिदृश्यते ॥ ७
ततो वातापिमसुरं छागं कृत्वा सुसंस्कृतम् ।
तं ब्राह्मणं भोजयित्वा पुनरेव समाह्वयत् ॥ ८
तस्य पार्श्वं विनिर्भिद्य ब्राह्मणस्य महासुरः ।
वातापिः प्रहसन्राजन्निश्चक्राम विशां पते ॥ ९
एवं स ब्राह्मणान्राजन्भोजयित्वा पुनः पुनः ।
हिंसयामास दैतेय इल्वलो दुष्टचेतनः ॥ १०
अगस्त्यश्चापि भगवानेतस्मिन्काल एव तु ।
पितॄन्ददर्श गर्ते वै लम्बमानानधोमुखान् ॥ ११
सोऽपृच्छल्लम्बमानांस्तान्भवन्त इह किंपराः ।
संतानहेतोरिति तं तमूचुर्ब्रह्मवादिनः ॥ १२
ते तस्मै कथयामासुर्वयं ते पितरः स्वकाः ।
गर्तमेतमनुप्राप्ता लम्बामः प्रसवार्थिनः ॥ १३

C. 3. 8555
B. 3. 96. 16
K. 3. 94. 16

---

3 B$_3$ om. 3 (cf. v.l. 2). — [c]) K$_4$ D1. 3 T G3. 4 M$_2$ चोद्वृतो; B1. 2 De D4. 6 चोद्यतो; B$_4$ Dn D$_4$ चोदितो; G1. 2 चोद्यते; M$_1$ चोत्थितो.

5 B$_3$ om. 5 (cf. v.l. 2). — [b]) Ś$_1$ K1. 2. 4 D1. 2 उक्तवान् (for उवाच). — K$_1$ om. 5[cd].

6 B$_3$ om. 6 (cf. v.l. 2). — [a]) Ś$_1$ K$_2$. 3 Dn D4. 6 तस्मिन्स; M$_2$ स तस्मै (by transp.). Ś$_1$ K B$_1$ (m as in text) De D1–3. 5 नैच्छत् (for नादात्). — [b]) Ś$_1$ K B$_1$ (m as in text) De D1–3 पुत्रं दातुं तथाविधं. — [c]) Ś$_1$ K1. 2 दितिजस् (for सोऽसुरस्). T G2–4 M तस्मै (for तस्य). G$_1$ चुक्रोध वज्री तस्मै तु. — [d]) K$_4$ S ब्राह्मणाय (for °णस्य). — After 6, Ś$_1$ (om. lines 1-2) K (K2–4 om. lines 1-2) B (B1. 3 om. lines 3-4) D (De om. lines 3-4; D1–3. 5 om. lines 1-2) S (T$_1$ G1. 2. 4 om. lines 3-4; T$_2$ reading lines 3-4 in marg.) ins.:

479* तदा प्रभृति राजेन्द्र ब्रह्महासुरसत्तमः ।
मन्युमान्भ्रातरं छागं मायावी प्रचकार ह ।
मेषरूपी च वातापिः कामरूपोऽभवत्क्षणात् ।
संस्कृत्य भोजयति तं विप्रान्स्म जिघांसति ।

[(L. 1) K$_1$ B De Dn D4. 6 इल्वलो ब्रह्महासुरः (for the posterior half). — (L. 2) K$_1$ B De Dn D4. 6 ह्यकरोत्ततः (for प्रचकार ह). — (L. 3) Ś$_1$ K1. 2 D$_5$ °रूपश् (for °रूपी). B2. 4 Dn D4. 6 T$_2$ G$_3$ °रूपी (for °रूपो). — (L. 4) K$_3$ भोजयामास; B2. 4 Dn D4. 6 T$_2$ G$_3$ च (T$_2$ G$_3$ तं) भोजयति (for भोजयंति तं). K$_3$ ब्राह्मणान्स जिघांसया; B2. 4 Dn D4. 6 T$_2$ G$_3$ ततो विप्रं जिघांसति.]

7 [a]) K$_3$ B D (except D3. 5) M स चा° (for समा°). Ś$_1$ K B1. 3 De D1. 3. 5 तं (for यं). — [d]) B$_4$ स; De Dn$_1$ D1. 3 G1 सं-; T$_2$ G2–4 च (for स्म). Ś$_1$ K1–3 B1. 3. 4 D प्रत्यदृश्यत; G$_1$ परिदृश्यते.

8 [c]) D1. 2 T G ब्राह्मणं भोजयित्वासौ (D1. 2 °त्वा तं; G$_1$ °त्वा स). — [d]) M सोसुरः पुनराह्वयत्. — After 8, K$_1$ B D (except D2. 3. 5) S ins.:

480* तामिल्वलेन महता स्वरेण गिरमीरिताम् ।
श्रुत्वातिमायो बलवान्क्षिप्रं ब्राह्मणकण्टकः ।

[(L. 1) B3. 4 De [अ]सुरेण (for स्वरेण). K$_1$ B De Dn D1. 4. 6 वाचम् (for गिरम्).]

9 B$_3$ om. 9[a]–10[b]. — [a]) M$_1$ (? gloss) कुक्षिं (for पार्श्वं). Ś$_1$ K D1. 2. 5 स तस्य पार्श्वं निर्भिद्य. — [d]) Ś$_1$ K1. 2 महामते; M$_1$ महीपते (for विशां पते).

11 [b]) K1. 2 D$_5$ एकस्मिन्; K$_3$ स तस्मिन्. Ś$_1$ K D1. 2 आगते; D$_5$ आगतः (for एव तु). — 11[cd] = (var.) 1. 41. 3[cd]. — [c]) De कौंतेय; T$_2$ G गर्तं तु. — [d]) K$_4$ B$_4$ (m as in text) D1. 2 T G1–3 M$_2$ अवाङ्मुखान् (for अधो°).

12 [a]) Ś$_1$ K De D1–3. 5 M$_1$ लंबतस्तानपृच्छत्स. — [b]) T$_2$ G2–4 भगवंतश्च (for भवन्त इह). K$_3$ इति; De Dn D$_4$ G$_1$ इव (for इह). K$_3$ के परे; K$_4$ के पराः; B$_3$m कल्पिताः; Dn D$_4$ कंपिताः; D$_3$ G$_4$ किं पुरा; D$_5$ केचन; G$_1$ किं वरः (for किंपराः). — After 12[ab], S ins.:

481* किमर्थं वेह लम्बध्वं गर्ते यूयमधोमुखाः ।

— M om. 12[cd]. — [d]) K$_3$ B Dn D4–6 प्रत्यूचुर्. Ś$_1$ K1. 2 ब्रह्मचारिणः; K3. 4 De D1–3. 5 G$_4$ ब्रह्मचारिणं.

C. 3. 8556
B. 3. 96. 16
K. 3. 94. 17

यदि नो जनयेथास्त्वमगस्त्यापत्यमुत्तमम् ।
स्यान्नोऽस्मान्निरयान्मोक्षस्त्वं च पुत्रामुया गतिम् ॥१४
स तानुवाच तेजस्वी सत्यधर्मपरायणः ।
करिष्ये पितरः कामं व्येतु वो मानसो ज्वरः ॥ १५
ततः प्रसवसंतानं चिन्तयन्भगवानृषिः ।
आत्मनः प्रसवस्यार्थे नापश्यत्सदृशीं स्त्रियम् ॥ १६
स तस्य तस्य सत्त्वस्य तत्तदङ्गमनुत्तमम् ।
संभृत्य तत्समैरङ्गैर्निर्ममे स्त्रियमुत्तमाम् ॥ १७
स तां विदर्भराजाय पुत्रकामाय ताम्यते ।
निर्मितामात्मनोऽर्थाय मुनिः प्रादान्महातपाः ॥ १८
सा तत्र जज्ञे सुभगा विद्युत्सौदामिनी यथा ।
विभ्राजमाना वपुषा व्यवर्धत शुभानना ॥ १९
जातमात्रां च तां दृष्ट्वा वैदर्भः पृथिवीपतिः ।
प्रहर्षेण द्विजातिभ्यो न्यवेदयत भारत ॥ २०
अभ्यनन्दन्त तां सर्वे ब्राह्मणा वसुधाधिप ।
लोपामुद्रेति तस्याश्च चक्रिरे नाम ते द्विजाः ॥ २१
ववृधे सा महाराज बिभ्रती रूपमुत्तमम् ।
अग्निवोत्पलिनी शीघ्रमग्नेरिव शिखा शुभा ॥ २२
तां यौवनस्थां राजेन्द्र शतं कन्याः सलंकृताः ।
दासीशतं च कल्याणीमुपतस्थुर्वशानुगाः ॥ २३
सा स्म दासीशतवृता मध्ये कन्याशतस्य च ।
आस्ते तेजस्विनी कन्या रोहिणीव दिवि प्रभो ॥ २४
यौवनस्थामपि च तां शीलाचारसमन्विताम् ।
न वव्रे पुरुषः कश्चिद्भयात्तस्य महात्मनः ॥ २५
सा तु सत्यवती कन्या रूपेणाप्सरसोऽप्यति ।
तोषयामास पितरं शीलेन स्वजनं तथा ॥ २६
वैदर्भी तु तथायुक्तां युवतीं प्रेक्ष्य वै पिता ।
मनसा चिन्तयामास कस्मै दद्यां सुतामिति ॥ २७

इति श्रीमहाभारते आरण्यकपर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

---

14 G1 om. 14c–16d. — d) T1 त्वं पुत्र प्राप्नुया गतिं; M लोकांश्चैवाप्नुयामहे.

15 G1 om. 15 (cf. v.l. 14). — After 15, K3 ins.:

482* स चाथ जनयामास भारतापत्यमुत्तमम् ।
लेभिरे पितरश्चास्य लोकान्राजन्यथेप्सितान् ।
[Line 1 = (var.) 495*.]

16 G1 om. 16 (cf. v.l. 14). — After 16, K3 (marg. *sec. m.*) ins.:

483* ऋषिर्हि प्रतपा नाम विधाय वरमुत्तमम् ।

17 c) K3 D3 T2 G2–4 संहत्य; B Dn D4. 6 संगृह्य; Dc तद्वद्य; D5 M2 संहृत्य; T1 संसृत्य; M1 संस्मृत्य. Ś1 K1. 2. 4 D1. 2. 5 तन्मयैर् (for तत्समैर्).

18 a) B D (except D1–3. 5) °राजस्य. — b) Ś1 K D1–3. 5 धीमते; G1 श्रम्य°; M शाम्य° (for ताम्य°). B Dc Dn D4. 6 पुत्रार्थं तप्यतस् (Dc °ते) तपः.

19 b) = 3. 50. 12d. Ś1 K3 B1 D5 सौदामनी. — c) Cf. 1. 65. 11a. — d) K3 M वरा° (for शुभा°).

20 a) Ś1 K1. 2 D1. 2 तु (for च).

21 a) T2 G3 तं (for तां). — b) G1 पृथिवीपते (for वसु°).

23 a) T2 G2–4 तां यौवनगतां राजन्; G1 शुभां तां यौवनगतां. — c) B Dn D4–6 दास्यः (for दासी-). — D3 om. from च (in 23c) up to 24d. — d) K2 B2 Dn1 उपातस्थुर्; K3 M उपतस्थे. K2. 4 Dc वशं गताः; M वशानुगं.

24 D3 om. 24 (cf. v.l. 23). — d) B1. 4 Dc Dn D4–6 G4 दिवि प्रभा; G1 दिवप्रभ.

25 a) Ś1 K Dc D1. 2. 5 शुभां (for च तां). — b) M तथा रूप° (for शीलाचार°).

26 a) T2 G3. 4 च (for तु). — b) Ś1 [अ]प्सरसामति; K3 T1 [अ]प्यप्सरोपमा; D5 [अ]प्सरसो ह्यति; T2 G2–4 [अ]प्सरसोपमा; G1 [अ]तीव सुंदरी. D3 रोहिणीव दिवि प्रभो (= 24d). — d) Ś1 K1. 2 प्रति (for तथा).

27 ab) Ś1 K Dc D1–3. 5 तां यौवनवतीं दृष्ट्वा वैदर्भाधिपतिर्नृपः. — d) B Dn D4. 6 G1 इमां सुतां (B3m शुभां); T2 G2–4 M2 सुतामिमां (for °मिति).

Colophon. — *Major parvan:* Ś1 K1. 2 Dn3 T G2–4 M1 आरण्य. — *Sub-parvan:* Dc Dn3 T1 तीर्थयात्रा; (Dc cont. आगस्त्य). Omitting sub-parvan name, K3. 4 B2 D1. 2 mention only लोमशतीर्थयात्रा (K4 B2 cont. आगस्त्य); B1. 3. 4 Dn1 D3–6 only आगस्त्य (or अगस्त्य); and Dn3 only अगस्त्यतीर्थयात्रा. — *Adhy. name:* T2 G3

९५

लोमश उवाच ।
यदा त्वमन्यतागस्त्यो गार्हस्थ्ये तां क्षमामिति ।
तदाभिगम्य प्रोवाच वैदर्भं पृथिवीपतिम् ॥ १
राजन्निवेशे बुद्धिर्मे वर्तते पुत्रकारणात् ।
वरये त्वां महीपाल लोपामुद्रां प्रयच्छ मे ॥ २
एवमुक्तः स मुनिना महीपालो विचेतनः ।
प्रत्याख्यानाय चाशक्तः प्रदातुमपि नैच्छत ॥ ३
ततः स भार्यामभ्येत्य प्रोवाच पृथिवीपतिः ।
महर्षिर्वीर्यवानेष क्रुद्धः शापाग्निना दहेत् ॥ ४
तं तथा दुःखितं दृष्ट्वा सभार्यं पृथिवीपतिम् ।
लोपामुद्राभिगम्येदं काले वचनमब्रवीत् ॥ ५
न मत्कृते महीपाल पीडामभ्येतुमर्हसि ।
प्रयच्छ मामगस्त्याय त्राह्यात्मानं मया पितः ॥ ६
दुहितुर्वचनाद्राजा सोऽगस्त्याय महात्मने ।
लोपामुद्रां ततः प्रादाद्विधिपूर्वं विशां पते ॥ ७
प्राप्य भार्यामगस्त्यस्तु लोपामुद्रामभाषत ।
महार्हाण्युत्सृजैतानि वासांस्याभरणानि च ॥ ८
ततः सा दर्शनीयानि महार्हाणि तनूनि च ।
समुत्ससर्ज रम्भोरूर्वसनान्यायतेक्षणा ॥ ९
ततश्चीराणि जग्राह वल्कलान्यजिनानि च ।
समानव्रतचर्या च बभूवायतलोचना ॥ १०
गङ्गाद्वारमथागम्य भगवानृषिसत्तमः ।
उग्रमातिष्ठत तपः सह पत्न्यानुकूलया ॥ ११
सा प्रीत्या बहुमानाच्च पतिं पर्यचरत्तदा ।
अगस्त्यश्च परां प्रीतिं भार्यायामकरोत्प्रभुः ॥ १२
ततो बहुतिथे काले लोपामुद्रां विशां पते ।
तपसा द्योतितां स्नातां ददर्श भगवानृषिः ॥ १३
स तस्याः परिचारेण शौचेन च दमेन च ।
श्रिया रूपेण च प्रीतो मैथुनायाजुहाव ताम् ॥ १४
ततः सा प्राञ्जलिर्भूत्वा लज्जमानेव भामिनी । C. 3. 8584
B. 3. 97. 15
K. 3. 95. 15

लोपामुद्रोत्पत्तिः. — *Adhy. no.* (figures, words or both): Dn1 (*sup. lin.*) 96; Dn3 M2 97; D1 100; T G M1 95. — *Śloka no.*: Dn 30; D1 29.

95

1 b) B1. 4 M2 क्षमामिव; T G अनिंदितां (for क्षमामिति). Ś1 K2–4 De D1–3. 5 योग्य (K4 °ग)रूपामिवात्मनः.

2 a) Ś1 K1. 2 विवाहे; T2 G निवेश- (for निवेशे). — b) Ś1 K De D1. 2. 5 M1 [s]पत्य° (for पुत्र°). — c) Ś1 K1. 2 त्वा (for त्वां). T2 G2–4 महाभाग; M1 महाराज (for मही°).

3 a) Ś1 K D1–3. 5 तु (for स). K3. 4 D1. 2 ऋषिणा (for मुनिना). — d) Ś1 K1. 2 वापि; K3. 4 De D1. 2. 5 चापि; B Dn D3. 4. 6 T1 M चैव (for अपि).

4 a) D1. 2 आहूय (for अभ्येत्य). — b) M1 स मही° (for पृथिवी°).

6 a) S (except M1) मत्कृते न (by transp.). — d) Ś1 K De D1. 2 पाहि; D3 रक्ष (for त्राहि).

7 a) Ś1 K1. 2 M2 राजन् (for राजा). — d) M1 प्रीतिपूर्वं. T2 G2–4 महात्मने (for विशां पते).

9 K1 om. (hapl.) 9a–10b. — ab) S ततः सा तानि वासांसि तनूनि च मृदूनि (G1 मृदून्याभरणानि) च. — c) K2. 3 De D2–4 M1 रंभोरुर्. — d) S दिव्यान्या(T1 सर्वाण्या)भरणानि च.

10 K1 om. 10ab (cf. v.l. 9). — d) D3 चचार (for बभूव). Ś1 K De D1. 2. 5 [अ]स्य तदा नृप; D3 वशवर्तिनी (for [आ]यतलो°).

11 a) Ś1 K1. 2 अथासाद्य; T2 G1. 3. 4 उपागम्य.

12 a) De Dn D1 प्रीता (for प्रीत्या). — d) B D3. 6 T1 आचरत्; De Dn D4. 5 M2 अचरत्; T2 G2–4 M1 अगमत्; G1 अहरत् (for अकरोत्). B1 पुनः; D3 तदा (for प्रभुः).

14 b) K1. 2 शमेन (for शौचेन). — c) D3. 5 प्रीत्या (for प्रीतो). — d) Ś1 K1. 2 B1. 2. 4 om. [आ-].

15 b) B (B1 marg.) De Dn1. 2 D4–6 भाविनी. — d) S भर्तारमिदमब्रवीत्.

C. 3. 8564
B. 3. 97. 15
K. 3. 95. 15

तदा सप्रणयं वाक्यं भगवन्तमथाब्रवीत् ॥ १५
असंशयं प्रजाहेतोर्भार्यां पतिरविन्दत ।
या तु त्वयि मम प्रीतिस्तामृषे कर्तुमर्हसि ॥ १६
यथा पितुर्गृहे विप्र प्रासादे शयनं मम ।
तथाविधे त्वं शयने मामुपैतुमिहार्हसि ॥ १७
इच्छामि त्वां स्रग्विणं च भूषणैश्च विभूषितम् ।
उपसर्तुं यथाकामं दिव्याभरणभूषिता ॥ १८

अगस्त्य उवाच ।

न वै धनानि विद्यन्ते लोपामुद्रे तथा मम ।
यथाविधानि कल्याणि पितुस्तव सुमध्यमे ॥ १९

लोपामुद्रोवाच ।

ईशोऽसि तपसा सर्वं समाहर्तुमिहेश्वर ।
क्षणेन जीवलोके यद्वसु किंचन विद्यते ॥ २०

अगस्त्य उवाच ।

एवमेतद्यथात्थ त्वं तपोव्ययकरं तु मे ।
यथा तु मे न नश्येत तपस्तन्मां प्रचोदय ॥ २१

लोपामुद्रोवाच ।

अल्पावशिष्टः कालोऽयमृतौ मम तपोधन ।
न चान्यथाहमिच्छामि त्वामुपैतुं कथंचन ॥ २२
न चापि धर्ममिच्छामि विलोप्तुं ते तपोधन ।
एतत्तु मे यथाकामं संपादयितुमर्हसि ॥ २३

अगस्त्य उवाच ।

यद्येष कामः सुभगे तव बुद्ध्या विनिश्चितः ।
हन्त गच्छाम्यहं भद्रे चर काममिह स्थिता ॥ २४

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

---

16 B$_3$ om. 16^{cd}. — ^{c}) S तथा (for या तु). M$_1$ [अ]पि या (for त्वयि).

17 T$_1$ om. 17–18. — ^{a}) K$_4$ B$_3$ De D$_5$ T$_2$ G$_{1.3}$ M$_2$ पितृगृहे (for पितुर्गृहे). — B$_3$ om. 17^{c}–19^{d}; G$_1$ om. 17^{c}–19^{b}.

18 B$_3$ T$_1$ G$_1$ om. 18 (cf. v.l. 17). — ^{a}) Ś$_1$ K$_2$ D$_{1.2}$ M त्वा (for त्वां). — ^{b}) K$_{3.4}$ D$_{1.2}$ [अ]पि (for वि-). — ^{c}) K$_2$ उपासितुं; K$_3$ उपपन्नं; D$_{1.3.5}$ °भोक्तुं (for °सर्तुं). — ^{d}) K$_3$ D$_{1-3}$ G$_{2.4}$ °भूषितं; D$_6$ M$_1$ °भूषितां. — After 18, B$_{1.2.4}$ De Dn D$_{4.6}$ T$_2$ (marg.) G$_3$ ins.:

484* अन्यथा नोपनिष्टेयं चीरकाषायवासिनी ।
नैवापवित्रो विप्रर्षे भूषणोऽयं कथंचन ।

19 B$_3$ om. 19; G$_1$ om. 19^{ab} (cf. v.l. 17). — ^{a}) B (B$_3$ om.) D (except D$_{1-3.5}$) ते (for वै).

20 ^{b}) Ś$_1$ ममाहर्तुम्; D$_{3.5}$ उपा°. K$_1$ B De Dn D$_{4-6}$ तपोधन (B$_3$ द्विजोत्तम); K$_2$ महेश्वर; S ममेप्सितं. — ^{d}) B वसु विद्यति (B$_4$ विद्यते वसु) किंचन; D$_3$ वसु विद्येत किंचन.

21 G$_4$ ऋषिः (for अगस्त्य उ°). — ^{a}) = 1. 143. 16^{a}. G$_3$ एव (for एतद्). K$_1$ °र्थत्वं; T$_1$ °तत्वं (for °त्थ त्वं). — ^{b}) B$_2$ हि तत्; Dn D$_{4.6}$ तु तत्; D$_5$ मम (for तु मे). — ^{c}) T$_1$ G$_{1.2.4}$ M$_3$ मे न प्रणश्येत्; T$_2$ G$_3$ न प्रणश्येत (for मे न नश्येत). — ^{d}) Ś$_1$ मा; B$_1$ मे (for मां). K$_{3.4}$ D$_2$ प्रणोदय. S तपस्तदुपधारय.

22 ^{b}) B D (except D$_{1-3.5}$) ऋतोर् (for ऋतौ). — ^{c}) K B$_2$ De D$_{1.2.5}$ S इच्छेयं (for इच्छामि).

23 D$_4$ om. (hapl.) 23^{ab}. — ^{b}) K$_{1.2}$ B$_2$ Dn D$_6$ G$_1$ कथंचन (for तपो°). — ^{c}) N (except D$_{3.5}$) एवं (for एतत्). Ś$_1$ K$_{1.2.4}$ D$_{1.2}$ मे त्वं; K$_3$ एतद्; D$_{3.5}$ सर्वं (for तु मे). Dn$_3$ यथाकालं; D$_{3.5}$ °तत्वं. — ^{d}) Ś$_1$ K$_{3.4}$ D$_{1-3.5}$ संपादयसि तत्कुरु.

24 ^{a}) Ś$_1$ K D$_{1-3.5}$ तथैष (Ś$_1$ K$_1$ °व) (for यद्येष). — After 24^{a}, Ś$_1$ K D$_{1.2.3}$ (om. line 2). $_{5.6}$ (marg. *sec. m.*) ins.:

485* मम धर्मविलोपकः ।
कामे कृते चरिष्यामि धर्मं दृष्टं यथास्मृति ।
यद्ययं चेप्सितः कामः.

— ^{c}) Dn D$_{4.5}$ G$_1$ हर्तुं (for हन्त). — ^{d}) Ś$_1$ K D$_{1-3}$ धर्मम् (for काममम्).

Colophon. — *Major parvan:* Ś$_1$ K$_{1.2}$ Dn$_2$ T G$_{2-4}$ M$_1$ आरण्य. — *Sub-parvan:* T$_1$ तीर्थयात्रा. Omitting sub-parvan name, K$_3$ B$_2$ D$_{1-3.5}$ G$_1$ mention only लोमशतीर्थयात्रा (K$_4$ B$_3$ D$_5$ cont. आगस्त्य); B$_{1.2}$ De Dn$_1$. n$_2$ D$_{4.6}$ only आगस्त्य; Dn$_3$ only अगस्त्योपाख्यान. — *Adhy. name:* B$_4$ लोपामुद्रागस्त्यसंवादः; T$_2$ G$_3$ लोपामुद्रावाक्यं; G$_1$ लोपामुद्रापरिणयः. — *Adhy. no.* (figures,

९६

लोमश उवाच ।
ततो जगाम कौरव्य सोऽगस्त्यो भिक्षितुं वसु ।
श्रुतर्वाणं महीपालं यं वेदाभ्यधिकं नृपैः ॥ १
स विदित्वा तु नृपतिः कुम्भयोनिमुपागमत् ।
विषयान्ते सहामात्यः प्रत्यगृह्णात्सुसत्कृतम् ॥ २
तस्मै चार्घ्यं यथान्यायमानीय पृथिवीपतिः ।
प्राञ्जलिः प्रयतो भूत्वा पप्रच्छागमनेऽर्थिताम् ॥ ३
अगस्त्य उवाच ।
वित्तार्थिनमनुप्राप्तं विद्धि मां पृथिवीपते ।
यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ मे ॥ ४
लोमश उवाच ।
तत आयव्ययौ पूर्णौ तस्मै राजा न्यवेदयत् ।
अतो विद्ध्यनुपादत्स्व यदत्र वसु मन्यसे ॥ ५
तत आयव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।
सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ ६
स श्रुतर्वाणमादाय वध्र्यश्वमगमत्ततः ।
स च तौ विषयस्यान्ते प्रत्यगृह्णाद्यथाविधि ॥ ७
तयोरर्घ्यं च पाद्यं च वध्र्यश्वः प्रत्यवेदयत् ।
अनुज्ञाप्य च पप्रच्छ प्रयोजनमुपक्रमे ॥ ८
अगस्त्य उवाच ।
वित्तकामाविह प्राप्तौ विद्ध्यावां पृथिवीपते ।
यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नौ ॥ ९
लोमश उवाच ।
तत आयव्ययौ पूर्णौ ताभ्यां राजा न्यवेदयत् ।

C. 3. 8604
B. 3. 98. 10
K. 3. 96. 10

---

words or both): Dn1(*sup. lin.*). n2 97; Dn3 M2 98; D1 101; T G M1 96. — *Śloka no.:* Dn1 24; Dn2 D1 25.

96

1 a) T2 G2–4 तत्रैव (for कौरव्य). — b) Ś1 K1. 2 धनम् (for वसु). — c) D5 राजानं श्रुतवर्माणं.

2 a) Ś1 K1. 2 विदित्वा च; B1 °त्वाथ; M1 °त्वैव. T2 G2–4 स तं विदित्वा नृपतिः. — b) Ś1 K Dc D1–3. 5 °योनिमुपस्थितं. — cd) Ś1 K1. 2 स च तं विषयस्यांते पूजयित्वा यथाविधि.

3 Ś1 K1. 2 om. 3ab. — a) K3. 4 तस्मादर्घं (sic); D2 तस्य चार्घ्यं; D5 तस्मा अर्घं. — b) K3. 4 Dc D1–3. 5 M2 उपहृत्य (K4 °पात्य; Dc °गृह्य; M2 उपानीय) महीपतिः. — c) B2 Dc S (except G1) प्रणतो (for °य°). — d) Ś1 K Dc D1–3. 5 आगमनक्रियां; T2 G2–4 आगमने द्विजं. — After 3, M2 ins.:

486* किमर्थमागमो ब्रह्मन्ब्रूह्योऽस्मागमनेन ते ।

4 a) Ś1 K Dc D1–3 इह (K3. 4 अहं) (for अनु). — 4cd=(var.) 9cd. — c) Ś1 D2 °शक्त्या°; K2 °वद° (for °शक्त्य°).

5 b) T2 G2–4 राजा तस्मै (by transp.). — c) Ś1 K1. 2 B4 D2 T1 ततो (for अतो). T2 G2–4 ततो ज्ञात्वा समादत्स्व. — d) Ś1 K1. 3. 4 D1–3 बहु (for वसु). T1 यदन्यत्राधिकं वसु; T2 G2–4 यदत्र व्यतिरिच्यते; G1 M यदत्राभ्यधिकं वसु.

6 b) Ś1 तत्तत् (for समौ).

7 a) D5 T2 G3 तं (for स). G2. 4 श्रुतर्वाणमथादाय. — b) K1 B1. 2. 4 Dc Dn D4. 6 T2 G3 ब्रह्मश्वम्; T1 G1 M2 वाध्र्यश्वम्; G2. 4 वाध्रीयम्.

8 M1 om. (hapl.) 8a–13b. — a) K3. 4 तयोरर्घं; B4 ततस्त्वर्घ्यं; D1. 2 ततश्चार्थं; T1 G1. 2. 4 ततः सोर्घ्यं. Ś1 K1. 4 D1. 2 राज्यं (for पाद्यं). — b) MSS. ब्रह्मश्व-, वाध्र्यश्व-, वाध्रीय- (as in 7). — G1 om. (hapl.) 8c–10b. — After 8, G2. 4 ins.:

487* वद कामं मुनिश्रेष्ठ धन्योऽस्म्यागमनेन ते ।

9 G1 M1 om. 9 (cf. v.l. 8). — 9cd=(var.) 4cd. — c) Ś1 K1–3 D2 यथाशक्त्या°. — d) K3 B2 D3–5 G4 मे (for नौ).

10 G1 om. 10ab; M1 om. 10 (cf. v.l. 8). — 10ab=(var.) 5ab. — b) Ś1 K Dc D1. 2 M2 राजा ताभ्यां (by transp.); D3. 5 तयो राजा. — cd) B1. 4 Dn D4. 6 T G3 अतो (for ततो). K1. 2 तु गृह्णाति; B Dn D4. 6 T2 G3 तु (T2 G3 नु) गृह्णीतं; T1 समादाय (for °दत्तां). K1. 2 व्यतिरिच्यते; G1 [अ]प्यतिरिं°. Ś1 K3. 4 Dc D1–3. 5 M2

C. 3 8604
B. 3. 98. 10
K. 3 96. 10

ततो ज्ञात्वा समादत्तां यदत्र व्यतिरिच्यते ॥ १०
तत आयव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।
सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ ११
पौरुकुत्सं ततो जग्मुस्त्रसदस्युं महाधनम् ।
अगस्त्यश्च श्रुतर्वा च वध्यश्वश्च महीपतिः ॥ १२
त्रसदस्युश्च तान्सर्वान्प्रत्यगृह्णाद्यथाविधि ।
अभिगम्य महाराज विषयान्ते सवाहनः ॥ १३
अर्चयित्वा यथान्यायमिक्ष्वाकू राजसत्तमः ।
समाश्वस्तांस्ततोऽपृच्छत्प्रयोजनमुपक्रमे ॥ १४

अगस्त्य उवाच ।

वित्तकामानिह प्राप्तान्विद्धि नः पृथिवीपते ।
यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नः ॥ १५

लोमश उवाच ।

तत आयव्ययौ पूर्णौ तेषां राजा न्यवेदयत् ।
अतो ज्ञात्वा समादद्ध्वं यदत्र व्यतिरिच्यते ॥ १६
तत आयव्ययौ दृष्ट्वा समौ सममतिर्द्विजः ।
सर्वथा प्राणिनां पीडामुपादानादमन्यत ॥ १७
ततः सर्वे समेत्याथ ते नृपास्तं महामुनिम् ।
इदमूचुर्महाराज समवेक्ष्य परस्परम् ॥ १८
अयं वै दानवो ब्रह्मन्निल्वलो वसुमान्भुवि ।
तमभिक्रम्य सर्वेऽद्य वयं याचामहे वसु ॥ १९
तेषां तदासीद्रुचितमिल्वलस्योपभिक्षणम् ।
ततस्ते सहिता राजन्निल्वलं समुपाद्रवन् ॥ २०

इति श्रीमहाभारते आरण्यकपर्वणि पण्णवतितमोऽध्यायः ॥ ९६ ॥

यदत्र व्यतिरिक्तं वै तेन कार्यं प्रवर्त(De1 De5 °र्त्य)तां. K1 *repeats* 10^{cd} with v.l. as in Ś1 above (reading व्यतिरिक्तं).

11 11=6. T2 G3 M1 om. 11 (for M1 cf. v.l. 8). — ^{b}) T1 G1. 2. 4 M2 तदा (for द्विजः). — ^{d}) De1. 2 अपश्यताम्; T1 M2 अमन्यताम्; G2. 4 विचिंत्य च (for अमन्यत).

12 M1 om. 12 (cf. v.l. 8). — ^{a}) Ś1 K1. 2 B1 Dc D3 पौरकुत्सं; K3 पौरकुत्स्यं; K4 पौरुकुत्सिं; D1 पुरुकुत्सं; D2 पौरुकुत्सुं; T1 G2 M2 पौरुकुत्स्यं. — ^{c}) Ś1 K1. 2 [अ]थ (for च). Ś1 K1. 2 श्रुतर्वाणो (for °र्वा च). — ^{d}) MSS. ब्रह्मश्च-, वाध्यश्च-, वाध्रीय- etc. (as in 7, 8). Ś1 स (for च).

13 M1 om. 13^{ab} (cf. v.l. 8). — ^{a}) Ś1 K B Dn D1. 4. 6 M3 तु; T2 G3–4 स (for च). B Dn D1. 4. 6 दृष्ट्वा (for सर्वान्). — ^{b}) G2. 4 पर्यं° (for प्रत्यं°). — ^{d}) B Dn D4. 6 महामनाः; T1 G1 M1 स चाहतः; T2 G2–4 स तान्नृपः (for सवा°).

14 ^{b}) T2 G2–4 ऐक्ष्वाको (for इक्ष्वाकू). — ^{c}) B1. 2. 4 Dc Dn D1. 4. 6 समस्तांश्च; D5 समासीनान्; M1 समाश्वस्तौ (for °श्वस्तान्).

15 15=(var.) 4, 9. — ^{c}) Ś1 K2. 3 D3. 5 यथाशक्त्या°.

16 16=(var.) 10. — All MSS. except B4 Dn D1 G1 om. the ref. D5 om. 16. — ^{b}) K3 (by transp.) राजा तेषां; S तेभ्यो (M1 ताभ्यां) राजा. — B3 om. 16^{cd}. — ^{c}) N (B3 D5 om.) M2 एतज्; T2 G1. 3 ततो (for अतो). N (B3 D5 om.) M2 ह्यपा(M2 [अ]प्युपा)दध्वं (K °दत्स्व; D2 °दत्त) (for समादद्ध्वं). — ^{d}) Ś1 K Dc D2. 3 यदन्यद्. K1. 2 अति°; T1 ह्यति° (for व्यति°).

17 17=6, 11. — ^{b}) M1 तदा (for द्विजः). T G तस्यापि स मुनिस्तदा (G1 स तस्य मुनिसत्तमः). — ^{d}) M °पश्य° (for °मन्य°).

18 ^{a}) B4 समेत्याशु; M1 समेतास्ते. — ^{b}) Ś1 K Dc D1. 2 तपोधनं (K4 °नाः) (for महा°). M1 नृपास्ते मुनिसत्तमं.

19 ^{a}) Ś1 K2. 3 D1–3. 5 हि (for वै). — ^{b}) T1 धनवान् (for वसुमान्). T2 G M1 धनवा(G1 बलवा-; M1 वसुमा)न्निल्वलो भुवि. — ^{c}) Ś1 K1–3 D3 उप°; K4 B Dn D5 अति°; D2 अप° (for अभि°). D1. 2 G2 संवेद्य (for सर्वेऽद्य). — ^{d}) Dn1. n2 चार्थो° (for याचा°).

20 D5 om. 20. — Before 20, K4 Dn D1 S (except T1 G2) ins. लोमश उ° (resp. लोमशः); B Dc D4. 6 ins. वैशं° उ°. — ^{a}) Ś1 रुदितम्; K1. 4 B1 Dc2 Dn D1. 2 S (except M1) उचितम् (for रुचितम्). — ^{b}) Ś1 B Dc Dn D4. 6 [ए]व; K1. 2 [उ]त; K3 [इ]ति; K4 M1 [अ]थ; T G2–4 च (for [उ]प-).

Colophon. — *Major parvan:* Ś1 K2 Dn2 T G2–4 M1 आरण्य. — *Sub-parvan:* D3 T1 तीर्थयात्रा. Omitting sub-parvan name, K3. 4 B2 D1. 2. 5 mention only लोमशतीर्थयात्रा (K4 B2 D5 cont. आगस्त्य); B1. 3. 4 Dc

९७

लोमश उवाच ।
इल्वलस्तान्विदित्वा तु महर्षिसहितान्नृपान् ।
उपस्थितान्सहामात्यो विषयान्तेऽभ्यपूजयत् ॥ १
तेषां ततोऽसुरश्रेष्ठ आतिथ्यमकरोत्तदा ।
स संस्कृतेन कौरव्य भ्रात्रा वातापिना किल ॥ २
ततो राजर्षयः सर्वे विषण्णा गतचेतसः ।
वातापिं संस्कृतं दृष्ट्वा मेषभूतं महासुरम् ॥ ३
अथाब्रवीदगस्त्यस्तान्राजर्षीनृषिसत्तमः ।
विषादो वो न कर्तव्यो अहं भोक्ष्ये महासुरम् ॥ ४
धुर्यासनमथासाद्य निषसाद महामुनिः ।
तं पर्यवेषदैत्येन्द्र इल्वलः प्रहसन्निव ॥ ५
अगस्त्य एव कृत्स्नं तु वातापिं बुभुजे ततः ।
भुक्तवत्यसुरोऽऽह्वानमकरोत्तस्य इल्वलः ॥ ६
ततो वायुः प्रादुरभूदगस्त्यस्य महात्मनः ।
इल्वलश्च विषण्णोऽभूदृष्ट्वा जीर्णं महासुरम् ॥ ७
प्राञ्जलिश्च सहामात्यैरिदं वचनमब्रवीत् ।
किमर्थमुपयाताः स्थ ब्रूत किं करवाणि वः ॥ ८
प्रत्युवाच ततोऽगस्त्यः प्रहसन्निल्वलं तदा ।

C. 3. 86?5
B. 3. 99. 11
K. 3. 97. 14

Dn D_6 G_1 only आगस्त्य (*or* अगस्त्य). — *Adhy. no.* (figures, words or both): Dn_2 98; Dn_3 M_2 99; D_1 102; T G M_1 97. — *Śloka no.*: Dn D_1 20.

97

1 [a]) Ś$_1$ K$_{1.2}$ विदित्वा च; D$_{3.5}$ °त्वाथ; M$_1$ °त्वैव. — Ś$_1$ om. 1^c–2^b. — [c]) K$_4$ De D$_{1.2.5}$ उपतस्थे; D$_3$ °तस्थौ; G_1 आगतांस्तान् (for उपस्थितान्). — [d]) B Dn D$_{4.6}$ T$_1$ G_1 ह्यपूजयत्; De [अ]भिपूज°.

2 Ś$_1$ om. 2^{ab} (cf. v.l. 1). — [ab]) K$_{1.2.4}$ B D (except D$_{2.3.5}$) T$_2$ G$_3$ ins. तु between the pādas (to avoid hiatus!). — B$_3$ om. (hapl.) 2^{cd}. — [d]) B (B$_3$ om.) Dn D$_{1.4.6}$ M$_2$ तदा; T G M$_1$ नृप (for किल).

4 B$_3$ om. 4^{cd}. — [b]) Ś$_1$ K$_{1.2}$ मुनिसत्तमः; K$_3$ द्विज°; D$_{1.2}$ नृपसत्तम; D$_3$ राजसंसदि; G_1 राजसत्तमः. — [c]) B$_1$ M$_1$ न भवद्भिर् (M$_1$ by transp. भवद्भिर्न) भयं कार्यं; T G$_{3-4}$ मा विषादो नृपा वो हि. — [d]) Ś$_1$ K$_{1-3}$ B$_{2-4}$ De D$_{1.2.5}$ त्वहं; K$_4$ Dn D$_{4.6}$ T$_1$ G$_1$ M$_2$ ह्यहं; D$_3$ स्वयं (for अहं). B$_1$ M$_1$ सुरद्विषं (for महा°).

5 B$_3$ om. 5^{ab}. — [a]) B$_1$ अतिक्रम्य; M अथाक्रम्य (for अथासाद्य). T G स धुर्यासनमाक्रम्य (G$_2$ °मासाद्य). — [b]) B$_2$ Dn D$_{4-6}$ महानृषिः. — [c]) Ś$_1$ संन्यवेशद्; K$_{1.2}$ प्रत्यवेश्य; B पर्यवेशद्.

6 [a]) K$_4$ D$_1$ G_1 तं कृत्स्नं; B$_1$ D$_3$ कृत्स्नं तं; T$_2$ G$_{2.3}$ तत्कृत्स्नं (for कृत्स्नं तु). — After 6^{ab}, T$_2$ G$_{2-4}$ ins.:

488* बह्वन्नाशापि ते मेऽस्तीत्यवदन्नक्षयन्नयन् ।

[G$_{2.4}$ मेस्तीति अवदद् (for ते मेऽस्तीत्यवदद्).]

— [d]) All MSS. except T G$_{3.4}$ चेल्वलः (for इ°), to avoid hiatus! — After 6, S ins.:

489* वातापे प्रतिबुध्यस्व दर्शयन्बलतेजसी ।
तपसा दुर्जयो यावदेष त्वां नातिवर्तते ।
ततस्तस्योदरं भेत्तुं वातापिर्वेगमाहरत् ।
तमबुध्यत तेजस्वी कुम्भयोनिर्महातपाः ।
स वीर्यात्तपसोग्रस्तु ननर्द भगवानृषिः ।
एष जीर्णोऽपि वातापे मया लोकस्य शान्तये ।
इत्युक्त्वा स्वकराग्रेण उदरं समताडयत् ।
त्रिरेवं प्रतिसंरब्धस्तेजसा प्रज्वलन्निव ।

7 [a]) D$_5$ T$_2$ G$_3$ आसीद् (for अभूद्). — [b]) B$_{2.4}$ Dn D$_{4.6}$ अधस्तस्य (for अगस्त्यस्य). — After 7^{ab}, K$_{1.2}$ B De Dn D$_{1.4.6}$ ins.:

490* शब्देन महता तात गर्जन्निव यथा घनः ।
वातापे निष्क्रमस्वेति पुनः पुनरुवाच ह ।
तं प्रहस्याब्रवीद्राजन्नगस्त्यो मुनिसत्तमः ।
कुतो निष्क्रमितुं शक्तो मया जीर्णस्तु सोऽसुरः ।

[(L. 1) B$_{1.2}$ राजन् (for तात). K$_{1.2}$ B$_{1.2}$ महा- (for यथा). — (L. 4) B$_1$ De$_2$ शक्तिर् (for शक्तो). K$_1$ ततोसुरः (for तु सोऽसुरः).]

— [c]) B D (except D$_{1-3.5}$) G$_4$ तु (for च).

8 [a]) B$_1$ स प्रांजलिः (for प्राञ्जलिश्च). B$_3$ स सामात्यैर्; S सहामात्य. — [c]) Ś$_1$ K$_2$ D$_{1.2}$ स्म (for स्थ).

9 [ab]) B$_1$ S (except M$_2$) तमगस्त्यो (T$_1$ अगस्त्योथ) हसन्वाक्यमिल्वलं प्रत्यभाषत (B$_1$ °पद्यत). — [c]) T G$_{2-4}$ ईशोस्यसुर. T$_1$ G$_{1.2}$ M$_2$ विद्म. G$_2$ M त्वा. — [d]) B$_1$

C. 3. 8625
B. 3. 99. 11
K. 3. 97. 14

ईशं ह्यसुर विद्मस्त्वां वयं सर्वे धनेश्वरम् ॥ ९
इमे च नातिधनिनो धनार्थश्च महान्मम ।
यथाशक्त्यविहिंस्यान्यान्संविभागं प्रयच्छ नः ॥ १०
ततोऽभिवाद्य तमृषिमिल्वलो वाक्यमब्रवीत् ।
दित्सितं यदि वेत्सि त्वं ततो दास्यामि ते वसु ॥ ११

अगस्त्य उवाच ।

गवां दश सहस्राणि राज्ञामेकैकशोऽसुर ।
तावदेव सुवर्णस्य दित्सितं ते महासुर ॥ १२
मह्यं ततो वै द्विगुणं रथश्चैव हिरण्मयः ।
मनोजवौ वाजिनौ च दित्सितं ते महासुर ।
जिज्ञास्यतां रथः सद्यो व्यक्तमेष हिरण्मयः ॥ १३

लोमश उवाच ।

जिज्ञास्यमानः स रथः कौन्तेयासीद्धिरण्मयः ।
ततः प्रव्यथितो दैत्यो ददावभ्यधिकं वसु ॥ १४
विवाजश्च सुवाजश्च तस्मिन्युक्तौ रथे हयौ ।
ऊहतुस्तौ वसून्याशु तान्यगस्त्याश्रमं प्रति ।
सर्वान्राज्ञः सहागस्त्यान्निमेषादिव भारत ॥ १५
अगस्त्येनाभ्यनुज्ञाता जग्मू राजर्षयस्तदा ।
कृतवांश्च मुनिः सर्वं लोपामुद्राचिकीर्षितम् ॥ १६

लोपामुद्रोवाच ।

कृतवानसि तत्सर्वं भगवन्मम काङ्क्षितम् ।
उत्पादय सकृन्मह्यमपत्यं वीर्यवत्तरम् ॥ १७

M1 धनार्थिनः (for धने°).

10 [a]) B2 Dn D4. 6 एते (for इमे). — 10[cd]= 3. 96. 15[cd]; cf. ibid. 4[cd], 9[cd]. — [c]) Ś1 K2. 3 D3. 5 यथाशक्त्या°.

11 [a]) K4 D2. 3. 5 [ś]भिमान्य; B1 [ś]नुमान्य; D1 [ś]भिगम्य; T1 G2. 4 M2 [ś]वमत्य; G1 [ś]पगत्य (for [ś]भिवाद्य). — [c]) K3 S (except M1) ईप्सितं (for दित्सितं). T2 G यदिह ब्रूहि (for यदि वेत्सि त्वं). K1 नो वेत्सि; K3 B1 Dc D1. 2 T1 M मे वेत्सि; K4 D5 ते वेद्मि (for वेत्सि त्वं). Ś1 K2 दित्सां मुने ममावेत्सि. — [d]) T1 तत्ते; T2 G तद्धि (for ततो). M दातास्मि (for दास्यामि). T1 [अ]हं (for ते).

12 [a]) K4 D2. 3 S शत- (for दश). — [b]) Ś1 G1 M1 वसु; M2 नृप (for ऽसुर). — 12[cd]=13[cd]. — K3 om. (hapl.) 12[c]–13[d]; K3 G1 om. (hapl.) 12[cd].

13 K3 om. 13[abcd] (cf. v.l. 12). — [b]) S (except T1) रथं and °मयं. D5 चाथ (for चैव). — 13[cd]=12[cd]. — Dn1 om. (hapl.) 13[cdef]; B1 D5 om. 13[cd]. — [c]) S (except G4 M1) महा° (for मनो°). T2 G2. 3 द्वौ (for च). — After 13[cd], S ins.:

491* लोमशः ।
इल्वलस्तु मुनिं प्राह सर्वमस्ति यथात्थ माम् ।
रथं तु यमवोचो मां नैनं विद्म हिरण्मयम् ।
अगस्त्यः ।
न मे वागनृता काचिदुक्तपूर्वा महासुर ।

[(L. 1) T1 G2. 4 M2 यदात्थ. — After line 1, G2 ins.:

492* सर्वमेतत्प्रदास्यामि हिरण्यं गाश्च यद्धनम् ।

— (L. 2) G1 रथस्तु स ह याचामो (for the prior half). T2 G3. 4 नैव (for नैनं). G2 असत्यं व्याहृतं ब्रह्मन्नथो नैष हिरण्मयः.]

— B1 D5 om. 13[ef]. — [e]) D3 विज्ञास्यतां; S विज्ञायतां (cf. v.l. 14). S साधु (G4 M2 °धुर्) (for सद्यो). — [f]) B2. 3 D (except D2; Dn1 D5 om.) व्यक्त (for व्यक्तम्). S एव (M1 अस्ति) (for एष).

14 K2 B2 Dn D4–6 om. 14[ab] (with the ref.). Ś1 K B Dc D1–3 om. the ref. — [a]) S विज्ञाय° (for जिज्ञास्य°); cf. v.l. 13. — [cd]) B2–4 S स (for प्र-).

15 [a]) B D4 विराज(B1. 4 D4 °जा)श्च सुराज(B1. 4 D4 °जा)श्च; Dc D5 वि(D5 न)वाजाश्च सुवाजाश्च; Dn D1. 6 विरावश्च सुरावश्च; D3 विचित्रौ च सुवर्णेन; T1 M विवाजिश्च सुवाजिश्च; T2 G1. 3. 4 व(G1 वि)वाजी च सुवाजी च; G2 ववाजिश्च सुवाजिश्च. — [c]) Ś1 K1. 2. 4 D3. 4 सुबहून्या(K4 D3. 4 °ना)शु; K3 चैव तानर्थान्; B Dc Dn3 D1 M2 सवसूना(B1 M2 °न्या)शु; Dn1. n3 D5. 6 स्म वसूनाशु; D2 स्म बहूनाशु; T1 च वसून्याशु (for तौ वसून्याशु). — [d]) Ś1 K1. 2 B3 Dc D1–3. 5. 6 तान°; B1. 2. 4 Dn D4 M2 ताव°; T1 तदा° (for तान्य°). — [e]) K3 सहामात्यान्; D1 सहागस्त्यो. — [f]) Ś1 K Dc D1–3 इति (K4 एव) (for इव). — After 15, T2 G2–4 ins.:

493* इल्वलस्त्वनुगम्यैनमगस्त्यं हन्तुमैच्छत ।
भस्म चक्रे महातेजा हुंकारेण महासुरम् ।;

while M ins.:

494* मुनेराश्रममश्वौ तौ निन्यतुर्वातरंहसौ ।

17 K1 transp. 17[ab] and 17[cd]. — [cd]) K3 तत्पादय (for उत्पा°)! D3 [अ]सकृन् (for सकृन्). Ś1 K1. 3 °त्तमं;

अगस्त्य उवाच ।

तुष्टोऽहमस्मि कल्याणि तव वृत्तेन शोभने ।
विचारणामपत्ये तु तव वक्ष्यामि तां शृणु ॥ १८
सहस्रं तेऽस्तु पुत्राणां शतं वा दशसंमितम् ।
दश वा शततुल्याः स्युरेको वापि सहस्रवत् ॥ १९

लोपामुद्रोवाच ।

सहस्रसंमितः पुत्र एको मेऽस्तु तपोधन ।
एको हि बहुभिः श्रेयान्विद्वान्साधुरसाधुभिः ॥ २०

लोमश उवाच ।

स तथेति प्रतिज्ञाय तया समभवन्मुनिः ।
समये समशीलिन्या श्रद्धावाञ्श्रद्दधानया ॥ २१
तत आधाय गर्भं तमगमद्वनमेव सः ।
तस्मिन्वनगते गर्भो ववृधे सप्त शारदान् ॥ २२
सप्तमेऽब्दे गते चापि प्राच्यवत्स महाकविः ।
ज्वलन्निव प्रभावेन दृढस्युर्नाम भारत ।
साङ्गोपनिषदान्वेदाञ्जपन्नेव महायशाः ॥ २३
तस्य पुत्रोऽभवद्दृषेः स तेजस्वी महानृषिः ।
स बाल एव तेजस्वी पितुस्तस्य निवेशने ।
इध्मानां भारमाजह्रे इध्मवाहस्ततोऽभवत् ॥ २४
तथायुक्तं च तं दृष्ट्वा मुमुदे स मुनिस्तदा ।
लेभिरे पितरश्चास्य लोकान्राजन्यथेप्सितान् ॥ २५
अगस्त्यस्याश्रमः ख्यातः सर्वर्तुकुसुमान्वितः ।
प्राह्लादिरेवं वातापिरगस्त्येन विनाशितः ॥ २६
तस्यायमाश्रमो राजन्रमणीयो गुणैर्युतः ।
एषा भागीरथी पुण्या यथेष्टमवगाह्यताम् ॥ २७

C. 3. 8646
B. 3. 99. 31
K. 3. 97. 37

इति श्रीमहाभारते आरण्यकपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥

K₂ °त्तमः (for °त्तरम्). M₁ तस्मात्सकृन्मय्यपत्यं त्वमुत्पादय वीर्यवत्.

18 [c]) D₁. ₂ अपत्येत्र; D₃. ₅ T₁ °त्येषु (for °त्ये तु). — [d]) Ś₁ K Dc D₁–₃. ₅ तव (K₁. ₂. ₄ Dc₂ D₅ शृणु) वक्ष्यामि यामहं (K₃ D₁–₃ तत्त्वतः; D₅ यत्त्वहं); S वक्ष्यामि श्रूयतां (T₁ शृणु तन्; M शृणुतां) मम.

19 [b]) S तत्समं तव (G₁ समं तपः *sic*). — [c]) K₃. ₄ D₃ तु; D₁. ₂ च; D₅ ते; M₁ वै (for स्युर्). — [d]) Ś₁ K₁–₃ वाथ; Dc D₁–₃. ₅ M₁ वास्तु (for वापि). Ś₁ K₂. ₄ B₁ D₁. ₂ °वान्; K₁ B₂–₄ Dc Dn D₄. ₆ °जित्; K₃ D₃. ₅ °भाक् (for °वत्).

20 [b]) B D (except D₁–₃. ₅) M₂ [s]प्यस्तु; G₂ वास्तु (for मेऽस्तु). — [c]) K D₂. ₃ G₂ M₁ [s]पि (for हि).

21 K₂ B₄ Dn D₄. ₆ T₂ G₃. ₄ M₂ om. the ref. — [b]) B₃ S समगमन्. — After 21[ab], Ś₁ K₁. ₂ ins. 495* (with v.l.).

23 [a]) D₄. ₆ T₂ G वापि (for चापि). — [b]) Ś₁ K₁. ₂ प्रादुर्भूत्; T₂ G₃ प्रज्ञावान् (for प्राच्यवत्). — [c]) Some MSS. प्रभावेण. — [d]) T G दृढच्युर् (for °स्युर्). — [e]) K₄ B₃ D₃ °निषदो (for °निषदान्). — [f]) K₁. ₃ B₂ D (except D₁–₃. ₅) जपन्निव. B D (except Dc₂ D₁. ₂) M₁ महातपाः; T G °मनाः; M₂ °त्मनाः.

24 [a]) D₁ राजन् (for ऋषेः). K₁. ₂ ऋषेस्तस्याभवत्पुत्रः (normal rhythm!). — [b]) B₁. ₂. ₄ Dn D₄. ₆ महाद्विजः. D₁ तेजस्वी भगवानृषिः.

25 [a]) B₁. ₂. ₄ Dn D₄. ₆ T G तु (for च). — B D (except D₁–₃. ₅) S ins. after 25[ab]: Ś₁ K₁. ₂, after 21[ab]:

495* एवं स जनयामास भारतापत्यमुत्तमम् ।

[Cf. 482*. Ś₁ K₁. ₂ स चाथ; G₁ M₂ एवं सं- (for एवं स).]

26 [a]) B₃ S चायं (for ख्यातः). B₁. ₂. ₄ Dn D₄. ₆ तत ऊर्ध्वमयं ख्यातः. — [b]) B₁. ₂. ₄ Dn D₄. ₆ त्वगस्त्यस्याश्रमो भुवि; B₃ S अत ऊर्ध्वं विशां पते; Dc तत ऊर्ध्वमयं भुवि. — After 26[ab], S ins.:

496* ख्यातो भुवि महाराज तेजसा तस्य धीमतः ।

— [c]) Ś₁ K₃ T₂ G₁. ₃ M प्राह्लादिः; K₃ प्रह्लादिः; T₁ G₂ प्रह्लादिः. M चापि (for एवं). — After 26[c], S ins.:

497* ब्रह्मघ्नो दुष्टचेतनः ।
एवं विनाशितो राजन् .

— [d]) B D (except D₁–₃. ₅) [उ]पशमितः; S महात्मना (for विना°).

27 [b]) K₄ D₁. ₃. ₅. ₆ S (except M₁) रमणीय-; B₂. ₄ Dn D₄ रमणीयैः. K₁. ₂ G₄ गुणान्वितः; B₂. ₃ D₄. ₆ T₁ गुणैर्वृतः; G₁ गुणोच्युतः. — [c]) Dc गंगा (for पुण्या). — [d]) K₁. ₂ रमणीयैर्गुणान्विता (K₂ °र्गुणैर्वृता); B Dn D₄. ₆ देवगंधर्वसेविता. — After 27, K₁. ₂ B D (except D₁–₃. ₅)

९८

C. 3. 8689
B. 3. 100. 1
K. 3. 99. 1

युधिष्ठिर उवाच ।

भूय एवाहमिच्छामि महर्षेस्तस्य धीमतः ।
कर्मणां विस्तरं श्रोतुमगस्त्यस्य द्विजोत्तम ॥ १

लोमश उवाच ।

शृणु राजन्कथां दिव्यामद्भुतामतिमानुषीम् ।
अगस्त्यस्य महाराज प्रभावममितात्मनः ॥ २
आसन्कृतयुगे घोरा दानवा युद्धदुर्मदाः ।
कालेया इति विख्याता गणाः परमदारुणाः ॥ ३
ते तु वृत्रं समाश्रित्य नानाप्रहरणोद्यताः ।
समन्तात्पर्यधावन्त महेन्द्रप्रमुखान्सुरान् ॥ ४
ततो वृत्रवधे यत्नमकुर्वन्त्रिदशाः पुरा ।
पुरंदरं पुरस्कृत्य ब्रह्माणमुपतस्थिरे ॥ ५
कृताञ्जलींस्तु तान्सर्वान्परमेष्ठी उवाच ह ।
विदितं मे सुराः सर्वं यद्वः कार्यं चिकीर्षितम् ॥ ६
तमुपायं प्रवक्ष्यामि यथा वृत्रं वधिष्यथ ।
दधीच इति विख्यातो महानृषिरुदारधीः ॥ ७
तं गत्वा सहिताः सर्वे वरं वै संप्रयाचत ।
स वो दास्यति धर्मात्मा सुप्रीतेनान्तरात्मना ॥ ८
स वाच्यः सहितैः सर्वैर्भवद्भिर्जयकाङ्क्षिभिः ।
स्वान्यस्थीनि प्रयच्छेति त्रैलोक्यस्य हिताय वै ।
स शरीरं समुत्सृज्य स्वान्यस्थीनि प्रदास्यति ॥ ९
तस्यास्थिभिर्महाघोरं वज्रं संभ्रियतां दृढम् ।
महच्छत्रुहणं तीक्ष्णं षडश्रं भीमनिस्वनम् ॥ १०
तेन वज्रेण वै वृत्रं वधिष्यति शतक्रतुः ।
एतद्वः सर्वमाख्यातं तस्माच्छीघ्रं विधीयताम् ॥ ११
एवमुक्तास्ततो देवा अनुज्ञाप्य पितामहम् ।

---

ins. a passage given in App. I (No. 14).

Colophon. — *Major parvan:* Śi K1. 2 Dn2 T G2–4 M1 आरण्य. — *Sub-parvan:* B3 T1 G1 तीर्थयात्रा (T1 cont. अगस्त्य). Omitting sub-parvan name, K1–3 D3 mention only आगस्त्य (*or* अगस्त्य); K4 B2 Dc Dn D1. 2. 4–6 लोमशतीर्थयात्रा (K4 Dc D5 cont. आगस्त्य). — *Adhy. name:* Śi K1. 2 वातापिवधः; B4 रामोपाख्यानं; Dn2 आगस्तिवातापिभक्षणं; T G1. 3 दृध्मवाहोत्पत्तिः. — *Adhy. no.* (figures, words or both): Dn1 (*sup. lin.*). n2 99; Dn3 M2 100; D1 103; T G M1 98. — *Śloka no.:* Dn1. n3 71; Dn2 33; D1 70.

98

2 d) B3 Dn D4. 6 G4 अमितौजसः; D5 अतिमानुष° (for अमितात्मनः).

3 a) Śi K D1–3. 5 राजन्; Dc तात (for घोरा). — c) Śi K1. 2 कालेय इति विख्यातो; B D (except D1–3. 5) G4 कालकेया इति ख्याताः. — d) Śi K1. 2 गणः °दारुणः.

4 a) D1. 2 तत्र (for ते तु). Śi K B1 °साद्य (for °श्रित्य).

6 a) K4 D1. 2 °लीन्सुरान्; T2 G3 °लिपुटान् (for °लींस्तु तान्). G1 दिव्यान् (for सर्वान्). — b) Dc परमेष्ठिम्; G1. 2 M परमेष्टिर्; G4 प्रजापतिर् (for परमेष्ठी). K D2. 3. 5 [अ]भ्युवाच; B Dn D4. 6 [इ]त्युवाच; T1 जगाद; T2 G3 ह्युवाच (for उवाच). — c) B1. 3 D1. 3. 5 G2 सर्वे (for सर्वं).

7 ab) Śi K1. 2 तत्रो° (for तमु°), and येन (for यथा).

8 b) Śi K1. 2 यूयं प्र°; K3 च सम°; D1. 2 विप्रं प्र° (for वै संप्र°). — c) D1. 2 वै (for वो).

9 c) Śi K1. 2 दधीचास्थीन् (for स्वान्य°). — e) T1 स्वशरीरात्; T2 G1. 3. 4 M2 शरीरास्त (for स शरीरं). D3. 5 G2 M2 परित्यज्य (for समु°).

10 b) Śi K3 संभ्रियते; K1 B1. 2. 4 Dn1. n3 D1. 4–6 संस्क्रियतां; K4 संश्रयता; D3 संपाद्यतां. — c) Śi K1. 2 °हनं (for °हणं). B Dc Dn D4. 6 M घोरं; D1. 2 तीव्रं; T G भीमं (for तीक्ष्णं). — d) K2. 4 D3. 5 षडस्रं; K3 M2 षडश्रि; B Dc Dn D4 षडस्रि; D1. 2 G4 षडस्रं; D6 षडस्रि; G1 षडश्रु. D1. 2 तीव्र- (for भीम-). Śi K1. 2 -विक्रमं (for -निस्वनम्).

11 K3 om. 11. — b) Dc D3 हनिं (for वधिं).

12 c) Śi K Dc D1–3 शतक्रतुं (for नारां).

13 b) K4 D3. 5 °वृते; B2 °चितं; T2 G M1 °युतं (G1

नारायणं पुरस्कृत्य दधीचस्याश्रमं ययुः ॥ १२
सरस्वत्याः परे पारे नानाद्रुमलतावृतम् ।
षट्पदोद्गीतनिनदैर्विघुष्टं सामगैरिव ।
पुंस्कोकिलरवोन्मिश्रं जीवं जीवकनादितम् ॥ १३
महिषैश्च वराहैश्च सृमरैश्चमरैरपि ।
तत्र तत्रानुचरितं शार्दूलभयवर्जितैः ॥ १४
करेणुभिर्वारणैश्च प्रभिन्नकरटामुखैः ।
सरोवगाढैः क्रीडद्भिः समन्तादनुनादितम् ॥ १५
सिंहव्याघ्रैर्महानादान्नदद्भिरनुनादितम् ।
अपरैश्चापि संलीनैर्गुहाकन्दरवासिभिः ॥ १६
तेषु तेष्ववकाशेषु शोभितं सुमनोरमम् ।
त्रिविष्टपसमप्रख्यं दधीचाश्रममागमन् ॥ १७
तत्रापश्यन्दधीचं ते दिवाकरसमद्युतिम् ।
जाज्वल्यमानं वपुषा यथा लक्ष्म्या पितामहम् ॥ १८
तस्य पादौ सुरा राजन्नभिवाद्य प्रणम्य च ।
अयाचन्त वरं सर्वे यथोक्तं परमेष्ठिना ॥ १९

ततो दधीचः परमप्रतीतः
सुरोत्तमांस्तानिदमभ्युवाच ।
करोमि यद्वो हितमद्य देवाः
स्वं चापि देहं त्वहमुत्सृजामि ॥ २०
स एवमुक्त्वा द्विपदां वरिष्ठः
प्राणान्वशी स्वान्सहसोत्ससर्ज ।
ततः सुरास्ते जगृहुः परासो-
रस्थीनि तस्याथ यथोपदेशम् ॥ २१
प्रहृष्टरूपाश्च जयाय देवा-
स्त्वष्टारमागम्य तमर्थमूचुः ।
त्वष्टा तु तेषां वचनं निशम्य
प्रहृष्टरूपः प्रयतः प्रयत्नात् ॥ २२
चकार वज्रं भृशमुग्ररूपं
कृत्वा च शक्रं स उवाच हृष्टः ।
अनेन वज्रप्रवरेण देव
भस्मीकुरुष्वाद्य सुरारिमुग्रम् ॥ २३

C. 3. 8712
B. 3. 100. 24
K. 3. 99. 24

°युते) (for °वृतम्). — G4 om. 13c–17b. — c) M °निनदं. — d) T G (G4 om.) M2 सं- (for वि-). M सारसैरपि (for सामगै°). — f) Ś1 K1. 2 D2. 5 जीव- (for जीवं).

14 G4 om. 14 (cf. v.l. 13). — b) D5 शूकरैश्च; T2 G2. 3 भ्रमरैश्च; G1 कोकिलैर् (for सृमरैश्च). Ś1 K3 चामरैर्; G1 भ्रमरैर् (for चमरैर्). M2 सृमरैश्च सशंबरैः. — c) Ś1 K D2. 5 °चरितैः. — d) S (except M1; G4 om.) मृगेंद्र°.

16 T1 G1. 4 om. 16 (for G4 cf. v.l. 13); K2 B1. 3 D1. 2 G2 om. 16cb. Dc1 D4 transp. 15 and 16; T2 G3 transp. 16ab and 16cd. — a) Dn1. n2 D4. 6 सिंहैर् (for सिंह-). T2 G3 °व्याघ्र- (for °व्याघ्रैर्). K1 D3 °नादैर्; D5 M1 °नादं; T2 G3 °नागैर् (for °नादान्). — b) T2 G3 महद्भिर् (for नदद्भिर्). — c) Ś1 चमरैं°; K1. 2 D5 चामरैं°; Dc पामरैं° (for अपरैं°). Ś1 K1. 2 चानु- (for चापि). — d) K4 B D (except D2. 5) °शायिभिः (Dc2 °गामिभिः).

17 G4 om. 17ab (cf. v.l. 13). — b) Ś1 K2. 3 नादितं. K4 D2. 5 T2 G (G4 om.) M सुमनोहरं. — c) B2. 3 त्रिपिष्टप°; T2 G °सदः प्रख्यं. — d) S (except M1) आगताः (for आगमन्).

18 d) S साक्षात् (for लक्ष्म्या).

20 c) T2 G2. 3 तद्वो (for यद्वो). — d) K4 B2. 4 Dn D1. 4. 6 स्वयम्; B3 इह (for स्वहम्).

21 b) K4 D1. 2 स्वयमु° (for सहसो°). — cd) Ś1 K Dc D1–3. 5 सुरास्ततोस्थीनि गतायुषस्ते यथोपजोषं जगृहुः स्म तस्य.

23 b) Ś1 K Dc D2. 3. 5 °वीर्यं (for °रूपं). — b) Ś1 K2 अब्रवीत्प्रहृष्टः (metrically bad!); T2 G2–4 समुवाच हृष्टः. — c) Ś1 K1–3 D1. 2 शस्त्रं° (for वज्र°). K शक्र; D2. 5 वीर (for देव).

24 G4 om. 24ab. — a) D1. 2 सुखं त्वं; D5 सुखी त्वं (for सुखं वै). K2 तं (for वै). — b) Ś1 K1. 2 वरिष्ठ; K4 Dc Dn2 D1. 2. 5 S (except G1; G4 om.) दिविस्थः. — Ś1 om. 24cd. — c) K4 B1. 2. 4 Dn D1. 2. 4. 6 तु (for स). B D (except D1–3. 5) तद् (for तु). — d) K2 [S]भिगृं; B Dc Dn ह्यगृं; D5 [S]न्वगृं; T2 G2–4 त्वगृं (for ऽभ्यगृं). G1 प्रहृष्टरूपः प्रथितो ह्यगृह्णात्.

Colophon. — *Major parvan:* Ś1 K1. 2 Dn2 T G2–4 M1 आरण्य. — *Sub-parvan:* T1 तीर्थयात्रा. Omitting sub-parvan name, K1. 2. 4 Dc Dn2 D1. 2 mention only

C. 3. 87.13
B. 3. 100. 25
K. 3. 94. 25

ततो हतारिः सगणः सुखं वै
प्रशासि कृत्स्नं त्रिदिवं दिविष्ठः ।
त्वष्ट्रा तथोक्तः स पुरंदरस्तु
वज्रं प्रहृष्टः प्रयतोऽभ्यगृह्णात् ॥ २४

इति श्रीमहाभारते आरण्यकपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

लोमश उवाच ।
ततः स वज्री बलिभिर्दैवतैरभिरक्षितः ।
आससाद ततो वृत्रं स्थितमावृत्य रोदसी ॥ १
कालकेयैर्महाकायैः समन्तादभिरक्षितम् ।
समुद्यतप्रहरणैः सभृङ्गैरिव पर्वतैः ॥ २
ततो युद्धं समभवद्देवानां सह दानवैः ।
मुहूर्तं भरतश्रेष्ठ लोकत्रासकरं महत् ॥ ३
उद्यतप्रतिपिष्टानां खड्गानां वीरबाहुभिः ।
आसीत्सुतुमुलः शब्दः शरीरेष्वभिपात्यताम् ॥ ४
शिरोभिः प्रपतद्भिश्च अन्तरिक्षान्महीतलम् ।
तालैरिव महीपाल वृन्ताद्भ्रष्टैरदृश्यत ॥ ५
ते हेमकवचा भूत्वा कालेयाः परिघायुधाः ।
त्रिदशानभ्यवर्तन्त दावदग्धा इवाद्रयः ॥ ६
तेषां वेगवतां वेगं सहितानां प्रधावताम् ।
न शेकुस्त्रिदशाः सोढुं ते भग्नाः प्राद्रवन्भयात् ॥ ७
तान्दृष्ट्वा द्रवतो भीतान्सहस्राक्षः पुरंदरः ।
वृत्रे विवर्धमाने च कश्मलं महदाविशत् ॥ ८
तं शक्रं कश्मलाविष्टं दृष्ट्वा विष्णुः सनातनः ।
स्वतेजो व्यदधाच्छक्रे बलमस्य विवर्धयन् ॥ ९
विष्णुनाप्यायितं शक्रं दृष्ट्वा देवगणास्ततः ।
स्वं स्वं तेजः समादध्युस्तथा ब्रह्मर्षयोऽमलाः ॥ १०
स समाप्यायितः शक्रो विष्णुना दैवतैः सह ।

लोमशतीर्थयात्रा (K$_3$. $_4$ Dc D$_3$ cont. आगस्त्य): likewise B$_3$ D$_2$. $_5$ only आगस्त्य. — *Adhy. name:* K$_1$ वृत्रवधः; B$_4$ वृत्रवधोपाख्यानं; T$_2$ G$_3$ दधीचाख्यानं; G$_1$ वज्रोत्पत्तिकथनं. — *Adhy. no.* (figures, words or both): Dn$_1$ 100; Dn$_3$. $_{ns}$ M$_2$ 101; D$_1$ 104; T G M$_1$ 99. — *Śloka no.:* Dn$_1$. $_{ns}$ D$_1$ 25.

99

1 ^{a}) G$_3$. $_4$ नु (for स). Śi K G$_1$ M सवज्रो (for स वज्री). B D$_5$. $_6$ G$_2$ M$_3$ बलभिद् (for बलिभिर्). — ^{b}) Some MSS. देवतैर्. Dn$_2$ D$_3$ परि- (for अभि-). D$_{1.2}$ देवैः समभिरक्षितः. — ^{c}) Śi K$_{1.2}$ Dc तदा (for ततो).

3 ^{b}) B$_1$ अपि दानवैः; B$_{2.4}$ Dn D$_{1.2.4.6}$ M दानवैः सह (by transp.).

4 ^{a}) T$_1$ M$_3$ °सृष्टानां; T$_3$ G$_{2-4}$ °विद्धानां. — ^{c}) T$_3$ G$_{2.3}$ तु (for सु-). — ^{d}) K$_4$ T$_3$ (after corr.) G$_3$ °पातितः; T$_3$ (before corr.) G$_{3.4}$ °पातिनां.

5 ^{ab}) N (except K$_{3.4}$) M ins. अपि between the pādas (to avoid hiatus!). B$_3$ °तले (for °तलम्). — ^{c}) B Dn D$_{4-6}$ महाराज (for महीं°).

6 ^{c}) Śi K$_1$. $_3$ °वर्तेरन्; D$_5$ °वर्षंत; T G °धावंत. — ^{d}) Śi K B$_3$ Dc D$_{2.5}$ इव द्रुमाः (for इवाद्रयः).

7 ^{b}) K$_1$ महतां च; K$_3$ सहतां च; B D (except D$_{1-3}$) साभिमानं (for सहिं°). — ^{c}) Śi D$_1$ T$_1$ G$_4$ सहिताः; K$_{1.3}$ संहताः (for त्रिदशाः).

8 ^{c}) B$_1$ [ऽ]पि; Dc$_2$ [ऽ]ति-; M [ऽ]भि- (for वि-). Śi K D$_{3.5}$ तु; D$_{1.2}$ [ऽ]पि (for च). — After 8, B D (except D$_{1-3.5}$) ins.:

498* कालेयभयसंत्रस्तो देवः साक्षात्पुरंदरः ।
जगाम शरणं शीघ्रं तं तु नारायणं प्रभुम् ।

9 ^{c}) B Dn D$_{2.4.6}$ व्यदधत्. — ^{d}) Śi K$_{1.3}$ D$_3$ व्यवर्धयत् (K$_1$ °न्); D$_6$ [अ]भिवर्धयन्.

10 ^{ab}) Śi K$_3$ धिष्ठितं; K$_1$ दिष्टितं; B D (except D$_{1-3.5}$) गोपितं (for [आ]प्यायितं). S transp. शक्रं and दृष्ट्वा. Śi K Dn D$_{1.2}$ G$_1$ तदा; Dc तथा (for ततः). — ^{c}) B$_{1.2.4}$ D (except D$_{1-3.5}$) सर्वे (for स्वं स्वं). Śi K$_{1.3}$ T$_3$ G$_{1-3}$ समादधुस्; K$_{3.4}$ Dc$_1$ D$_1$ M सम(K$_4$ °मा)दधुस्;

ऋषिभिश्च महाभागैर्बलवान्समपद्यत ॥ ११
ज्ञात्वा बलस्थं त्रिदशाधिपं तु
ननाद वृत्रो महतो निनादान् ।
तस्य प्रणादेन धरा दिशश्च
खं द्यौर्नगाश्चापि चचाल सर्वम् ॥ १२
ततो महेन्द्रः परमाभितप्तः
श्रुत्वा रवं घोररूपं महान्तम् ।
भये निमग्नस्त्वरितं मुमोच
वज्रं महत्तस्य वधाय राजन् ॥ १३
स शक्रवज्राभिहतः पपात
महासुरः काञ्चनमाल्यधारी ।
यथा महाञ्शैलवरः पुरस्ता-
त्स मन्दरो विष्णुकरात्प्रमुक्तः ॥ १४
तस्मिन्हते दैत्यवरे भयार्तः
शक्रः प्रदुद्राव सरः प्रवेष्टुम् ।
वज्रं न मेने स्वकरात्प्रमुक्तं
वृत्रं हतं चापि भयान्न मेने ॥ १५
सर्वे च देवा मुदिताः प्रहृष्टा
महर्षयश्चेन्द्रमभिष्टुवन्तः ।
सर्वांश्च दैत्यांस्त्वरिताः समेत्य
जघ्नुः सुरा वृत्रवधाभितप्तान् ॥ १६
ते वध्यमानास्त्रिदशैस्तदानीं
समुद्रमेवाविविशुर्भयार्ताः ।
प्रविश्य चैवोदधिमप्रमेयं
झषाकुलं रत्नसमाकुलं च ॥ १७
तदा स्म मन्त्रं सहिताः प्रचक्रु-
स्त्रैलोक्यनाशार्थमभिस्मयन्तः ।
तत्र स्म केचिन्मतिनिश्चयज्ञा-
स्तांस्तानुपायाननुवर्णयन्ति ॥ १८
तेषां तु तत्र क्रमकालयोगा-
द्घोरा मतिश्चिन्तयतां बभूव ।
ये सन्ति विद्यातपसोपपन्ना-
स्तेषां विनाशः प्रथमं तु कार्यः ॥ १९
लोका हि सर्वे तपसा ध्रियन्ते

C. 3. 8734
B. 3. 101. 21
K. 3. 100. 21

B₃ स्वमादाय.

12 [a]) Ś₁ K D₁–₃. ₅ तं (for तु). — [b]) M विविधान् (for महतो). Ś₁ K₁. ₂ [s]थ (for नि-). — [d]) K₃. ₄ [अ]भि- (for [अ]पि).

13 [b]) Ś₁ K₁. ₃. ₄ D₂ घोरमुग्रं; B₂ °शब्दं; D₅ °तरं (for °रूपं). S (except M₁) घोरमुदग्रकल्पं (for घोररूपं महा°). .Dc₂ श्रुत्वा च वाचमथ घोररूपं. — [c]) Ś₁ K₁. ₂ योद्धुं (for भये). Ś₁ B₂–₄ D (except D₂. ₅) त्वरितो (for °तं).

14 [b]) T₂ G₃ °माल° (for °माल्य°). — [c]) N महा- (for महाञ्). — [d]) N (except K₁. ₂. ₄) वि° (for प्र°).

15 [c]) Ś₁ K Dn D₁. ₂ च; B D₄. ₆ स; Dc स्म; D₃. ₅ तु (for न). K₁. ₂ शक्रस्य (for मेने स्व-). Ś₁ च; K₃. ₄ D₁–₃. ₅ T₁ स; B Dc Dn D₄. ₆ न (for स्व-). K₁. ₂ B₂–₄ Dn D₁–₃. ₅. ₆ वि- (for प्र-). — [d]) B Dc Dn D₄. ₆ M₁ transp. हतं and भयात्. Ś₁ K D₁–₃. ₅ वृत्रं भयाच्चैव हतम- (K₄ D₁–₃. ₅ हतं स्व)पश्यत्; M₂ वृत्रं भयाच्च निहतं न मेने.

16 [a]) Ś₁ K₁. ₂ सहिताः (for मुदि°). — [b]) D₂ T₁ G₁. ₂. ₄ अथ (for अभि-). — After 16[ab], Ś₁ K₁. ₂ read 18[cd]; while S ins.:

499* वृत्रं हतं संददृशुः पृथिव्यां
वज्राहतं शैलमिवावकीर्णम् ।

— [c]) Ś₁ K D₂. ₃ M शेषान् (for सर्वान्). T₂ G₁–₃ M₁ तु (for च).

17 [a]) B D (except D₁–₃) तैस् (B₁. ₃ ते) त्रास्य° (for ते वध्य°). B Dn D₄–₆ समेतैः (for तदानीं). — [d]) K₃ B D (except D₂. ₃) G₄ नक्र°; K₄ वृत्र° (for रत्न°).

18 [b]) T₁ °प्रयाताः; T₂ G °प्रयत्नात् (G₁ °प्रयुक्ताः); M₁ °प्रवृत्ताः; M₂ °प्रयत्नाः (for °स्मयन्तः). — Ś₁ K₁. ₂ read 18[cd] after 16[ab]. — [c]) Ś₁ K₁. ₂ ततः (for तत्र). — [d]) Ś₁ K₂ नृप; K₁. ₃. ₄ B D (except D₃) उप-; T₁ अभि- (for अनु-). Ś₁ K B₁ D₁. ₂ -वर्णयंतः (for -वर्णयन्ति).

19 D₂ om. (hapl.) 19[abc]. — [a]) Ś₁ K₁–₃ D₃. ₅ क्षय- (for क्रम-). K₃ S (except T₁ G₁) -योगकालाद् (for -कालयोगाद्).

20 T₂ G₂–₄ read 20[ab] after 20[ef]. — [b]) B₃. ₅ चरध्वं; D₃ यत° (for स्वर°). — [c]) K₃ B Dn D₄. ₆ च; T₁ तु (for हि). — [f]) A few MSS. प्रणष्टेषु, and प्रणष्टं.

C. 3. 8734
B 3. 101. 21
K. 3. 100. 21

तस्माच्चरध्वं तपसः क्षयाय ।
ये सन्ति केचिद्धि वसुंधरायां
तपस्विनो धर्मविदश्च तज्ज्ञाः ।
तेषां वधः क्रियतां क्षिप्रमेव
तेषु प्रनष्टेषु जगत्प्रनष्टम् ॥ २०

एवं हि सर्वे गतबुद्धिभावा
जगद्विनाशे परमप्रहृष्टाः ।
दुर्गं समाश्रित्य महोर्मिमन्तं
रत्नाकरं वरुणस्यालयं स्म ॥ २१

इति श्रीमहाभारते आरण्यकपर्वणि नवनवतितमोऽध्यायः ॥ ९९ ॥

१००

लोमश उवाच ।
समुद्रं ते समाश्रित्य वारुणं निधिमम्भसाम् ।
कालेयाः संप्रवर्तन्त त्रैलोक्यस्य विनाशने ॥ १
ते रात्रौ समभिक्रुद्धा भक्षयन्ति सदा मुनीन् ।
आश्रमेषु च ये सन्ति पुण्येष्वायतनेषु च ॥ २
वसिष्ठस्याश्रमे विप्रा भक्षितास्तैर्दुरात्मभिः ।
अशीतिशतमष्टौ च नव चान्ये तपस्विनः ॥ ३
च्यवनस्याश्रमं गत्वा पुण्यं द्विजनिषेवितम् ।
फलमूलाशनानां हि मुनीनां भक्षितं शतम् ॥ ४
एवं रात्रौ स्म कुर्वन्ति विविशुश्चार्णवं दिवा ।
भरद्वाजाश्रमे चैव नियता ब्रह्मचारिणः ।
वाय्वाहाराम्बुभक्षाश्च विंशतिः संनिपातिताः ॥ ५
एवं क्रमेण सर्वांस्तानाश्रमान्दानवास्तदा ।
निशायां परिधावन्ति मत्ता भुजबलाश्रयात् ।
कालोपसृष्टाः कालेया घ्नन्तो द्विजगणान्बहून् ॥ ६
न चैनानन्वबुध्यन्त मनुजा मनुजोत्तम ।

Dc D2 S (except M1) हि (for the second प्र-).

21 a) Ś1 K1 दत्वा (for सर्वे). — b) D3 परमं (for परम-). — d) Ś1 K1. 2. 4 °लयं च; Dc °लयस्य (for °लयं स्म).

Colophon. — *Major parvan:* Ś1 K1. 2 Dn2 D3. 6 T G2–4 M1 आरण्य. — *Sub-parvan:* T1 तीर्थयात्रा, followed by अगस्त्यचरित. Omitting sub-parvan name K3. 4 Dn2 D3 mention only लोमशतीर्थयात्रा, followed by आगस्त्य; B Dc Dn1 D4–6 only आगस्त्य (*or* अगस्त्य); D1. 2 only लोमशतीर्थयात्रा. — *Adhy. name:* Ś1 G1 वृत्रवधः. — *Adhy. no.* (figures, words or both): Dn2. n3 M3 102; D1 105; T G M1 100. — *Śloka no.:* Dn 23; D1 21.

100

1 a) K3 समुद्रांतः; T G °द्रांतं; M3 °द्रांते Ś1 K (except K3) Dc D1–3 G4 °साद्य (for °श्रित्य). — b) Ś1 K1. 2. 4 B1. 2 Dn1. n3 D3 G1 वरुणं; D3 वरुणिं. K3 B Dn1. n3 D6 G4 निधिमंभसः. T2 G3 वरुणालयमंभसां. — c) Ś1 K1. 2 Dc समवर्तंत; K3. 4 D1–3. 5 समपद्यंत; D4. 6 T G1–3 संप्रवर्तंते. M संप्रावर्तत कालेयाः.

2 a) B3 समतिक्रुद्धा; T G2. 3 सहिताः क्रुद्धा. — b) K1. 2 महामुनीन्; T2 G2–4 सदा ऋषीन्.

3 c) Ś1 K1. 4 अशीतिं; K2 B D (except D2) अशीतिः. — d) M नियता ब्रह्मचारिणः (= 5d).

4 a) Dn आश्रमे (for आश्रमं)!

5 a) Ś1 K2 प्रवर्तंते; K1 प्रवर्तंतौ; Dc2 विकुर्वंति; T2 G2–4 प्रकुर्वंति (for स्म कु°). — After 5ab, S ins.:

500* कालेयास्ते दुरात्मानो भक्षयन्तस्तपोधनान् ।

— c) Ś1 Dn3 D4 भार° (for भर°). — f) Ś1 सर्वदेवताः; K1 संति देवताः; K3. 4 Dc Dn2 D3 स्म निषूदिताः; B सं(B1 तु)निसूदि°; D1. 2 विनिपूदि°; G1 संनिवेशि°; G4 सुनिपाति°.

6 D3 om. (hapl.) 6a–7b. — c) Ś1 K D1. 2 पर्यधावंत; B4 Dn D4. 6 परिबाधंते. — d) S समुद्रांबुबलाश्रयात् (T1 °श्रयाः). — B3 om. 6c–8a. — f) Ś1 K D1. 2 मुनि° (for द्विज°).

एवं प्रवृत्तान्दैत्यांस्तांस्तापसेषु तपस्विषु ॥ ७
प्रभाते समदृश्यन्त नियताहारकर्शिताः ।
महीतलस्था मुनयः शरीरैर्गतजीवितैः ॥ ८
क्षीणमांसैर्विरुधिरैर्विमज्जान्त्रैर्विसंधिभिः ।
आकीर्णैराचिता भूमिः शङ्खानामिव राशिभिः ॥ ९
कलशैर्विप्रविद्धैश्च स्रुवैर्भग्नैस्तथैव च ।
विकीर्णैरग्निहोत्रैश्च भूर्बभूव समावृता ॥ १०
निःस्वाध्यायवषट्कारं नष्टयज्ञोत्सवक्रियम् ।
जगदासीन्निरुत्साहं कालेयभयपीडितम् ॥ ११
एवं प्रक्षीयमाणाश्च मानवा मनुजेश्वर ।
आत्मत्राणपरा भीताः प्राद्रवन्त दिशो भयात् ॥ १२
केचिद्गुहाः प्रविविशुर्निर्झरांश्चापरे श्रिताः ।
अपरे मरणोद्विग्ना भयात्प्राणान्समुत्सृजन् ॥ १३
केचिदत्र महेष्वासाः शूराः परमदर्पिताः ।
मार्गमाणाः परं यत्नं दानवानां प्रचक्रिरे ॥ १४
न चैतानधिजग्मुस्ते समुद्रं समुपाश्रितान् ।
श्रमं जग्मुश्च परममाजग्मुः क्षयमेव च ॥ १५
जगत्युपशमं याते नष्टयज्ञोत्सवक्रिये ।
आजग्मुः परमामार्तिं त्रिदशा मनुजेश्वर ॥ १६
समेत्य समहेन्द्राश्च भयान्मन्त्रं प्रचक्रिरे ।
नारायणं पुरस्कृत्य वैकुण्ठमपराजितम् ॥ १७
ततो देवाः समेतास्ते तदोचुर्मधुसूदनम् ।

C. 3. 8755
B. 3. 102. 19
K. 3. 101. 20

---

7 D₃ om. 7^{ab}; B₂ om. 7 (cf. v.l. 6). — ^{a}) K₃. ₄ B₁. ₃ Dc D₁. ₂. ₆ T₁ चैतान्; T₂ G₂–₄ वै तान् (for चैनान्). B₃ अनु-; Dc M₂ अव-; G₁ एव (for अन्व-). — ^{b}) Ś₁ K Dc D₁. ₂. ₅ मनुजाधिप (for °जोत्तम). — ^{c}) D₅ S प्रवृत्ताः (for प्रवृत्तान्). D₃ तांस्तत्र; D₆ ते तत्र; T G ते दैत्याः; M₁ दैत्यास्ते; M₂ दैतेयाः (for दैत्यांस्तान्). — ^{d}) Ś₁ K₁ आश्रमेषु (for तापसेषु). — After 7, S (except G₁) ins.:

501* क्षयाय जगतः क्रूराः पर्यटन्ति स्म मेदिनीम् ।

8 B₂ om. 8^{a} (cf. v.l. 6). — ^{b}) B₁. ₃ D₅. ₆ S नियमाहार-. Ś₁ K₁–₃ -कर्षिताः.

9 ^{a}) Ś₁ K₁. ₂ क्षीणवासैर्; G₁ क्षतमांसैर् (for क्षीणमांसैर्). — ^{b}) K₁. ₂ निर्मज्जं तैर्; K₃ निर्मज्जांतां; Dc विकपाटैर्; D₁. ₂ विसृष्टांत्रैर्; T₁ मज्जामात्रैर्; G₂ निर्मज्जांत्रि-. — ^{c}) Ś₁ K₂. ₄ D₃ विकीर्णैर्; K₁ विकर्णैर्; D₁. ₂ आकीर्णा. Ś₁ K₁. ₂. ₄ B₂–₄ Dc Dn D₂–₆ आवभौ; K₃ B₁ आवृता; D₁. ₂ चास्थिभिर्; G₁ रुचिरा (for आचिता). — ^{d}) K₃ T₂ G₂–₄ राजिभिः (for राशि°).

10 ^{a}) B₁ चापविद्धैश्च; D₅ विप्रभग्नैश्च. — ^{b}) B₁ च भारत (for तथैव च). — ^{c}) Ś₁ K D₁–₃. ₅ विशीर्णैर्; B₂ आकीर्णैर्. — ^{d}) T G₂–₄ बभूव च (for भूर्बभूव). Ś₁ K₄ D₃. ₅ समाकुला. K₁. ₂ बभूव वसुधावृता.

12 ^{a}) B₄ Dn D₆ सं- (for प्र-). Ś₁ K D₃. ₅ स्म; D₁. ₂ M तु (for च). — ^{d}) Ś₁ K₃ D₃. ₃. ₆ T₁ G₁ M प्र(D₃. ₃ प्रा)द्रवंति. Ś₁ K₁–₃ D₁. ₅ T₂ G₂–₄ दिशो दश.

13 ^{a}) Ś₁ K₁ गृहान्; B₁ D₆₂ T₂ G₂. ₃ M₂ गुहां (for गुहाः). — ^{b}) Ś₁ K₄ B Dc Dn D₁. ₂. ₄. ₆ चापरे तथा; K₁–₃ D₃. ₅ च तथापरे (for चापरे श्रिताः). — ^{c}) Ś₁ K₁–₃ च भयोद्विग्नाः; M तत्रयादेव. — ^{d}) Ś₁ K₁. ₂. ₄ D₃. ₅ अवासृजन्; K₃ T₂ G₂–₆ समत्य° (for समुत्सृ°). M सहसासून्समत्यजन्.

14 ^{a}) Ś₁ K Dc D₁. ₂ M तत्र (for अत्र). — ^{b}) B Dn D₄. ₆ परमहर्षिताः. — The portion of the text from परमदर्पिताः up to 3. 104. 18^{c} is lost in G₁ on a missing fol.

15 D₂ om. (hapl.) 15^{a}–17^{b}. G₁ missing (cf. v.l. 14). — ^{a}) Ś₁ K₁–₃ Dc₁ D₅ M चैनान् (for चैतान्). Ś₁ K₁–₃ अनुजज्ञुस्ते; T G₂–₄ M₁ अभिजग्मु(M₁ °ह्व)स्ते. — ^{b}) K₃ समुपासृतान्; D₃. ₅ °पस्थितान्. — ^{c}) Ś₁ K₁. ₂ जज्ञुश्च. S (except M₂; G₁ missing) श्रमं च परमं जग्मुः. — ^{d}) K₁. ₂ आजज्ञुः; K₄ संजग्मुः; D₁ न जग्मुः (for आजग्मुः). D₁ ते (for च).

16 D₂ om. 16 (cf. v.l. 15). G₁ missing (cf. v.l. 14). — ^{b}) Ś₁ K₁. ₂ °संज्ञो° (for °यज्ञो°). — ^{c}) K₁. ₂ ते (for आ-). — ^{d}) S (G₁ missing) मनुजाधिप (T₁ °जा इव).

17 D₂ om. 17^{ab} (cf. v.l. 15). G₁ missing (cf. v.l. 14). — ^{a}) Ś₁ K D₁. ₃ तु (for च). — After 17^{ab}, B D (except D₁–₃. ₅) ins.:

502* शरण्यं शरणं देवं नारायणमजं विभुम् ।

— ^{c}) B D (except D₁–₃. ₅) तेभिगम्य (B₁ Dc °त्वा) (for नारा°). K₄ B Dn D₁. ₃. ₄. ₆ नमस्कृत्य (for पुर°).

18 G₁ missing (cf. v.l. 14). — ^{a}) B Dn D₄. ₆ G₂ समस्ता° (for समेता°). — ^{b}) Ś₁ K D₂. ₃. ₅ G₂ तमूचुर्; B₁ तुष्टुवुर्; B₂ Dc तत्रोचुर्. — ^{c}) Ś₁ K Dc D₁–₃. ₅ गोप्ता; B₂–₄ Dn D₄. ₆ कर्ता (Dn₃ भर्ता) (for पाता). B₁ त्वं नः कर्ता च स्रष्टा च. — ^{d}) B Dn D₄. ₆ M हर्ता (for

C. 3. 8756
B. 3. 102. 20
K. 3. 101. 21

त्वं नः स्रष्टा च पाता च भर्ता च जगतः प्रभो ।
त्वया सृष्टमिदं सर्वं यच्चेङ्गं यच्च नेङ्गति ॥ १८
त्वया भूमिः पुरा नष्टा समुद्रात्पुष्करेक्षण ।
वाराहं रूपमास्थाय जगदर्थे समुद्धृता ॥ १९
आदिदैत्यो महावीर्यो हिरण्यकशिपुस्त्वया ।
नारसिंहं वपुः कृत्वा सूदितः पुरुषोत्तम ॥ २०
अवध्यः सर्वभूतानां बलिश्चापि महासुरः ।
वामनं वपुराश्रित्य त्रैलोक्याद्भ्रंशितस्त्वया ॥ २१
असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः ।
यज्ञक्षोभकरः क्रूरस्त्वयैव विनिपातितः ॥ २२
एवमादीनि कर्माणि येषां संख्या न विद्यते ।
अस्माकं भयभीतानां त्वं गतिर्मधुसूदन ॥ २३
तस्मात्त्वां देव देवेश लोकार्थं ज्ञापयामहे ।
रक्ष लोकांश्च देवांश्च शक्रं च महतो भयात् ॥ २४

इति श्रीमहाभारते आरण्यकपर्वणि शततमोऽध्यायः ॥ १०० ॥

१०१

देवा ऊचुः ।
इतः प्रदानाद्वर्तन्ते प्रजाः सर्वाश्चतुर्विधाः ।
ता भाविता भावयन्ति हव्यकव्यैर्दिवौकसः ॥ १
लोका ह्येवं वर्तयन्ति अन्योन्यं समुपाश्रिताः ।

भर्ता). — [e]) Śi K De D1. 2 जगत् (for इदं). B Dn D3. 4. 6 विश्वं; De D1. 2 कृत्स्नं (for सर्वं). — [f]) Dn3 G3 नेंगते; D1. 2 T1 नेंगितं; G4 नेंगतं (for °ति). K1 यच्चेंगेभ्यश्च नेंगते; M स्थावरं जंगमं च यत्. — After 18, S (G1 missing) ins.:

503* त्वय्येव पुण्डरीकाक्ष पुनस्तत्प्रविलीयते ।

19 G1 missing (cf. v.l. 14). — [a]) D1. 2. 5 M2 सृष्टा (for नष्टा). — [b]) Śi D1. 3 समुद्राः; T1 °द्रं; G2 °द्रे (for °द्रात्). — D3 om. 19[cd] and *repeats* 18[ef] in its place. — [c]) Śi वराह- (for वाराहं). B Dn D4–6 T1 M वपुर् (for रूपम्). B Dn D4–6 M आश्रित्य (for आस्थाय).

20 G1 missing (cf. v.l. 14). — [b]) B2 Dn D4. 6 T2 G2–4 पुरा (for त्वया). — [c]) D1. 2 T1 G2 M1 नारसिंह-.

21 G1 missing (cf. v.l. 14). B3 om. 21–23. — [b]) Śi K1 नाम; D5 चैव (for चापि). — [c]) K4 D2 वपुरास्थाय; T2 G2–4 रूपमास्थाय.

22 B3 G4 om. 22 (for B3 cf. v.l. 21). G1 missing (cf. v.l. 14). T1 om. 22[cd]. — [c]) B1 जगत्- (for यज्ञ-). B1 क्रुद्धस्; De D2. 5 T2 G2. 3 M शूरस् (for क्रूरस्).

24 G1 missing (cf. v.l. 14). G4 om. 24[ab]. — [a]) Śi D1. 3 त्वं; K2. 4 त्वा (for त्वां). Śi अपि; T1 M एव (for देव). — [c]) B3 De D2. 3 transp. लोकांश्च and देवांश्च. — After 24, T2 G2–4 M1 ins.:

504* शरणागतसंत्राणे त्वमेकोऽसि दृढव्रतः ।

[G2 M1 धृत° (for दृढ°).]

Colophon om. in D1. 2. G1 missing. — *Major parvan:* Śi K1. 2 Dn2 T G2–4 M1 आरण्य. — *Sub-parvan:* De तीर्थयात्रा, followed by आगस्त्य. Omitting sub-parvan name, K2 B2. 3 Dn2. n3 D4. 5 mention only आगस्त्य; K3. 4 D3 only लोमशतीर्थयात्रा, followed by आगस्त्य; T1 only अगस्त्यचरित. — *Adhy. name:* B4 De वृत्रवधोपाख्यानं. — *Adhy. no.* (figures, words or both): Dn2. n3 M2 103; T G2–4 M1 101. — *Śloka no.*: Dn 26.

101

☞ This adhy. is missing in G1 (cf. v.l. 3. 100. 14). The MS. is mostly ignored here.

1 [a]) Śi K1–3 B1. 3. 4 Dn D1. 4–6 T2 G2. 3 तव; K4 De D2. 3 भवत्- (for इतः). N (for B2 see below) T2 G2–4 प्रसादाद् (for प्रदानाद्). K2. 4 B3 D (except D3. 5) G2 वर्धते (for वर्तन्ते). B2 त्वत्प्रसादात्प्रवर्तते.

2 [a]) K3 De प्रवर्तते; B Dn D1. 4. 6 विवर्धते; D3 वर्धयंति (for वर्तयन्ति). — [b]) To avoid the hiatus, Śi K1. 3 तेन्योन्यं; K4 B D (except D5) M1 ह्यन्योन्यं (for अं). — [c]) K3 B1. 3 त्वत्प्रभावान्. — [d]) = (var.) 5[d]. B2 त्वया वै (for त्वयैव).

त्वत्प्रसादान्निरुद्विग्नास्त्वयैव परिरक्षिताः ॥ २
इदं च समनुप्राप्तं लोकानां भयमुत्तमम् ।
न च जानीम केनेमे रात्रौ वध्यन्ति ब्राह्मणाः ॥ ३
क्षीणेषु च ब्राह्मणेषु पृथिवी क्षयमेष्यति ।
ततः पृथिव्यां क्षीणायां त्रिदिवं क्षयमेष्यति ॥ ४
त्वत्प्रसादान्महाबाहो लोकाः सर्वे जगत्पते ।
विनाशं नाधिगच्छेयुस्त्वया वै परिरक्षिताः ॥ ५

विष्णुरुवाच ।

विदितं मे सुराः सर्वं प्रजानां क्षयकारणम् ।
भवतां चापि वक्ष्यामि शृणुध्वं विगतज्वराः ॥ ६
कालेय इति विख्यातो गणः परमदारुणः ।
तैश्च वृत्रं समाश्रित्य जगत्सर्वं प्रबाधितम् ॥ ७
ते वृत्रं निहतं दृष्ट्वा सहस्राक्षेण धीमता ।
जीवितं परिरक्षन्तः प्रविष्टा वरुणालयम् ॥ ८
ते प्रविश्योदधिं घोरं नक्रग्राहसमाकुलम् ।
उत्सादनार्थं लोकानां रात्रौ घ्नन्ति मुनीनिह ॥ ९
न तु शक्याः क्षयं नेतुं समुद्राश्रयगा हि ते ।
समुद्रस्य क्षये बुद्धिर्भवद्भिः संप्रधार्यताम् ।
अगस्त्येन विना को हि शक्तोऽन्योऽर्णवशोषणे ॥ १०
एतच्छ्रुत्वा वचो देवा विष्णुना समुदाहृतम् ।
परमेष्ठिनमाज्ञाप्य अगस्त्यस्याश्रमं ययुः ॥ ११
तत्रापश्यन्महात्मानं वारुणिं दीप्ततेजसम् ।
उपास्यमानमृषिभिर्देवैरिव पितामहम् ॥ १२
तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।

C. 3. 8776
B. 3. 103. 14
K. 3. 102. 21

---

3 D_2 om. (hapl.) 3–5. — [b]) M इत्युत (for उत्तमम्). — [c]) $Ś_1$ $K_{1.2}$ न हि जानंति; $K_{3.4}$ Dc $D_{1.3.5}$ जानीमो न च; B_4 कालका नाम (for न च जानीम). $Ś_1$ $K_{3.4}$ $D_{3.5}$ M केनैते; K_1 विध्यंते; K_2 वध्यंते; B_5 केपि[? पी]मे; D_1 केनैव; T $G_{2.3}$ केनेति (for केनेमे). Dn_2 न च जानीमहे केन. — [d]) S (G_1 missing) वै द्विजाः (for ब्राह्मणाः). $Ś_1$ K B_{1m} Dc $D_{1.3.5}$ वध्यंते (K_1 केनैते; K_2 केनैव) ब्राह्मणा निशि.

4 D_2 om. 4 (cf. v.l. 3). — [a]) $Ś_1$ K Dc transp. क्षीणे° and ब्राह्म°. T_2 G_{2-4} हि (for च). — $Ś_1$ K_3 om. (hapl.) 4^{cd}.

5 D_2 om. 5 (cf. v.l. 3). — [c]) $G_{2.4}$ नाति-; M_1 नाभि-; M_2 नैव (for नाधि-). — [d]) =(var.) 2^d. Dc T $G_{2.3}$ त्वयैव (for त्वया वै).

6 D_3 कृष्ण उ°; T_2 G (G_1 missing) श्रीभगवान् (for विष्णुरु°). — [b]) S (G_1 missing) पृथिवी- (for प्रजानां).

7 [ab]) $K_{1.2}$ $D_{1.2}$ T $G_{2.3}$ M कालेया. $D_{1.2}$ S (except M_2; G_1 missing) विख्याता, गणाः, and °दारुणाः. — [d]) K_2 $B_{2.3}$ D (except $D_{2.3.5}$) प्रमाथितं (for प्रबा°).

9 [b]) K B_1 $D_{1–3.5}$ S (G_1 missing) नाना- (for नक्र-). — [c]) $Ś_1$ $K_{1–3}$ D_1 लोकस्य (for लोकानां). — [d]) Dn D_4. 6 ऋषीन् (for मुनीन्). $Ś_1$ $K_{1.2}$ अथ (for इह).

10 [a]) B_1 S (except M_1; G_1 missing) हि (for तु). — [b]) $Ś_1$ $K_{1.2}$ समुद्रक्षयगा; S (G_1 missing) °द्राश्रयिणो. K_4 समुद्राश्रयमाश्रिताः; D_3 (marg. *sec. m.*) समुद्रस्य क्षयं विना; D_5 समुद्रक्षयगामिनः. — D_5 reads 10^{cd} after 505*. — [d]) $Ś_1$ K Dc $D_{1–3.5}$ संविधीयतां (for संप्रधा°). — S om. 10^{ef}. — After 10, N (except $Ś_1$ $K_{1.2}$) ins.:

505* अन्यथा हि न शक्यास्ते विना सागरशोषणम् ।

11 [a]) $B_{2.3}$ ततो; B_4 Dn D_4. 6 G_4 तदा (for वचो). — After 11^{ab}, S (G_1 missing) ins.:

506* विष्णुमेव पुरस्कृत्य ब्रह्माणं समुपस्थिताः ।
ते तस्मै प्रणता भूत्वा तमेवार्थं न्यवेदयन् ।
सर्वलोकविनाशार्थं कालेयाः कृतनिश्चयाः ।
तेषां तद्वचनं श्रुत्वा पद्मयोनिः सनातनः ।
उवाच परमप्रीतस्त्रिदशानर्थवद्वचः । [5]
विदितं मे सुराः सर्वं दानवानां विचेष्टितम् ।
मनुष्यादेश्च निधनं कालेयैः कालचोदितैः ।
क्षयस्तेषामनुप्राप्तः कालेनोपहताश्च ये ।
उपायं संप्रवक्ष्यामि समुद्रस्य विशोषणे ।
अगस्त्य इति विख्यातो वारुणिः सुसमाहितः । [10]
तमुपागम्य सहिता इममर्थं प्रयाचत ।
स हि शक्तो महातेजाः क्षणात्पातुं महोदधिम् ।
समुद्रे च क्षयं नीते कालेयान्निहनिष्यथ ।
एवं श्रुत्वा वचो देवा ब्रह्मणः परमेष्ठिनः ।

[(L. 2) $G_{2.4}$ ततस्ते; M ते नीचैः (for ते तस्मै). — (L. 7) M_1 मनुष्याणां च (for °ष्यादेश्च). — (L. 9) M_1 [अ]पि (for वि-). — (L. 12) M_1 °भागः (for °तेजाः).]

— [cd]) B_1 आश्रित्य; $D_{1.2}$ अनुज्ञाप्य (for आज्ञाप्य). $Ś_1$ K D_5 परमेष्ठ्यभ्यनुज्ञाता (for [c]). S (G_1 missing) समनुज्ञाप्य ब्रह्माणं वारुणिं समुपस्थिताः.

13 K_4 om. 13. 13^b=(var.) 3. 103. 3^b. — [d])

C. 3. 8776
B. 3. 103. 14
K. 3. 102. 21

आश्रमस्थं तपोराशिं कर्मभिः स्वैरभिष्टुवन् ॥ १३
देवा ऊचुः ।
नहुषेणाभितप्तानां त्वं लोकानां गतिः पुरा ।
भ्रंशितश्च सुरैश्वर्याल्लोकार्थं लोककण्टकः ॥ १४
क्रोधात्प्रवृद्धः सहसा भास्करस्य नगोत्तमः ।
वचस्तवानतिक्रामन्विन्ध्यः शैलो न वर्धते ॥ १५
तमसा चावृते लोके मृत्युनाभ्यर्दिताः प्रजाः ।
त्वामेव नाथमासाद्य निर्वृतिं परमां गताः ॥ १६
अस्माकं भयभीतानां नित्यशो भगवान्गतिः ।
ततस्त्वार्ताः प्रयाचामस्त्वां वरं वरदो ह्यसि ॥ १७

इति श्रीमहाभारते आरण्यकपर्वणि एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

युधिष्ठिर उवाच ।
किमर्थं सहसा विन्ध्यः प्रवृद्धः क्रोधमूर्छितः ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण महामुने ॥ १
लोमश उवाच ।
अद्रिराजं महाशैलं मेरुं कनकपर्वतम् ।
उदयास्तमये भानुः प्रदक्षिणमवर्तत ॥ २
तं तु दृष्ट्वा तथा विन्ध्यः शैलः सूर्यमथाब्रवीत् ।
यथा हि मेरुर्भवता नित्यशः परिगम्यते ।
प्रदक्षिणं च क्रियते मामेवं कुरु भास्कर ॥ ३
एवमुक्तस्ततः सूर्यः शैलेन्द्रं प्रत्यभाषत ।
नाहमात्मेच्छया शैल करोम्येनं प्रदक्षिणम् ।
एष मार्गः प्रदिष्टो मे येनेदं निर्मितं जगत् ॥ ४

K$_3$ B$_4$ Dc D$_{1.\ 2}$ अभिष्टुतं; B$_1$ D$_{3.\ 5}$ अधिष्ठितं; S (G$_1$ missing) तु तुष्टुवुः (for अभिष्टुवन्).

14 [a]) B$_{2.\ 4}$ Dn$_{1.\ 3a}$ G$_4$ नाहुषेण. — [b]) Ś$_1$ K$_{1-3}$ त्वं देवानां; K$_4$ D$_{3.\ 5}$ देवानां त्वं (for त्वं लोकानां). — [d]) K$_2$ लोकार्थे; K$_3$ B$_{2.\ 4}$ Dn D$_{4.\ 6}$ स्वर्लोकाल् (for लोकार्थं).

15 [a]) K$_{1.\ 3.\ 4}$ D$_2$ सुमहान्; T$_1$ G$_4$ तरणं; G$_2$ सरणं; M तरसा (for सहसा). — [b]) T G$_{2.\ 3}$ नभोगतः; G$_4$ नभोत्तमः (for नगोत्तमः). — [c]) B$_1$ °क्रम्य (for °क्रामन्).

16 [a]) Ś$_1$ दर्पितं; K$_1$ संवृते; D$_2$ चार्दिते; D$_5$ च वृते; M$_1$ ह्यावृते. T$_2$ G$_{2-4}$ °सा चावृतो लोको. — [b]) T$_1$ M$_1$ ह्य° (for °भ्य°).

17 [b]) Ś$_1$ K$_{1.\ 2}$ ऋषिः (for गतिः). — [c]) B$_4$ Dc प्रयाचाम. — [d]) B D (except D$_{2.\ 3.\ 5}$) वरं त्वां (by transp.); T$_1$ वरदं; T$_2$ G$_{2-4}$ त्वां वयं; M$_2$ त्वां परं. M °दोत्तम (for °दो ह्यसि).

Colophon. G$_1$ missing. — *Major parvan:* Ś$_1$ K$_{1.\ 2}$ Dn$_2$ T G$_{2-4}$ M$_1$ आरण्य. — *Sub-parvan:* B$_4$ तीर्थयात्रा, followed by आगस्त्य. K D$_1$ (om. sub-parvan name) mention only लोमशतीर्थ(K$_2$ om. तीर्थ)यात्रा (followed by आगस्त्य in K$_{3.\ 4}$); B$_{1-3}$ Dc Dn D$_{4-6}$, likewise, only आगस्त्य. — *Adhy. name:* Ś$_1$ K$_{1.\ 2}$ कालेयवधः; T$_1$ अगस्त्यचरितं. — *Adhy. no.* (figures, words or both): Dn$_1$ T G (G$_1$ missing) M$_1$ 102; Dn$_{2.\ 3}$ M$_2$ 104; D$_1$ 106. — *Śloka no.:* Dn 18; D$_1$ 43.

102

☞ This adhy. is missing in G$_1$ (cf. v.l. 3. 100. 14). The MS. is mostly ignored here.

1 1^{cd} = (var.) 3. 104. 4^{ab}. — [c]) T$_2$ G$_{2.\ 3}$ इच्छामहे (for °म्यहं). — [d]) M °मते (for °मुने).

2 [a]) T$_2$ (before corr.) G$_{2.\ 4}$ °सारं (for °राजं). T$_2$ G$_{2-4}$ °राज (for °शैलं). — [b]) Ś$_1$ K$_2$ एकं; K$_1$ अर्थं (for मेरुं). — [c]) N (except Ś$_1$ K$_1$ D$_2$) °स्रमने.

3 [a]) Dc तत्र; M$_2$ अथ (for तं तु). D$_2$ T$_1$ transp. तु and दृष्ट्वा. K$_{3.\ 4}$ B Dc T$_1$ तदा (for तथा). — [c]) K$_{1.\ 2}$ transp. हि and मेरुर्. Ś$_1$ यथा मेरुर्भगवता. — [e]) N प्रदक्षिणश्च.

4 [c]) K$_{1.\ 2.\ 4}$ B Dn$_2$ D$_{1-3.\ 5}$ T$_1$ शैलं; Dc शैलः (for शैल). — [f]) B Dn D$_{4.\ 6}$ T$_1$ M$_2$ यैर् (for येन).

5 [a]) K$_4$ क्रुद्धः (for क्रोधात्). — [b]) D$_2$ M$_2$ स महा-

एवमुक्तस्ततः क्रोधात्प्रबृद्धः सहसाचलः ।
सूर्याचन्द्रमसोर्मार्गं रोद्धुमिच्छन्परंतप ॥ ५
ततो देवाः सहिताः सर्व एव
सेन्द्राः समागम्य महाद्रिराजम् ।
निवारयामासुरुपायतस्तं
न च स्म तेषां वचनं चकार ॥ ६
अथाभिजग्मुर्मुनिमाश्रमस्थं
तपस्विनं धर्मभृतां वरिष्ठम् ।
अगस्त्यमत्यद्भुतवीर्यदीप्तं
तं चार्थमूचुः सहिताः सुरास्ते ॥ ७

देवा ऊचुः ।

सूर्याचन्द्रमसोर्मार्गं नक्षत्राणां गतिं तथा ।
शैलराजो वृणोत्येष विन्ध्यः क्रोधवशानुगः ॥ ८
तं निवारयितुं शक्तो नान्यः कश्चिद्द्विजोत्तम ।
ऋते त्वां हि महाभाग तस्मादेनं निवारय ॥ ९

लोमश उवाच ।

तच्छ्रुत्वा वचनं विप्रः सुराणां शैलमभ्यगात् ।
सोऽभिगम्याब्रवीद्विन्ध्यं सदारः समुपस्थितः ॥ १०
मार्गमिच्छाम्यहं दत्तं भवता पर्वतोत्तम ।
दक्षिणामभिगन्तास्मि दिशं कार्येण केनचित् ॥ ११
यावदागमनं मह्यं तावत्त्वं प्रतिपालय ।
निवृत्ते मयि शैलेन्द्र ततो वर्धस्व कामतः ॥ १२
एवं स समयं कृत्वा विन्ध्येनामित्रकर्शन ।
अद्यापि दक्षिणादेशाद्वारुणिर्न निवर्तते ॥ १३
एतत्ते सर्वमाख्यातं यथा विन्ध्यो न वर्धते ।
अगस्त्यस्य प्रभावेन यन्मां त्वं परिपृच्छसि ॥ १४
कालेयास्तु यथा राजन्सुरैः सर्वैर्निषूदिताः ।
अगस्त्याद्वरमासाद्य तन्मे निगदतः शृणु ॥ १५
त्रिदशानां वचः श्रुत्वा मैत्रावरुणिरब्रवीत् ।
किमर्थमभियाताः स्थ वरं मत्तः किमिच्छथ ।
एवमुक्तास्ततस्तेन देवास्तं मुनिमब्रुवन् ॥ १६
एवं त्वयेच्छाम कृतं महर्षे
महार्णवं पीयमानं महात्मन् ।
ततो वधिष्याम सहानुबन्धा-

C. 3. 8798
B. 3. 104. 18
K. 3. 103. 19

चलः; D_3 M_1 स महाबलः. — [c]) = 8^a. $K_{1.4}$ M_1 सूर्यं (for सूर्या°). — [d]) T G_{2-4} M_1 °मैच्छत् (for °मिच्छन्).

6 [b]) B D (except $D_{1-3.5}$) विंध्यं (B_1 तदा) (for सेन्द्राः). K_3 B_2 समागत्य. K_6 B_1 D_{1-3} तम् (for महा-). — [c]) $Ś_1$ K_1 स्म (for तं). — [d]) $D_{1.2}$ T G_{2-4} [ए]व; M [अ]पि (for स्म).

7 [c]) $K_{1.4}$ D_{C2} $D_{1-3.5}$ °दीप्तवीर्यं; B D_{C1} Dn $D_{4.6}$ M °वीर्यवंतं (for °वीर्यदीप्तं). — [d]) $Ś_1$ $K_{1.2}$ च; $K_{3.4}$ $D_{3.5}$ T M_2 तं (for ते).

9 [c]) S (G_1 missing) त्वद्(T_1 °द्भ्)ते हि (for ऋते त्वां हि). — [d]) T_1 $G_{3.4}$ एतं (for एनं).

10 [a]) D_C देवः (for विप्रः). — [b]) D_C अभ्ययात्. — [d]) $B_{3.4}$ D_C Dn $D_{4.6}$ G_4 °स्थितं (for °स्थितः).

11 [a]) $Ś_1$ $K_{1.2}$ दातुं; B_1 यातुं (for दत्तं). — [c]) $Ś_1$ $K_{1.2}$ °गच्छामि (for गन्तास्मि).

13 [c]) D_C ते; $D_{3.5}$ तु (for स). — [b]) $Ś_1$ K $D_{1-3.5}$ [अ]त्रिवरेण ह ($Ś_1$ $K_{1.2}$ हि); B [अ]मित्रकर्षण ($B_{3.4}$ °णः).

14 [c]) Some MSS. प्रभावेण. — [d]) $Ś_1$ K_1 M_2 मा (for मां).

15 [b]) M_1 यथा (for सुरैः). D_C M_2 सर्वे; M_1 देवैर् (for सर्वैर्). $Ś_1$ K_1 B_{1-3} निसूदिताः; T निवेदिताः; M निपातिताः. — [c]) $Ś_1$ K_1 T $G_{3.4}$ अगस्त्यद्वारमा°; G_2 M अगस्त्यं द्वारमा°.

16 [b]) $Ś_1$ $K_{1.2}$ तथेति मुनिरब्रवीत् (= 18^b). — Before 16^{cd}, D_C ins. अगस्त्य उ°. — B_3 om. (hapl.) 16^c–18^b. — [c]) $Ś_1$ K D_C D_{1-3} उप- (for अभि-). $Ś_1$ D_C स्म (for स्थ). — [d]) D (except $D_{2.3.5}$) कम् (for किम्). — After 16^{cd}, D_C reads 18^{cd}, *repeating* it in its proper place. — [e]) $Ś_1$ K D_{C2} $D_{1-3.5}$ तदा (for ततस्). Dn तेथ; D_4 ते तं (for तेन). — [f]) $D_{n1.n3}$ $D_{4.6}$ देवता (for देवास्तं). — After 16, S ins.:

507* सर्वे प्राञ्जलयो भूत्वा पुरंदरपुरोगमाः ।

17 B_3 om. 17 (cf. v.l. 16); K_3 om. 17^{ab}. — [a]) D_C D_3 M_1 एकं; M_2 एतं (for एवं). $D_{3.5}$ वयं (for कृतं). $B_{2.4}$ Dn $D_{4.6}$ हि कार्यं (for महर्षे). — [b]) $Ś_1$ $K_{1.2}$ महांतं (for महात्मन्). — [d]) T_3 G_{3-4} M_3 कालोपसृष्टान्;

C. 3. 8798
B. 3. 104. 18
K. 3. 103. 19

न्कालेयसंज्ञान्सुरविद्विषस्तान् ॥ १७
त्रिदशानां वचः श्रुत्वा तथेति मुनिरब्रवीत् ।
करिष्ये भवतां कामं लोकानां च महत्सुखम् ॥ १८
एवमुक्त्वा ततोऽगच्छत्समुद्रं सरितां पतिम् ।
ऋषिभिश्च तपःसिद्धैः सार्धं देवैश्च सुव्रतः ॥ १९
मनुष्योरगगन्धर्वयक्षकिंपुरुषास्तथा ।
अनुजग्मुर्महात्मानं द्रष्टुकामास्तदद्भुतम् ॥ २०
ततोऽभ्यगच्छन्सहिताः समुद्रं भीमनिस्वनम् ।
नृत्यन्तमिव चोर्मीभिर्वल्गन्तमिव वायुना ॥ २१
हसन्तमिव फेनौघैः स्खलन्तं कन्दरेषु च ।
नानाग्राहसमाकीर्णं नानाद्विजगणायुतम् ॥ २२
अगस्त्यसहिता देवाः सगन्धर्वमहोरगाः ।
ऋषयश्च महाभागाः समासेदुर्महोदधिम् ॥ २३

इति श्रीमहाभारते आरण्यकपर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

लोमश उवाच ।
समुद्रं स समासाद्य वारुणिर्भगवानृषिः ।
उवाच सहितान्देवानृषींश्चैव समागतान् ॥ १
एष लोकहितार्थं वै पिबामि वरुणालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥ २
एतावदुक्त्वा वचनं मैत्रावरुणिरच्युतः ।
समुद्रमपिबत्क्रुद्धः सर्वलोकस्य पश्यतः ॥ ३
पीयमानं समुद्रं तु दृष्ट्वा देवाः सवासवाः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥ ४
त्वं नस्त्राता विधाता च लोकानां लोकभावनः ।
त्वत्प्रसादात्समुच्छेदं न गच्छेत्सामरं जगत् ॥ ५
संपूज्यमानस्त्रिदशैर्महात्मा

T$_1$ कालेयसृष्टान्; M$_1$ कालेन सृष्टान् (for कालेयसंज्ञान्). K$_3$ सुरविद्विषास्त्वान्; K$_4$ असुरद्विषां गणान्; D$_{1.2}$ सुरविद्विषाणान्; D$_3$ °विद्विषो गणान्; T$_1$ असुरद्विषस्तान्; M$_2$ सुरविद्विषांश्च.

19 ^{c}) Ś$_1$ K De D$_{1-3.5}$ तपःसिद्धैश्च मुनिभिः. — ^{d}) K$_{3.4}$ B$_{1.3.4}$ Dn D$_{2.4-6}$ सुव्रत; T$_2$ G$_3$ M$_1$ सुव्रतैः; G$_2$ संवृतः; G$_4$ संवृतं.

22 D$_3$ om. 22 (with 21^{cd}). — ^{b}) K$_4$ D$_{1.2}$ कंदरैरिव (for °रेषु च). T$_2$ G$_3$ (after corr.) [अ]पि; G$_{2.3}$ (before corr.). ^{4} M$_1$ [द्र]व (for च). T$_1$ कंदरेषु च नादितं. — G$_4$ om. 22^{cd}. — ^{d}) K$_2$ B$_3$ Dn D$_{1.4.6}$ °गणान्वितं; B$_2$ °निषेवितं; D$_5$ °गणैर्युतं.

Colophon. G$_1$ missing. — *Major parvan:* Ś$_1$ K$_{1.2}$ T G$_{2-4}$ M$_1$ आरण्य. — *Sub-parvan:* De$_1$ तीर्थयात्रा, preceded by आगस्त्य. K$_1$ B Dn D$_{3-6}$ (all om. sub-parvan name) mention only आगस्त्य; K$_{3.4}$ D$_1$, likewise, only लोमशतीर्थयात्रा (followed by आगस्त्य in K$_{3.4}$); and De$_2$ only अगस्त्यतीर्थयात्रा. — *Adhy. no.* (figures, words or both): Dn$_{2.n3}$ M$_2$ 105; D$_1$ 107; T G (G$_1$ missing) M$_1$ 103. — *Śloka no.:* Dn D$_1$ 25.

103

☞ This adhy. is missing in G$_1$ (cf. v.l. 3. 100. 14). The MS. is mostly ignored here.

1 ^{a}) B$_2$ D$_{1.3.5.6}$ S (G$_1$ missing) स समुद्रं (by transp.). — ^{b}) Ś$_1$ K$_{1.2}$ मुनिः (for ऋषिः). — ^{c}) K$_4$ सर्वान् (for देवान्). — ^{d}) K$_4$ देवर्षींश्च; T G$_{2.3}$ ऋषींश्चापि.

2 ^{a}) Dn D$_6$ T$_1$ G$_2$ अहं (for एष). T$_2$ G$_{2-4}$ °हितार्थाय. — ^{c}) Ś$_1$ K$_2$ भगवान्; K$_{1.3.4}$ D$_{1-3.5}$ भवतां (for भवद्भिर्).

4 ^{a}) Ś$_1$ B Dn$_3$ D$_{4.6}$ T$_2$ G$_3$ M$_1$ तं (for तु). — ^{b}) B Dn D$_{4.6}$ T$_1$ M सेंद्राः (for देवाः). B$_1$ तथा सुराः; Dn D$_{4.6}$ T$_1$ M तदा मराः; T$_2$ G$_{2-4}$ सहामराः (for सवा°). — ^{d}) Ś$_1$ K$_4$ D$_1$ T G$_3$ [अ]भ्यपूं; K$_2$ [अ]पि पूं (for [अ]प्यपूं).

5 ^{a}) De देवता त्वं (for त्वं नस्त्राता). — ^{b}) K$_{2.3}$ B Dn$_1$ D$_{2.5.6}$ T$_2$ G$_{2-4}$ M$_1$ °भावन; T$_1$ °पावनः.

गन्धर्वतूर्येषु नदत्सु सर्वशः ।
दिव्यैश्च पुष्पैरवकीर्यमाणो
महार्णवं निःसलिलं चकार ॥ ६
दृष्ट्वा कृतं निःसलिलं महार्णवं
सुराः समस्ताः परमप्रहृष्टाः ।
प्रगृह्य दिव्यानि वरायुधानि
तान्दानवाञ्जघ्नुरदीनसत्त्वाः ॥ ७
ते वध्यमानास्त्रिदशैर्महात्मभि-
र्महाबलैर्वेगिभिरुन्नदद्भिः ।
न सेहिरे वेगवतां महात्मनां
वेगं तदा धारयितुं दिवौकसाम् ॥ ८
ते वध्यमानास्त्रिदशैर्दानवा भीमनिस्वनाः ।
चक्रुः सुतुमुलं युद्धं मुहूर्तमिव भारत ॥ ९
ते पूर्वं तपसा दग्धा मुनिभिर्भावितात्मभिः ।
यतमानाः परं शक्त्या त्रिदशैर्विनिषूदिताः ॥ १०
ते हेमनिष्काभरणाः कुण्डलाङ्गदधारिणः ।
निहत्य बहुशोभन्त पुष्पिता इव किंशुकाः ॥ ११
हतशेषास्ततः केचित्कालेया मनुजोत्तम ।
विदार्य वसुधां देवीं पातालतलमाश्रिताः ॥ १२
निहतान्दानवान्दृष्ट्वा त्रिदशा मुनिपुंगवम् ।
तुष्टुवुर्विविधैर्वाक्यैरिदं चैवाब्रुवन्वचः ॥ १३
त्वत्प्रसादान्महाभाग लोकैः प्राप्तं महत्सुखम् ।
त्वत्तेजसा च निहताः कालेयाः क्रूरविक्रमाः ॥ १४
पूरयस्व महाबाहो समुद्रं लोकभावन ।
यत्त्वया सलिलं पीतं तदस्मिन्पुनरुत्सृज ॥ १५
एवमुक्तः प्रत्युवाच भगवान्मुनिपुंगवः ।
जीर्णं तद्धि मया तोयमुपायोऽन्यः प्रचिन्त्यताम् ।
पूरणार्थं समुद्रस्य भवद्भिर्यत्नमास्थितैः ॥ १६
एतच्छ्रुत्वा तु वचनं महर्षेर्भावितात्मनः ।
विस्मिताश्च विषण्णाश्च बभूवुः सहिताः सुराः ॥ १७
परस्परमनुज्ञाप्य प्रणम्य मुनिपुंगवम् ।
प्रजाः सर्वा महाराज विप्रजग्मुर्यथागतम् ॥ १८
त्रिदशा विष्णुना सार्धमुपजग्मुः पितामहम् ।
पूरणार्थं समुद्रस्य मन्त्रयित्वा पुनः पुनः ।
ऊचुः प्राञ्जलयः सर्वे सागरस्याभिपूरणम् ॥ १९

C. 3. 8824
B. 3. 105. 20
K. 3. 104. 21

इति श्रीमहाभारते आरण्यकपर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

6 [a]) K2. 4 B Dn D1. 4–6 G4 M1 स (for सं-). T2 G2–4 महात्मभिः (for महात्मा). — [b]) Ś1 K1. 2 मृदंग° (for गन्धर्व°). Ś1 K Dc D1–3. 5 चैव (for सर्वशः). — [c]) Ś1 K1. 2 अनु° (for अव°).

7 [a]) B3 S (G1 missing) समुद्रं (for महार्णवं). — [c]) Ś1 K2 चापानि; B1 सर्वाणि (for दिव्यानि).

8 [b]) Ś1 K1–3 B2 D2. 3. 5 S (G1 missing) °बला (for °बलैर्). K3. 4 B2. 3 T2 G2–4 M वेगितैर्; D2 वेगत (for वेगिभिर्). K1 उन्नमद्भिः; B3 उल्लसद्भिः; D3 तैर्नदद्भिः.

9 [b]) Some MSS. °निःस्वनाः. — [c]) Some MSS. सुतुमलं.

10 D5 om. 10. — [d]) Ś1 K1. 2 B M °सूदिताः; K3 °पातिताः.

12 [a]) Ś1 K B1 D1–3. 5 °शिष्टास् (for °शेषास्). — [d]) Dn D1. 4. 6 आस्थिताः (for आश्रिताः).

13 [d]) Dn D4. 6 इदं वचनमब्रुवन्.

14 [a]) K1. 4 B Dc Dn D1. 4. 6 महाबाहो; D3 T1 M मुनिश्रेष्ठ (for महाभाग). — [c]) T G2–4 वि- (for च). — [d]) Ś1 °कर्मणः (*sup. lin.* °विक्रमाः as in text).

15 D5 om. 15. — [a]) Ś1 K1. 2. 4 °विप्र; K3 °भागः; D1–3 G2 M1 °भाग (for °बाहो). — [b]) Ś1 K1. 2 लोक-भावनं; D3 T G2–4 °पावनं.

16 [b]) T2 G2–4 °सत्तमः (for °पुंगवः). — After 16[ab], S (except G4; G1 missing) ins.:

508* तांस्तथा सहितान्देवानगस्त्यः सपुरंदरान् ।
[T2 G3 नान्हि; M1 तदा (for तथा).]

19 Ś1 om. 19[ab]. — [b]) B2. 4 उपाजग्मुः. — [d]) Ś1 K D1–3 मंत्रयंतः. K3 D1. 2 परस्परं (for पुनः पुनः). B3m भवद्भिर्यत्नमास्थितैः (= 16[f]) — After 19[cd], S (G1 missing) ins.:

509* ते धातारमुपागम्य त्रिदशाः सह विष्णुना ।

— [e]) B प्रोचुः (for ऊचुः). — [f]) K4 D5 [अ]पि (for [अ]भि-). K2 B1 Dc Dn3 °पूर्णे (for °पूरणम्). — T1 om. from 19[f] up to 3. 104. 1[c].

१०४

C. 3. 8825
B. 3. 106. 1
K. 3. 105. 1

लोमश उवाच ।

तानुवाच समेतांस्तु ब्रह्मा लोकपितामहः ।
गच्छध्वं विबुधाः सर्वे यथाकामं यथेप्सितम् ॥ १
महता कालयोगेन प्रकृतिं यास्यतेऽर्णवः ।
ज्ञातीन्वै कारणं कृत्वा महाराज्ञो भगीरथात् ॥ २

युधिष्ठिर उवाच ।

कथं वै ज्ञातयो ब्रह्मन्कारणं चात्र किं मुने ।
कथं समुद्रः पूर्णश्च भगीरथपरिश्रमात् ॥ ३
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
कथ्यमानं त्वया विप्र राज्ञां चरितमुत्तमम् ॥ ४

वैशंपायन उवाच ।

एवमुक्तस्तु विप्रेन्द्रो धर्मराज्ञा महात्मना ।
कथयामास माहात्म्यं सगरस्य महात्मनः ॥ ५

लोमश उवाच ।

इक्ष्वाकूणां कुले जातः सगरो नाम पार्थिवः ।
रूपसत्त्वबलोपेतः स चापुत्रः प्रतापवान् ॥ ६
स हैहयान्समुत्साद्य तालजङ्घांश्च भारत ।
वशे च कृत्वा राज्ञोऽन्यान्स्वराज्यमन्वशासत ॥ ७
तस्य भार्ये त्वभवतां रूपयौवनदर्पिते ।
वैदर्भी भरतश्रेष्ठ शैब्या च भरतर्षभ ॥ ८

Colophon om. in B_4 $D_{3.5}$ T_1. G_1 missing. — *Major parvan:* $Ś_1$ $K_{1.2}$ Dn_2 T_2 G_{2-4} M_1 आरण्य. — *Sub-parvan:* K D_1 (om. sub-parvan name) mention only लोमशतीर्थयात्रा (followed by आगस्त्य in $K_{3.4}$); $B_{2.3}$ Dc Dn $D_{4.6}$, likewise, only आगस्त्य. — *Adhy. name:* $Ś_1$ K_1 मंत्रः; Dc कालेयवधः. — *Adhy. no.* (figures, words or both): Dn_1 T_2 G (G_1 missing) M_1 104; $Dn_{2.3}$ M_2 106; D_1 108. — *Śloka no.:* Dn D_1 20.

104

☞ G_1 missing up to 18^c of this adhy. (cf. v.l. 3. 100. 14). The MS. is mostly ignored up to the end of the lacuna.

1 T_1 om. 1^{abc} (cf. v.l. 3. 103. 19). — After 1^{ab}, T_2 $G_{2.3}$ M ins.:

510* निर्हादिन्या गिरा राजन्देवानाश्वासयंस्तदा ।

2 ^{c}) $Ś_1$ D_3 तु; Dn_3 $D_{2.5}$ T_2 G_{2-4} च (for वै). — ^{d}) K_4 °राजाद्; B_3 T_2 G_3 °राजो; G_2 °भोगो; G_4 °भागो (for °राज्ञो). B_3 T G_{2-4} M_1 भगीरथः. — After 2, Dc_2 Dn_2 ins.:

511* आनयिष्यद्यदा गङ्गां तदा पूर्णो भविष्यति ।

— K_1 B Dc Dn $D_{4.6}$ ins. after 2 (Dc_2 Dn_2, after 511*):

512* पितामहवचः श्रुत्वा सर्वे विबुधसत्तमाः ।
कालयोगं प्रतीक्षन्तो जग्मुश्चापि यथागतम् ।

After the above, B_4 ins. colophon (omitted at the end of adhy. 103). On the other hand, S (G_1 missing) ins. after 2:

513* पूरयिष्यति तोयौघैः समुद्रं निधिमम्भसाम् ।
[G_2 M_2 स मुनिर् (for समुद्रं).]

3 ^{b}) K_4 $D_{2.3}$ चाभवन् (for चात्र किं). $Ś_1$ $K_{1.2}$ D_5 M_2 वै (for किं). — ^{c}) $Ś_1$ K Dc D_2 तु (for च). — ^{d}) B Dc Dn $D_{4.6}$ °प्रतिश्रयात्; D_5 T_2 G_3 °परिश्रयात्; T_1 °परिश्रमैः.

5 G_4 om. 5. — ^{a}) T_2 $G_{2.3}$ राजेंद्र (for विप्रेन्द्रो). — ^{b}) T $G_{2.3}$ M धर्मराजेन धीमता. — K_2 om. (hapl.) 5^{cd}.

6 ^{c}) $D_{1.3.4}$ °गुणोपेतः.

7 ^{a}) K_3 हैहयान्स (by transp.). $Ś_1$ K_1 S (G_1 missing) हेहयान्. $Ś_1$ समुद्राद्यान्; K_2 समुत्साद्यान् (for समुत्साद्य). — ^{b}) $Ś_1$ मलंकांश्चैव; K_1 ससंकां चैव; K_2 सलंकां चैव (for तालं°). — ^{c}) $K_{2.4}$ Dc D_{1-3} M (by transp.) कृत्वा च; B_1 कृत्वा तु; T_2 G_{2-4} कृत्वा स. B Dn $D_{4.6}$ राजन्यान् (for राज्ञोऽन्यान्). — ^{d}) $Ś_1$ $K_{1.2}$ स (for स्व-). $Ś_1$ $K_{2.4}$ $D_{1-3.5}$ चान्वशा($Ś_1$ °गा)त्ततः; K_1 नाम शाश्वतः; K_3 Dc चान्वशासत; $B_{1.2}$ अनुशासत; S (G_1 missing) अनुशिष्टवान् (for अन्वशासत).

8 ^{a}) $Ś_1$ $K_{1.2}$ उ($Ś_1$ ष्णु)भे राजन्; K_4 Dc $D_{1.2}$ ह्यभवतां; D_5 तु भवतां. — ^{d}) $Ś_1$ K_2 पांडुनंदन; K_1 [अ]प्सरसोपमा; K_3 [अ]प्सरसां समे; K_4 D_3 [अ]प्सरसोपमे; D_5 [अ]प्सरसा समे; M कुरुनंदन (for भरत°).

9 ^{b}) B Dn $D_{4.6}$ तप्यते; Dc_1 तेपे च; Dc_2 प्रतेपे (for

स पुत्रकामो नृपतिस्तताप सुमहत्तपः ।
पत्नीभ्यां सह राजेन्द्र कैलासं गिरिमाश्रितः ॥ ९
स तप्यमानः सुमहत्तपो योगसमन्वितः ।
आससाद महात्मानं त्र्यक्षं त्रिपुरमर्दनम् ॥ १०
शंकरं भवमीशानं शूलपाणिं पिनाकिनम् ।
त्र्यम्बकं शिवमुग्रेशं बहुरूपमुमापतिम् ॥ ११
स तं दृष्ट्वैव वरदं पत्नीभ्यां सहितो नृपः ।
प्रणिपत्य महाबाहुः पुत्रार्थं समयाचत ॥ १२
तं प्रीतिमान्हरः प्राह सभार्यं नृपसत्तमम् ।
यस्मिन्वृतो मुहूर्तेऽहं त्वयेह नृपते वरम् ॥ १३
षष्टिः पुत्रसहस्राणि शूराः समरदर्पिताः ।
एकस्यां संभविष्यन्ति पत्न्यां तव नरोत्तम ॥ १४
ते चैव सर्वे सहिताः क्षयं यास्यन्ति पार्थिव ।
एको वंशधरः शूर एकस्यां संभविष्यति ।
एवमुक्त्वा तु तं रुद्रस्तत्रैवान्तरधीयत ॥ १५
स चापि सगरो राजा जगाम स्वं निवेशनम् ।
पत्नीभ्यां सहितस्तात सोऽतिहृष्टमनास्तदा ॥ १६
तस्याथ मनुजश्रेष्ठ ते भार्ये कमलेक्षणे ।
वैदर्भी चैव शैब्या च गर्भिण्यौ संबभूवतुः ॥ १७
ततः कालेन वैदर्भी गर्भालाबुं व्यजायत ।
शैब्या च सुषुवे पुत्रं कुमारं देवरूपिणम् ॥ १८
तदालाबुं समुत्स्रष्टुं मनश्चक्रे स पार्थिवः ।
अथान्तरिक्षाच्छुश्राव वाचं गम्भीरनिस्वनाम् ॥ १९
राजन्मा साहसं कार्षीः पुत्रान्न त्यक्तुमर्हसि ।
अलाबुमध्यान्निष्कृष्य बीजं यत्नेन गोप्यताम् ॥ २०
सोपस्वेदेषु पात्रेषु घृतपूर्णेषु भागशः ।

C. 3. 8846
B. 3. 106. 22
K. 3. 105. 24

ततप). B Dn1. n3 D6 स्म; Dc2 च (for सु-). — d) Śi Ki Bi. 3 Mi कैलास-; K2 कैलाश-; K3. 4 Dc2 D2. 3 कैलाशं.

10 T1 om. 10a–12b. — d) M शर्वं (for त्र्यक्षं). Śi K Dc D1. 2 त्रिपुरघातिनं; M1 त्रिभुवनेश्वरं; M2 त्रिपुरघातकं.

11 T1 om. 11 (cf. v.l. 10); B2 om. 11ab. — a) D3. 5 शर्वम् (for भवम्). — b) B1 Dn D4. 6 पिनाकिं शूलपाणिनं. — c) M उग्रेषुं (for उग्रेशं). T2 G2–4 त्रियंबकं शिवं श्रेष्ठं. — After 11, K B1 Dc D1–3. 5 ins.:

514* लोकधातारमजरममरेशं पुरातनम् ।
दिग्वाससं वृषरथमचिन्त्याद्भुतयोगिनम् ।

13 a) Dc भवः (for हरः). — c) Śi Ki. 2 अस्मिन् (for य°). — d) T1 G2. 4 M1 [ए]व (for [इ]ह). Ki. 2 वरः (for वरम्).

14 a) Śi K D1–3. 5 पुत्राः षष्टिसह°. — b) K1 B D (except D1–3) परम° (for समर°). — c) K3. 4 D1. 2 एकस्याः (for °स्यां). Śi K1. 3. 4 Dc D1. 2 ते (for सं-). — d) K3. 4 D1. 4 पत्न्या (for °त्यां). Śi K B Dc Dn D3–6 नरवरोत्तम; D1. 2 नृपवरात्मज; T1 ते च नरोत्तम (for तव नरो°).

15 a) T G2–4 तथैव; M ते चापि (for ते चैव). Śi K2 प्रागेव हि (for चैव सर्वे). K3 Dc D1–3. 5 S (G1 missing) सहिताः सर्वे (by transp.). — c) T2 G2–4 M1 वंशकरः. — d) Śi K1. 4 G2 एकस्याः (for °स्यां). — e) Śi K1–3 ततो (for तु तं).

16 c) Dn D1. 2 तत्र (for तात). — d) Śi K1. 2 नाति°; K3 संप्र°; M1 सोपि (for सोऽनि°). — After 16, S (G1 missing) ins.:

515* कालं शंभुवरप्राप्तं प्रतीक्षन्सगरोऽनयत् ।
[M °प्राप्तेः (for °प्राप्तं).]

17 a) Śi तस्यार्थे; B Dn D4. 6 तस्य ते; T G2–4 तस्येमे. D3 T1 M2 भरतश्रेष्ठ. — B2 transp. 17b and 17d. — b) Śi K1. 2. 4 Dc D1. 2 द्वे (for ते). B Dn D4. 6 T G2–4 भार्ये कमललोचने.

18 a) T2 G2. 3 काले तु (for कालेन). — b) K1–3 गर्भालाबु; K4 D1. 2 M1 °लांबु; T2 G2–4 गर्भतुंबं. Śi K2. 3 Dc असूयत; K4 D1. 2 व्यसूयत. — G1 resumes from 18d.

19 a) K3 तमलाबुं; K4 तदलांबु; D1. 2 अलांबु तत्; T G2–4 ततस्तुंबं (cf. v.l. 18). — b) T1 M [s]थ (for स). — c) Śi K Dc D1–3. 5 ततो (for अथ). T2 G2–4 [अं]तरिक्षे (for °क्षात्). — d) Some MSS. °निःस्वनाः.

20 c) K1 Dn2 निष्काम्य; K4 D5 M2 निष्कम्य; G2 निष्कृत्य. — d) T G धार्य° (for गोप्य°).

21 a) Śi K Dc D1–3. 5 भांडेषु (for पात्रे°). — c) D1. 2 T1 तत्र (for ततः). — d) K1. 2 भागशः; K4 Dn D1. 3–6 T1 भारत (for पार्थिव).

22 a) D3 T2 G निर्दिष्टं; T1 दत्तं तत्; M दिष्टं तत् (for दिष्टं ते). — b) B1. 3. 4 जना° (for नरा°). — d) Śi K1. 4

C. 3. 8847
B. 3. 106. 23
K. 3. 105. 24

ततः पुत्रसहस्राणि षष्टिं प्राप्स्यसि पार्थिव ॥ २१
महादेवेन दिष्टं ते पुत्रजन्म नराधिप ।
अनेन क्रमयोगेन मा ते बुद्धिरतोऽन्यथा ॥ २२

इति श्रीमहाभारते आरण्यकपर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

१०५

लोमश उवाच ।
एतच्छ्रुत्वान्तरिक्षाच्च स राजा राजसत्तम ।
यथोक्तं तच्चकाराथ श्रद्दधद्भरतर्षभ ॥ १
षष्टिः पुत्रसहस्राणि तस्याप्रतिमतेजसः ।
रुद्रप्रसादाद्राजर्षेः समजायन्त पार्थिव ॥ २
ते घोराः क्रूरकर्माण आकाशपरिसर्पिणः ।
बहुत्वाच्चावजानन्तः सर्वाँल्लोकान्सहामरान् ॥ ३
त्रिदशांश्चाप्यबाधन्त तथा गन्धर्वराक्षसान् ।
सर्वाणि चैव भूतानि शूराः समरशालिनः ॥ ४
वध्यमानास्ततो लोकाः सागरैर्मन्दबुद्धिभिः ।
ब्रह्माणं शरणं जग्मुः सहिताः सर्वदैवतैः ॥ ५
तानुवाच महाभागः सर्वलोकपितामहः ।
गच्छध्वं त्रिदशाः सर्वे लोकैः सार्धं यथागतम् ॥ ६
नातिदीर्घेण कालेन सागराणां क्षयो महान् ।
भविष्यति महाघोरः स्वकृतैः कर्मभिः सुराः ॥ ७
एवमुक्तास्ततो देवा लोकाश्च मनुजेश्वर ।

D₂ भूद् (for ते). D₃. ₆ मा ते भूद्बुद्धिरन्यथा.

Colophon om. in D₅. — *Major parvan:* Ś₁ K₁. ₂ Dn₂ D₆ T₂ G₂–₄ M₁ आरण्य. — *Sub-parvan:* B₄ Dc तीर्थयात्रा, followed by आगस्त्य. K₁. ₃. ₄ D₁. ₃ (om. sub-parvan name) mention only लोमशतीर्थयात्रा (followed by आगस्त्य in K₄); B₁–₃ Dn D₄. ₆, likewise, only आगस्त्य. — *Adhy. name:* K₃ सगरोपाख्यानं. — *Adhy. no.* (figures, words or both): Dn S 105 (Dn₂. n₃ M₂ 107); D₁ 109. — *Śloka no.:* Dn D₁ 23.

105

1 ᵃ) B₂–₄ अंतरीक्षात्. G₁. ₂ वै; M स (for च). — ᵇ) M राजा वै (for स राजा). B₁. ₄ Dc Dn₁. n₃ D₃ T₂ G₁. ₃ °सत्तमः (for °सत्तम). Ś₁ K₁. ₂ राजा राजन्यसत्तम. — ᵈ) Ś₁ K₁. ₂ D₁. ₃. ₅ श्रद्धावान् (for श्रद्दधद्). — After 1, K₁. ₂ B (B₃ om. lines 2-4) D (except D₁–₃. ₅) G₃ M₂ ins.:

516* एकैकशस्ततः कृत्वा बीजं बीजं नराधिपः ।
घृतपूर्णेषु कुम्भेषु तान्भागान्विदधे ततः ।
धात्रीश्चैकैकशः प्रादात्पुत्ररक्षणतत्परः ।
ततः कालेन महता समुत्तस्थुर्महाबलाः ।

[(L. 1) K₁ जीवं जीवं; B₁ De बीजं (B₁ °ज-) पूर्णं (for बीजं बीजं). B₁. ₂. ₄ De °षिप (for °षिपः). — (L. 2) B₁. ₄ कुंडेषु (for कुम्भेषु). B₁ De गर्भान् (for भागान्). De निदधे (for विदधे). B₂ De पुनः (for ततः). — (L. 4) K₁ कालेन महता पष्टिः (for the prior half).]

2 B₃ om. 2ᵃ–3ᵇ. — 2ᵃ=3. 104. 14ᵃ. — ᵈ) T G सगरस्य महात्मनः.

3 B₃ om. 3ᵃᵇ (cf. v.l. 2). — ᵇ) D₁. ₂ आकाशे; D₄ आकाशं. — ᵈ) B₂ सहेश्वरान्; T G₂–₄ सुरासुरान्; G₁ चराच°; M₂ सहासु° (for सहाम°).

4 ᵃ) Ś₁ K B₁. ₃ Dc D₁–₃. ₅ T₁ [अ]भ्य (B₁. ₃ D₁ [अ]प्य) धावंत (for [अ]प्यधा°). — ᶜ) Dc तथा सर्वाणि भूतानि.

5 ᵃ) Dc T₁ G₁ M₂ तदा; T₂ G₂–₄ तथा (for ततो). — ᵈ) Ś₁ K₁. ₂ T₁ सर्वदेवताः; D₆ T₂ G °देवतैः; M₂ °वेदितैः.

6 ᵃ) K₂ Dc D₂ T₂ G₂ महाभाग; B₂ ततो ब्रह्मा. — 6ᵇ=1. 6. 5ᵇ; 204. 24ᵇ. — K₂ om. (hapl.) 6ᵇᶜ. — ᵈ) Ś₁ K₁. ₂ °क्रमं (for °गतम्).

7 After 7, M₂ ins.:

517* कपिलं ते समासाद्य विनशिष्यन्त्यसंशयम् ।

8 ᵃ) K₄ च ते; B₂. ₄ D (except D₁. ₃. ₅) तु ते; G₁ तदा (for ततो). — ᵇ) B₁. ₃ G₁ M मनुजोत्तम; T₁ °जाधिप. — ᵈ) G₄ M प्रति° (for विप्र°).

पितामहमनुज्ञाप्य विप्रजग्मुर्यथागतम् ॥ ८
ततः काले बहुतिथे व्यतीते भरतर्षभ ।
दीक्षितः सगरो राजा हयमेधेन वीर्यवान् ।
तस्याश्वो व्यचरद्भूमिं पुत्रैः सुपरिरक्षितः ॥ ९
समुद्रं स समासाद्य निस्तोयं भीमदर्शनम् ।
रक्ष्यमाणः प्रयत्नेन तत्रैवान्तरधीयत ॥ १०
ततस्ते सागरास्तात हृतं मत्वा हयोत्तमम् ।
आगम्य पितुराचख्युरदृश्यं तुरगं हृतम् ।
तेनोक्ता दिक्षु सर्वासु सर्वे मार्गत वाजिनम् ॥ ११
ततस्ते पितुराज्ञाय दिक्षु सर्वासु तं हयम् ।
अमार्गन्त महाराज सर्वं च पृथिवीतलम् ॥ १२
ततस्ते सागराः सर्वे समुपेत्य परस्परम् ।
नाध्यगच्छन्त तुरगमश्वहर्तारमेव च ॥ १३

आगम्य पितरं चोचुस्ततः प्राञ्जलयोऽग्रतः ।
ससमुद्रवनद्वीपा सनदीनदकन्दरा ।
सपर्वतवनोद्देशा निखिलेन मही नृप ॥ १४
अस्माभिर्विचिता राजञ्शासनात्तव पार्थिव ।
न चाश्वमधिगच्छामो नाश्वहर्तारमेव च ॥ १५
श्रुत्वा तु वचनं तेषां स राजा क्रोधमूर्छितः ।
उवाच वचनं सर्वांस्तदा दैववशानृप ॥ १६
अनागमाय गच्छध्वं भूयो मार्गत वाजिनम् ।
यज्ञियं तं विना ह्यश्वं नागन्तव्यं हि पुत्रकाः ॥ १७
प्रतिगृह्य तु संदेशं ततस्ते सगरात्मजाः ।
भूय एव महीं कृत्स्नां विचेतुमुपचक्रमुः ॥ १८
अथापश्यन्त ते वीराः पृथिवीमवदारिताम् ।
समासाद्य बिलं तच्च खनन्तः सगरात्मजाः ।

C. 3. 8871
B. 3. 107.
K. 3. 106.

9 [a]) K1 महतिभिर् (for बहु°). T G1. 3. 4 ततो बहुतिथे काले. — [c]) K1 व्यचरन्; K4 विचरन्; G2 [s]प्यचरद् (for व्यचरद्). Ś1 K1 Dc भूमौ (for भूमिं). — [f]) K3 च; K4 B Dc Dn D4. 6 स; D5 तु; G2 M2 तैः (for सु-). — After 9, S ins.:

518* सर्वैरेव महोत्साहैः स्वच्छन्दप्रचरो नृप ।

[T1 महाभागैः (for महां°). G1 °प्रचरान्; M1 °प्रसरो (for °प्रचरो).]

10 [a]) B1 Dc D5 S स समुद्रं (by transp.). D1. 2 च (for स).

11 [a]) T G3 तत्र (for तात). — [b]) K1. 4 Dc S (except G2 M2) ज्ञात्वा; D1. 2 दृष्ट्वा (for मत्वा). — [c]) Dc D3 G1 आगत्य (for आगम्य); cf. v.l. 14. K1 Dc2 D3 आचक्षुर् (for °ख्युर्). — [f]) Ś1 K D1–3 भूयो; T G पुत्रा (for सर्वे). — After 11, B1 ins. a variant of 17cd (v.l. नागंतव्यमृते हयं for the posterior half); while S ins.:

519* ससमुद्रवनद्वीपां विचिन्वन्तो वसुंधराम् ।

12 [a]) D5 ततः पित्राज्ञया सर्वे. — [c]) Ś1 K D1–3. 5 मृगयंतो (for अमार्गन्त). D3. 5 महीपाल; G2 हयं राजन् (for महा°). — [d]) Ś1 K D3. 5 संचेरुः; Dc सर्वं हि; D1. 2 चेरुश्च (for सर्वं च).

13 [d]) Ś1 K D1. 2 अभि- (for अश्व-). B3. 4 Dc वा (for च); cf. v.l. 15.

14 T1 om. (hapl.) 14–15. — [a]) Dc G1 आगत्य (for आगम्य); cf. v.l. 11. Ś1 K1. 2 पितरं प्रोचुः; K3 पितुरुद्विग्नाः. — After 14ab, S (T1 om.) ins.:

520* स्थित्वा सर्वे महीपालाः सागराः सहितास्तदा ।

— [f]) Ś1 K D1–3. 5 नि(D5 ह्य)खिलेयं (for °लेन).

15 T1 om. 15 (cf. v.l. 14). — [a]) Ś1 K1. 2 (? gloss) मार्गिता (for विचिता); cf. 18d. — D3 reads 15b–16b after 17a. — [c]) Dc अव°; T3 G2–4 अभि° (for अधि°). — [d]) B1. 3. 4 Dc वा (for च); cf. v.l. 13.

16 For D3, cf. v.l. 15. — [a]) K1. 3 B1 D3 तेषां वचनं (by transp.). — [c]) Ś1 K D1–3. 5 तनयान्; G1 सहितान् (for वचनं).

17 After 17a, D3 reads 15b–16b. — [c]) K3 [अ]प्यश्वं; K4 [अ]श्वं मे; T3 G3. 4 चाश्वं (for ह्यश्वं).

18 [b]) B Dn D3. 4. 6 T3 G3 पितुं (for तत°). — K3 T3 G3 om. (hapl.) 18c–19d. — [c]) K (K3 om.) Dc D1–3. 5 G3 M1 सर्वां (for कृत्स्नां).

19 K3 T3 G3 om. 19abcd (cf. v.l. 18). — [a]) G2 M2 °पश्यंस्ततो (for °पश्यन्त ते). — After 19ab, T1 G1. 3. 4 M ins.:

521* समुद्रे पृथिवीपाल पदमार्गं च वाजिनः ।

— [c]) D1. 2 G3. 4 तत्र (for तच्च). — [d]) B D (except D1–3. 5) G2 M1 [अ]प्यखनन्; T1 खनंश्च (for खनन्तः). — [e]) Ś1 K1. 2 अंकुशैं°; K3 चातुशैं°; K4 हंसुकैं°; B3 हेसुकैं°; B4 हिसुकैं°; Dc D4. 6 हेषुकैं°; D3 हंसुखैं°; D5 सुमुखैं°; S मुसलैं° (for हेषुकैं°). D1 कुद्दालकैसुकैश्चैव; D2 सकुद्दाद्विस-

C. 3. 8871
B. 3. 107. 23
K. 3. 106. 24

कुद्दालैर्हरिभिश्चैव समुद्रमखनंस्तदा ॥ १९
स खन्यमानः सहितैः सागरैर्वरुणालयः ।
अगच्छत्परमामार्तिं दार्यमाणः समन्ततः ॥ २०
असुरोरगरक्षांसि सत्त्वानि विविधानि च ।
आर्तनादमकुर्वन्त वध्यमानानि सागरैः ॥ २१
छिन्नशीर्षा विदेहाश्च भिन्नजान्वस्थिमस्तकाः ।
प्राणिनः समदृश्यन्त शतशोऽथ सहस्रशः ॥ २२
एवं हि खनतां तेषां समुद्रं मकरालयम् ।
व्यतीतः सुमहान्कालो न चाश्वः समदृश्यत ॥ २३
ततः पूर्वोत्तरे देशे समुद्रस्य महीपते ।
विदार्य पातालमथ संक्रुद्धाः सगरात्मजाः ।
अपश्यन्त हयं तत्र विचरन्तं महीतले ॥ २४
कपिलं च महात्मानं तेजोराशिमनुत्तमम् ।
तपसा दीप्यमानं तं ज्वालामिरिव पावकम् ॥ २५

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

लोमश उवाच ।
ते तं दृष्ट्वा हयं राजन्संप्रहृष्टतनूरुहाः ।
अनादृत्य महात्मानं कपिलं कालचोदिताः ।
संक्रुद्धाः समधावन्त अश्वग्रहणकाङ्क्षिणः ॥ १
ततः क्रुद्धो महाराज कपिलो मुनिसत्तमः ।
वासुदेवेति यं प्राहुः कपिलं मुनिसत्तमम् ॥ २
स चक्षुर्विवृतं कृत्वा तेजस्तेषु समुत्सृजन् ।
ददाह सुमहातेजा मन्दबुद्धीन्स सागरान् ॥ ३

कैश्चैव. — [1]) B D (except D1-3. 5) G2 M यत्नमास्थिताः (for अखनंस्तदा). T2 G1. 3. 4 ततः (for तदा).

20 B4 om. 20. — [d]) B (B4 om.) Dc Dn1. n2 D3 दीर्यमाणः.

22 [b]) Ś1 K1. 2 संभिन्नकुक्षिसंधयः; K3 भिन्नयंत्रास्थिसंधयः; K4 °जान्वस्थिसंधयः; B Dc Dn D4-6 °स्वगस्थिसंधयः (B1 °जस्वस्थिसंचयाः); D3 °जास्वस्थिसंधयः; G1 °जास्वस्थिमज्जताः.

23 [a]) T2 G3 वि-; G2 M1 तु; M2 नि- (for हि). — [b]) K3 B D (except D3. 5) वरुणा° (for मकरा°).

24 [b]) Ś1 K D3 विशां (for मही-). — After 24[ab], M2 ins.:

522* विदार्यमाणां पृथिवीं सागरैर्बलदर्पितैः ।

— [c]) Ś1 K1. 2. 4 °मधः; D1. 2. 5 °तलं; T G2. 3 M1 °मथो (for °मथ). M2 ते प्रविष्टास्तु पातालं. — T1 om. 24[c]-25[d]. — [f]) Ś1 K2. 4 D1-3. 5 M1 महीपते; Dc महीतलं; M2 विशां पते (for महीतले).

25 T1 om. 25 (cf. v.l. 24). — [c]) Ś1 K2 B D (except D1-3) तेजसा (for तपसा). B2. 4 Dn D4. 6 M2 तु (for तं). — [d]) T2 G ज्वलंतम् (for ज्वालाभिर्). — S (T1 om.) ins. after 25 (G2 M2, after 25[ab]):

523* दृष्ट्वा हि हृषिताः सर्वे बभूवुः सागरास्तदा ।

16 ^{a}) T_2 $G_{3.4}$ स्तबकां° (for तिलकां°). — ^{b}) Ś$_1$ K $D_{3.5}$ प्रोत्फुल्लितान्; B Dc Dn $D_{4.6}$ T G_3 सुपुष्पितान्. Ś$_1$ K$_{1.2}$ S (except G_1 M_3) अवनम्या°; $D_{1.2}$ चैव विनामयानां (for अवनाम्यावभज्य). — ^{c}) $D_{1.2}$ रहोगता सा मदा° (sic).

17 ^{a}) Ś$_1$ K$_1$. $_2$ D_1 अथार्ष्य°; K$_3$ Dc $Dn_{2.n_3}$ D_{2-4} अथर्ष्य°. D_5 निरीक्ष्य (for समी°). — Ś$_1$ K$_2$ om. from पीड्य (in 17^b) up to विचेतनः (in 18^b). — After 17^a, K$_1$ reads 18^{bcd}. — ^{b}) K (K$_2$ om.) D_3 गात्रम् (for कायम्). — ^{c}) K$_3$ D_3 T_1 M अवेक्ष° (as in text); T_2 G_3 अन्वेष°; G_4 अन्वेक्ष°; the rest अवेक्ष्य°.

18 K$_1$ reads 18^{bcd} after 17^a. Ś$_1$ K$_2$ om. up to विचेतन (cf. v.l. 17). — ^{b}) Ś$_1$ K Dc $Dn_{1.n_2}$ D_{1-6} ऋष्यशृंगः. — ^{c}) K$_{3.4}$ $D_{2.3.5}$ गतः स; T_2 G_{2-4} गतोथ (for गतेन). Ś$_1$ K$_2$ Dn $D_{1.4.6}$ T_2 G शून्ये.

19 ^{b}) Ś$_1$ K$_{1.2.4}$ D_{1-3} लोमभिर् (for रोमभिर्). Ś$_1$ K$_2$ D_3 आनखादि; K$_3$ आजटाभिः; K$_4$ Dc आनखाग्रं; $D_{1.2}$ आनखांतः. — ^{d}) S विभंडकः.

20 ^{b}) Ś$_1$ K$_{1.2}$ एकां (for एकं). Ś$_1$ K $D_{3.5}$ °बुद्धि

C. 3. 10048
B. 3. 111. 21
K. 3. 112. 21

सोऽपश्यदासीनमुपेत्य पुत्रं
ध्यायन्तमेकं विपरीतचित्तम् ।
विनिःश्वसन्तं मुहुरूर्ध्वदृष्टिं
विभाण्डकः पुत्रमुवाच दीनम् ॥ २०
न कल्प्यन्ते समिधः किं नु तात
कच्चिद्धुतं चाग्निहोत्रं त्वयाद्य ।
सुनिर्णिक्तं स्रुक्स्रुवं होमधेनुः
कच्चित्सवत्सा च कृता त्वयाद्य ॥ २१
न वै यथापूर्वमिवासि पुत्र
चिन्तापरश्चासि विचेतनश्च ।
दीनोऽतिमात्रं त्वमिहाद्य किं नु
पृच्छामि त्वां क इहाद्यागतोऽभूत् ॥ २२

इति श्रीमहाभारते आरण्यकपर्वणि एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

ऋश्यशृङ्ग उवाच ।
इहागतो जटिलो ब्रह्मचारी
न वै ह्रस्वो नातिदीर्घो मनस्वी ।
सुवर्णवर्णः कमलायताक्षः
सुतः सुराणामिव शोभमानः ॥ १
समृद्धरूपः सवितेव दीप्तः
सुशुक्लकृष्णाक्षतरश्चकोरैः
नीलाः प्रसन्नाश्च जटाः सुगन्धा
हिरण्यरज्जुग्रथिताः सुदीर्घाः ॥ २
आधाररूपा पुनरस्य कण्ठे

(for °चित्तम्). — [d]) S (except G4) विभंडकः. M तमुवाचाथ (for पुत्रमुवाच).

21 [a]) B1 विद्यंते; T2 G2–4 कल्पिताः (for कल्प्यन्ते). — [b]) T2 G2–4 ना° (for चा°). — [c]) B स्रुक्श्रुवं. — [d]) Ś1 सर्वात्मा (for सवत्सा). Ś1 K2 B2 Dn D1. 2. 4. 6 [अ]द्य; K1 [अ]थ; D5 न (for च). Ś1 B2 Dn D2–4. 6 च (for [अ]द्य).

22 [a]) Ś1 इहास्य (sic); K1. 2 इहाद्य; De एवासि; D1. 2 इवाद्य (for इवासि). — [b]) Ś1 T G3. 4 M1 [अ]पि (for [अ]सि). — [c]) Ś1 K D1. 2. 3 (before corr.). 5 M1 [s]निमित्तं (K1 °यमात्रं) (for ऽतिमात्रं). K2 त्वमहादि (sic); D1. 2 T1 G1 M किमिहाद्य; T2 G2–4 किमिवाद्य. N G1 किं नु (D1 कच्चित्); T G2–4 खिन्नः; M1 पुत्र (for किं नु, as in M2 only!). — [d]) Ś1 K1 M त्वा (for त्वां). G1 M2 किम् (for क). D1. 2 T2 G2–4 M1 [अ]भि-; D3 [अ]पि (for [अ]द्य).

Colophon. — *Major parvan:* Ś1 K1. 2 Dn2 T2 G2–4 M1 आरण्य. — *Sub-parvan:* M1 तीर्थयात्रा, followed by ऋश्यशृंगोपाख्यान. K4 D1 (om. sub-parvan name) mention only लोमशतीर्थयात्रा, followed by ऋष्यशृंगोपाख्यान; B De Dn D3–6, likewise, only ऋष्यशृंगोपाख्यान. — *Adhy. name:* B4 विभांडकप्रभः. — *Adhy. no.* (figures, words or both): K1 16 (=116); Dn1 110; Dn2. n3 S 112 (M2 114); D1 116. — *Śloka no.:* Dn 23; D1 28.

112

1 Cf. Jātaka (ed. Fausböll), vol. 5, No. 526, Gāthā 28. — [b]) D1. 2 न चानि-; M1 नाति- (for न वै). — [c]) Ś1 K1. 2 °यतेक्षणः (for °यताक्षः). — [d]) K4 सुरासुराणाम्; Dn D4. 6 G4 स्वतः सुराणाम्. G1 लोभ° (for शोभ°).

2 [a]) K4 समिद्धरूपः. — [b]) D1 स (for सु-). K2. 4 (marg. *sec. m.*) °क्षितरश्; K4 (orig.) °क्षिधरश्; D2 °क्षरतश्; M1 °क्षिकृनश् (for °क्षतरश्). K2. 4 (marg. *sec. m.* as in text) D6 च गौरः; D1 च गात्रैः; M2 चकोरात् (for चकोरैः). K1 B1 De सुशुक्लकृष्णाक्षिरती (K1 °ते)व गौरः; K3 °कृष्णाक्षतलश्चकोरात्; B2–4 Dn D3. 4. 6 सुश्लक्ष्ण(B3 °कक्ष)कृष्णाक्षिरतीव (D3 °तरश्; *sup. lin.* °रतीव) गौरः (B4 दीप्तः); T1 G1 सुश्लक्ष्णकृष्णाक्ष(G1 °क्षि)तरश्चकोरात्; T2 G2–4 सुश्लक्ष्णवाकृष्णतार(G4 °तरा)श्चकोरात् (T2 [after corr.] G3 °श्च गौरः); text exactly as in Ś1 only! — [c]) Ś1 K D3. 5 transp. प्रसन्नाः and सुगन्धाः.

विभ्राजते विद्युदिवान्तरिक्षे ।
द्वौ चास्य पिण्डावधरेण कण्ठ-
मजातरोमौ सुमनोहरौ च ॥ ३
विलग्नमध्यश्च स नाभिदेशे
कटिश्च तस्यातिकृतप्रमाणा ।
तथास्य चीरान्तरिता प्रभाति
हिरण्मयी मेखला मे यथेयम् ॥ ४
अन्यच्च तस्याद्भुतदर्शनीयं
विकूजितं पादयोः संप्रभाति ।
पाण्योश्च तद्वत्स्वनवन्निबद्धौ
कलापकावक्षमाला यथेयम् ॥ ५
विचेष्टमानस्य च तस्य तानि
कूजन्ति हंसा सरसीव मत्ताः ।
चीराणि तस्याद्भुतदर्शनानि
नेमानि तद्वन्मम रूपवन्ति ॥ ६
वक्त्रं च तस्याद्भुतदर्शनीयं
प्रव्याहृतं ह्लादयतीव चेतः ।
पुंस्कोकिलस्येव च तस्य वाणी
तां शृण्वतो मे व्यथितोऽन्तरात्मा ॥ ७
यथा वनं माधवमासि मध्ये
समीरितं श्वसनेनाभिवाति ।
तथा स वात्युत्तमपुण्यगन्धी
निषेव्यमाणः पवनेन तात ॥ ८
सुसंयताश्चापि जटा विभक्ता

C. 3. 1005*
B. 3. 112.
K. 3. 113.

---

3 Cf. Jātaka (ed. Fausböll), vol. 5, No. 526, Gāthā 29. — D1. 2 read 3 after 5. — [a]) Śi K1. 2 Bim.am आश्चर्यरूपा (Śi °रूपः); K3. 4 (marg. *sec. m.*) D1–3 T2 G आधाराभूता (G1. 2. 4 °तः); B3 अवाल° (m आधार°); T1 आधाररूपः; M1 आधाररूपं. K4 आश्चर्यभूतान्प-रिशुष्य कंठे; D5 आश्चर्यरूपाणि विमुंच्य कंठे. — [b]) B2. 3 अंतरीक्षे. — [c]) T2 G2–4 [अ]थ वृत्त(G2 रक्त)रूपौ (for [अ]धरेण कण्ठम्). K2. 3 B Dc Dn D4–6 कंठात्; D3 कक्षात्; M2 कर्णः (for कण्ठम्). — [d]) Śi °लोमं; K D1–3. 5 G1 M1 °लोमौ; G4 °रूपौ (for °रोमौ). Śi °हरं (for °हरौ). S मे (for च).

4 [b]) Śi कश्चित्; K1. 2 कश्चित्; S (except T1) कटी (for कटिश्). D3 तु (for च). Śi K1. 2 कस्य (for तस्य). K3 [अ]विकृति-; D3 [अ]तिशय- (for [अ]तिकृत-). Śi K1. 2 -प्रणामः (for -प्रमाणा). — [c]) B Dn D4. 6 G1 M1 चीरां-तरतः; T2 G3. 4 M2 °तरता. K1. 3. 4 D1–3 वि- (for प्र-). — After 4, D1. 2 ins.:

550* अन्यच्च तस्याद्भुतदर्शनीया
विभाति माला कनकप्रभासा ।
कण्ठे स्थिता वक्षसि घूर्णमाना
यथाक्षमाला भवता निबद्धा ।

5 Śi K1. 2 om. 5. — [b]) K3. 4 B4 (*sup. lin.* as in text) Dc D3 T1. 2 (before corr.) G3. 4 M2 विकुंचितं (for विकूजितं). K3. 4 D1–3. 5 संवि° (for संप्र°). — [c]) B1 पाणौ च; D1 पाण्यौ च (for पाण्योः). K3. 4 M1 तद्-द्वभतुर्; D1 तौ सस्वनतुर्; D3 तद्वद्विभृक्ष्नन् (sic); T1 तस्याश्च तनू; G1. 2. 4 तद्वच्च तनू; M3 तद्वद्वहुसं- (for तद्वत्स्वनवन्). — After 5, D1. 2 read 3.

6 [a]) D1. 2 तस्य तात; M (by transp.) तानि तस्य. — [b]) Śi K1. 2 transp. हंसाः and मत्ताः. D5 शरदीव (for सरसीव). — [c]) D1. 2 °द्भुतरूपवंति. — [d]) Śi K1. 2 तत्तत्सम- (for तद्वन्मम).

7 Cf. Jātaka (ed. Fausböll), vol. 5, No. 526, Gātha 30. — [a]) D1. 2 वक्त्रं हि चंद्रप्रतिमं च तस्य. — [b]) Śi K3 प्रह्लादयत्; K4 प्रत्याहृतं; T1 G1 M2 सव्याहृतं; T2 G3. 4 संव्या°; G2 सुव्या°. D5 चित्तं (for चेतः). — [d]) K3 reads 8[d] before 7[d]. K1 T1 व्यथते°; K4 [S]व्यथता° (for व्यथितो°). K3 शृण्वं ततो मे व्यथितांतरात्मा.

8 Cf. Jātaka (ed. Fausböll), vol. 5, No. 526, Gāthā 36. — [a]) B1. 3 Dc D5 T1. 2 (before corr.) G2–4 M माधवमासमध्ये; D1. 2 माधवे चैव मासि. — [b]) D4. 6 समी-रिते. Śi [आ]वि-; K1. 3 D3. 4. 6 [ए]व; K3. 4 [अ]ति-; B1. 3 Dc D5 G2 [अ]व-; B2. 4 Dn D1. 2 [इ]व (for [अ]-भि-). All MSS. except K4 G4 M1 -भाति (for -वाति). Cf. Lüders, *op. cit.*, 1897, p. 123. — [c]) B Dn D3–6 S (except M1) भाति; Dc ताम् (for वाति). D1 तथा च साप्युत्तम°. K3 °गंधवंति (for °पुण्यगन्धी). — [d]) K3 reads 8[d] before 7[d]. Some N MSS. °मानः (for °माणः). Śi K1 पुनरेव (for पवनेन). K3 निष्पिष्यमाणस्य वनेन तातं.

9 [a]) K3 Dc असंयताश्; B3 सुसंवृताश्. D1. 2 M1 चास्य (for चापि). — D5 om. from जटा up to वृत्तम् (in 10[a]). K4 विमुक्ता; Dn D4. 6 °भक्ता (for °भक्ता).

C. 3. 10059
B. 3. 112. 9
K. 3. 113. 9

द्वैधीकृता भान्ति समा ललाटे ।
कर्णौ च चित्रैरिव चक्रवालैः
समावृतौ तस्य सुरूपवद्भिः ॥ ९
तथा फलं वृत्तमथो विचित्रं
समाहनत्पाणिना दक्षिणेन ।
तद्भूमिमासाद्य पुनः पुनश्च
समुत्पतत्यद्भुतरूपमुच्चैः ॥ १०
तच्चापि हत्वा परिवर्ततेऽसौ
वातेरितो वृक्ष इवावधूर्णः ।
तं प्रेक्ष्य मे पुत्रमिवामराणां
प्रीतिः परा तात रतिश्च जाता ॥ ११
स मे समाश्लिष्य पुनः शरीरं
जटासु गृह्याभ्यवनाम्य वक्त्रम् ।
वक्त्रेण वक्त्रं प्रणिधाय शब्दं
चकार तन्मेऽजनयत्प्रहर्षम् ॥ १२
न चापि पाद्यं बहु मन्यतेऽसौ
फलानि चेमानि मयाहृतानि ।
एवंव्रतोऽस्मीति च मामवोच-
त्फलानि चान्यानि नवान्यदान्मे ॥ १३
मयोपयुक्तानि फलानि तानि
नेमानि तुल्यानि रसेन तेषाम् ।
न चापि तेषां त्वगियं यथैषां
साराणि नैषामिव सन्ति तेषाम् ॥ १४
तोयानि चैवातिरसानि मह्यं
प्रादात्स वै पातुमुदाररूपः ।
पीत्वैव यान्यभ्यधिकः प्रहर्षो
ममाभवद्भूश्चलितेव चासीत् ॥ १५
इमानि चित्राणि च गन्धवन्ति
माल्यानि तस्योद्ग्रथितानि पट्टैः ।
यानि प्रकीर्येह गतः स्वमेव
स आश्रमं तपसा द्योतमानः ॥ १६
गतेन तेनास्मि कृतो विचेता

— [b]) Ś1 द्विधी°; K1. 2 G1. 2 द्विधा° (for द्वैधी°). K3 B De Dn D4. 6 नानि-; D1. 2 साति- (for भान्ति). S ललाटदेशे (for समा ललाटे). — [c]) K4 B1. 4 D1. 2 S (except T1 G1) वि-; D3 तु (for च). S (except M1) वर- (for इव). K1. 3 B De Dn D3. 4. 6 T2 G1–3 M1 चक्रवाकैः; D1. 2 वक्रचक्रैः (for चक्रवालैः).

10 Cf. Jātaka (ed. Fausböll), vol. 5, No. 526, Gāthā 37. — D5 om. up to वृत्तम् (cf. v.l. 9); Ś1 K1. 2 om. 10. — [b]) K4 B Dn D4–6 °हरन्; D1. 2 T1 G1 °हतं; T2 G2–4 °हतं (for °हनत्). — K4 repeats 10 (reading °वह्निः [cf. 9[d]] for °मुच्चैः first time).

11 [a]) K1. 2 D3 G4 तथापि; B1–3 Dn D4. 6 तच्चाभि-; D1. 2 तथा हि; D5 तच्चाव- (for तच्चापि). Ś1 K1. 2. 4 D3 हित्वा; G1 गत्वा (for हत्वा). Ś1 K1. 2 D5 स्म; K4 D1–3 सः (for ऽसौ). — [b]) D5 हरिद्वनं (for वातेरितो). Ś1 K प्रघूर्णन्; B D G1. 4 [अ]वघूर्णन् (D5 °चूर्णयन्); T2 G3 [अ]वघूर्णः; G2 [अ]वघूर्णितः (for [अ]वघूर्णः). — [c]) Ś1 K D1. 3. 5 संप्रेक्ष्य तं (Ś1 ते); B De Dn D4. 6 तं प्रेक्षतः (for तं प्रेक्ष्य मे). — [d]) Ś1 K2 पुरा; T2 G3. 4 तदा (for परा). D1. 2 पुनश्च (for रतिः). Ś1 K1–3 D3 मेभूत् (for च जाता). — After 11, K4 reads 16–17.

12 [b]) Ś1 K1. 2 गृह्णाति (for गृह्याभि-). Ś1 T G2–4 M °नम्य (for °नाम्य). G1 जटासु नम्याभ्यवरुह्य वक्त्रं. — [c]) D1 T1 G1 M वक्त्रे च (for वक्त्रेण). — [d]) T2 G2–4 च (for प्र-).

13 [a]) T1 परिगृह्यते (for बहु मन्यते). Ś1 K D3. 5 सः (for ऽसौ). — [b]) K4 D5 समा° (for मया°). — [d]) K2. 3 B Dn D4. 6 समाददन्मे; De स चाददन्मे; D1. 2 च मे प्रयच्छत्; D3 विधान्यदान्मे; D5 नवाददान्मे (for नवान्यदान्मे). Ś1 अदन् (for अदान्).

14 [a]) Ś1 K2 D1–3. 5 G2 M2 °भुक्तानि (for °युक्तानि). B2–4 De Dn D4. 6 G1. 2 यानि; D1. 2 तात (for तानि). — [b]) K3 D1–3. 5 फलानि (for रसेन). — After 14, K1 ins. 551*.

15 [c]) S (except T1 G1) तानि (for यानि). D1. 2 T G3. 4 [अ]भ्यधिकं (for °कः)

16 For sequence of K4 cf. v.l. 11. — [b]) D1 T G ग्रथितानि (for [उ]द्ग्रथि°). D1. 2 चाग्र मे (for पट्टैः). — [c]) T2 (before corr.) G1. 2. 4 [ए]व (for [ह्]ह). Ś1 K D3 तपस्वी; D1. 2 तरस्वी (for स्वमेव). — [d]) Ś1 K D1–3 स्वम्; T1 तम् (for स).

17 For sequence of K4 cf. v.l. 11. — [b]) K3 B

गात्रं च मे संपरितप्यतीव ।
इच्छामि तस्यान्तिकमाशु गन्तुं
तं चेह नित्यं परिवर्तमानम् ॥ १७
गच्छामि तस्यान्तिकमेव तात
का नाम सा व्रतचर्या च तस्य ।
इच्छाम्यहं चरितुं तेन सार्धं
यथा तपः स चरत्युग्रकर्मा ॥ १८

इति श्रीमहाभारते आरण्यकपर्वणि द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

विभाण्डक उवाच ।
रक्षांसि चैतानि चरन्ति पुत्र
रूपेण तेनाद्भुतदर्शनेन ।
अतुल्यरूपाण्यतिघोरवन्ति
विघ्नं सदा तपसश्चिन्तयन्ति ॥ १
सुरूपरूपाणि च तानि तात
प्रलोभयन्ते विविधैरुपायैः ।
सुखाच्च लोकाच्च निपातयन्ति
तान्युग्रकर्माणि मुनीन्वनेषु ॥ २
न तानि सेवेत मुनिर्यतात्मा
सतां लोकान्प्रार्थयानः कथंचित् ।
कृत्वा विघ्नं तापसानां रमन्ते

C. 3. 10072
B. 3. 113. 3
K. 3. 114. 3

De Dn D4–6 °दृश्यतीव; G2 °तप्यते च; M2 °तप्यमेव (for °तप्यतीव). — [c]) G1 [आ]श्रमम् (for [अ]न्तिकम्). M1 एव (for आशु). — [d]) Ś1 K2 M1 तं चेह; K1. 4 ते चेह; K3 तथैव; G1 तं नेह; G2 तं चैव (for तं चेह).

18 [a]) T1 M गच्छाव (for गच्छामि). Ś1 K D3. 5 इच्छामि विज्ञातुमहं हि (K1. 2 च) तात. — [b]) Ś1 K2. 3 D5 सा स्याद् (for सा). K4 Dn D4. 6 ब्रह्म° (for व्रत°). Ś1 K1. 2. 4 D1–3. 5 हि (for च). — [d]) Ś1 K1 D1. 5 सं- (for स). B2. 4 Dn D4. 6 आर्यधर्मा; T1 G2 M उग्रधर्मा; T2 G3 उग्रधर्म; G1 इत्युग्रधर्मा; G4 आर्यधर्मः (for उग्रकर्मा). — K2 B3. 4 Dn D2 (marg. *sec. m.*). 4. 6 ins. after 18: K1, after 14:

551* चर्तुं तथेच्छा हृदये ममास्ति
दुनोति चित्तं यदि तं न पश्ये ।

Colophon. G4 partly broken. — *Major parvan:* Ś1 K1. 2 Dn2 T2 G2–4 M1 आरण्य. — *Sub-parvan:* B4 M1 तीर्थयात्रा, followed by ऋष्य(M1 °इय)श्रृंगोपाख्यान. K1. 4 B1–3 Dc Dn D2–6 (all om. sub-parvan name) mention only ऋष्यश्रृंगोपाख्यान; K3 D1, likewise, only लोमशतीर्थयात्रा, followed by ऋष्यश्रृंगोपाख्यान (D1 *vice versa*). — *Adhy. no.* (figures, words or both): K1 17 (=117); Dn2. n3 S (G4 broken) 113 (M2 115); D1 117. — *Śloka no.:* Dn 19: D1 21.

113

1 For stanzas 1–4, cf. Jataka (ed. Fausböll), vol. 5, No. 526, Gāthā 56. — [b]) B4 °द्भुतदर्शनानि. — [c]) K3 अघोररूपाणि; K4 B3. 4 Dc Dn D4–6 T2 G1. 3 M2 अतुल्यवीर्याणि; D1. 2 तुल्यप्रचाराणि (for अतुल्यरूपाणि). B Dc अतिरूप°; Dn D4. 6 अभिरूप° (for अतिघोर°). — [d]) T2 (before corr.) तात; G4 तथा (for सदा).

2 Cf. v.l. 1. — [a]) Ś1 T2 G3. 4 स्वरूप° (for सुरूप°). D1. 2 हि तानि; T2 G2–4 कृतानि; G1 M2 तु तात; M1 च तात (for च तानि). D5 तानि नो; S कृत्वा (G1 भूत्वा) (for तात). — [b]) Ś1 K1. 2 तैर्लोभयित्वा; K3 ते लोभ्य चैतान्; K4 Dc D3 तैर्लोभ्यमानान् (Dc °माना); D5 विलोभयित्वा; S प्रलोभ्य (T M1 विलोभ्य; G1 विमोह्य) भूयो (for प्रलोभयन्ते). D1. 2 तैर्लोभ्यमानोतिविधेयरूप (D2 °पी). — T1 om. 2[d]–3[d]. — [d]) B3 D (except D1–3. 5) S (except M1; T1 om.) °रूपाणि (for °कर्माणि). D1. 2 वने चरंति (for मुनीन्वनेषु).

3 Cf. v.l. 1. — T1 om. 3 (cf. v.l. 2). — [b]) Ś1 K D3. 5 T2 G3 कदा° (for कथं°). — [d]) K1. 2. 4 B1 G1 तपसा; K3 D5 ता(D5 त)पसां; B2–4 Dn D3. 4. 6 तापसः

C. 3. 10072
B. 3. 113. 3
K. 3. 114. 3

पापाचारास्तपसस्तान्यपाप ॥ ३
असज्जनेनाचरितानि पुत्र
पापान्यपेयानि मधूनि तानि ।
माल्यानि चैतानि न वै मुनीनां
स्मृतानि चित्रोञ्छबलगन्धवन्ति ॥ ४
लोमश उवाच ।
रक्षांसि तानीति निवार्य पुत्रं
विभाण्डकस्तां मृगयांबभूव ।
नासादयामास यदा त्र्यहेण
तदा स पर्यावृतेऽऽश्रमाय ॥ ५
यदा पुनः काश्यपो वै जगाम
फलान्याहर्तुं विधिना श्रामणेन ।
तदा पुनर्लोभयितुं जगाम
सा वेशयोषा मुनिमृश्यशृङ्गम् ॥ ६
दृष्ट्वैव तामृश्यशृङ्गः प्रहृष्टः
संभ्रान्तरूपोऽभ्यपतत्तदानीम् ।
प्रोवाच चैनां भवतोऽऽश्रमाय
गच्छाव यावन्न पिता ममैति ॥ ७
ततो राजन्काश्यपस्यैकपुत्रं
प्रवेश्य योगेन विमुच्य नावम् ।
प्रलोभयन्त्यो विविधैरुपायै-
राजग्मुरङ्गाधिपतेः समीपम् ॥ ८
संस्थाप्य तामाश्रमदर्शने तु
संतारितां नावमतीव शुभ्राम् ।
तीरादुपादाय तथैव चक्रे
राजाश्रमं नाम वनं विचित्रम् ॥ ९
अन्तःपुरे तं तु निवेश्य राजा
विभाण्डकस्यात्मजमेकपुत्रम् ।
ददर्श देवं सहसा प्रवृष्ट-
मापूर्यमाणं च जगज्जलेन ॥ १०

(for तपसः). K₃ चाप्यपाप; B₁ De तानपास्य (De °स्येत्); B₂. ₃ Dn D₃. ₄. ₆ तान्न पश्येत्; B₃ तान्न पास्ये; D₅ तापयंति; T₂ G₂. ₃ पातयंति; G₁. ₄ प्रापयंति (for तान्यपाप). D₁. ₂ M पापाचाराण्यतपस्कान्यपाप (D₁. ₂ °पापे).

4 Cf. v.l. 1. — [a]) Ś₁ K₁₋₃ °जनैराचरि°; D₁. ₂ °जनेनावग° (for °जनेनाचरि°). — [b]) K₁. ₃ B₁₋₃ De Dn₂ D₅ G₃ M पानानि (for पापानि). B₃ तत्र; D₅ G₁ तात; T₁ पुत्र (for तानि). — [d]) De पूतानि; T₁ ऋ°; T₂ G₃ व्र° (T₂ वृ° also); G₁ भृ°; G₂ धृ° (for स्मृ°). Ś₁ K₂. ₃ D₁₋₃. ₅ तान्युत्तमगंध°; K₁. ₄ चित्रोत्तमगंध°.

5 B₁ D (except D₁₋₃. ₅) S om. the ref. — [b]) S (except G₃) विभंडकः. K₃ T G₂. ₃ तं (for तां). — [c]) K₁ तदा; Dn₃ सदा; D₁ यथा (for यदा).

6 [b]) K₃. ₄ De D₁₋₃. ₅ विविधानि (for विधिना). K₁ B Dn D₄. ₆ [अ]श्रावणेन; K₂ श्रम°; De D₁₋₃. ₅ G₃. ₄ [आ]श्रमाच्च (D₁₋₃ °मान्मः; D₅ °मेभ्यः; G₃. ₄ °मेभौ); T₁ श्रमकेन; T₂ G₃ ममेति; G₁ काननानि; M₁ श्रमेण; M₂ चाश्रमेण (for श्राम°). — [d]) Ś₁ K₃ T₂ G₃ सा वेश्ययोषा; K₁ सा वेष्य°; K₄ G₁ सा वेश्या योषिन्; D₁ विवेश योषा; D₆ सा वैश्मयोषा; T₁ G₂. ₄ M सा वेशयोषिन्. D₁. ₂ ऋषिम् (for मुनिम्). N ऋष्य° (for ऋश्य°).

7 [a]) N ऋष्य° (for ऋश्य°). — [b]) G₂. ₄ स श्रांत° (for संभ्रान्त°). K₂ De D₁ न्यपतत्; B₂ G₄ [स]म्यगमत्; D₆ [स]म्यवदत्; T₁ G₂ ह्यभवत्; M₂ [स]म्यभवत् (for Sभ्यपतत्). — [c]) B₁. ₃ चैनं (for चैनां). Ś₁ K₁. ₂ B₁D₃. ₆ T₁ G₁. ₂. ₄ M₂ भवदाश्रमाय; K₄ Dn₃ °तः श्रमाय. — [d]) D₆ [अ]भ्युपैति; D₆ समेति (for ममैति).

8 Before 8, S (except T₁ G₄) ins. लोमशः. — [a]) D₁. ₂ [आ]मजं तं; T₁ G₁ [आ]शु पुत्रं; M₁ [ए]व पुत्रं (for [ए]कपुत्रं). — [b]) Ś₁ K₁ प्रालोभ्य; K₂ प्रलोभ-; K₃ पुण्यप्र-; K₄ पुण्येन; K₄m D₃. ₅ प्रलोभ्य (for प्रवेश्य). S (except M₂) वेगेन (for योः). Ś₁ K₁. ₂ विमुष्य मानं K₄ D₁. ₂ विमु(D₁ °मो)ह्यमानं. — Ś₁ om. 8[cd]. — [c]) K₁. ₂ B D G₁ M₂ °मोद° (for °लोभ°).

9 [a]) T G₂₋₄ M₁ °दर्शनाय; M₂ °दर्शनेषु (for °दर्शने तु). — [b]) B₁. ₄ De इहाति-; Dn D₄₋₆ अथाति- (for अनीव). — [c]) K₁ Dn₃ D₁ G₁ नीराद् (for तीराद्). — [d]) K₄ B₂₋₄ Dn D₄₋₆ नाव्या° (for राजा°).

10 [a]) De तत्र; D₁. ₂ तात; D₄ ते तु (for तं तु). — After 10[a], T₁ reads 12[a] (with v.l.) for the first time, *repeating* it in its proper place. — [b]) S विभंडक°. D₁. ₂ यज्ञरूपं (for एकपुत्रम्). — [c]) B₁ ववर्ष (for ददर्श). B₁ देवः; D₁ चैवं; D₂ चैनं; S (except M₂) मेघैः (for देवं). K₂ B₁ De D₁ T₁ G₂. ₄ प्रहृष्टम्; B₂. ₄ Dn₃ D₅ M₃ प्रवि°

स लोमपादः परिपूर्णकामः
सुतां ददावृश्यशृङ्गाय शान्ताम् ।
क्रोधप्रतीकारकरं च चक्रे
गोभिश्च मार्गेष्वभिकर्षणं च ॥ ११
विभाण्डकस्यात्रजतः स राजा
पशून्प्रभूतान्पशुपांश्च वीरान् ।
समादिशत्पुत्रगृद्धी महर्षि-
र्विभाण्डकः परिपृच्छेद्यदा वः ॥ १२
स वक्तव्यः प्राञ्जलिभिर्भवद्भिः
पुत्रस्य ते पशवः कर्षणं च ।
किं ते प्रियं वै क्रियतां महर्षे
दासाः स्म सर्वे तव वाचि बद्धाः ॥ १३
अथोपायात्स मुनिश्चण्डकोपः
स्वमाश्रमं फलमूलानि गृह्य ।
अन्वेषमाणश्च न तत्र पुत्रं
ददर्श चुक्रोध ततो भृशं सः ॥ १४
ततः स कोपेन विदीर्यमाण
आशङ्कमानो नृपतेर्विधानम् ।
जगाम चम्पां प्रदिधक्षमाण-
स्तमङ्गराजं विषयं च तस्य ॥ १५
स वै श्रान्तः क्षुधितः काश्यपस्ता-
न्घोषान्समासादितवान्समृद्धान् ।
गोपैश्च तैर्विधिवत्पूज्यमानो
राजेव तां रात्रिमुवास तत्र ॥ १६
संप्राप्य सत्कारमतीव तेभ्यः
प्रोवाच कस्य प्रथिताः स्थ सौम्याः ।
ऊचुस्ततस्तेऽभ्युपगम्य सर्वे
धनं तवेदं विहितं सुतस्य ॥ १७

C. 3. 10086
B. 3. 113. 17
K. 3. 114. 17

(for प्रवृ°). — D2 om. 10d–11a. — d) D1 ऋषेः सुतं तं सहस्राभिपूज्य. — After 10, D1 ins.:

552* समायाते ऋष्यशृङ्गेऽथ राजन् .

11 D2 om. 11a (cf. v.l. 10). — a) K4 °चेताः (for °कामः). — b) T2 G2–4 अदात् (for ददौ). N (except B Dn3 D1) ऋष्य° (for ऋश्य°). — c) Ś1 K1. 3. 4 तस्य (for चक्रे). D1. 2 °करामदात्सः (for °करं च चक्रे). — d) N गाश्चैव (D1–3 गावश्च) (for गोभिश्च). Ś1 च कर्मणा हि; K B D च कर्षणानि (for [अ]भिकर्षणं च).

12 a) S (except G1 M3) विभंडक°. — b) K3 पशुपान्प्रवीरान्; B4 °पांश्च धीमान्; D1. 2 °पालांश्च (D1 °पालकांश्च) धीरान्; T2 G2–4 °पालांश्च वीरान्; M1 °पांश्च धीरान्. — c) K1. 2 T2 G2–4 M1 पुत्रगृध्नुर्; D1. 2 यत्र चासौ; T1 M2 पुत्रगृद्धिर्. — d) S विभंडकः.

13 a) D1. 2 तत एवं (for प्राञ्जलिभिर्). — b) T2 G2. 3 कर्षणानि (for °णं च). — c) Ś1 K1. 4 B1 Dc D3 S किं (for वै). D3 transp. वै and क्रियतां. K3 किं कर्म ते करवामो महर्षे. — d) D1. 2 प्रब्रूहि (for दासाः स्म). D5 बालवृद्धाः; M2 चापि बद्धाः (for वाचि बद्धाः). K3 D3 दासाः सर्वे तव वाचि प्रवि(D3 °ब)द्धाः. — After 13, D1. 2 ins.:

553* तत्कोपशान्तेः प्रतिकारमेवं
कृत्वा सुखी संबभूवाथ राजा ।

14 a) K1. 3 T1 G2. 4 M2 अथापयात्. D1. 2 तीव्र°; G1. 4 बद्ध° (for चण्ड°). — b) Ś1 K1–3 D5 मूलफलानि (D5 °दि) (for फलमूलानि). K4 B Dc Dn D1. 2. 4. 6 मूलफलं (Dc D6 फलमूलं) गृहीत्वा (D1. 2 विहाय); D3 फलमूले गृहीत्वा; S मूलफलं प्रगृह्य. — d) Ś1 चुकोप; K2 D1. 2 G4 चुक्रोश (for चुक्रोध). Ś1 K1–3 D1. 2. 5 T1 भृशं ततः स्म (K3 D5 सः; D1. 2 T1 [अ]सौ); K4 भृशं महात्मा; G1 तदा भृशं सः.

15 a) B1 Dc Dn3 D4 G2. 4 विदार्यमाण. — b) Ś1 K B4 Dc D1. 2. 5 आशंस°; T G तं (G2 तत्) शंक° (for आशंक°). K3 नृपतिर्; T G [अं]गपतेर् (for नृपतेर्). Ś1 K1. 3. 4 D1. 2. 5 विनाशं (for विधानम्). — c) K3 ययावरण्यात् (for जगाम चम्पां). D3 वेश्यां; T G3. 4 पंपां (for चम्पां). Ś1 K1. 2 B Dc Dn D1. 5 G1. 3. 4 M1 प्रतिधक्ष्यमाणस्; K3 प्रतिदिक्ष°; K4 प्रतिधक्ष°; D2. 4 प्रतिवक्ष्य°; D3 प्रतिवीक्ष्य°; D5 प्रदिदक्ष°; T1 प्रतियक्ष्य°. — d) B Dc Dn D4. 6 °राजं सपुरं सराष्ट्रं; D3 °राजं प्रति जातकोपः.

16 D1 om. 16b. — c) Ś1 K1 D1. 2 घोषैः (for गोपैः). Ś1 K1. 3 तु (for च). T2 G2–4 विविधैः (for विधिवत्). — d) D1. 2 हृष्टः; D3 वीरः (for तत्र).

17 a) Ś1 K3. 4 D1–3 तं प्राप्य; K1 स प्राप्य; K2 B Dc Dn D4. 6 अवाप्य (for संप्राप्य). S (except T1) हृष्टः (for तेभ्यः). — b) T2 G2–4 तस्य (for कस्य). Dc प्रहिताः; T1 M प्रकृताः; T2 G3. 4 प्रकृतान्; G2 प्रकृतीन् (for प्रथिताः). Ś1 K1. 2 स्म; T1 स-; T2 G2–4 च (for स्थ). B Dn D3–6 गोपाः; T2 G2–4 सर्वान् (for सौम्याः). D1. 2 प्रोवाच कस्यो-

C. 3. 10087
B. 3. 113. 18
K. 3. 114. 18

देशे तु देशे तु स पूज्यमान-
स्तांश्चैव शृण्वन्मधुरान्प्रलापान् ।
प्रशान्तभूयिष्ठरजाः प्रहृष्टः
समाससादाङ्गपतिं पुरस्थम् ॥ १८
संपूजितस्तेन नरर्षभेण
ददर्श पुत्रं दिवि देवं यथेन्द्रम् ।
शान्तां स्नुषां चैव ददर्श तत्र
सौदामिनीमुच्चरन्तीं यथैव ॥ १९
ग्रामांश्च घोषांश्च सुतं च दृष्ट्वा
शान्तां च शान्तोऽस्य परः स कोपः ।
चकार तस्मै परमं प्रसादं
विभाण्डको भूमिपतेर्नरेन्द्र ॥ २०

स तत्र निक्षिप्य सुतं महर्षि-
रुवाच सूर्याग्निसमप्रभावम् ।
जाते पुत्रे वनमेवाव्रजेथा
राज्ञः प्रियाण्यस्य सर्वाणि कृत्वा ॥ २१
स तद्वचः कृतवानृश्यशृङ्गो
ययौ च यत्रास्य पिता बभूव ।
शान्ता चैनं पर्यचरद्यथाव-
त्खे रोहिणी सोममिवानुकूला ॥ २२
अरुन्धती वा सुभगा वसिष्ठं
लोपामुद्रा वापि यथा ह्यगस्त्यम् ।
नलस्य वा दमयन्ती यथाभू-
द्यथा शची वज्रधरस्य चैव ॥ २३

न्पथि मत्स्यसंघाः. — After 17, D_2 ins.:

554* गोपास्तथैते कर्षणं चैवमेते.

18 [a]) K_3 B_2 Dn $D_{4.6}$ देशेषु देशेषु; $B_{1.3.4}$ Dc S एवं स देशेषु; D_3 देशेथ देशेथ. S_1 K_1 सं-; B Dc S [अ]भि- (for स). $B_{1.4}$ -सज्ज° (for पूज्य°). — [b]) B_4 तथैव; D_3 तांस्तान् (for तांश्चैव). S_1 $K_{1.2}$ Dn_3 D_3 G_2 मधुरप्र°; K_4 मधुरान्प्रवदान्; $D_{1.2}$ मधुरां च वाचं. — [c]) S_1 K_{2-4} D_5 °तरं (for °रजाः). $Dn_{2.n3}$ $D_{4.6}$ प्रविष्टः; T_2 G_{2-4} सुहृ° (for प्रहृ°). — [d]) S_1 $K_{1.2}$ D_3 °मदद् (for °समाद). S_1 K_{1-3} $D_{1.2}$ अंगपतेः; D_3 राष्ट्रपतिं. S_1 K_{1-3} $D_{1.2}$ पुरं तत्; K_4 प्रहृष्टं; G_1 पुनस्तं (for पुरस्थम्).

19 [a]) $K_{2.3}$ B_{1-3} Dn $D_{1.3-6}$ T_2 G_3 M_1 स (for सं-). — [b]) S त्रिदिवे (for दिवि देवं). — [c]) S ततः (for शान्तां), and शांतां (for तत्र). — [d]) S_1 $K_{1.2}$ B $Dn_{1.n3}$ $D_{1.4-6}$ T_2 $G_{1.3}$ सौदामनीम्; G_4 असौ मुनिर् (for सौदामिनीम्). K_4 प्रचरंतीं; T_1 द्युच्° ; T_2 (after corr.) G_3 आच°; M द्युच्च° (for उच्च°). T_2 (orig.) G_4 विद्युदिवाचरंतीं (for उच्चरंतीं यथैव). $K_{2.4}$ तथैव; G_2 यथावत्; G_3 यथा वै (for यथैव).

20 [a]) K_1 सुतांश्च; B Dc Dn $D_{4.6}$ सुतस्य; D_2 सुतां च (for सुतं च). — [b]) G_1 प्र- (for च). S_1 [अ]पि पुनः; $K_{1.2}$ [अ]स्य पुनः; K_3 स परं; S परमो (for [अ]स्य परः). S_1 $K_{1.2.4}$ प्र-; K_3 स्म; D_5 च; S [अ]स्य (for स). — [c]) S_1 K Dc D_5 तस्याथ परं; $B_{1.3}$ Dn $D_{3.4.6}$ तस्यैव परं; B_2 तस्योपसरं; B_4 M_1 तस्मै च परं (for तस्मै परमं). — [d]) S विभंडको. T_2 (after corr.) G_3 भूपतये (for भूमिपतेर्).

21 [b]) B Dc Dn $D_{4.6}$ T G M_1 सूर्याग्निसमप्रभावः; $D_{1.2}$ M_3 °ग्निसमानतेजाः; D_5 °तिशयप्रभावं. — [c]) S_1 $K_{1.2.4}$ $D_{3.5}$ [s]पत्ये; B_{1-3} Dn_1 D_4. 6 तु पुत्रे; B_4 Dn_3 $D_{1.2}$ T_2 G_3 च पुत्रे (for पुत्रे). S_1 Dc T_1 G_1 वनमेव व्र°; $B_{1.3}$ स वनं व्र°; B_4 वनमेव गच्छेः; $D_{1.2}$ त्वमिहाव्र° (for वनमेवाव्र°). — [d]) S_1 $K_{1.2.4}$ $D_{3.5}$ कार्याणि; K_3 कर्मा° (for प्रिया°). — After 21, $D_{1.2}$ ins.:

555* कृत्वा तथैवास्य नृपस्य राजन्;

while G_1 ins.:

556* इत्युक्त्वासावृश्यशृङ्गं महात्मा
विभण्डको रोमपादेन राजा ।
संपूजितो हृष्टचेता महर्षि-
र्ययौ वनं मुनिवर्यैः प्रजुष्टम् ।

22 [a]) N (except B_4) ऋष्यशृंगो. — [b]) D_1 जगाम (for ययौ च). T_2 G_{2-4} स्व- (for [अ]स्य). — [c]) $B_{1.3}$ यथा वै; $B_{2.4}$ Dn $D_{4.6}$ नरेंद्र; $D_{1.2}$ तथावत्; T $G_{1.3.4}$ तथा वै (for यथावत्). — [d]) K_4 एका यथैव; B_1 एकं तथास्य; B_4 यथानुकूला; Dc एकं तथैव; T_1 G_1 M_1 इवानुरक्ता (for इवानुकूला). S_1 K_{1-3} $D_{1.2.5}$ M_3 यथा खे वै (K_3 by transp. वै खे; D_5 च वै) रोहिणी सोममेका (K_3 चंद्रकांतं; $D_{1.2}$ सोममेकं).

23 G_4 om. 23^{ab}. — [a]) K_3 शुभगा वा; G_3 चापि यथा (for वा सुभगा). M_1 [इ]व (for वा). — B_3 om. from वसिष्ठं up to शोभयन् (in 25^b). — [b]) S_1 K_1 वेह; K_{2-4} D_5 चेह; $B_{2.4}$ $Dn_{1.n3}$ $D_{4.6}$ G_1 वा; D_2 G_3 चापि (for वापि). — [c]) Dn $D_{4.6}$ वै (for वा). S_1 $K_{1.2}$ $D_{1.2}$ यथावद्; K_3 यथैव; D_5 यथा वा (for यथाभूद्).

24 B_3 om. 24 (cf. v.l. 23); G_4 om. 24^{ab}. — [a])

नाडायनी चेन्द्रसेना यथैव
वश्या नित्यं मुद्गलस्याजमीढ ।
तथा शान्ता ऋश्यशृङ्गं वनस्थं
प्रीत्या युक्ता पर्यचरन्नरेन्द्र ॥ २४

तस्याश्रमः पुण्य एषो विभाति
महाह्रदं शोभयन्पुण्यकीर्तेः ।
अत्र स्नातः कृतकृत्यो विशुद्ध-
स्तीर्थान्यन्यान्यनुसंयाहि राजन् ॥ २५

इति श्रीमहाभारते आरण्यकपर्वणि त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

वैशंपायन उवाच ।
ततः प्रयातः कौशिक्याः पाण्डवो जनमेजय ।
आनुपूर्व्येण सर्वाणि जगामायतनान्युत ॥ १
स सागरं समासाद्य गङ्गायाः संगमे नृप ।
नदीशतानां पञ्चानां मध्ये चक्रे समाप्लवम् ॥ २
ततः समुद्रतीरेण जगाम वसुधाधिपः ।
भ्रातृभिः सहितो वीरः कलिङ्गान्प्रति भारत ॥ ३

लोमश उवाच ।
एते कलिङ्गाः कौन्तेय यत्र वैतरणी नदी ।
यत्रायजत धर्मोऽपि देवाञ्शरणमेत्य वै ॥ ४
ऋषिभिः समुपायुक्तं यज्ञियं गिरिशोभितम् ।
उत्तरं तीरमेतद्धि सततं द्विजसेवितम् ॥ ५

C. 3. 10099
B. 3. 114. 5
K. 3. 115. 5

B (B₃ om.) D (except D₁. ₂) M₂ नारायणी; T G (G₄ om.) M₁ नाळायणी (for नाडायनी). Ś₁ K₄ De₂ चंद्रसेना; K₁ चंद्रसेनं; K₂ चंद्रसीनं; B₂ D₄ T₂ G₃ वेंद्रसेना. K₃ Dn D₃. ₄. ₆ T₃ G₃ बभूव (for यथैव). — After 24ᵃᵇ, D₁. ₂ ins.:

557* राकोदितेन्दूदयतुल्यकीर्तेः.

T G ins. after 24ᵃᵇ (G₄, which om. 24ᵃᵇ, ins. after 23):

558* यथा सीता दाशरथेर्महात्मनो
यथा तव द्रौपदी पाण्डुपुत्र ।

— ᶜ) After शान्ता; B₃. ₄ T₁ G₁. ₃ M ins. [अ]पि, T₂ G₃ हि (to avoid hiatus). N (except D₆; B₃ om.) ऋष्य°.

25 B₃ om. up to शोभयन्. — ᵃ) B₂ D (except D₁–₃) [अ]व-; G₁ [अ]भि- (for वि-). — ᵇ) Ś₁ K₁–₃ °तीर्थैः; B Dn D₄. ₆ T₁ °कीर्तिः; D₁. ₃. ₅ °तीर्थः (for °कीर्तेः). — ᵈ) B₁ De T₂ G उप- (for अनु-). Ś₁ K B₁ De D₁. ₃ -यातासि; D₆ -यातः स (for -संयाहि). D₆ राजा (for राजन्).

Colophon. — *Major parvan:* Ś₁ K₁. ₂ Dn₂ T G₂–₄ M₁ आरण्य. — *Sub-parvan:* B₃. ₄ M₁ तीर्थयात्रा, followed by ऋष्य(M₁ °इय)शृंगोपाख्यान. Ś₁ K₁–₃ B₂ De Dn D₂–₄. ₆ M₂ (all om. sub-parvan name) mention only ऋष्य(M₂ °श्य)शृंगोपाख्यान; K₄ B₁ D₁. ₅, likewise, only लोमशतीर्थयात्रा, followed by ऋष्यशृंगोपाख्यान. To ऋष्यशृंगोपाख्यान, Ś₁ K₁. ₃ B₁ D₁–₃. ₅ M add समाप्त. — *Adhy. no.* (figures, words or both): Dn₁ 112; Dn₂ 113 (as in text): Dn₃ S 114 (M₂ 116): D₁ 118. — *Śloka no.:* Dn 25; D₁ 26.

114

1 ᵃ) D₁–₃ प्रयाताः. K₄ B₁ D₃. ₅ S (except M₁) कौशिक्यां. — ᵇ) D₁–₃. ₅ पांडवा. — ᶜ) Ś₁ K De₂ D₁–₃ °पूर्वेण (for °पूर्व्येण). D₁. ₂ तीर्थानि (for सर्वाणि). — ᵈ) D₁. ₂ जग्मुर् (for जगाम). K₃ D₁. ₂. ₅ T₁ च; B₃. ₃ Dn D₄. ₆ [अ]थ (for [उ]त).

2 ᵃ) K₃ सागरः स; K₄ D₅ सागरं स (by transp.); B₁ सागरं च. Ś₁ K₁. ₂ सागरं समुपासाद्य. — ᵇ) B₂. ₃ G₁ M₂ नृपः.

3 ᵃ) Ś₁ समुद्रतीराणि; K₃. ₄ D₃. ₅ °तीर्थानि; B₃ °तीर्थेन. — ᵇ) B₃ om. 3ᵇ. Ś₁ G₁ T₂ (before corr.) °धाधिप.

4 ᵇ) K₃ Dn D₃. ₆ G₄ तत्र (for यत्र). — ᶜ) K₃ तत्रा°; D₁ अत्रा° (for यत्रा°). T₂ G₃. ₄ वै (for ऽपि). — ᵈ) D₁. ₂ देवाश्चापि युधिष्ठिर.

5 ᵃ) T G₃ सत्रिभिः; G₁ भ्रातृभिः; G₄ शत्रुभिः. D₁. ₂ तु सदा जुष्टं; T₂ G₃ सुमुदा युक्तं; G₄ सोमपायुक्तं. — ᵇ) D₁. ₂

C. 3. 11000
B. 3. 114. 6
K. 3. 115. 6

समेन देवयानेन पथा स्वर्गमुपेयुषः ।
अत्र वै ऋषयोऽन्येऽपि पुरा क्रतुभिरीजिरे ॥ ६
अत्रैव रुद्रो राजेन्द्र पशुमादत्तवान्मखे ।
रुद्रः पशुं मानवेन्द्र भागोऽयमिति चाब्रवीत् ॥ ७
हृते पशौ तदा देवास्तमूचुर्भरतर्षभ ।
मा परस्वमभिद्रोग्धा मा धर्मान्सकलान्नशीः ॥ ८
ततः कल्याणरूपाभिर्वाग्भिस्ते रुद्रमस्तुवन् ।
इष्ट्या चैनं तर्पयित्वा मानयांचक्रिरे तदा ॥ ९
ततः स पशुमुत्सृज्य देवयानेन जग्मिवान् ।
अत्रानुवंशो रुद्रस्य तं निबोध युधिष्ठिर ॥ १०
अयातयामं सर्वेभ्यो भागेभ्यो भागमुत्तमम् ।
देवाः संकल्पयामासुर्भयाद्रुद्रस्य शाश्वतम् ॥ ११

इमां गाथामत्र गायन्नपः स्पृशति यो नरः ।
देवयानस्तस्य पन्थाश्चक्षुश्चैव प्रकाशते ॥ १२

वैशंपायन उवाच ।

ततो वैतरणीं सर्वे पाण्डवा द्रौपदी तथा ।
अवतीर्य महाभागा तर्पयांचक्रिरे पितॄन् ॥ १३

युधिष्ठिर उवाच ।

उपस्पृश्यैव भगवन्नस्यां नद्यां तपोधन ।
मानुषादस्मि विषयादपेतः पश्य लोमश ॥ १४
सर्वाँल्लोकान्प्रपश्यामि प्रसादात्तव सुव्रत ।
वैखानसानां जपतामेष शब्दो महात्मनाम् ॥ १५

लोमश उवाच ।

त्रिंशतं वै सहस्राणि योजनानां युधिष्ठिर ।

S याज्ञि(G4 M °ज्ञी)यं (for यज्ञियं). K3. 4 D1. 2 गिरिशोभनम्; B2 °मुत्तमम्. — c) Ś1 K1. 2 D3 T2 G2. 3 तीर्थम् (for तीरम्). T1 G1 आप्याद्य (for एतद्धि). — d) Ś1 K1. 2 देव° (for द्विज°).

6 a) K1 B2 Dn D4. 6 समानं; K3 अनेन; K4 समेत (*sup. lin.* as in text); B3. 4 De शुभेन; D1. 2 संमितं; D3 सोमेन (for समेन). — b) K1. 3. 4 Dn2 D1. 4. 6 T1 यथा (for पथा). — c) De D5 यत्र. Ś1 K B1 D3. 5 देवर्षयो; T1 G1 M चैवर्षयो; G2. 4 एवर्षयो (for वै ऋ°). — d) B2. 3 De ममेति (for ऽयमिति).

7 c) Ś1 K1–3 D1–3 आखुं; K4 M1 हत्वा; B1 अदात्; B2m. 3. 4 De आर्द्रं; D5 अश्वं; M3 रौद्रं (for रुद्रः). G2 पशुर् (for पशुं). B2. 4m Dn D4. 6 पशुमादाय राजेंद्र. — d) B2. 3 De ममेति (for ऽयमिति).

8 a) Ś1 K1. 2 कृते; K3 De D3 हते (for हृते). K3 B2 T G3 ततो (for तदा). — d) Ś1 वदीः; K3 न सः; B Dn D1. 4. 6 T2 G3 वशीः (B3 °धीः); T1 G1. 2. 4 M1 मा धर्म्यान्नी(G4 °द्वि)नशः पथः.

9 Ś1 om. from अस्तुवन् up to °यानेन (in 10b). — cd) K1. 3 De Dn2. n3 D1. 2 T1 G4 दृष्ट्वा; K2 दृष्टा; D3. 5 दृष्ट्वा (for दृष्ट्या). B2 मानयित्वा तर्पयांचक्रिरे. D1. 2 सुराः (for तदा). — After 9, D3 ins.:

559* एष ते रुद्र भागो वै मा नो यज्ञमिमं जहि ।
अयं ते पशुरित्येवमूचुर्देवाः समागताः ।

10 ab) Ś1 om. up to °यानेन (cf. v.l. 9). Ś1 संभवान् (for जग्मिवान्). — c) K4 B2–4 Dn D4–6 T2 G3. 4 तत्र (for अत्र). T2 G3. 4 M3 [अ]नुवंशं.

12 D3 om. from 12 up to 3. 118. 15c; the MS. is generally ignored hereafter up to the end of the lacuna. — ab) B4 अनु- (for अत्र). B2. 3 De S (except T2 G3) उप- (for अपः). B4 स्पर्शति (for स्पृ°). Ś1 K B1 D5 इमां सुश्रुत्य (K1 सुस्तुत्य; K3 संस्तुत्य; K4 B1 गायन्स्म) यो (K3 वै) गाथां तत्रो(K3. 4 D5 अत्रो; B1 यत्रो)पस्पृशते नरः; D1. 2 इमां गायति यो गाथामपः संस्पृशते तु यः. — c) D2 सिद्धश् (for पन्थाश्). Ś1 D5 देवयानस्य पंथाः स्यात्; K3 देवयाने पथं प्यास्यात् (sic); B2. 3 Dn D4. 6 T2 G3 देवयानोस्य पंथाश्च. — d) B1. 2 De Dn D4. 6 T2 G3 चक्षुषाभि-; B3. 4 °श्चानि-; T1 °षो वै (for °श्चैव). Ś1 K प्रवर्तते; D1 प्रवर्धते; G2. 4 प्रजायते.

14 G1 (hapl.) om. 14a–16b. — a) K1 B2–4 Dn D4. 6 T2 G3 [इ]ह (for [ए]व). B Dn D4. 6 T2 G3 विधिवद् (B1 सलिलं) (for भगवन्). — b) K3. 4 D1. 6 नद्यामस्यां (by transp.); De तस्यां नद्यां. N T2 G3 °बलात् (for °धन). — c) D1. 2 T1 M1 अद्य (for अस्मि). M3 विषयादस्मात् (for अस्मि विषयाद्). — d) M1 अपेतान्; M3 अपेतं (for अपेतः).

15 G1 om. 15 (cf. v.l. 14). — a) = 3. 129. 19a. T1 G2. 4 M1 प्रपश्यामः. — b) Ś1 K B1 De D5 भगवंस्तव (for तव सुव्रत).

16 G1 om. 16ab (cf. v.l. 14). — a) Ś1 K B1. 4 De D5 त्रिंशद्भूमेः (K3 °मि-); D3 त्रिंशतिं वै. — c) T1 G1. 2 M1 शृणोमि. Ś1 K2 B1 D1 एतं; K3 एवं; G1 एष; M एतत् (for एनं). — d) Ś1 यस्व; K4 यास्व; B1. 4 आस्थ;

यत्र ध्वनिं शृणोष्येनं तूष्णीमास्स्व विशां पते ॥ १६
एतत्स्वयंभुवो राजन्वनं रम्यं प्रकाशते ।
यत्रायजत कौन्तेय विश्वकर्मा प्रतापवान् ॥ १७
यस्मिन्यज्ञे हि भूर्दत्ता कश्यपाय महात्मने ।
सपर्वतवनोद्देशा दक्षिणा वै स्वयंभुवा ॥ १८
अवासीदच्च कौन्तेय दत्तमात्रा मही तदा ।
उवाच चापि कुपिता लोकेश्वरमिदं प्रभुम् ॥ १९
न मां मर्त्याय भगवन्कस्मैचिद्दातुमर्हसि ।
प्रदानं मोघमेतत्ते यास्याम्येषा रसातलम् ॥ २०
विषीदन्तीं तु तां दृष्ट्वा कश्यपो भगवानृषिः ।
प्रसादयांबभूवाथ ततो भूमिं विशां पते ॥ २१
ततः प्रसन्ना पृथिवी तपसा तस्य पाण्डव ।
पुनरुन्मज्ज्य सलिलाद्वेदीरूपा स्थिता बभौ ॥ २२
सैषा प्रकाशते राजन्वेदी संस्थानलक्षणा ।
आरुह्यात्र महाराज वीर्यवान्वै भविष्यसि ॥ २३
अहं च ते स्वस्त्ययनं प्रयोक्ष्ये
यथा त्वमेनामधिरोक्ष्यसेऽद्य ।
स्पृष्टा हि मर्त्येन ततः समुद्र-
मेषा वेदी प्रविशत्याजमीढ ॥ २४
अग्निर्मित्रो योनिरापोऽथ देव्यो
विष्णो रेतस्त्वममृतस्य नाभिः ।
एवं ब्रुवन्पाण्डव सत्यवाक्यं

C. 3. 11021
B. 3. 114. 27
K. 3. 115. 28

De आस्सीद् (for आस्स्व). D1. 2 तूष्णीं स्थास्यंति संप्रति.

17 b) K1. 4 B1. 2. 4 Dn D2. 4. 6 M दिव्यं; D1 G2 सर्वं (for रम्यं). — c) B2–4 Dn D1. 2. 4. 6 राजेंद्र; T G धर्मात्मा (for कौन्तेय).

18 a) K1. 2 अस्मिन्; K3 B1 D5 तस्मिन् (for यस्मिन्). Ś1 K3. 4 D1. 2. 5 तदा (for हि भूर्). G1 भद्रात्मा (for भूर्दत्ता). — b) Ś1 B1 D1 S काश्यपाय. — d) Ś1 K4 D5 दक्षिणा भूः; K1. 2 B2 Dn D4–6 °णार्थे; K3 °णाभूत्; B3 °णार्थं (for °णा वै).

19 a) Ś1 D1. 2. 5 अथा°; K1 अत्रा° (for अवा°). — b) D5 वसुंधरा; T1 G1 स्वयंभुवा (for मही तदा). — c) D1 कुपिता राजन् (for चापि कुपिता). T2 G2–4 M वाचा (for चापि). T1 G1 मही तदा नु कुपिता. — d) D1. 2 M वचः (for प्रभुम्). T1 G1 वाचोवाच स्वयंभुवं.

20 a) Ś1 K1. 2 M मा (for मां). D1. 2 न च मामद्य भगवन्. — After 20, M ins.:

560* इत्येवमुक्त्वा पृथिवी जगाम च रसातलम् ।
निममज्ज कुरुश्रेष्ठ याच्यमानापि भारत ।

21 a) Ś1 अवसीदं तु तां दृष्ट्वा; K3 तां दृष्ट्वा चावसीदंतीं; Dc सीदंतीं तां तु गां दृष्ट्वा. — b) Dc Dn2. n3 D4 S (except G4) काश्यपो.

22 b) K4 तप्यमानस्य (for तपसा तस्य). K1. 2 B2 पार्थिव (for पाण्डव). — c) B Dn D4. 6 उन्नद्ध (for उन्मज्ज्य). S उत्सृष्टसलिला (for उन्मज्ज्य सलिलाद्). Dc यतिता (for सलिलाद्). — d) Ś1 K3 T2 G2–4 M °भूता (for °रूपा). K1. 2 तदा (for स्थिता). Dc D5 [अ]भवत् (for बभौ). T1 G1 सैषातीव (T1 सैषा राजन्) प्रकाशते (cf. 23a).

23 ab) G1 प्रकाशतेद्य ते राजन् (for a). Ś1 K3. 4 D5 ततो बभूव सा वेदी सैषा (Ś1 ह्येषा) राजन्प्रकाशते. — c) Dc आरोहेमां; D1. 2 प्रारोहस्व; S (except G1) आरोहात्र (for आरुह्यात्र). — d) S (except M2) त्वं (for वै). — After 23, N (except D5; D3 missing) ins.:

561* सैषा सागरमासाद्य राजन्वेदी समाश्रिता ।
एतामारुह्य भद्रं ते त्वमेकस्तर सागरम् ।

[L. 1) K3 प्रकाशते; D1. 2 समास्थिता (for °श्रिता). — (L. 2) Ś1 K3. 4 D1. 2 आरोह; B आरुह; Dc आहर (for आरुह्य). Dc त्वमेकं भरतर्षभ (for the posterior half).]

24 b) Ś1 K यदा (for यथा). Ś1 K4 B1 Dc T1 M1 एनाम् (for एनाम्). K3 °रोष्यसि; Dn D5. 6 °रोहसे (for रोक्ष्यसे). K3 [ह्]ह; K4 न; T G3. 4 [स्]त्र (for स्व). — c) M सर्वेण (for मर्त्येन). S (except M2) पुनः (for ततः). — d) K1. 2 Dc देवी; some S MSS. वेदिः (for वेदी). — After 24, Dn D1. 2. 6 (marg.) ins.:

562* ॐ नमो विश्वगुप्ताय नमो विश्वपराय ते ।
सांनिध्यं कुरु देवेश सागरे लवणाम्भसि ।

[(L. 1) D1. 2 सर्व- (for the second नमो).]

In D1. 2, 562* is followed by 563*, which in its turn is followed in D2 by 25cd.

25 D1 om. 25; D2 om. 25ab. — b) T G1. 3. 4 रेतस्य (for रेतस्). Ś1 K1. 3. 4 Dc त्वमृतस्यास्य; T G1. 3. 4 अस्य भूमिश्च (G1 °मिं च); G2 त्वमृतस्यैव; M2 त्वममृतस्यास्य (for त्वममृतस्य). — D2 reads 25cd after 563*. — c) K4 सत्यवाक्यं नरेंद्र; G1 पांडवेत्येव वक्ष्यन् (for पाण्डव सत्य°). — d) Ś1 B1 ततो वेदीं (for वेदीमिमां). — K1. 2 B Dc Dn D4. 6 T2 (marg. *sec. m.*) G3 ins. after 25: D1. 2,

C. 3. 110 21
B. 3. 114. 27
K. 3. 115. 28

वेदीमिमां त्वं तरसाधिरोह ॥ २५
वैशंपायन उवाच ।
ततः कृतस्वस्त्ययनो महात्मा
युधिष्ठिरः सागरगामगच्छत् ।
कृत्वा च तच्छासनमस्य सर्वं
महेन्द्रमासाद्य निशामुवास ॥ २६

इति श्रीमहाभारते आरण्यकपर्वणि चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

वैशंपायन उवाच ।
स तत्र तामुषित्वैकां रजनीं पृथिवीपतिः ।
तापसानां परं चक्रे सत्कारं भ्रातृभिः सह ॥ १
लोमशश्चास्य तान्सर्वानाचख्यौ तत्र तापसान् ।
भृगूनङ्गिरसश्चैव वासिष्ठानथ काश्यपान् ॥ २
तान्समेत्य स राजर्षिरभिवाद्य कृताञ्जलिः ।
रामस्यानुचरं वीरमपृच्छदकृतव्रणम् ॥ ३
कदा नु रामो भगवांस्तापसान्दर्शयिष्यति ।
तेनैवाहं प्रसङ्गेन द्रष्टुमिच्छामि भार्गवम् ॥ ४
अकृतव्रण उवाच ।
आयानेवासि विदितो रामस्य विदितात्मनः ।
प्रीतिस्त्वयि च रामस्य क्षिप्रं त्वां दर्शयिष्यति ॥ ५

---

after 562*:

563* अग्निश्च ते योनिरिडा च देहो
रेतोधा विष्णोरमृतस्य नाभिः ।
एवं जपन्पाण्डव सत्यवाक्यं
ततोऽवगाहेत पतिं नदीनाम् ।
अन्यथा हि कुरुश्रेष्ठ देवयोनिरपां पतिः । [5]
कुशाग्रेणापि कौन्तेय न स्प्रष्टव्यो महोदधिः ।

[(L. 1) Dc इष्टां च देहे (for इडा च देहो). B1 corrupt; D1. 2 अग्निश्च तेजस्तव देव देहे. — (L. 2) D1. 2 T2 G2 विष्णुर् (for विष्णोर्). — D1. 2 ins. after line 2:

564* घृतबर्हिर्घृतयोनिस्त्वगर्हो
स तेषां वै पयसां संनिधानम् ।

— (L. 3) D1. 2 एतद् ब्रुवन् (for एवं जपन्). B4 एवं ब्रुवन्सत्यवाक्यं च राजन्. — (L. 4) B1. 2 Dc °गाहस्व (for °गाहेत). — After line 4, D2 ins.:

565* आ जन्मशतमाहस्राद्यत्पापं कुरुते नरः ।
मुच्यते सर्वपापेभ्यः स्नात्वा तु लवणाम्भसि ।

— (L. 6) K1. 2 कौरव्य (for कौन्तेय).]

— After 563*, D2 reads 25cd.

26 b) K2 प्रीतमनान्वगच्छत्; B1 सागरमाजगाम; Dc D4 °मभ्यगच्छत्; Dn D6 °मध्यगच्छत्; D1. 2 °मागमत्तं (for °गामगच्छत्). — c) B4 T1 G1 M1 तु (for च).

Colophon. — *Major parvan*: Ś1 K2 T2 G M1 आरण्य. — *Sub-parvan*: B1. 2. 4 G1 तीर्थयात्रा. K B2 Dc Dn1. n2 D1–6 (all om. sub-parvan name) mention only लोमशतीर्थयात्रा. — *Adhy. no.* (figures, words or both): Dn1 113; Dn2 114 (as in text); Dn2 S 115 (M2 117); D1 119. — *Śloka no.*: Dn 30; D1 31.

115

☞ This adhy. is missing in D2 (cf. v.l. 3. 114. 12); the MS. is generally ignored here.

1 a) T G M1 [ए]वम् (G1. 4 [ए]कम्) (for ताम्). Ś1 स उषित्वा च तत्रैकां; D1. 2 स च तत्रोषितो वीरो.

2 a) Ś1 K4 B1 D2 T1 चापि; K2 स्वस्थ; B2. 3 Dc Dn D1. 4. 6 तस्य (for चास्य). — T1 om. 2cd. — d) B Dn1. n2 D5. 6 G1 वसिष्ठान्. G2 वासिष्ठान्काश्यपांस्तथा.

3 c) D1. 2 तत्र; T1 G1 धीरम्; T2 G2–4 विप्रम् (for वीरम्). — d) D1. 2 स पप्रच्छ (for अपृच्छद्).

4 a) K4 B4 Dn D1. 2. 4. 6 T1 G1. 2 तु (for नु). K1–3 Dc D5 तापसानां कदा (K1. 2 यदा) रामो. — b) K1. 2 Dc2 भगवन्; K3 Dc1 D5 भगवान् (for तापसान्). — T2 om. (hapl.) 4c–5d. — c) D1. 2 M तमहं तपसा युक्तं.

5 T2 om. 5 (cf. v.l. 4). — a) Ś1 आयानेवापि; K1. 2 अयानेवासि; K3 अयञ्जिवास; D1. 2. 5 S (except G2; T2 om.) आ(D1 अ)यञ्जेवासि. — c) K1. 2 च त्वयि (by transp.); B4 त्वयि हि. — d) Ś1 K2 त्वा (for त्वां).

चतुर्दशीमष्टमीं च रामं पश्यन्ति तापसाः ।
अस्यां रात्र्यां व्यतीतायां भवित्री च चतुर्दशी ॥ ६

युधिष्ठिर उवाच ।

भवाननुगतो वीरं जामदग्न्यं महाबलम् ।
प्रत्यक्षदर्शी सर्वस्य पूर्ववृत्तस्य कर्मणः ॥ ७
स भवान्कथयत्वेतद्यथा रामेण निर्जिताः ।
आहवे क्षत्रियाः सर्वे कथं केन च हेतुना ॥ ८

अकृतव्रण उवाच ।

कन्यकुब्जे महानासीत्पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम सः ॥ ९
वने तु तस्य वसतः कन्या जज्ञेऽप्सरःसमा ।
ऋचीको भार्गवस्तां च वरयामास भारत ॥ १०
तमुवाच ततो राजा ब्राह्मणं संशितव्रतम् ।
उचितं नः कुले किंचित्पूर्वैर्यत्संप्रवर्तितम् ॥ ११
एकतःश्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
सहस्रं वाजिनां शुल्कमिति विद्धि द्विजोत्तम ॥ १२
न चापि भगवान्वाच्यो दीयतामिति भार्गव ।
देया मे दुहिता चेयं त्वद्विधाय महात्मने ॥ १३

ऋचीक उवाच ।

एकतःश्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
दास्याम्यश्वसहस्रं ते मम भार्या सुतास्तु ते ॥ १४

अकृतव्रण उवाच ।

स तथेति प्रतिज्ञाय राजन्वरुणमब्रवीत् ।
एकतःश्यामकर्णानां पाण्डुराणां तरस्विनाम् ।
सहस्रं वाजिनामेकं शुल्कार्थं मे प्रदीयताम् ॥ १५
तस्मै प्रादात्सहस्रं वै वाजिनां वरुणस्तदा ।
तदश्वतीर्थं विख्यातमुत्थिता यत्र ते हयाः ॥ १६
गङ्गायां कन्यकुब्जे वै ददौ सत्यवतीं तदा ।

C. 3. 1015 3
B. 3. 115. 28
K. 3. 116. 28

---

6 K$_3$ D$_5$ om. 6^{ab}. — ^{a}) Ś$_1$ K$_4$ चतुर्दश्यामष्टम्यां वा (K$_4$ °श्यां तथाष्टम्यां). — ^{c}) Ś$_1$ K$_4$ इतो रजन्यां पंचम्यां. — ^{d}) B Dc Dn D$_{4-6}$ श्वश् (for च). — After 6, Ś$_1$ K Dc D$_1$. $_2$. $_{4-6}$ ins.:

566* तत्र द्रक्ष्यसि रामं त्वं कृष्णाजिनजटाधरम् ।

7 ^{a}) Ś$_1$ K B$_1$ नित्यं; B$_{2.3}$ Dc Dn D$_{4-6}$ T$_2$ (after corr.) G$_3$ रामं (for वीरं).

8 ^{a}) Ś$_1$ K$_4$ T$_1$ G$_1$ भगवान् (for स भवान्). B$_4$ Dn D$_6$ G$_2$ [अ]थ (for [ए]तद्). — ^{b}) K$_{1-3}$ D$_5$ घातिताः (for निर्जिताः). — ^{c}) Ś$_1$ K$_4$ शूराः (for सर्वे). — After 8, K$_{1.2}$ B$_3$ Dc Dn D$_4$. $_6$ G$_3$ ins. a passage given in App. I (No. 15).

9 ^{a}) K$_2$ B$_{1.4}$ Dc कान्यकुब्जे; D$_5$ S कन्या°. — After 9^{ab}, B$_1$ Dc ins.:

567* कुशिकस्यात्मजो राजञ्जज्ञे वंशसमुद्भवः ।

— ^{d}) Ś$_1$ B$_{1.2}$ Dn D$_4$. $_6$ G$_4$ M$_1$ ह (for सः).

10 ^{a}) B$_1$ transp. तस्य and वसतः. B$_2$ कन्या (for तस्य). K$_4$ वने च वसतो जज्ञे; D$_{1.2}$ G$_1$ वने निवसतस्तस्य. — ^{b}) Ś$_1$ K B$_{1.4}$ Dc D$_5$ (by transp.) जज्ञे कन्या (K$_4$ कन्या तस्य); B$_2$ जज्ञे तस्य; G$_1$ कन्यासीद्; G$_{2.4}$ कन्याभूद्. B$_{1.4}$ D$_{1.2}$ S [अ]प्सरोपमा (for [अ]प्सरःसमा). — After 10^{ab}, B$_4$ ins.:

568* बभूव शतपत्राक्षी रूपेणासदृशी भुवि ।

— ^{c}) K$_4$ तु; D$_2$ S वै (for च). — ^{d}) T$_2$ G$_{3.4}$ पार्थिव (for भारत).

11 ^{a}) Ś$_1$ K$_4$ B$_1$ स (B$_1$ च) राजर्षिर्; K$_{1-3}$ B$_{2-4}$ D (D$_3$ missing) ततो गाधिर्; T$_2$ G$_{3.4}$ ततो राजन् (for ततो राजा). — ^{b}) K$_{1.2}$ ब्रह्माणं (for ब्राह्मणं). K$_{1-3}$ B$_4$ Dc D$_5$ तपसि स्थितं (for संशित°). Ś$_1$ K$_4$ गाधिर्ब्राह्मणसत्तमं. — ^{c}) K$_{1.2}$ विदितं (for उचितं). — ^{d}) K$_{1.2}$ पूर्ववत् (for पूर्वैर्यत्). D$_{1.2}$ यत्पूर्वैः संप्रकीर्तितं.

12 Cf. 5. 104. 26; 114. 5; 117. 5; etc. — ^{b}) S पांडराणां (for पाण्डु°). K Dc D$_{1.2.5}$ शुभ्राणां (K$_3$ शुभानां; Dc D$_{1.2}$ हयानां) चंद्रवर्चसां. — ^{cd}) D$_{1.2}$ सहस्रं शुल्कमित्येतद्विद्धि त्वं हि द्विजोत्तम.

13 ^{a}) Ś$_1$ ततश्च; K$_1$ तच्चापि (for न चापि). — ^{c}) K$_1$ [अ]येयं; B Dn D$_4$. $_6$ T$_2$ G$_3$ M$_1$ चैव (for चेयं).

14 ^{b}) S पांडराणां. — ^{d}) D$_{1.2.5}$ T$_2$ G$_{3-4}$ [अ]स्तु (D$_{1.2}$ हि) ते सुता (for सुतास्तु ते).

15 S om. the ref. — ^{a}) Ś$_1$ D$_5$ तं तथा; K$_{1-3}$ तत्तथा (for तथेति). — ^{d}) S (except G$_1$) पांडराणां. — ^{f}) Dn प्रतिदी° (!); D$_2$ संप्रदी°; T$_1$ दीयतां मम (for मे प्रदी°).

16 ^{a}) K$_{1.2}$ सहस्राणि; Dc सहस्रं ते (for सहस्रं वै).

17 ^{a}) B Dc D$_5$ G$_4$ कान्य°; T G$_{1.3}$ कन्या° (for कन्य°). — ^{c}) Ś$_1$ K$_{1.3}$ D$_{4.6}$ गाधिसुतां. B$_{3-4}$ Dc Dn

C. 3. 10153
B. 3. 115. 2ª
K. 3. 116. 28

ततो गाधिः सुतां तस्मै जन्याश्चासन्सुरास्तदा ।
लब्ध्वा हयसहस्रं तु तांश्च दृष्ट्वा दिवौकसः ॥ १७
धर्मेण लब्ध्वा तां भार्यामृचीको द्विजसत्तमः ।
यथाकामं यथाजोषं तया रेमे सुमध्यया ॥ १८
तं विवाहे कृते राजन्सभार्यमवलोककः ।
आजगाम भृगुश्रेष्ठः पुत्रं दृष्ट्वा ननन्द च ॥ १९
भार्यापती तमासीनं गुरुं सुरगणार्चितम् ।
अर्चित्वा पर्युपासीनौ प्राञ्जली तस्थतुस्तदा ॥ २०
ततः स्नुषां स भगवान्प्रहृष्टो भृगुरब्रवीत् ।
वरं वृणीष्व सुभगे दाता ह्यस्मि तवेप्सितम् ॥ २१
सा वै प्रसादयामास तं गुरुं पुत्रकारणात् ।
आत्मनश्चैव मातुश्च प्रसादं च चकार सः ॥ २२

भृगुरुवाच ।

ऋतौ त्वं चैव माता च स्नाते पुंसवनाय वै ।
आलिङ्गेतां पृथग्वृक्षौ साश्वत्थं त्वमुदुम्बरम् ॥ २३
आलिङ्गने तु ते राजंश्चक्रतुः स्म विपर्ययम् ।
कदाचिद्भृगुरागच्छत्तं च वेद विपर्ययम् ॥ २४
अथोवाच महातेजा भृगुः सत्यवतीं स्नुषाम् ।
ब्राह्मणः क्षत्रवृत्तिर्वै तव पुत्रो भविष्यति ॥ २५
क्षत्रियो ब्राह्मणाचारो मातुस्तव सुतो महान् ।
भविष्यति महावीर्यः साधूनां मार्गमास्थितः ॥ २६
ततः प्रसादयामास श्वशुरं सा पुनः पुनः ।

D4. 6 G4 चास्मै (for तस्मै). — d) K3 कन्यां; T1 प्रीनाश्; M2 कन्याश् (for जन्याश्). K3 om. from चासन् up to °सहस्रं तु (in 17c). K1. 2 B1 D2 सुरर्षयः; T2 G3 सुतास्तदा (for सुरास्तदा). K4 D1 कन्यां तां च (D1 प्रादात्) सुरर्षये; G2 तदा कन्यां नृपोत्तम. — e) K1. 2. 4 D1 दत्त्वा; D3 दत्ता; T1. 2 (before corr.) G1 2 4 M1 लब्ध्वं (for लब्ध्वा). K1. 4 D1. 2. 5 T1 G1 M तत्; B1 Dc T2 G2–4 च (for तु). — f) K1. 3 T2 G1. 3 तां (for तान्). K1. 2. 4 D1. 2 [अ]भ्यर्च्य (for दृष्ट्वा). D1. 2 मुदं ययौ (for दिवौ°). — After 17, T2 G2–4 ins.:

569* विस्मयं परमं जग्मुस्तमेव दिवि संस्तुवन् ।

19 b) D1. 2 सभार्यो मुनिपुंगवः. — c) D2 मुनिं (for भृगुं). — d) B2 Dn D4. 6 ह (for च).

20 a) S (except G1) समासीनं. — b) G2. 4 भृगुं (for गुरुं). D5 सुरासुरं°. — c) Dc D1 G2 अर्चयित्वा स्नुषां° (Dc °भ्युषां°).

21 a) K1. 2. 4 विप्रर्षिः (for भगवान्). — b) K3 प्रहृष्टं; D1. 2 M दृष्ट्वा वै (for प्रहृष्टो). K1. 2 वाक्यम्; Dc T1 गुरुर्; T2 G3 मुनिर् (for भृगुर्).

22 a) K1. 2 B1 Dc T G तु; K4 च (for वै). K1. 2. 4 D1. 2 प्रचोद° (for प्रसाद°). K D5 स्म वरं वरयामास. — b) Ś1 K1. 4 भृगुं तं; K3 Dc D5 गुरुं तं (by transp.). — d) T G वै (for च). Ś1 K B1 D1. 2. 5 ददौ तच्च स (Ś1 K2 तच्चास्य; B1 तं च स; D1. 2 तच्चापि) भारत.

23 Ś1 K D5 T G3. 4 om. the ref. (K4 ins. it in marg. *sec. m.*). — c) Ś1 K1 आलिंग्यतां; K2 °गेथाः; K3 T G1. 2 M2 °गेथां; K4 D1. 2 °गतां; Dc1 Dn1. n2 D6 °ग्येतां. — d) B2–4 उडुंबरं. — After 23, K1. 2 B Dc Dn D4. 6 T2 (marg. *sec. m.*) G3 ins.:

570* चरुद्वयमिदं भद्रे जनन्याश्च तवैव च ।
विश्वमावर्तयित्वा तु मया यत्नेन साधितम् ।
प्राशितव्यं प्रयत्नेन तेन्युक्त्वादर्शनं गतः ।

[(L. 1) K3 D6 तथैव (for तवैव). — (L. 2) Dc त्वया (for मया). — (L. 3) Dc च (for the second प्र-), and इत्यु° (for नेत्यु°).]

24 a) D5 आलिंगनं. Ś1 D5 G3 तु तं राजन्; K1 B Dc Dn D4. 6 T G3 चरौ चैव (B1 T1 राजन्); D1. 2 तु राजेंद्र (for तु ते राजन्). — b) Ś1 K1. 2 B2–4 Dn D4. 6 T2 G3 ते; G1 तु; G4 सं- (for स्म). — cd) Ś1 तं स्म; K3 तत्त्वं; D5 T2 G2. 3 तच्च (for तं च). — K2 B Dc Dn D4. 6 subst. for 24cd (B1. 2 ins. after 24):

571* ततः पुनः स भगवान्काले बहुतिथे गते ।
दिव्यज्ञानाद्विदित्वा तु भगवानागतः पुनः ।

25 Ś1 om. 25ab. — After 25ab, K1. 2 B Dc Dn D4. 6 T2 (marg. *sec. m.*) G3 ins.:

572* उपयुक्तश्चरुर्भद्रे वृक्षे चालिङ्गनं कृतम् ।
विपरीतेन ते सुभ्रूर्मात्रा चैवासि वञ्चिता ।

[(L. 1) Dc मात्रा (for भद्रे). — (L. 2) Dn2 D4. 6 T2 G3 सुभ्रु; Dc भद्रे (for सुभ्रूर्).]

— B4 om. 25cd. — c) Ś1 K1. 2 क्षत्रवृत्तो वै (K1 °सौ); K4 क्षात्रवृत्तिर्वै; D1. 2 क्षत्रियमतिस्.

27 b) T2 G2–4 तु; M1 वा (for सा). — c) Ś1 K1. 2 तादृक् (for ईदृक्). — d) K1. 2 मम (for कामं). K2. 3 पुत्रो (for पौत्रो). T1 भविष्यति (for भवेदिति).

न मे पुत्रो भवेदीदृक् कामं पौत्रो भवेदिति ॥ २७
एवमस्त्विति सा तेन पाण्डव प्रतिनन्दिता ।
जमदग्निं ततः पुत्रं सा जज्ञे काल आगते ।
तेजसा वर्चसा चैव युक्तं भार्गवनन्दनम् ॥ २८
स वर्धमानस्तेजस्वी वेदस्याध्ययनेन वै ।
बहूनृपीन्महातेजाः पाण्डवेयात्यवर्तत ॥ २९
तं तु कृत्स्नो धनुर्वेदः प्रत्यभाद्भरतर्षभ ।
चतुर्विधानि चास्त्राणि भास्करोपमवर्चसम् ॥ ३०

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

अकृतव्रण उवाच ।
स वेदाध्ययने युक्तो जमदग्निर्महातपाः ।
तपस्तेपे ततो देवान्नियमाद्वशमानयत् ॥ १
स प्रसेनजितं राजन्नधिगम्य नराधिपम् ।
रेणुकां वरयामास स च तस्मै ददौ नृपः ॥ २
रेणुकां त्वथ संप्राप्य भार्यां भार्गवनन्दनः ।
आश्रमस्थस्तया सार्धं तपस्तेपेऽनुकूलया ॥ ३
तस्याः कुमाराश्चत्वारो जज्ञिरे रामपञ्चमाः ।
सर्वेषामजघन्यस्तु राम आसीज्जघन्यजः ॥ ४
फलाहारेषु सर्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत्कदाचिन्नियतव्रता ॥ ५
सा तु चित्ररथं नाम मार्तिकावतकं नृपम् ।

C. 3. 10176
B 3. 116. 6
K. 3. 117. 6

---

28 After 28^{ab}, S ins.:
573* कालं प्रतीक्ष्य तं गर्भं धारयामास यत्नतः ।
— ^{d}) Dn D4. 6 जज्ञे सा (by transp.). — ^{e}) T1 G1 यशसा; T2 G2–4 तपः (for वर्चः).

29 ^{b}) T1 G4 °ध्ययने रतः (for °ध्ययनेन वै). B2–4 Dc Dn D4. 6 T2 G2. 3 च (for वै). — ^{d}) B2–4 Dc G1 अभ्यव° (for अत्यव°). D1. 2 तोषयामास पांडव.

30 ^{a}) B1 तस्य; D3 तं च (for तं तु). — ^{b}) M2 प्रत्यगाद्. — D1 om. 30^{cd}. — ^{c}) Dn2 T2 G2. 3 शास्त्राणि (for चा°). — ^{d}) Ś1 °वर्चसः; K4 D2 °दर्शनं; B1. 2 °तेजसः.

Colophon. — *Major parvan:* Ś1 K1. 2 T2 G2–4 M आरण्य. — *Sub-parvan:* K3 B1. 3. 4 Dc Dn D1. 2. 4–6 (all om. sub-parvan name) mention only कार्तवीर्योपाख्यान; K4 B2 D3, likewise, only लोमशतीर्थयात्रा (followed by कार्तवीर्योपाख्यान in B2 D3). — *Adhy. name:* T1 G1 जामदग्न्य(G1 °ग्नि)चरितं. — *Adhy. no.* (figures, words or both): Dn1 114; Dn2 115 (as in text); Dn3 S 116 (M2 118); D1 120. — *Śloka no.:* Dn 46; D1 32.

116

☞ This adhy. is missing in D3 (cf. v.l. 3. 114. 12); the MS. is generally ignored here.

1 ^{c}) B2. 4 Dc Dn1. n3 D4. 6 ततो वेदान्; T1 महातेजा (for ततो देवान्). — After 1, K4 D1. 2 ins.:
574* तं तप्यमानं ब्रह्मर्षिमूचुर्देवाः सवासवाः ।
किमर्थं तप्यसे ब्रह्मन्कः कामः प्रार्थितस्तव ।
एवमुक्तः प्रत्युवाच देवान्ब्रह्मर्षिसत्तमः ।
स्वर्गहेतोस्तपस्तप्ये लोकाश्च स्युर्ममाक्षयाः ।
तच्छ्रुत्वा वचनं तस्य तदा देवास्तमूचिरे । [5]
नासंततेर्भवेल्लोकः कृत्वा धर्मशतान्यपि ।
स श्रुत्वा वचनं तेषां त्रिदशानां कुरूद्वह ।
[(L. 5) D2 ब्रह्मर्षिणैवमुक्ते तु पुनरूचुर्दिवौकसः. — (L. 6) D2 ब्रह्मर्षे नानपत्यस्य लोकाः संतीह चाक्षयाः.]

2 ^{b}) K1. 4 B1 D1. 2 S (except G1 M1) अभि° (for अधि°). — B1 om. (hapl.) 2^{cd}. — ^{d}) Ś1 K1. 2 नृप (for नृपः).

3 ^{a}) D1. 2 अथ; G1 चापि (for त्वथ). K4 रेणुकां तु समासाद्य. — ^{c}) D1. 2 आश्रमे स (for °मस्थस्).

4 ^{a}) S (except G4) तस्यां (for तस्याः). — ^{c}) T G2–4 च (for तु).

7 ^{b}) D1. 2 S (except T2 G3) हेम° (for पद्म°). — ^{c}) K3. 4 G2 M1 ऋद्धिमत्तां.

8 ^{a}) B2 Dn D4. 6 च (for तु). Ś1 K3 वै तस्मात्; K4 S सा तस्मिन्; Dn (by transp.) तस्मात्सा. D1. 2 व्यभि-

C. 3. 10176
B. 3. 116. 6
K. 3. 117. 6

ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ॥ ६
क्रीडन्तं सलिले दृष्ट्वा सभार्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥ ७
व्यभिचारात्तु सा तस्मात्क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्तान्वबुध्यत ॥ ८
स तां दृष्ट्वा च्युतां धैर्याद्ब्राह्मया लक्ष्म्या विवर्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्यवान् ॥ ९
ततो ज्येष्ठो जामदग्न्यो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा ॥ १०
तानानुपूर्व्याद्भगवान्वधे मातुरचोदयत् ।
न च ते जातसंमोहाः किंचिदूचुर्विचेतसः ॥ ११
ततः शशाप तान्कोपात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्माणः क्षिप्रमासञ्जडोपमाः ॥ १२
ततो रामोऽभ्यगात्पश्चादाश्रमं परवीरहा ।
तमुवाच महामन्युर्जमदग्निर्महातपाः ॥ १३
जहीमां मातरं पापां मा च पुत्र व्यथां कृथाः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥ १४
ततस्तस्य महाराज जमदग्नेर्महात्मनः ।
कोपो *अगच्छत्सहसा प्रसन्नश्चाब्रवीदिदम् ॥ १५
ममेदं वचनात्तात कृतं ते कर्म दुष्करम् ।
वृणीष्व कामान्धर्मज्ञ यावतो वाञ्छसे हृदा ॥ १६
स वव्रे मातुरुत्थानमस्मृतिं च वधस्य वै ।
पापेन तेन चास्पर्शं भ्रातॄणां प्रकृतिं तथा ॥ १७
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ।
ददौ च सर्वान्कामांस्ताञ्जमदग्निर्महातपाः ॥ १८
कदाचित्तु तथैवास्य विनिष्क्रान्ताः सुताः प्रभो ।
अथानूपपतिर्वीरः कार्तवीर्योऽभ्यवर्तत ॥ १९
तमाश्रमपदं प्राप्तमृषेर्भार्या समर्चयत् ।

चारेण सा चैव. — [b]) Ś1 K1. 2 क्लिन्नांगा वै; K3 Dc D5 क्लिन्नांगी वै; K4 D1. 2 संक्लिन्नांगी (for क्लिन्नाम्भसि). — After 8[ab], T (T1 marg.) G2–4 ins.:

575* अन्तरिक्षात्क्षिपतिता नर्मदायां महाह्रदे ।
उत्तीर्य चापि सा यत्नाज्जगाम भरतर्षभ ।

— [c]) T G [अ]थ संत्रस्ता (for [आ]श्रमं त्रस्ता). — [d]) T G1. 3. 4 तस्यै (for तां वै). T2 G3. 4 त्ववुं; G1 [अ]नुवुं (for [अ]न्ववुं).

9 [a]) D1. 2 दृष्ट्वा तां प्रच्युतां धैर्याद्. — [b]) K1. 2 ब्रह्म· (for ब्राह्मया). — [c]) D1. 2 °वीर्यो (for °तेजा). — [d]) D1. 2 जगाद स तु वीर्य°.

10 [b]) K3 मरुता; K3 समन्वा; D1 सुतपो; T1 जमंडो (for रुमण्वान्). D2 भारत (for नामतः). — [d]) Dc T2 G2–4 तदा (for तथा).

11 [a]) K3. 4 B1–3 Dn2. n3 D1. 2. 4–6 °पूर्व्या (for °पूर्व्याद्). — [c]) K1 जातसंदोहाः; K4 G1 °संमोहात्; B2. 4 Dn D4. 6 °सं(Dn1 D4. 6 °स)मोहाः. — [d]) T2 G3. 4 अचे° (for विचे°).

12 [a]) B2–4 Dn D4. 6 T1 G4 M क्रोधात् (for कोपात्). — [b]) Dc सर्वे (for शप्ताश्).

13 [a]) B2. 4 Dn D4. 6 G4 M1 [s]भ्ययात्. — [b]) D1. 2 °मं स्वं युधिष्ठिर. — [c]) B2. 4 Dn D4. 6 °बाहुर् (for °मन्युर्). — [d]) Ś1 K D5 प्रतापवान्; T2 G2–4 महायशाः (for °तपाः).

14 D4 om. (hapl.) 14[a]–15[b]. — After 14[ab], G1 ins.:

576* इत्युक्तो गुरुणा राजन्क्रोधात्तु जमदग्निना ।

15 D4 om. 15[ab] (cf. v.l. 14). — [a]) Ś1 K1. 2 °बाहोर् (for °राज). — [c]) Ś1 K3. 4 D5 व्यगच्छत्; K1. 2 D2 G4 M [s]भ्यग°; B Dn D1. 4. 6 T2 G1–3 [s]म्यग°; Dc [s]भ्यगाद्वै; T1 ह्यगच्छत् (for *अगच्छत्). — [d]) Dc सुतं (for इदम्). Ś1 K B1 D5 स प्रसन्नोब्रवीत्सुतं (B1 °स्तु तं).

16 [a]) Ś1 K B1 Dc राम (for तात). — [b]) T1 G1 कृतं कर्म सुदुष्करं. — [c]) D1. 2 T2 (before corr.) G1. 2. 4 कामं (for कामान्). Ś1 K धर्मात्मन् (for धर्मज्ञ). — [d]) K3. 4 यावंतो; Dc यांश्च त्वं; D1. 2 यावत्त्वं (for यावतो). Ś1 K1. 4 मत्त इच्छसि; D1. 2 मन्यसे हृदा (for वाञ्छसे हृदा).

17 [b]) Ś1 K D5 वधं प्रति (for वधस्य वै).

18 [c]) Ś1 K1. 4 स (for च). Dc D1. 2 सर्वकामांस्तान्; K4 सकलान्कामान्; T2 G2–4 M1 कामान्सर्वांस्तान् (for सर्वान्कामांस्तान्). Dn2 तान्कामान् (by transp.). T2 G2 स (for तान्). T1 ददौ तस्मै स कामांस्तान्.

19 [b]) G1 सु· (for वि·). — [c]) D1. 2 ततो°; G2 तदा°; G4 अथो° (for अथा°).

20 [b]) D5 मुनिभार्यां; G2. 4 ऋषिरभ्यात् (for ऋषेर्भार्यां). Dn D4–6 T2 G2. 4 समार्च° (for समर्च°). Ś1 K2. 4 ऋषिः

स युद्धमदसंमत्तो नाभ्यनन्दत्तथार्चनम् ॥ २०
प्रमथ्य चाश्रमात्तस्माद्धोमधेन्वास्तदा बलात् ।
जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमान् ॥ २१
आगताय च रामाय तदाचष्ट पिता स्वयम् ।
गां च रोरूयतीं दृष्ट्वा कोपो रामं समाविशत् ॥ २२
स मन्युवशमापन्नः कार्तवीर्यमुपाद्रवत् ।
तस्याथ युधि विक्रम्य भार्गवः परवीरहा ॥ २३
चिच्छेद निशितैर्भल्लैर्बाहून्परिघसंनिभान् ।
सहस्रसंमितान्राजन्प्रगृह्य रुचिरं धनुः ॥ २४
अर्जुनस्याथ दायादा रामेण कृतमन्यवः ।
आश्रमस्थं विना रामं जमदग्निमुपाद्रवन् ॥ २५
ते तं जघ्नुर्महावीर्यमयुध्यन्तं तपस्विनम् ।
असकृद्राम रामेति विक्रोशन्तमनाथवत् ॥ २६
कार्तवीर्यस्य पुत्रास्तु जमदग्निं युधिष्ठिर ।
घातयित्वा शरैर्जग्मुर्यथागतमरिंदमाः ॥ २७
अपक्रान्तेषु चैतेषु जमदग्नौ तथागते ।
समित्पाणिरुपागच्छदाश्रमं भृगुनन्दनः ॥ २८
55 Before मनसा, K2–4 B1. 3 D (except D1. 3) G3 ins. स. B D (except D1–3. 5) G3 विचित्य; T1 M विनिश्चित्य (for निश्चित्य). K1 S (except G3) मासे (for मासि). — T2 G2 पर्याप्तिर्. After पर्याप्तं, Dn2 G3 ins. तदा; G1 कार्यं तर्हि. T2 G2. 4 निर्यातनीयौ (for निर्यातय). Ś1 K2. 4 B Dc G4 M1 [उ]पाध्यायाय वाम्यौ (B4 °य आचष्ट) (for [उ]पाध्यायवाम्यौ). B4 om. [इ]ति.

56 D4 om. स. Ś1 K1. 3 D1. 3. 5 G2 [ए]नं; K4 Dc Dn D4 G3 [ए]त्र (for [ए]नं). Ś1 K1. 3 D1 T G2. 4 M om. तं. K4 D3. 5 om. तं राजानम्.

57 K1 तं राजानं; K3 स राजा तं (for तं राजा). G4 [उ]वाच (for प्रत्यु°). After वाहनम्, G1 M1 ins. अहं.

C. 3. 13185
B. 3. 192. 16
K. 3. 195. 46

वाच । राज्ञामेतद्वाहनम् । अनर्हा ब्राह्मणा रत्नाना-
मेवंविधानाम् । किं च ब्राह्मणानामश्वैः कार्यम् । साधु
प्रतिगम्यतामिति ॥ ५७ ॥ स गत्वैवमुपाध्यायाया-
चष्ट ॥ ५८ ॥ तच्छ्रुत्वा वचनमप्रियं वामदेवः क्रोध-
परीतात्मा स्वयमेव राजानमभिगम्याश्वार्थमभ्यचो-
दयत् । न चादाद्राजा ॥ ५९ ॥

वामदेव उवाच ।

प्रयच्छ वाम्यौ मम पार्थिव त्वं
कृतं हि ते कार्यमन्यैरशक्यम् ।
मा त्वा वधीद्वरुणो घोरपाशै-
र्ब्रह्मक्षत्रस्यान्तरे वर्तमानः ॥ ६०

राजोवाच ।

अनड्वाहौ सुव्रतौ साधु दान्ता-
वेतद्विप्राणां वाहनं वामदेव ।
ताभ्यां याहि त्वं यत्र कामो महर्षे
छन्दांसि वै त्वादृशं संवहन्ति ॥ ६१

वामदेव उवाच ।

छन्दांसि वै मादृशं संवहन्ति
लोकेऽमुष्मिन्पार्थिव यानि सन्ति ।
अस्मिंस्तु लोके मम यानमेत-
दस्मद्विधानामपरेषां च राजन् ॥ ६२

राजोवाच ।

चत्वारो वा गर्दभास्त्वां वहन्तु
श्रेष्ठाश्वतर्यो हरयो वा तुरंगाः ।
तैस्त्वं याहि क्षत्रियस्यैष वाहो
मम वाम्यौ न तवैतौ हि विद्धि ॥ ६३

वामदेव उवाच ।

घोरं व्रतं ब्राह्मणस्यैतदाहु-
रेतद्राजन्यदिहाजीवमानः ।
अयस्मया घोररूपा महान्तो

— M_2 om. from अनर्हा up to राजानम् (in 59). — After °विधानाम्, T $G_{1.2.4}$ ins. इति. — $K_{1.2}$ किं च न; T $G_{1.2.4}$ न (T_1 om. न) किंचिद् (for किं च). B Dc Dn $D_{1.2-6}$ om. च. D_5 कार्यमश्वैः (by transp.). — B_{2-4} Dn $D_{4.6}$ T G om. प्रति-. B_{2-4} Dn $D_{4.6}$ G_3 om. इति.

58 $K_{3.4}$ B_{2-4} D G_3 एतद् (for एवम्). Śi K $D_{1-3.5}$ [आ]चचक्षे (for [आ]चष्ट).

59 Before तच्छ्रुत्वा, Dc ins. तदा. G_1 भूयो (for अप्रियं). Dc वामदेवश्च. D_5 कोप°; G_2 क्रोधपरीतांतरात्मा. Śi K $D_{1-3.5}$ read अभिचोदयन्नुवाच (for अभ्यचोदयत्), and om. न चादाद्राजा. B Dc Dn $D_{4.6}$ G_3 अचोदयत् (for अभ्यचो°). — The same MSS. [अ]ददद्; G_4 M_2 अददाद् (for [अ]दाद्).

60 Śi $K_{1.3.4}$ om. the ref. — [b]) Śi $K_{1.2}$ कार्यमनन्यशक्यं; K_3. 4 B_{2-4} Dn D_{1-6} G_3 कार्यमाभ्यामशक्यं; G_4 कार्यमन्यैर्न शक्यं. — [c]) K_4 Dc त्वां; G_2 M_2 त्वं (for त्वा). T हिंस्यैद्; $G_{1.2.4}$ M हिंसीद् (for वधीद्). — [d]) G_1 स तु; G_3 प्राहुः (for ब्रह्म-). N $G_{2.3}$ वर्तमानं.

61 [a]) G_1 सुभृतौ. — [b]) Dc तद्; T_2 $G_{1.2.4}$ [ए]तौ (for [ए]तद्). — [c]) G_1 ब्राह्मणस् (for ताभ्यां याहि). $G_{2.4}$ पितृ- (for यत्र).

62 G_1 om. 62^c–63^d. — [c]) G_2 M एतम् (for एतद्). — [d]) S (except G_3; G_1 om.) अपरेषु (for अपरेषां च).

63 G_1 om. 63 (cf. v.l. 62). — [a]) Śi K_1 G_4 त्वा (for त्वां). B_{2-4} Dc Dn $D_{4.6}$ G_3 चत्वारस्त्वां वा (Dc Dn_3 om. वा) गर्दभाः संवहंतु. — [b]) T $G_{2.4}$ M om. वा. B वातरंहसः; Dc Dn $D_{4.6}$ G_3 वातरंहाः (for वा तुरंगाः). T_2 $G_{2.4}$ तु मेर्हाः (for तुरंगाः). — [c]) $D_{1.2.4}$ [ए]व (for [ए]ष). K_1 $D_{2.4}$ वाहौ. — [d]) After मम, B D (except D_5) G_3 ins. [ए]व. T_2 $G_{2.4}$ तावद् (for न तव). Śi $K_{1.2}$ [अ]श्वौ (for [ए]तौ).

64 [a]) T_1 नैतद्; T_2 $G_{1.2.4}$ M_1 नैवं; M_2 न वै (for घोरं). — [b]) Śi $K_{1.2}$ यदिह संजीवयामि; $K_{3.4}$ B_1 $D_{1.2.3}$ (marg. *sec. m.* as in text). 5 यदिहाजीवयामि; T_2 $G_{2.4}$ यद्वभाषे वचो मां. — [c]) D_5 अयोमया. — After 64^{abc}, B D (except D_{1-3}) G_3 ins.:

964* चत्वारो वा यातुधानाः सुरौद्राः ।
मया प्रयुक्तास्त्वद्वधमीप्समाना.

— [d]) B_4 निघ्नंतु; Dc S (except G_3) हरंतु (for वहन्तु). Śi $K_{1.3.4}$ D_3 M त्वा (for त्वां). $K_{1.4}$ शितरूपा°; Dn_1 D_3 शतशूला°; M_2 शरशूला°. T_1 शितशूलाग्रहस्ताः.

65 [a]) M_1 ते (for ये). After ये, $K_{1.2}$ ins. हि.

वहन्तु त्वां शितशूलाश्चतुर्धा ॥ ६४
राजोवाच ।
ये त्वा विदुर्ब्राह्मणं वामदेव
वाचा हन्तुं मनसा कर्मणा वा ।
ते त्वां सशिष्यमिह पातयन्तु
मद्वाक्यनुन्नाः शितशूलासिहस्ताः ॥ ६५
वामदेव उवाच ।
नानुयोगा ब्राह्मणानां भवन्ति
वाचा राजन्मनसा कर्मणा वा ।
यस्त्वेवं ब्रह्म तपसान्वेति विद्वां-
स्तेन श्रेष्ठो भवति हि जीवमानः ॥ ६६
मार्कण्डेय उवाच ।
एवमुक्ते वामदेवेन राज-
न्समुत्तस्थू राक्षसा घोररूपाः ।
तैः शूलहस्तैर्वध्यमानः स राजा
प्रोवाचेदं वाक्यमुच्चैस्तदानीम् ॥ ६७
इक्ष्वाकवो यदि ब्रह्मन्दलो वा
विधेया मे यदि वान्ये विशोऽपि ।
नोत्सक्ष्येऽहं वामदेवस्य वाम्यौ
नैवंविधा धर्मशीला भवन्ति ॥ ६८
एवं ब्रुवन्नेव स यातुधानै-
र्हतो जगामाशु महीं क्षितीशः ।
ततो विदित्वा नृपतिं निपातित-
मिक्ष्वाकवो वै दलमभ्यषिञ्चन् ॥ ६९
राज्ये तदा तत्र गत्वा स विप्रः
प्रोवाचेदं वचनं वामदेवः ।
दलं राजानं ब्राह्मणानां हि देय-
मेवं राजन्सर्वधर्मेषु दृष्टम् ॥ ७०

C. 3. 13199
B. 3. 192. 60
K. 3. 195. 60

K$_{2-4}$ B D (except D$_{c2}$) T$_1$ G$_3$ M त्वां (for त्वा). Ś$_1$ K D$_{1-3}$ विद्युर् (for विदुर्). B T$_2$ G$_{1.\,2.\,4}$ M$_1$ ब्राह्मणा (T$_2$ °ण). K$_3$ D$_5$ वामदेवं. — [b]) G$_1$ M$_2$ हंत; G$_{2.\,4}$ हंत्वा (sic) (for हन्तुं). — K$_3$ T$_1$ G$_2$ om. (hapl.) 65[c]–66[b]. — [c]) K$_{1.\,2}$ G$_1$ ते त्वा; T$_2$ G$_4$ स त्वा. T$_2$ G$_4$ सहिष्यामि ह (for सशिष्यमिह). — [d]) Ś$_1$ K$_{1.\,4}$ D$_c$ D$_{1-3.\,5}$ M$_1$ शितशूलहस्ताः; B$_4$ T$_2$ G$_{1.\,4}$ M$_2$ शितशूलाग्रहस्ताः. — After 65, K$_2$ B D$_c$ D$_n$ D$_3$(marg. *sec. m.*). 4–6 G$_3$ ins.:

965* वामदेव उवाच ।
ममैतौ वाम्यौ प्रतिगृह्य राज-
न्पुनर्ददानीति प्रपद्य मे त्वम् ।
प्रयच्छ शीघ्रं मम वाम्यौ त्वमश्वौ
यथात्मानं जीवितुं ते क्षमं स्यात् ।
राजोवाच ।
न ब्राह्मणेभ्यो मृगया प्रसूता [5]
न त्वानुशास्म्यद्य प्रभृति ह्यसत्यम् ।
तवैवाज्ञां संप्रणिधाय सर्वा
तथा ब्रह्मन्पुण्यलोकं लभेयम् ।

[(L. 2) K$_2$ B$_1$ D$_{n1}$ D$_{3-5}$ G$_3$ ददामीति. K$_2$ B$_{1.\,3.\,4}$ D$_c$ प्रपद्यसे (for °द्य मे). — (L. 4) K$_2$ D$_{4-6}$ यथात्मानं; D$_c$ यथात्मनो. K$_2$ D$_c$ D$_3$ जीवितं. — (L. 5) D$_5$ वा प्रशस्ता (for प्रसूता). — (L. 6) D$_c$ ह्यसंतम् (for ह्यसत्यम्).]

66 K$_3$ T$_1$ G$_3$ om. 66[ab] (cf. v.l. 65). — [a]) D$_1$ नानुयोग्या; D$_5$ नानुयोगा; G$_4$ नानुयोगाद्. — [b]) D$_1$ हंतुं (for राजन्). — [c]) Ś$_1$ K D$_{1-3.\,5}$ यस्त्वेष; D$_n$ D$_4$ G$_3$ यस्त्वेव; T$_1$ G$_2$ यस्त्वैवं. Ś$_1$ धर्म-; D$_c$ ब्रह्मन्; D$_1$. 2 ब्राह्मणस्; D$_4$ ब्राह्म-; T$_2$ G$_4$ वै (for ब्रह्म). K$_4$ D$_{2.\,3.\,5}$ वेत्ति; T$_1$ G$_1$. 2 [अ]त्येति; M$_1$ [अ]न्येति; M$_2$ [अ]ध्येति (for [अ]न्वेति). — [d]) D$_c$ D$_1$ om. हि. D$_3$ T$_2$ G$_{2.\,4}$ [ह्]ह (for हि).

67 K$_{1.\,3.\,4}$ D$_{1-3.\,5}$ G$_4$ om. the ref. Ś$_1$ T G$_2$ वैशं° (for मार्कं°). — [a]) S (except G$_3$) चोक्तं (for उक्तं).

68 [a]) K$_{1.\,2.\,4}$ D$_{1-3.\,5}$ ब्रह्मा दलो (for ब्रह्मन्दलो). T$_1$ G$_1$ इक्ष्वाकवो यदि वा ब्रह्मदग्धा; T$_2$ G$_{2.\,4}$ °वो वा यदि वा मां त्यजेयुर्. — [b]) T$_1$ G$_1$ M ते (for मे). B D (except D$_{1-3.\,5}$) T$_1$ G$_{1.\,3}$ M चेमे (for वान्ये). T$_2$ G$_{2.\,4}$ ये ते विधेया भुवि चान्ये महीपाः. — [c]) T G$_{2.\,4}$ नोत्सृजेहं; G$_1$ नैतत्सक्ष्ये. S (except G$_3$) वामदेवाय (for °देवस्य). — [d]) B D$_n$ D$_{4.\,6}$ कर्मं° (for धर्मं°).

69 [a]) Ś$_1$ K$_{1.\,2}$ तु (for स). — [b]) D$_{1.\,2}$ जगामाथ. T$_1$ G$_1$ M$_1$ महीशः (for क्षितीशः). — [d]) Ś$_1$ K D$_{1-3.\,5}$ दलमेव (for वै दलम्).

70 [c]) B$_4$ T$_2$ G$_{2.\,4}$ राजन् (for राजानं). — [d]) D$_c$ जुष्टं; T$_1$ दिष्टं; G$_4$ दृष्टः.

71 [a]) D$_{c2}$ T$_1$ तु (for त्वम्). — [d]) Ś$_1$ K$_{1.\,2}$ स चापपाणिः; K$_4$ D$_{1-3}$ मोहान्वितः (for स पार्थिवः). K$_4$

C. 3 13200
B. 3 192. 61
K. 3 195. 61

बिभेषि चेत्त्वमधर्मान्नरेन्द्र
प्रयच्छ मे शीघ्रमेवाद्य वाम्यौ ।
एतच्छ्रुत्वा वामदेवस्य वाक्यं
स पार्थिवः सूतमुवाच रोषात् ॥ ७१
एकं हि मे सायकं चित्ररूपं
दिग्धं विषेणाहर संगृहीतम् ।
येन विद्धो वामदेवः शयीत
संदश्यमानः श्वभिगर्तरूपः ॥ ७२
वामदेव उवाच ।
जानामि पुत्रं दशवर्षं तवाहं
जातं महिष्यां श्येनजितं नरेन्द्र ।
तं जहि त्वं मद्वचनात्प्रणुन्न-
स्तूर्णं प्रियं सायकैर्घोररूपैः ॥ ७३
मार्कण्डेय उवाच ।
एवमुक्तो वामदेवेन राज-
न्नन्तःपुरे राजपुत्रं जघान ।
स सायकस्तिग्मतेजा विसृष्टः
श्रुत्वा दलस्तच्च वाक्यं बभाषे ॥ ७४
इक्ष्वाकवो हन्त चरामि वः प्रियं
निहन्मीमं विप्रमद्य प्रमथ्य ।
आनीयतामपरस्तिग्मतेजाः
पश्यध्वं मे वीर्यमद्य क्षितीशाः ॥ ७५
वामदेव उवाच ।
यं त्वमेनं सायकं घोररूपं
विषेण दिग्धं मम संदधासि ।
न त्वमेनं शरवर्यं विमोक्तुं
संधातुं वा शक्ष्यसि मानवेन्द्र ॥ ७६
राजोवाच ।
इक्ष्वाकवः पश्यत मां गृहीतं
न वै शक्नोम्येष शरं विमोक्तुम् ।
न चास्य कर्तुं नाशमभ्युत्सहामि
आयुष्मान्वै जीवतु वामदेवः ॥ ७७
वामदेव उवाच ।
संस्पृशैनां महिषीं सायकेन

D1–3 राजा (for रोषात्).

72 a) G2. 4 एनं. Ś1 K D1–3. 5 घोर° (for चित्र°). — c) T2 G2. 4 येनैष (for येन). — d) D1. 2 संभक्ष्यमाणः; T1 संदह्य°. — After 72, Ś1 K1. 2 ins. a colophon.

73 b) T1 G1 M1 शूरं (for जातं). Ś1 K1. 2 सैन्य- (K1 °न)जितं; K4 B1. 4 D1–3 G1 सेन°; T1 M1 एव जातं; G2. 4 स्वेन जितं; M2 एव शूरं. K4 Dc2 G2. 4 नरेंद्रं. — c) B2 स तं; D5 T1 G1 M तं वै; T2 G2. 4 एतं (for तं). D3 नरेंद्र (for प्रणुन्नस्). — d) Ś1 K1. 2 G1 तूर्णं प्रियैः; K4 D2. 3 कुलप्रियं; D5 पुत्रं प्रियं.

74 T1 G4 M2 om. the ref. — a) D (except Dn1) एवमुक्ते. — d) B D (except D5) G3 तत्र; T2 G2. 4 तस्य (for तच्च).

75 Before 75, B D (except D1–3. 5) G3 ins. राजोवाच. — a) K4 [S]हं वितरामि (for हन्त चरामि). G2. 4 चराम विप्रियं (for चरामि वः प्रियं). — b) T G1. 2. 4 निहन्म्यहं. — c) B4 S (except G3) तिग्मवेगः.

76 a) K4 B Dc Dn D1. 4–6 G3 यस्त्वमेनं (K4 B4 °वं); D3 T M यं त्वमेकं; G1. 2. 4 यस्त्वमेकं. — b) K1. 2 संददासि. — c) B Dn D4. 6 G3 न त्वेतं त्वं; T2 G2. 4 स त्वमेनं; M न त्वमेवं. Ś1 B2. 3 D (except D1–3) T2 G3 शरवर्षं. — d) K3. 4 Dc D1. 2. 5 T G1. 4 M न संधातुं; G2 न संदधातुं (for संधातुं वा). K1. 3 T2 शक्यसि; K2 D (except D1–3) G3 शक्यमे. Ś1 K1. 3 हे नरेंद्र; K3 T1 मां नरेंद्र; K4 D1. 2 वा नरेंद्र.

77 a) D1 पश्यतां; G2 पश्यतु; G4 पश्यतो. Ś1 K1. 3 T1 मा; T2 G1. 2. 4 M मे (for मां). T2 G2. 4 ग्रहीतुं. — b) Ś1 K1. 3 नैनं; Dc D5 T2 G1. 2. 4 M न चैव (G1. 4 °प) (for न वै). Dc om. [ए]व. Ś1 K1. 3 [अ]द्य (for [ए]व). G1 शत्रुं (for शरं). G2 प्रमोक्तुं. — K3 om. (hapl.) 77c–78b. — c) K4 D3. 5 अभ्युत्सहेहं; T2 G4 अप्युत्सहामि. G1 M न चास्य नाशमहमप्युत्सहामि. — d) G3. 4 जीवितुं.

78 K3 om. 78ab (cf. v.l. 77). — a) K4 B Dn D3–6 G3 संस्पृश्यैनां; T G1. 2. 4 M °शेमां. — b) T1 G1 M तत एतस्माद्; T2 G3. 4 तदेतस्माद्.

79 All MSS. om. the ref. — a) Ś1 तथा ततः; T2 G4 ततस्तत्; G2 ततश्च तत् (for ततस्तथा). B2 M3 स (for तु). — Before 79cd, K3. 4 D1–3 ins. राज्ञ्युवाच; B Dn

ततस्तस्मादेनसो मोक्ष्यसे त्वम् ॥ ७८

मार्कण्डेय उवाच ।

ततस्तथा कृतवान्पार्थिवस्तु
ततो मुनिं राजपुत्री बभाषे ।
यथा युक्तं वामदेवाहमेनं
दिने दिने संविशन्ती व्यशंसम् ।
ब्राह्मणेभ्यो मृगयन्ती सूनृतानि
तथा ब्रह्मन्पुण्यलोकं लभेयम् ॥ ७९

वामदेव उवाच ।

त्वया त्रातं राजकुलं शुभेक्षणे
वरं वृणीष्वाप्रतिमं ददानि ते ।
प्रशाधीमं स्वजनं राजपुत्रि
इक्ष्वाकुराज्यं सुमहच्चाप्यनिन्द्ये ॥ ८०

राजपुत्र्युवाच ।

वरं वृणे भगवन्नेकमेव
विमुच्यतां किल्बिषादद्य भर्ता ।
शिवेन चाख्याहि सपुत्रबान्धवं
वरो वृतो ह्येष मया द्विजाग्र्य ॥ ८१

मार्कण्डेय उवाच ।

श्रुत्वा वचः स मुनी राजपुत्र्या-
स्तथास्त्विति प्राह कुरुप्रवीर ।
ततः स राजा मुदितो बभूव
वाग्यौ चास्मै संप्रददौ प्रणम्य ॥ ८२

C. 3. 142f*
B. 3. 192. 72
K. 3. 195. 72

इति श्रीमहाभारते आरण्यकपर्वणि नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

D5. 6 राजपुत्र्युवाच; Dc देव्युवाच. — c) B4 Dn D4. 6 G3 युक्ता. S (except G3) एव (for एनं). — d) B Dc Dn D1. 4. 6 G3 संदिशंती; D5 °वसंती; T M2 °विशंति. K1. 2 विशंसम्; B D (except D3. 5) G3 नृशंसम्; T1 G1 M1 ह्यशंसम्; T2 प्रशंसम्; G4 प्रवृद्धम्; M2 अभ्याशम्. — e) B Dc मृगयन्; Dn D4. 6 T1 G1 मृगयती; T2 G2. 4 गायंती. — f) T1 G1 M1 तथा सती; T2 G2. 4 तथा वै ब्रह्मन्; M2 तथाहं वै (for तथा ब्रह्मन्). Śi K D1–3 पुण्यलोकान्; T1 G1 M ब्रह्मलोकं. Śi K D1–3. 5 व्रजेयं (for लभें°).

80 After the ref., D5 ins. 966*. — a) T1 G1 M स्विदं शुभे (for शुभें°). — b) D3. 4 वृणीथा°. K4 Dc2 Dn2 D1. 2 T2 G3 ददामि. K4 T2 G4 om. ते. — c) T1 प्रशासि त्वं (for °धीमं). K4 Dc D1. 2. 5 T2 G2 M त्वं जनं; T1 जनकं; G4 च जनं (for स्वजनं). — Śi K1–3 subst. for 80: D5 ins. after the ref.:

966* साध्वि स्थिरं चेयमदुष्टचित्ता
धर्मे मतिस्ते सततं प्रयातु ।
वरं च मत्तः प्रतिकाङ्क्षस्व सुभ्रु
त्वया वृतः पालनीयो हि नित्यम् ।

81 Śi K D1–3 राज्ञ्युवाच; B1–3 राजपत्न्युवाच. — a) B2. 3 Dc D4 G3 एवमेष; Dn D6 त्वेवमेष; G1 एवमेवं (for एकमेव). — b) M2 मेघ (for अद्य). — After 81ab, D1. 2 ins.:

967* वृत्तेन बुद्ध्या च विवृद्धिमेतु
जीवेदसौ मम पुत्रोऽद्य विप्र ।

— D2. 4 om. 81cd. — c) Śi K1. 2 मां ध्याहि; K3 चाध्याय; K4 Dc1 Dn1. n2 D6 G3 च ध्याहि; T2 G4 जीवामि; G1 चाख्याहि. Śi K1. 2 B4 T2 G2. 4 °बांधवा. — d) B2 द्विजेंद्र.

82 Śi K1 मार्कांडेय उ° (Śi om. उ°). — b) Śi D1 ख्याह; T1 [इ]त्याह (for प्राह). — d) T2 G2. 4 तस्मै (for चास्मै). K3. 4 प्रददौ (for संप्र°). B Dn D4. 6 T2 G प्रददौ संप्रणम्य.

Colophon om. in K3. — *Major parvan:* Śi T G1 आरण्य; G2 श्रीमदारण्य. — *Sub-parvan:* G1 मार्कंडेयसमस्या (followed by मंडूकोपाख्यान). B Dc Dn D4. 6 G3 (all om. sub-parvan name) mention only मंडूकोपाख्यान (followed by समाप्त in B1 Dc); and M2, likewise, only वामदेवोपाख्यान. — *Adhy. name:* K3. 4 Dc D1–3. 5 ब्राह्मणमाहात्म्यं. — *Adhy. no.* (figures, words or both): Dn 191 (Dn3 192); D1 198; T G1. 2. 4 M (M2 *inf. lin.*) 194 (M2 orig. 197). — *Śloka no.:* Dn3. n3 72; D1 90.

☞ A passage given in App. I (No. 21) is ins. in K3 B3–4 Dc Dn D4. 6 G3 after adhy. 190, and in K1. 4 D1–3 after adhy. 206 (with some further

C. 3. 13331
B. 3. 199. 1
K. 3. 202. 1

वैशंपायन उवाच ।

मार्कण्डेयमृषयः पाण्डवाश्च पर्यपृच्छन् । अस्ति कश्चिद्भवतश्चिरजाततर इति ॥ १ ॥ स तानुवाच । अस्ति खलु राजर्षिरिन्द्रद्युम्नो नाम क्षीणपुण्यस्त्रिदिवात्प्रच्युतः । कीर्तिस्ते व्युच्छिन्नेति । स मामुपातिष्ठत् । अथ प्रत्यभिजानाति मां भवानिति ॥ २ ॥ तमहमब्रुवम् । न वयं रासायनिकाः शरीरोपतापेनात्मनः समारभामहेऽर्थानामनुष्ठानम् ॥ ३ ॥ अस्ति खलु हिमवति प्राकारकर्णो नामोलूकः । स भवन्तं यदि जानीयात् । प्रकृष्टे चाध्वनि हिमवान् । तत्रासौ प्रतिवसतीति ॥ ४ ॥

स मामश्वो भूत्वा तत्रावहद्यत्र बभूवोलूकः ॥ ५ ॥ अथैनं स राजर्षिः पर्यपृच्छत् । प्रत्यभिजानाति मां भवानिति ॥ ६ ॥ स मुहूर्तं ध्यात्वाब्रवीदेनम् ।

---

internal transposition), in D_3 the first one of the adhy. being written *sec. m.* on a suppl. fol. and placed after adhy. 190!

191

1 B_{2-4} om. ऋषयः. T $G_{3.4}$ ऋषिं (for ऋषयः). B_{2-6} Dn $D_{1.4-6}$ om. च. After च, T_2 $G_{2.4}$ ins. परिवृत्य इंद्रद्युम्नोपाख्यानं. T_2 $G_{2.4}$ अपृच्छन् (for पर्यपृ˚). — Before अस्ति, G_1 M_1 ins. किम्. $G_{2.4}$ भगवत˚ (for भवत˚). $K_{1.3.4}$ B Dn $D_{3.4.6}$ चिरजात (for चिरजाततर).

2 G_1 om. स तानुवाच, and ins. पुरा कश्चिद् after खलु. $\acute{S}_1$ K_2 राजन्; D_4 G_3 ऋषिर् (for राजर्षिर्). — B Dc Dn D_3 (before corr.). $_{4.6}$ G_3 मे; T M तस्य; $G_{1.3.4}$ अस्य (for ते). G_1 विच्छिन्नेति; T_2 $G_{1.3.4}$ विच्युतेति. — K_3 B_4 D_3 T $G_{1.3}$ उपतिष्ठद्; B_2 उद˚. — K_4 D_{1-3} एवं (for अथ). $\acute{S}_1$ om. from अथ प्रत्यभि˚ up to the end of 2. T_1 om. मां भवानिति. T_2 $G_{1.3}$ मा (for मां).

3 D_5 T_2 $G_{2.4}$ om. अहम्. After अहम्, G_1 ins. एवम्. G_4 अब्रवीत्; M अब्रवं (!). — After अब्रुवं, Dn $D_{4.6}$ ins. कार्यचेष्टाकुलत्वात्; G_3 नापि जानामि भवंतमिति. — T $G_{1.4}$ M om. न. After वयं, G_3 ins. न. B Dc Dn $D_{4.6}$ G_3 वासा˚; T G रसा˚ (for रासा˚). Before शरीरो˚, B Dc Dn $D_{4.6}$ G_3 ins. न. B Dc Dn $D_{4.6}$ G_3 समारभामो; T_2 $G_{2.4}$ समारंभामहे. Before अर्थानाम्, $G_{1.3.4}$ ins. तथा. After अनुष्ठानम्, M_1 ins. अस्ति कश्चिद्भवतश्चिरजाततर इति (cf. 1). — After 3, T_2 G_4 ins.:

968* एवमुक्तः स राजर्षिरिन्द्रद्युम्नः पुनर्मामब्रवीत् । अथास्ति कश्चिद्भवत्तश्चिरजाततर इति । तं पुनः प्रत्यब्रुवम् ।

For 3, $\acute{S}_1$ (om. all words up to मामुवाच) K $D_{1-3.5}$ subst.:

969* तमहमब्रुवम् । आकुलत्वात्कार्यचेष्टानां न प्रत्यभिजानेऽहम् । स मामुवाच । अस्त्यन्यश्चिरजाततर इति । तमब्रुवम् ।

4 B_3 om. (hapl.) from अस्ति in 4 up to उलूकमब्रवीत् in 8. M_3 om. खलु. T_1 M_1 तु (for खलु). $B_{1.3.4}$ D (except $D_{1-3.5}$) T_1 $G_{1.3}$ प्रावारकर्णो; T_2 $G_{2.4}$ प्राकारवर्णो. After उलूकः, B D (except $D_{3.5}$) T G ins. प्रतिवसति. — After स, B D (except $D_{1-3.5}$) G_3 ins. मत्तश्चिरजातो. T_2 G_4 transp. स and भवन्तं. G_1 (by transp.) भवन्तं यदि स (for स भवन्तं यदि). M om. भवन्तं. $\acute{S}_1$ K_1. $_2$ जानाति (for जानीयात्). After जानीयात्, B_4 Dc_2 ins. इति. — Before प्रकृष्टे, B_1. $_3$ Dc_1 Dn $D_{4.6}$ G_3 ins. इतः. G_3 om. from प्रकृष्टे up to तत्रावहद् (in 5). T_2 G_4 विप्रकृष्टे (for प्रकृष्टे). After प्रकृष्टे, $\acute{S}_1$ ins. नाश्वेनानीतो; K_3 नाधुनानीतो. $\acute{S}_1$ K_3 om. चाध्वनि. K_1 नाध्व˚ (for चाध्व˚). After चाध्वनि, $K_{3.4}$ B_1 $D_{1-3.5}$ T_1 M ins. इतो; T_2 G_4 यतो; G_1 ततो. — $\acute{S}_1$ K_{3-4} Dc $D_{1-3.5}$ T_1 $G_{1.4}$ M_1 यत्र (for तत्र). $\acute{S}_1$ K_{3-4} $D_{1-3.5}$ om. [इ]ति.

5 B_3 om. 5 (cf. v.l. 4). G_3 om. up to तत्रावहद् (cf. v.l. 4). Before स, B D (except $D_{1-3.5}$) G_3 ins. ततः. T_2 G_4 समाश्वस्तो; G_1 स माश्वो (for स मामश्वो). Dc om. तत्र. $\acute{S}_1$ K_1. $_2$ उदवहद्; T_2 G_4 तत्रायाद् (for तत्रावहद्). After यत्र, $\acute{S}_1$ K_1. $_2$ ins. असौ; $K_{3.4}$ Dc_2 $D_{2.5}$ M स. $\acute{S}_1$ K_1. $_2$ उलूको बभूव (by transp.). T_2 $G_{2.4}$ अभूत्स (for बभूव).

6 B_3 om. 6 (cf. v.l. 4). T_2 $G_{2.4}$ om. स; $\acute{S}_1$ K $D_{1-3.5}$ om. स राजर्षिः. B_1. $_4$ Dc Dn $D_{4.6}$ G_3 स राजा; B_3 राजा स (for स राजर्षिः). $K_{3.4}$ $D_{1.2.5}$ M_1 अपृच्छत्;

नाभिजाने भवन्तमिति ॥ ७ ॥ स एवमुक्तो राजर्षिरिन्द्रद्युम्नः पुनस्तमुलूकमब्रवीत् । अस्ति कश्चिद्भवतश्चिरजाततर इति ॥ ८ ॥ स एवमुक्तोऽब्रवीदेनम् । अस्ति खल्विन्द्रद्युम्नसरो नाम । तस्मिन्नाडीजङ्घो नाम बकः प्रतिवसति । सोऽस्मत्तश्चिरजाततरः । तं पृच्छेति ॥ ९ ॥

तत इन्द्रद्युम्नो मां चोलूकं चादाय तत्सरोऽगच्छद्यत्रासौ नाडीजङ्घो नाम बको बभूव ॥ १० ॥ सोऽस्माभिः पृष्टः । भवानिन्द्रद्युम्नं राजानं प्रत्यभिजानातीति ॥ ११ ॥ स एवमुक्तोऽब्रवीन्मुहूर्तं ध्यात्वा । नाभिजानाम्यहमिन्द्रद्युम्नं राजानमिति ॥ १२ ॥ ततः सोऽस्माभिः पृष्टः । अस्ति कश्चिदन्यो भवतश्चिरजाततर इति ॥ १३ ॥ स नोऽब्रवीत् । अस्ति खल्विहैव सरस्यकूपारो नाम कच्छपः प्रतिवसति । स मत्तश्चिरजाततर इति । स यदि कथंचिदभिजानीयादिमं राजानं तमकूपारं पृच्छाम इति ॥ १४ ॥

C. 3. 13336
B. 3. 199. 6
K. 3. 202. 8

B1. 3. 4 De Dn D4. 6 G3 पप्रच्छ; D3 अब्रवीत् (for पर्यपृच्छत्). After पर्यपृच्छत्, K4 D1–3 ins. स राजा. — Before प्रत्यभि°, K3 ins. क्वचित्; D5 कश्चित्. T2 om. from प्रत्यभि°, up to अब्रवीत् (in 8). B1 De प्रत्यभिजानीते; B4 Dn D4. 6 G3 प्रतिजानाति. T1 G2. 4 मा (for मां). Ś1 K1. 2 अधनमपृच्छत्कश्चि(K1 °ंकंचि)न्मामभिजानाति भवानिति.

7 B2 T2 om. 7 (cf. v.l. 4, 6). After मुहूर्तं, B D (except D1–3. 5) G3 ins. इव. Before अब्रवीद्, D1. 2 ins. तम्. K4 B1 D1. 2 G2. 4 एवं (for एनम्). — B D (except D1–3. 5) T1 G3 नाभिजानामि. De om. इति. T1 om. from इति up to पृष्टः (in 13).

8 T1 om. 8 (cf. v.l. 7). T2 om. up to अब्रवीत् (cf. v.l. 6). Ś1 K1. 2 G4 om. स. B Dn D4. 6 G3 transp. राजर्षिः after अब्रवीत्. M2 om. (hapl.) from अब्रवीत् up to चोलूकं (in 10). — Before अस्ति, B Dn D4. 6 S (except T1 M2) ins. अथ. S (except G3; T1 M2 om.) त्वत्तश् (for भवतश्). — After भवतः, K1. 3 B1. 3. 4 D G3 ins. सकाशाच्. K1. 3 B4 Dn D3 चिरजात (for चिरजाततर).

9 T1 M2 om. 9 (cf. v.l. 7, 8). B De Dn D4. 6 G3 om. एनम्, and read इंद्रद्युम्नं नाम सरः (for इन्द्रद्युम्नसरो नाम). — T2 G4 अस्मिन् (for तस्मिन्). K3 D3 G2 नालीजंघो; D5 नील°; M1 नालीक°. Ś1 K1. 2 प्रतिनिवसति; G1 प्रतिवसनीति. — K3 D3 सोस्मच्; T2 G2. 4 स मत्तश् (for सोऽस्मत्तश्). After °जाततरः, Ś1 K2. 4 D1. 2 T2 ins. इति. — D4 G3 ins. ततस् before तं. Ś1 K4 D2. 3. 5 पृच्छस्वेति; G2 पृच्छतेति.

10 T1 om. 10; M2 om. up to चोलूकं (cf. v.l. 8). K4 D1–3 om. तत. Ś1 K3 ततश्च (for तत). K2 om. (hapl.) from इन्द्र° up to भवान् (in 11). S (except G3; T1 M2 om.) om. the *first* च. K1. 4 B1. 3. 4 D (except D1. 2. 5) G3 om. the *second* च. Ś1 न्यपतद्; K1. 3 [ऽ]भ्यपतद्; K4 D1–3 [ऽ]गमद्; D5 [ऽ]भ्यगच्छद्. Ś1 K3 om. नाडीजङ्घो. D3 नार्लीजंघो; D5 नाल°; M नालीक°. Ś1 K3 om. नाम. G1 om. बको.

11 T1 om. 11 (cf. v.l. 7). G1 परिपृष्टः. — Before भवान्, Ś1 K1 ins. अपि; K3 B2 De अस्ति. T2 G2. 4 माम् (for भवान्). Before इन्द्रद्युम्नं, K3. 4 B1. 3. 4 D (except D1) G3 ins. इममम्. K1 om. राजानं. B Dn D4. 6 G3 अभिजानातीति; T2 G2. 4 प्रतिजानामि.

12 T1 om. 12 (cf. v.l. 7). Ś1 K2 D1 om. स. Dn1. n3 एव; Dn2 G3 एनम् (for एवम्). B1. 3. 4 Dn D4. 6 G3 om. उक्तो. B D (except D1–3. 5) S (T1 om.) मुहूर्तं ध्यात्वाब्रवीत् (by transp.). Ś1 K2 om. मुहूर्तं ध्यात्वा. — D4 om. from नाभि° up to ऽब्रवीद् (in 14). De न हि (for नाभि). Ś1 K1–3 D5 om. [अ]हमिन्द्रद्युम्नं राजानम्. Before इन्द्र°, D2. 3 ins. इमं; S (except G3; T1 om.) भवंतं. K3 B2 D5 om. इति.

13 D4 om. 13; T1 om. up to पृष्टः (cf. v.l. 12, 7); Ś1 K1. 3 D5 om. from ततः up to °ब्रवीत् । अस्ति (in 14). D1 om. सः and अन्यो; B3. 4 Dn D6 G3 om. अस्ति. K2 B Dn D6 G3 transp. अन्यः and भवतः. After °जाततरः, Dn D6 G3 ins. अस्ति.

14 D4 G1 om. स नोऽब्रवीद् (for D4 cf. v.l. 12). — T2 om. from सरस्य° up to ततः स (in 15). Ś1 K1–3 D5 किं त्वस्मिन्नेव; B De Du D4. 6 G3 खल्वस्मिन्नेव (for (for खल्विहैव). Ś1 [अ]कूवरो; K2 °वारो; M2 °बारो. Ś1 प्रतिनिवसति — K1–3 B1. 4 D (except D1–3) G3 om. इति. — T1 om. स; D5 om. स यदि; D1–3 om. यदि. G2. 4 transp. यदि and कथंचिद्. M2 om. कथंचिद्. D3 अजानीयाद्; S (except G3; T2 om.) जानीयाद् (for अभिजा°). K4 D1–3 T1 G1 M2 अकूपारस्तं (for तमकूपारं). Ś1 K2. 3 अकूवारं. G4 M1 om. अकूपारं. B D (except

C. 3. 13339
B. 3. 199. 9
K. 3. 202. 9

ततः स बकस्तमकूपारं कच्छपं विज्ञापयामास। अस्त्यस्माकमभिप्रेतं भवन्तं कंचिदर्थमभिप्रष्टुम्। साध्वागम्यतां तावदिति ॥ १५ ॥ एतच्छ्रुत्वा स कच्छपस्तस्मात्सरस उत्थायाभ्यगच्छद्यत्र तिष्ठामो वयं तस्य सरसस्तीरे ॥ १६ ॥ आगतं चैनं वयमपृच्छाम। भवानिन्द्रद्युम्नं राजानमभिजानातीति ॥ १७ ॥ स मुहूर्तं ध्यात्वा बाष्पपूर्णनयन उद्विग्नहृदयो वेपमानो विसंज्ञकल्पः प्राञ्जलिरब्रवीत्। किमहमेनं न प्रत्यभिजानामि। अहं ह्यनेन सहस्रकृत्वः पूर्वमग्निचितिषूपहितपूर्वः। सरश्चेदमस्य दक्षिणादत्ताभिर्गोभिरतिक्रममाणाभिः कृतम्। अत्र चाहं प्रतिवसामीति ॥ १८ ॥

अथैतत्कच्छपेनोदाहृतं श्रुत्वा समनन्तरं देवलोकादेवरथः प्रादुरासीत् ॥ १९ ॥ वाचश्चाश्रूयन्तेन्द्रद्युम्नं प्रति। प्रस्तुतस्ते स्वर्गः। यथोचितं स्थानमभिपद्यस्व। कीर्तिमानसि। अव्यग्रो याहीति ॥ २० ॥

दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः।
यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ २१

D1–3. 5) G3 पृच्छध्वमिति; G1 पृच्छेति; G2 M1 पृच्छामेति; G4 पृच्छामीति.

15 T2 om. ततः स (cf. v.l. 14); D1 om. ततः. After ततः, T1 ins. स उदितः. T2 G2. 4 om. तम्. Ś1 K2. 3 अकूवारं. — T1 om. (hapl.) from अभिप्रेतं up to राजानमभि- (in 17). De2 om. अभिप्रेतं; D5 om. भवन्तं. G2. 4 भगवंतं (for भवन्तं). Ś1 B2–4 Dn3 D3. 6 G2 M1 किंचिद्; G4 कश्चिद्. K3 अभिप्रायं; K4 Dn1 D1. 2 प्रष्टुं; G1. 4 अपि प्रष्टुं. — K4 [अ]भिगम्यतां; D3 [अ]व°.

16 T1 om. 16 (cf. v.l. 15). K1 B1–3 D (except D1–3. 5) G3 read तत् for एतत्, and om. स. Ś1 K1–3 B1. 3 om. तस्मात्सरस उत्थाय. Ś1 अभ्यागात्; K1–3 B1. 3 De D1–4 G M1 अभ्यागच्छत्. Ś1 K1–3 B1. 3 om. यत्र —सरसस्तीरे. T2 G2. 4 M तिष्ठाम. K4 D1–3 T2 G2 M1 transp. तस्य and सरसस्. Dn1. n3 D3. 6 M2 सरस् (for सरसस्). D3 G1. 4 सरस्तस्य (for तस्य सरसस्).

17 T1 om. up to राजानमभि- (cf. v.l. 15). B2 अभ्यागतं; M1 आगच्छंतं (for आगतं). Ś1 K1. 2 तं (for चैनं). K3. 4 B Dn1. n3 D3. 6 वयमपृच्छामः; D1 वयमपृच्छन्; D4 G वयं पृच्छामो. After अपृच्छाम, De ins. इति. — Before भवान्, Ś1 K3 ins. अपि; K3 अस्ति; T2 G2. 4 M1 अथ; M2 कच्चिदथ. After भवान्, Ś1 ins. तम्; K2. 3 De D2–6 G3 M1 इमम्. T2 G2. 4 इंद्रद्युम्नराजानं जानातीति.

18 Ś1 K D1–3. 5 G1 बाष्पपूर्णलोचनः (D1. 2 °पूर्णकंठः; G1 °पूर्णवदनः); B De Dn D4. 6 G3 बाष्पसंपूर्णनयनः (B4 °पूर्णमुखः; De °पूर्णवदनः); T1 G2 बाष्पांबुपूर्णं°; T2 बाष्पपूर्णांबुनयनः. K4 D1–3 om. उद्विग्नहृदयो. Ś1 K1–3 D5 वेपमान (K2 °ना) उद्विग्नचेताः (for उद्विग्नं वेपं°). — M1 कथम् (for किम्). T2 G2. 4 om. अहम्. T1 एतद् (for एनं), and अहं (for न). Ś1 K D1–3. 5 प्रत्यभिज्ञास्ये; B De Dn D4. 6 G1. 3 M2 प्रत्यभिज्ञास्यामि; T1 प्रतिज्ञास्यामि. — B4 D5 om. अहं हि. B2. 3 De Dn D4. 6 G3 इह (for अहं). Ś1 K D1–3 om. हि. B1 इंद्रद्युम्नेन; De2 (marg. *sec. m.*) इह द्युम्नेन (for अहं ह्यनेनं). Before सहस्र°, T G2. 4 ins. असकृत्. M2 पातितपूर्वः (for [उ]पहित°). Ś1 K1. 2 सहस्रशो यज्ञेपूपहू(K2 °ह)तः; K3. 4 D3 सहस्रकृत्वश्चितिपूपहि(K3 °चि)तः; B De Dn D4. 6 G3 °कृत्वश्चितिषु यूपा आहिताः; D1. 2 °कृत्वश्चितिषूपतापितः; D5 °कृत्वो यूपा अभिहिताः; M1 असकृत्वोग्निचितिषु पातितपूर्वः. — Before सरश्च, Ś1 K D1–3. 5 ins. पूर्वं. K1 Dn D1. 4–6 G3 दक्षिणाभिर्दत्ताभिर्; T2 G2. 4 दक्षिणोदकदत्ताभिर्; K4 D3 [अ]भिक्रममाणाभिर्; D1. 2 [अ]तिचंक्रम°; T2 G2 क्रममाण°; G4 कर्मणार्हाभिर्. De खुरकृतं (for कृतम्). — G1 M अतोत्र (for अत्र). T2 G2. 4 om. च. Ś1 K1. 2 om. इति.

19 Ś1 K2 इत्येतावत्; K3 अथैतावत्; D1 अथ तत्; D2 अथैव. Before कच्छपेन, K1 B2. 4 De Dn D4. 6 G3 ins. सकलं. B1 G2 व्याहृतं (for [उ]दाहृतं). B D (except D1–3. 5) T1 G3 तद° (for सम°). Ś1 K1 देवलोकोद्वीयमानाः; K2 °लोकाद्वीयमानारथ (sic). Ś1 K1. 2 प्रादुरासन्; D3 प्रादुरभूद्.

20 Ś1 K1–3 D5 om. च (after वाचः). G1 बत भो (for वाचश्च). — D5 स्वर्गोयम्. — D6 अथोचितं. K4 B D (except D1–3) T G3 प्रतिपद्यस्व; T2 G4 M1 अभिप्रपद्यस्व. — Ś1 कीर्तनस्यव्यग्रो (sic); K1. 2 कीर्तनेनाव्यग्रो; S (except G3) कीर्तिमानव्यग्रो (for कीर्तिं। अव्यग्रो).

21 b) B2 G1 शब्दश्च पुण्यकर्मणः. — c) De गर्भो (for शब्दो). — d) S (except G3) तावत्स्वर्गे महीयते.

22 ab) K3. 4 D3 गीयते; D5 गाय° (for कीर्त्य°). Ś1 K1. 2 D1. 2 यस्य गीयेत (for कीर्त्यते यस्य). B De Dn D4. 6 G3 transp. यस्य and लोके. — c) K1 B1–3 D

अकीर्तिः कीर्त्यते यस्य लोके भूतस्य कस्यचित् ।
पतत्येवाधमाँल्लोकान्यावच्छब्दः स कीर्त्यते ॥ २२
तस्मात्कल्याणवृत्तः स्यादत्यन्ताय नरो भुवि ।
विहाय वृत्तं पापिष्ठं धर्ममेवाभिसंश्रयेत् ॥ २३

इत्येतच्छ्रुत्वा स राजाब्रवीत् । तिष्ठ तावद्यावदिदानीमिमौ वृद्धौ यथास्थानं प्रतिपादयामीति ॥ २४ ॥ स मां प्राकारकर्णं चोलूकं यथोचिते स्थाने प्रतिपाद्य तेनैव यानेन संसिद्धो यथोचितं स्थानं प्रतिपन्नः ॥ २५ ॥ एतन्मयानुभूतं चिरजीविना दृष्टमिति पाण्डवानुवाच मार्कण्डेयः ॥ २६ ॥

पाण्डवाश्चोचुः प्रीताः । साधु । शोभनं कृतं भवता राजानमिन्द्रद्युम्नं स्वर्गलोकाच्च्युतं स्वे स्थाने स्वर्गे पुनः प्रतिपादयतेति ॥ २७ ॥

अथैनानब्रवीदसौ । ननु देवकीपुत्रेणापि कृष्णेन नरके मज्जमानो राजर्षिर्नृगस्तस्मात्कृच्छ्रात्समुद्धृत्य पुनः स्वर्गं प्रतिपादित इति ॥ २८ ॥

C. 3. 1114
B. 3. 199. 18
K. 3. 20 *. 18

इति श्रीमहाभारते आरण्यकपर्वणि एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

(except $D_{1-3.5}$) G_3 स पतति (for पतत्येव). — [d]) K_1 $B_{1.2.4}$ Dn $D_{4.6}$ G_3 प्रकी°; D_5 [अ]स्य की°; T $G_{1.2.4}$ M तु की° (for स की°).

23 [a]) $Ś_1$ K_2 कल्याणवृत्तिः; D_5 उत्तमवृत्तः; M_1 कल्याणयुक्तः. — [b]) K_4 B_4 D_3 अनंताय; $D_{1.2}$ आनंत्याय; D_5 कल्याणाय; T_2 $G_{2.4}$ दाता नावन्; G_1 अत्यर्थं च. K_1 B_{1-3} Dc Dn $D_{4.6}$ G_3 अनंताय नरः सदा. — [c]) K_4 B_2 Dc वित्तं; B_1 Dn D_4 G_3 चित्तं (for वृत्तं). — [d]) K_3 D_5 शुभं वृत्तं (for धर्ममेव). $Ś_1$ $K_{1.3.4}$ D_{1-3} [अ]भिवर्धयेत्; K_3 D_5 सदाश्रयेत्; B_2 Dn $D_{4.6}$ G_3 समाश्रयेत्; T $G_{2.4}$ [अ]नुसंश्रयेत्.

24 S (except G_3) om. तिष्ठ तावद्; $K_{1.4}$ B D (except $D_{2.3}$) G_3 om. इदानीम्; D_5 om. इति.

25 G_2 om. स. $Ś_1$ D_2 T_2 G_2 प्राकारवर्णं; B Dc Dn $D_{4.6}$ $G_{1.3}$ प्रावारकर्णं; T_1 G_4 प्रकारक(G_4 °व)र्णं; M_1 प्रावरकर्णं. After चोलूकं, M_2 ins च. T_1 चो° (for यथो°). Dc D_5 G_4 यथोचितं (D_5 G_4 °त-) स्थानं. M_2 om. तेनैव. T_2 $G_{1.2.4}$ M_1 om. [ए]व. T_1 वै (for [ए]व). Dc S (except T_1 G_3) देवयानेन (for यानेन). T_1 M_1 om. संसिद्धो. $Ś_1$ K_2 संसिद्धौ; K_1 Dn $D_{4.6}$ G_3 संस्थितो; K_4 G_4 संविद्धो; D_5 संसिद्धं; G_1 सुसिद्धो. B_4 om. यथोचितं स्थानं. B_1 यथोपचितं; B_3 इति यथोक्तं (for यथोचितं). After प्रतिपन्नः, B_4 ins. इति; T_2 $G_{2.4}$ ins. एव. N (except $Ś_1$ K_3 B_4 $D_{1.2}$) G_3 प्रतिपेदे (for °पन्नः).

26 $K_{1.2}$ B D (except $D_{1-3.5}$) T_2 G_3 तन् (for एतन्). $K_{1.3.4}$ B Dc Dn $D_{2-4.6}$ T_1 G_3 M चिरजीविनेदृश(Dc °दृष्ट)म्. B_1 G_1 M_2 मार्कंडेयं.

27 Before पाण्डवाश्च, K_3 D_5 M_1 ins. तमृषयः; T_2 $G_{1.2.4}$ तमृषिं; M_2 ऋषयः. T_1 om. च. B_{2-4} D (except $D_{1-3.5}$) G_3 M_2 om. प्रीताः. — B D (except D_{1-3}) G_3 (by transp.) भवता कृतं; T_1 यथा. Dc_2 D_5 T स्वर्गलोकच्युतं. K_4 Dc D_5 T_1 $G_{1.2.4}$ M स्व- (for स्वे). Dc om. स्वर्गे; $K_{1.3.4}$ B Dn D_{4-6} T_1 G_3 om. स्वर्गे पुनः. D_{1-3} G_1 M_1 (by transp.) पुनः स्वर्गे; T_2 $G_{2.4}$ M_2 पुनः स्वर्गलोकं.

28 K_1 B D G_3 अथैनान्. K_3 D_5 S (except G_3) प्रत्यब्रवीद् (for अब्र°). $D_{1.2}$ T_2 $G_{1.2.4}$ om. असौ. D_5 अयं (for असौ). — Before ननु, $D_{1.2}$ ins. अहो; T_2 $G_{1.2.4}$ अनेन. $Ś_1$ K_{2-4} $D_{1-3.5}$ निमज्ज°; T_1 पच्य° (for मज्ज°). $Ś_1$ K_2 उद्धृत्य; K_3 B समुद्धृतः. K_1 Dn $D_{4.6}$ G_3 transp. समुद्धृत्य and पुनः; $K_{1.2.4}$ D_{1-3} transp. पुनः and स्वर्गं. B D (except D_{1-3}) G_3 प्रापित (for प्रतिपादित).

Colophon. — *Major parvan:* $Ś_1$ $K_{1.2}$ $G_{2.4}$ आरण्य. — *Sub-parvan:* G_1 मार्कंडेयसमस्या (followed by इंद्रद्युम्नोपाख्यान). $K_{3.4}$ B D $G_{2.3}$ M_2 (all om. sub-parvan name) mention only इंद्रद्युम्नोपाख्यान. — *Adhy. no.* (figures, words or both): Dn 198 (Dn_2 197); D_1 199; T $G_{1.2.4}$ M (M_2 *inf. lin.*) 195 (M_2 orig. 197). — *Śloka no.:* Dn1 25; $Dn_{2.3}$ 18; D_1 31.

192

1 After the ref., N ins.:

970* श्रुत्वा स राजा राजर्षेरिन्द्रद्युम्नस्य तत्तदा ।
मार्कण्डेयान्महाभागात्स्वर्गस्य प्रतिपादनम् ।

[(L. 1) $K_{1.2}$ Dn D_6 तु (for स). $D_{1.2}$ सर्वे (for राजा). K_4 B_1 Dc D_5 राजर्षिः. D_5 श्रुत्वेच्छ्रुत्वा स राजर्षिः (for the prior half). K_1 $B_{1.4}$ D (except $D_{1-3.5}$) तथा (for तदा). — (L. 2) D_5 मार्कंडेयं महाभागः. $Ś_1$ K

१९२

C. J. 1348
B. 3. 201. 2
K. 3. 204. 2

वैशंपायन उवाच ।

युधिष्ठिरो धर्मराजः पप्रच्छ भरतर्षभ ।
मार्कण्डेयं तपोवृद्धं दीर्घायुषमकल्मषम् ॥ १
विदितास्तव धर्मज्ञ देवदानवराक्षसाः ।
राजवंशाश्च विविधा ऋषिवंशाश्च शाश्वताः ।
न तेऽस्त्यविदितं किंचिदस्मिँल्लोके द्विजोत्तम ॥ २
कथां वेत्सि मुने दिव्यां मनुष्योरगरक्षसाम् ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथितं द्विज ॥ ३
कुवलाश्व इति ख्यात इक्ष्वाकुरपराजितः ।
कथं नाम विपर्यासाद्धुन्धुमारत्वमागतः ॥ ४
एतदिच्छामि तत्त्वेन ज्ञातुं भार्गवसत्तम ।
विपर्यस्तं यथा नाम कुवलाश्वस्य धीमतः ॥ ५

मार्कण्डेय उवाच ।

हन्त ते कथयिष्यामि शृणु राजन्युधिष्ठिर ।
धर्मिष्ठमिदमाख्यानं धुन्धुमारस्य तच्छृणु ॥ ६
यथा स राजा इक्ष्वाकुः कुवलाश्वो महीपतिः ।
धुन्धुमारत्वमगमत्तच्छृणुष्व महीपते ॥ ७
महर्षिर्विश्रुतस्तात उत्तङ्क इति भारत ।
मरुधन्वसु रम्येषु आश्रमस्तस्य कौरव ॥ ८
उत्तङ्कस्तु महाराज तपोऽतप्यत्सुदुश्चरम् ।
आरिराधयिषुर्विष्णुं बहून्वर्षगणान्विभो ॥ ९
तस्य प्रीतः स भगवान्साक्षाद्दर्शनमेयिवान् ।

De D1–3. 5 स्वर्गमभि°.]

— a) N महाराज (B1 °भागः) (for धर्म°). — b) B4 T2 G3 भरतर्षभः. Ś1 K2. 3 B1 De D1–3. 5 पुनः पप्रच्छ तं मुनिं. — d) Ś1 K1. 2 शुद्धात्मानमकल्म°.

2 Before 2, De G1 ins. युधिष्ठिर उ° (G1 om. उ°). — b) G2. 4 M1 °रक्षसां. — cd) Ś1 K1. 2. 4 D1–3. 5 पिशाचोरगगंधर्वा (for 2c), and राज° (for ऋषि°). — f) S (except G3) द्विजर्षभ (for द्विजो°).

3 a) Ś1 K D1–3. 5 तथा; T2 G2. 4 अथ (for कथां). Ś1 K3. 4 D1–3. 5 दिव्या; K1. 2 पुण्या; T2 G2. 4 वंशान् (for दिव्यां). — b) Ś1 K D1–3. 5 कथाः पुण्या महात्मनां; B1 मानुषोरगराक्षसां. — After 3ab, B3–4 D (except D1–3. 5) S ins.:

971* देवगन्धर्वयक्षाणां किंनराप्सरसां तथा ।

[De °दानव° (for °गन्धर्व°). S (except G3) सुपर्णकिंनराणां च यक्षाणां च महौजसां.]

— c) B D (except D1–3. 5) G3 इदम्; G4 श्रोतुम् (for एतद्). S (except G3) भगवन् (for [अ]हं श्रोतुं). — d) Ś1 B De Dn D4. 6 G3 द्विजसत्तम (for कथितं द्विज). D1. 2 तव; T1 त्वया (for द्विज).

4 b) T2 G2. 4 इक्ष्वाकुकुलसंभवः.

5 a) K2 [अ]हं श्रोतुं and तत्त्वेन also (as in text). — b) Ś1 भार्गवनंदन; B1 भरतसत्तम; D5 मार्ग च सत्तम. — After 5, B D (except D1. 3; D5 marg.) G3 ins.:

972* वैशंपायन उवाच ।
युधिष्ठिरेणैवमुक्तो मार्कण्डेयो महामुनिः ।
धौन्धुमारमुपाख्यानं कथयामास भारत ।

[Some MSS. om उवाच.]

6 D3 om. 6ab. — a) T1 अधुना; T2 G1 अथ ते; M1 अहं ते (for हन्त ते). — b) K3. 4 D5 राजर्षेस्तस्य धीमतः. — d) De धौंधुमारस्य. K4 तस्य तत् (for तच्छृणु).

7 a) K1–3 De2 D5 राजा स (by transp.); B2 चैव स. S ऐ(T1 चै)क्ष्वाकः (T1 M1 °कुः). — K3 om. (hapl.) 7cd. — d) K3. 4 D5 मुनेस्तस्य प्रसादतः (K4 प्रभावतः).

8 b) Here and below throughout S उदंक° (for उत्तङ्क°). The variant is ignored (mostly) in the sequel. De नाम (for इति). D3 नामतः (for भारत). — d) Ś1 K D1–3. 5 धीमतः; M1 भारत (for कौरव).

9 a) B1 T1 च (for तु). S °तेजा (for °राज). — b) K4 B1 D1. 3 M1 [S]तप्यत (for [S]तप्यत्सु-). Ś1 B4 D1. 3 T2 G2–4 सुदुष्करं; K1. 3 सुदारुणं; T1 महानृषिः (for सुदुश्चरम्). — T1 om. from 9c up to 3. 193. 10b. — c) K3–4 D3 आरं° (for आरिं°). De देवं (for विष्णुं). Ś1 ब्रह्मन् (for बहून्). B3 धर्मगुणान् (for वर्षगणान्). Ś1 K1–3 विभुं; K4 Dn D1–3. 5 विभुः; B1. 3. 4 D4. 6 उत; B3 De मुनिः (for विभो).

10 T1 om. 10 (cf. v.l. 9). — a) K4 च (for स). — b) Ś1 K1. 3. 4 B1. 2 Dn3 °मीयिवान्; D3 °मागतः (for °मेयिवान्). — c) Ś1 K D1–3. 5 च (Ś1 तु) मुनिः प्रहः (K4 D1–3 देवं); B1 तु स राजर्षिः; B4 [ऋ]षिस्तु प्रशस्तं; De

दृष्ट्वैव चर्षिः प्रह्लस्तं तुष्टाव विविधैः स्तवैः ॥ १०
त्वया देव प्रजाः सर्वाः सदेवासुरमानवाः ।
स्थावराणि च भूतानि जङ्गमानि तथैव च ।
ब्रह्म वेदाश्च वेद्यं च त्वया सृष्टं महाद्युते ॥ ११
शिरस्ते गगनं देव नेत्रे शशिदिवाकरौ ।
निःश्वासः पवनश्चापि तेजोऽग्निश्च तवाच्युत ।
बाहवस्ते दिशः सर्वाः कुक्षिश्चापि महार्णवः ॥ १२
ऊरू ते पर्वता देव खं नाभिर्मधुसूदन ।
पादौ ते पृथिवी देवी रोमाण्योषधयस्तथा ॥ १३
इन्द्रसोमाग्निवरुणा देवासुरमहोरगाः ।
प्रह्लास्त्वामुपतिष्ठन्ति स्तुवन्तो विविधैः स्तवैः ॥ १४
त्वया व्याप्तानि सर्वाणि भूतानि भुवनेश्वर ।
योगिनः सुमहावीर्याः स्तुवन्ति त्वां महर्षयः ॥ १५
त्वयि तुष्टे जगत्स्वस्थं त्वयि क्रुद्धे महद्भयम् ।
भयानामपनेतासि त्वमेकः पुरुषोत्तम ॥ १६
देवानां मानुषाणां च सर्वभूतसुखावहः ।
त्रिभिर्विक्रमणैर्देव त्रयो लोकास्त्वयाहृताः ।
असुराणां समृद्धानां विनाशश्च त्वया कृतः ॥ १७
तव विक्रमणैर्देवा निर्वाणमगमन्परम् ।
पराभवं च दैत्येन्द्रास्त्वयि क्रुद्धे महाद्युते ॥ १८
त्वं हि कर्ता विकर्ता च भूतानामिह सर्वशः ।
आराधयित्वा त्वां देवाः सुखमेधन्ति सर्वशः ॥ १९
एवं स्तुतो हृषीकेश उत्तङ्केन महात्मना ।
उत्तङ्कमब्रवीद्विष्णुः प्रीतस्तेऽहं वरं वृणु ॥ २०

उत्तङ्क उवाच ।

पर्याप्तो मे वरो ह्येष यदहं दृष्टवान्हरिम् ।

C. 3. 13565
B 3. 201. 25
K. 3. 204. 25

तमृषिः प्रह्लः (for चर्षिः प्रह्लस्तं). T₂ G₁. ₃ M दृष्ट्वा महर्षिः प्रह्लस्तं (G₁ M₂ ब्रह्माणं; M₁ धीमांश्च); G₂. ₄ दृष्ट्वा च महर्षिर्ब्रह्म.

11 T₁ om. 11 (cf. v.l. 9). Before 11, K₂ B D (except D₁. ₂. ₅) ins. उत्तंक उ˚; S (except G₄; T₁ om.) उदंकः. — [b]) B₂. ₄ D₁₁ D₄. ₆ ससुरासुर˚ (for सदेवासुर˚). Ś₁ K₁. ₂. ₄ ˚मानुषाः (for ˚मानवाः). — [d]) B₄ [ह्]तराणि च; S (T₁ om.) च सर्वशः (for तथैव च). — [e]) Ś₁ K D₁. ₂ G₄ ब्रह्मा (for ब्रह्म). K₁. ₂ वेदश्च; M₂ वेद्याश्च. B₄ विद्याश्च; G₁ वेदं च (for वेद्यं च). — [f]) B₄ सृष्टा (for सृष्टं). Ś₁ K₁. ₂ त्वया सृष्टा जगत्पते.

12 T₁ om. 12 (cf. v.l. 9). — [b]) D₄ नेत्रं; G₄ नेत्रौ (for नेत्रे). D₅ नेत्रे च शशिभास्करौ. — [c]) Some MSS. निश्वासः. — [d]) B₁ G₁ तथाच्युत; G₄ महाद्युते. — [e]) Ś₁ च (for ते). — [f]) Ś₁ K₁. ₂ D₁ कुक्षौ. Ś₁ तव; K₃. ₄ D₃ चैव (for चापि). Ś₁ K₁. ₂. ₄ D₁₋₃ महार्णवाः.

13 T₁ om. 13 (cf. v.l. 9); D₅ om. (? hapl.) 13–15. — [b]) N (D₅ om.) खं जंघे (B₁ जंघे च) (for खं नाभिर्). — [c]) T₂ G₂₋₄ चैव (for देवी). — [d]) K₂₋₄ D₁. ₆ T₁ (before corr.) M₁ रोमाण्यौषधयस्. S (T₁ om.) तव (for तथा).

14 T₁ D₅ om. 14 (cf. v.l. 9, 13). — [c]) K₄ ब्रह्मन्; B₄ सर्वे (for प्रह्लास्). — [d]) B₄ स्तुत्वा नानाविधैः स्तवैः.

15 T₁ D₅ om. 15 (cf. v.l. 9, 13). — [ab]) Ś₁ K₁. ₂ सर्वाणि भूतानि व्याप्तानि; K₃ B₁ D₁₋₃ G₁ व्याप्तानि भूतानि सर्वाणि. — [c]) Ś₁ K D₁₋₃ योगिनं सु(Ś₁ त्वां)महावीर्यं. — [d]) Ś₁ च; K₁ G₁ M₁ त्वा; G₂. ₄ [ह्]र्थं (for त्वां).

16 T₁ om. 16 (cf. v.l. 9). [a]) K₁ सर्वं; B₁ D₅ तुष्टं; B₂. ₃ सुस्थं; B₄ D₁₁ D₆ ˚स्वास्थ्यं; S (T₁ om.) शांतं (for स्वस्थं). — [b]) T₂ G₃. ₄ [अ]तुष्टे (for क्रुद्धे). K₄ B₄ G₁ जगद्भयं (for मह˚). — [c]) Ś₁ ˚नीता˚ (for ˚नेता˚). — [d]) K₂ एव (for एकः). A few MSS. पुरुषोत्तमः.

17 T₁ G₄ om. 17 (for T₁ cf. v.l. 9). — [b]) Ś₁ K D₁₋₃. ₅ M₁ ˚लोक˚ (for ˚भूत˚). Ś₁ K₁ D₂₋₅ G₁. ₂ M₁ ˚सुखावह˚. — [d]) D₁. ₂ G₂ जिताः; T₂ (by corr.) G₃ वृताः (for [आ]हृताः). D₅ त्वया लोका जिताः प्रभो.

18 T₁ om. 18 (cf. v.l. 9). — [a]) G₁. ₂. ₃ (before corr.). ₄ देव (for देवा). — [b]) K₁ corrupt. K₃ D₀₂ D₃. ₆ ˚णमगमत्; B₂ ˚णशमनं (for ˚णमगमत्). — K₁ om 18[c]–19[d]; G₄ om. 18[cd]. — [c]) Ś₁ K₂₋₄ D₁₋₃. ₆ पराजयं; B₁. ₃ D₀ D₁₁ D₄. ₆ ˚भूताश्च; B₂ ˚भूतश्च (for ˚भवं). B₃ D₀₂ G₁ दैत्येंद्रस्. — [d]) G₁ प्रजापते (for महा˚).

19 T₁ K₁ om. 19 (cf. v.l. 9, 18); D₁ om. 19[cd]. — [c]) B₁. ₂ D₀₂ देव (for देवाः). — [d]) S (T₁ om.) नित्यशः (for सर्वशः).

20 T₁ om. 20 (cf. v.l. 9). Before 20, K₂ D₀ ins. मार्कंडेय उ˚. — [a]) T₂ G₃ स्तुते ˚केशे.

21 T₁ om. 21 (cf. v.l. 9); D₃ om. 21 with the ref. — [a]) G₄ [ऽ]यं (for मे). D₀₃ तु (for हि). — [c]) T₂ G₂₋₄ विष्णुं (for दिव्यं). — [d]) Ś₁ K₁. ₂ जगतां (for

C. 3. 13505
B. 3. 201. 26
K. 3. 204. 25

पुरुषं शाश्वतं दिव्यं स्रष्टारं जगतः प्रभुम् ॥ २१

विष्णुरुवाच ।

प्रीतस्तेऽहमलौल्येन भक्त्या च द्विजसत्तम ।
अवश्यं हि त्वया ब्रह्मन्मत्तो ग्राह्यो वरो द्विज ॥ २२
एवं संछन्द्यमानस्तु वरेण हरिणा तदा ।
उत्तङ्कः प्राञ्जलिर्वव्रे वरं भरतसत्तम ॥ २३
यदि मे भगवान्प्रीतः पुण्डरीकनिभेक्षणः ।
धर्मे सत्ये दमे चैव बुद्धिर्भवतु मे सदा ।
अभ्यासश्च भवेद्भक्त्या त्वयि नित्यं महेश्वर ॥ २४

विष्णुरुवाच ।

सर्वमेतद्धि भविता मत्प्रसादात्तव द्विज ।
प्रतिभास्यति योगश्च येन युक्तो दिवौकसाम् ।
त्रयाणामपि लोकानां महत्कार्यं करिष्यसि ॥ २५
उत्सादनार्थं लोकानां धुन्धुर्नाम महासुरः ।
तपस्यति तपो घोरं शृणु यस्तं हनिष्यति ॥ २६
बृहदश्व इति ख्यातो भविष्यति महीपतिः ।
तस्य पुत्रः शुचिर्दान्तः कुवलाश्व इति श्रुतः ॥ २७
स योगबलमास्थाय मामकं पार्थिवोत्तमः ।
शासनात्तव विप्रर्षे धुन्धुमारो भविष्यति ॥ २८

मार्कण्डेय उवाच ।

उत्तङ्कमेवमुक्त्वा तु विष्णुरन्तरधीयत ॥ २९

इति श्रीमहाभारते आरण्यकपर्वणि द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

°तः). Śi K D1. 2. 5 पतिं (for प्रभुम्). B2 स्रष्टारमजरं विभुं.

22 T1 om. 22 (cf. v.l. 9). — G1 भगवान्; G4 श्रीभगवान् (for विष्णु°). — [b]) K4 B2 Dc च तव; B1. 3. 4 Dn D4. 6 तव च; D3 च मुनि- (for च द्विज-). — [c]) Śi K3. 4 D1–3 तु; D5 तत् (for हि). S (T1 om.) विद्वन् (for ब्रह्मन्). — [d]) D5 वरो ग्राह्यो (by transp.).

23 T1 om. 23 (cf. v.l. 9). Before 23, B2 Dc ins. मार्कंडेय उ°. — [a]) Śi B1. 3 Dc Dn स छंद्य°; D2 संछिद्य°; D3 (before corr.) संछिद्य°; S (T1 om.) संचोद्य° (for संछन्द्य°). B2 छंद्यमानो वरेणैवम्; B4 एवं स उक्तस्तुष्टेन. — [b]) B2 उत्तंको (for वरेण). B2 ततः; D1 तथा (for तदा). — [c]) B2 स पुनः (for उत्तङ्कः). B1 Dc भूत्वा (for वव्रे). — [d]) M वरदसत्तम.

24 T1 om. 24 (cf. v.l. 9). Before 24, Dc ins. उत्तंक उ°. — [a]) B2. 4 Dn D4. 6 G2. 4 M भगवन्. K2 प्रीतिः (for प्रीतः). — [b]) Many MSS. °क्षण (for °क्षणः). — [c]) Śi K B4 D1–3. 5 सत्ये धर्मे (by transp.). — [d]) Śi K3. 4 D3 प्रीतिर्; K1 प्रीतो (for बुद्धिर्). — [e]) D1 अभ्यासाच्च; G1 °मं च. — [f]) B1–3 Dn D4. 6 T2 G1. 3 ममें°; Dc सुरें° (for महें°).

25 T1 om. 25 (cf. v.l. 9). — N G1 भगवान् (K2. 4 B2 D1–3. 5, with prefixed श्री) (for विष्णुर्). — [a]) K1. 3 D3 भवतो; G1 भवति; G1 भवतान्; M2 भवता (for भविता). — [b]) Śi K1. 2. 4 B2. 4 D3 G4 द्विजोत्तम (for तव द्विज). — [c]) Śi K D3 ते योगो; B4 योगस्ते (for योगश्च). — [d]) B1. 3 चापि (for अपि). — [f]) B2 महाकार्यं. K2. 4 B3 D1 करिष्यति.

26 T1 om. 26 (cf. v.l. 9). — [a]) D5 उत्सादनाय. B1 D1 लोकस्य. — Śi om. (hapl.) 26[b]–28[c]. — [b]) S (T1 om.) भविष्यति (for महा°). — [c]) K1–3 महा- (for तपो). — After 26, K2 B3 D (except D1. 3. 5) ins.:

973* राजा हि वीर्यवांस्तात इक्ष्वाकुरपराजितः ।

27 Śi T1 om. 27 (cf. v.l. 9, 26). — [c]) G4 शिशुर् (for शुचिर्). — [d]) K1. 2. 4 D1–3 स्मृतः (for श्रुतः).

28 T1 om. 28; Śi om. 28[abc] (cf. v.l. 9, 26). — [a]) D1 आश्रित्य (for आस्थाय).

29 All MSS. (except Dc) om. the ref. — [a]) Śi K D3 स (for तु). B Dc Dn D4. 6 एवमुक्त्वा तु तं विप्रं.

Colophon om. in S. — *Major parvan:* Śi K1. 2 आरण्य. — *Sub-parvan:* K3. 4 B D (all om. sub-parvan name) mention only धुंधुमारोपाख्यान. — *Adhy. no.* (figures, words or both): Dn1. 2 D1 200; Dn2 199. — *Śloka no.:* Dn 33; D1 32.

193

☞ A shorter version of the Dhundhumāra episode as narrated in adhy. 193 and 195 occurs in Harivaṁśa (Calcutta ed.) 1. 11. 667–705; Vāyu Purāṇa 88. 20–60; and Brahmāṇḍa 3. 63. 29–61. Many of the lines agree verbatim with each other.

१९३

मार्कण्डेय उवाच ।

इक्ष्वाकौ संस्थिते राजञ्शशादः पृथिवीमिमाम् ।
प्राप्तः परमधर्मात्मा सोऽयोध्यायां नृपोऽभवत् ॥ १
शशादस्य तु दायादः ककुत्स्थो नाम वीर्यवान् ।
अनेनाश्चापि काकुत्स्थः पृथुश्चानेनसः सुतः ॥ २
विष्वगश्वः पृथोः पुत्रस्तस्मादार्द्रस्तु जज्ञिवान् ।
आर्द्रस्य युवनाश्वस्तु श्रावस्तस्तस्य चात्मजः ॥ ३
जज्ञे श्रावस्तको राजा श्रावस्ती येन निर्मिता ।
श्रावस्तस्य तु दायादो बृहदश्वो महाबलः ।
बृहदश्वसुतश्चापि कुवलाश्व इति स्मृतः ॥ ४
कुवलाश्वस्य पुत्राणां सहस्राण्येकविंशतिः ।
सर्वे विद्यासु निष्णाता बलवन्तो दुरासदाः ॥ ५
कुवलाश्वस्तु पितृतो गुणैरभ्यधिकोऽभवत् ।
समये तं ततो राज्ये बृहदश्वोऽभ्यषेचयत् ।
कुवलाश्वं महाराज शूरमुत्तमधार्मिकम् ॥ ६
पुत्रसंक्रामितश्रीस्तु बृहदश्वो महीपतिः ।
जगाम तपसे धीमांस्तपोवनममित्रहा ॥ ७
अथ शुश्राव राजर्षिं तमुत्तङ्को युधिष्ठिर ।
वनं संप्रस्थितं राजन्बृहदश्वं द्विजोत्तमः ॥ ८
तमुत्तङ्को महातेजाः सर्वास्त्रविदुषां वरम् ।

c. 3 13524
B. 3 202. 10
K. 3 205. 10

---

1 T1 om. 1–10^{ab} (cf. v.l. 3. 192. 9). — ^{a}) T2 (m as in text) G2 इक्ष्वाकुर्यः स्थितो राजा; G4 इक्ष्वाकुस्तु ततो राजा. — ^{b}) K2 D3 (*sup. lin. sec. m.*) समादः; T2 G2. 4 शशास (for शशादः). T2 G1. 2. 4 पृथिवीपतिः. — ^{d}) Ś1 K D1–3. 5 सोयोध्याधिपतिर्बभौ.

2 T1 om. 2 (cf. v.l. 1). — ^{ab}) D3 समादस्य. D1. 2 च (for तु). T2 (before corr.) G2. 4 शशादस्तस्य दायादः (for ^{a}). A few MSS. ककुत्स्थो (for ककुत्स्थो). B4 ककुत्स्थो नाम मेधावी पुत्रोस्य सुमहात्मनः. — ^{c}) K3 G4 अनेन (for अनेनाश्). D5 T2 G3 च ककुत्स्थस्य (for चापि काकुत्स्थः). A few MSS. काकुत्स्थः. — ^{d}) G4 च जनितः (for चानेनसः). Dc स्मृतः; M2 सुखः (*inf. lin.* सुनः as in text).

3 T1 om. 3 (cf. v.l. 1). — ^{a}) Ś1 K1–3 Dc M2 विश्वगाश्वः; B2 D4 T2 (by corr.) G3 विष्टराश्वः; D3 पृष्ठगश्वः; T2 (before corr.) G4 बाढशाश्व; G2 बाधशाश्व. B3 तु तत् (for पृथोः). — ^{b}) B4 Dn1. n2 D1 अद्रिः (for आर्द्रः). B1. 3. 4 Dc Dn D4. 6 T2 G3 च (for तु). D6 वीर्यवान् (for जज्ञि°). — ^{c}) K4 B1. 3. 4 Dc Dn3 D2. 4. 6 M1 आर्द्रात्तु; Dn1. n2 D1 अद्रेश्च; D5 आंधस्य (for आर्द्रस्य). K1 युवनाश्वस्यः; K3 चाभवत्पुत्रः; B2 युवनाश्वोभूत्; D1. 2 °नाश्च. — ^{d}) D1 सुश्रावस्; T2 G श्रावकस्; M इयावस्थस् (for श्रावस्तस्). K3 B4 श्रावस्तो नाम वीर्यवान्; B1–3 Dc Dn D2. 4. 6 °स्त(B2 °स्तो)स्यात्मजोभवत्; D5 °स्तो नाम तत्सुतः.

4 T1 om. 4 (cf. v.l. 1). — ^{a}) B Dc Dn1 D4. 6 तस्य (B4 ततः) (for जज्ञे). T2 G श्रावस्ततो; M इयावस्थको. B Dc Dn1 D4. 6 ज्ञेयः (B4 जज्ञे) (for राजा). K3 D5 पुरीणामुत्तमा लोके. — ^{b}) T2 G2–4 श्रावकी; M इयावस्थी (for श्रावस्ती). — ^{c}) Ś1 B4 D1. 2 G1 M1 च (for तु). B1 श्रावस्तकस्य दा°. — The portion from 4^{d} up to 3. 194. 3^{b} is lost in D3 on a missing fol. (264). — ^{e}) D5 चासीत् (for चापि). B Dc Dn D4. 6 बृहदश्वस्य दायादः. — ^{f}) Ś1 D5 श्रुतः (for स्मृतः).

5 T1 om. 5 (cf v.l. 1). D3 missing (cf. v.l. 4). — ^{c}) Ś1 K1. 3 D1 सर्व- (for सर्वे).

6 T1 om. 6 (cf. v.l. 1). D3 missing (cf. v.l. 4). — ^{a}) B1. 2. 4 Dn D2. 4 °श्वश्च; D1. 6 °श्वस्य (for °श्वस्तु). — G1 om. (hapl.) 6^{cd}. — ^{c}) B Dc Dn D4. 6 T2 (by corr.) पिता; D5 तथा; T2 (before corr.) G (G1 om.) M तदा (for ततो). — K3 D2 om (hapl.) 6^{d}–7^{a}. — ^{f}) D5 °विक्रमं (for °धार्मिकम्).

7 T1 om. 7; K3 D2 om. 7^{a} (cf. v.l. 1, 6). D3 missing (cf. v.l. 4). — ^{c}) T2 G श्रीमान् (for धीमान्).

8 T1 om. 8 (cf. v.l. 1). D3 missing (cf. v.l. 4). Before 8, B Dc Dn D2. 4. 6 ins. मार्कंडेय उ°. — ^{a}) M2 अथो (for अथ). — ^{b}) B2 Dn D4. 6 नराधिप (B2 Dn1 °पं) (for युधिष्ठिर). — ^{d}) K1. 3. 4 Dc D4 G4 द्विजोत्तम; D5 महाद्युति.

9 T1 om. 9 (cf. v.l. 1). D3 missing (cf. v.l. 4). — ^{b}) K4 वरः (for वरम्). — ^{c}) K2 निवार°; D5 अवार° (for न्यवार°). — ^{d}) K1–3 B4 D5 S (T1 om.) पुरोत्तमं (T2 G2–4 M2 °मे) (for नरो°).

10 T1 om. 10^{ab} (cf. v.l. 1). D3 missing (cf.

C. 3. 13524
B. 3. 202. 10
K. 3. 205. 10

न्यवारयदमेयात्मा समासाद्य नरोत्तमम् ॥ ९

उत्तङ्क उवाच ।

भवता रक्षणं कार्यं तत्तावत्कर्तुमर्हसि ।
निरुद्विग्ना वयं राजंस्त्वत्प्रसादाद्वसेमहि ॥ १०
त्वया हि पृथिवी राजन्रक्ष्यमाणा महात्मना ।
भविष्यति निरुद्विग्ना नारण्यं गन्तुमर्हसि ॥ ११
पालने हि महान्धर्मः प्रजानामिह दृश्यते ।
न तथा दृश्यतेऽरण्ये मा ते भूद्बुद्धिरीदृशी ॥ १२
ईदृशो न हि राजेन्द्र धर्मः क्वचन दृश्यते ।
प्रजानां पालने यो वै पुरा राजर्षिभिः कृतः ।
रक्षितव्याः प्रजा राज्ञा तास्त्वं रक्षितुमर्हसि ॥ १३
निरुद्विग्नस्तपश्चर्तुं न हि शक्नोमि पार्थिव ।
ममाश्रमसमीपे वै समेषु मरुधन्वसु ॥ १४
समुद्रो वालुकापूर्ण उज्जानक इति स्मृतः ।
बहुयोजनविस्तीर्णो बहुयोजनमायतः ॥ १५
तत्र रौद्रो दानवेन्द्रो महावीर्यपराक्रमः ।
मधुकैटभयोः पुत्रो धुन्धुर्नाम सुदारुणः ॥ १६
अन्तर्भूमिगतो राजन्वसत्यमितविक्रमः ।
तं निहत्य महाराज वनं त्वं गन्तुमर्हसि ॥ १७
शेते लोकविनाशाय तप आस्थाय दारुणम् ।
त्रिदशानां विनाशाय लोकानां चापि पार्थिव ॥ १८
अवध्यो देवतानां स दैत्यानामथ रक्षसाम् ।
नागानामथ यक्षाणां गन्धर्वाणां च सर्वशः ।
अवाप्य स वरं राजन्सर्वलोकपितामहात् ॥ १९
तं विनाशय भद्रं ते मा ते बुद्धिरतोऽन्यथा ।
प्राप्स्यसे महतीं कीर्तिं शाश्वतीमव्ययां ध्रुवाम् ॥ २०

---

v.l. 4). — [b]) K$_3$ तात यत्; T$_2$ G$_3$ तानवत्; G$_4$ तात तत् (for तत्तावत्). B$_4$ क्रियतामिति (for कर्तुम्). — [d]) B Dn D$_4$. $_6$ भवे (for वसे).

11 D$_3$ missing (cf. v.l. 4). — [a]) D$_5$ तु (for हि), and नूनं (for राजन्). — [b]) G$_1$ रम्; M$_1$ द्रक्ष्य् (for रक्ष्य्). — [d]) K$_1$ T$_2$ G$_{2-4}$ मारण्यं; B$_1$ या विभो; G$_4$ अरण्यं. G$_2$ कर्तुम् (for गन्तुम्).

12 D$_3$ missing (cf. v.l. 4). — [a]) G$_1$ महाधर्मः. — Ś$_1$ K$_1$. $_2$. $_4$ om. (hapl.) 12^c–13^b. — [d]) B Dc Dn D$_4$. $_6$ transp. ते and भूत्.

13 D$_3$ missing (cf. v.l. 4). Ś$_1$ K$_1$. $_2$. $_4$ om. 13^{ab} (cf. v.l. 12). — [a]) D$_5$ ईदृशो हि महाराज. — [c]) Ś$_1$ K$_2$ पालनेनार्य. B$_2$ वै हि; D$_5$ धर्मो; T$_2$ G$_3$ यत्नं; G$_{2.4}$ यत्नः (for यो वै). — [c]) B$_{1-3}$ D$_5$ रक्षितव्या. — [f]) Ś$_1$ K$_1$. $_2$ तत्त्वं; K$_4$ त्वं च; D$_1$ तांश्च; D$_2$ ताश्च; T$_1$ त्वं हि; T$_2$ G$_3$ तांस्त्वं (for तास्त्वं).

14 D$_3$ missing (cf. v.l. 4). — [a]) Ś$_1$ K$_1$. $_2$ समु° (for निरु°). B$_1$. $_3$. $_4$ Dc D$_1$. $_2$ S तमुं (for चतुं). — [b]) Ś$_1$ K$_1$ शक्नोमि; K$_2$ D$_1$ शक्तोमि (read °स्मि?). K$_1$ भार्गव; K$_2$ भार्गवान् (for पार्थिव). B$_2$ ममाश्रमसमीपतः. — [c]) D$_1$. $_2$ तु; D$_5$ G$_1$ -पु; T G$_{2-4}$ M हि (for वै).

15 D$_3$ missing (cf. v.l. 4). — 15^{ab} = 3. 195. 7^{ab}. — [a]) Ś$_1$ K$_1$. $_2$ T G समुद्र- (for समुद्रो). Ś$_1$ Dc$_2$ T$_1$ G$_1$. $_2$ °पूर्णा (for °पूर्ण). — [b]) B D (except D$_1$. $_5$; D$_3$ missing) उज्जालक; M °नुक (for °नक). — [c]) D$_5$ योजनायुतवि°.

16 D$_3$ missing (cf. v.l. 4). — [a]) Ś$_1$ K$_1$ ततो (for तत्र). — [d]) K$_1$ °र्नामा; G$_1$ °मारः (for °र्नाम). Ś$_1$ K B$_4$ D$_1$. $_2$. $_5$ T$_1$ महासुरः (for सुदा°).

17 D$_3$ missing (cf. v.l. 4). — [d]) K$_4$ D$_5$ transp. वनं and त्वं; T$_2$ G$_{2.3}$ transp. त्वं and गन्तुं.

18 D$_3$ missing (cf. v.l. 4). — [a]) S स शेते (G$_1$ M शेते स) लोकनाशाय. — K$_1$ om. (hapl.) 18^{bc}. — [b]) D$_5$ दुष्करं (for दारुणम्). — [d]) B$_1$ T$_1$ G$_1$ M$_1$ om. च. T$_2$ G$_{2-4}$ लोकानां च नराधिप.

19 D$_3$ missing (cf. v.l. 4). — [a]) K$_1$. $_2$ B$_{2.4}$ Dc$_1$ Dn$_2$ D$_4$. $_6$ T$_2$ G$_3$ देवतानां (for दे°). Ś$_1$ K$_1$. $_2$. $_4$ B$_1$ D$_5$ च; B$_{2.4}$ Dc$_1$ Dn D$_4$. $_6$ हि (for स). — [b]) K$_4$ B$_1$ अपि; G$_1$ सह (for अथ). — [c]) B$_1$ अपि (for अथ). Ś$_1$ K D$_1$. $_2$. $_5$ सर्पा(K$_1$ °र्वा)णां (for यक्षाणां). — [d]) T$_2$ (before corr.) G$_{2.4}$ राक्षसानां (for गन्ध°). — [e]) T$_1$ M$_1$ वरान् (for वरं).

20 D$_3$ missing (cf. v.l. 4). — [a]) D$_5$ T$_1$ तद् (for ते). K$_1$ D$_5$ G$_2$ विनाशाय (for °शय). T$_1$ बुध्यंतां (for भद्रं ते). — [b]) Ś$_1$ K D$_1$. $_2$. $_5$ मा ते भूद्बुद्धिरन्यथा; G$_1$ मा च ते बुद्धिरन्यथा. — [c]) Ś$_1$ K B$_4$ D$_1$. $_2$. $_5$ महतीं प्राप्नुहि ख्यातिं. — [d]) K$_{2.3}$ Dc Dn$_2$ ध्रुवं (for ध्रुवाम्). T$_1$ महतीं ध्रुवमव्ययां; G$_1$ अव्ययं परमं ध्रुवं.

क्रूरस्य स्वपतस्तस्य वालुकान्तर्हितस्य वै ।
संवत्सरस्य पर्यन्ते निःश्वासः संप्रवर्तते ।
यदा तदा भूश्चलति सशैलवनकानना ॥ २१
तस्य निःश्वासवातेन रज उद्धूयते महत् ।
आदित्यपथमावृत्य सप्ताहं भूमिकम्पनम् ।
सविस्फुलिङ्गं सज्वालं सधूमं ह्यतिदारुणम् ॥ २२
तेन राजन्न शक्नोमि तस्मिन्स्थातुं स्व आश्रमे ।
तं विनाशय राजेन्द्र लोकानां हितकाम्यया ।
लोकाः स्वस्था भवन्त्वद्य तस्मिन्विनिहतेऽसुरे ॥ २३
त्वं हि तस्य विनाशाय पर्याप्त इति मे मतिः ।
तेजसा तव तेजश्च विष्णुराप्याययिष्यति ॥ २४
विष्णुना च वरो दत्तो मम पूर्वं ततो वधे ।
यस्तं महासुरं रौद्रं वधिष्यति महीपतिः ।
तेजस्तं वैष्णवमिति प्रवेक्ष्यति दुरासदम् ॥ २५
तत्तेजस्त्वं समाधाय राजेन्द्र भुवि दुःसहम् ।
तं निषूदय संदुष्टं दैत्यं रौद्रपराक्रमम् ॥ २६
न हि धुन्धुर्महातेजास्तेजसाल्पेन शक्यते ।
निर्दग्धुं पृथिवीपाल स हि वर्षशतैरपि ॥ २७

C. 3. 193.15
B. 3. 202. 1
K. 3. 205. 1

इति श्रीमहाभारते आरण्यकपर्वणि त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

21 D_3 om. 21 (cf. v.l. 1). — [a]) B_{1-3} De Dn $D_{4.6}$ तस्य स्वपनः (by transp.). $Ś_1$ K B_4 $D_{1.2.5}$ स्वपन-स्तस्य रौद्रस्य. — [b]) $Ś_1$ B D (except D_5; D_3 missing) च (for वै). — [c]) K_4 $D_{1.2}$ पर्याये; T_2 (before corr.) शुध्यंते (for पर्यन्ते). Dm संवत्सरे तु पर्येते; D_5 स संवत्सर-पर्यंते. — [d]) Some MSS. निश्वासः. D_5 संप्रवर्धते. $D_{1.2}$ स निःश्वासं प्रमुंचति.

22 D_3 missing (cf. v.l. 4). — [a]) Some MSS. निश्वास°. — [c]) T_2 (before corr.) $G_{2.4}$ °रथम् (for °पथम्). B Dn $D_{4.6}$ S (except M_1) आश्रित्य; De आस्थाय (for आवृत्य). — [d]) T_1 M_2 भूमिकंपनः. — [e]) T_1 G_1 M_1 सविस्फुलिंगः. $Ś_1$ K $D_{1.5}$ सांगारं; T_1 G_1 M सज्वालः. — [f]) T_1 G_1 M सधूमो. $Ś_1$ K $D_{1.2.5}$ om. हि. T_1 G_1 M °दारुणः. B De Dn $D_{4.6}$ धूममिश्रं सुदारुणं.

23 D_3 missing (cf. v.l. 4). — [a]) S न तेन राजन्न् (by transp.). K_2 D_5 शक्तोस्मि (for शक्नोमि). — [b]) K_3 B_3 Dc_2 D_2 T_1 $G_{1.2.4}$ स्वमाश्रमे. — [c]) $Ś_1$ $K_{1.2}$ T_1 तद्विनाशाय (for तं विना°). M_2 विनाशयति भद्रं ते. — [e]) $B_{2.3}$ सुस्था (for स्वस्था). B D (except $D_{1.2.5}$; D_3 missing) भविष्यंति (for भवन्त्वद्य). — [f]) B_1 स्वया (for तस्मिन्). S युधि (for ऽसुरे). — After 23, T_2 G ins.:

974* धुन्धुर्नामानमत्युग्रं दानवं रोमहर्षणम् ।
समरे घोरमतुले विनाशय महेष्वणा ।

24 D_3 missing (cf. v.l. 4). G_1 om. 24[a]–25[b]. — [a]) T_2 G_3 सर्वं (for तस्य). — [b]) D_5 (? gloss) समर्थः (for पर्याप्तः). — [c]) K_4 लोक° (for तेज°).

25 D_3 missing (cf. v.l. 4). G_1 om. 25[ab] (cf. v.l. 24). — [b]) B D (except $D_{1.2.5}$; D_3 missing) transp. मम and पूर्वं. N (D_3 missing) T_2 (by corr.) G_3 महीपते; M_1 नवानघ; M_2 तु ते मम्वे (for ततो वधे). — [c]) B_1 यश्च; D_4 यस्त्वं (for यस्तं). G_1 समरे घोरनुमुले. — [d]) $Ś_1$ हरिष्यति; K $D_{1.2.5}$ हनि° (for वधि°). — [e]) $T_{1.2}$ (before corr.) $G_{1.2.4}$ तद् (for तं).

26 D_3 missing (cf. v.l. 4). B_2 om. 26[ab]. — [a]) $Ś_1$ $K_{1.2}$ De समादाय; G_4 °स्थाय. — [b]) T_1 G_1 M_1 दुःसहं भुवि भूपते. — [c]) M_2 सं (for तं). Some MSS. निसूदय. B De Dn D_4 राजेंद्र; D_6 वै पुष्टं; S संदिष्टो (G_3 संदष्टो; M_2 तं दुष्टं).

27 D_3 missing (cf. v.l. 4). K_3 om. 27. — [a]) B_1 °राज; T_2 $G_{1.3}$ M °वीर्यस् (for °तेजास्). T_1 नियुध्यस्व महावीर्य; $G_{2.4}$ न हि युद्धे महावीर्यस्. — [b]) D_5 [अ]न्यैर्न (for [अ]हंपन). T_1 धक्ष्यते (for शक्यते). — [c]) B_1 तु मही° (for पृथिवी°). — [d]) D_1 न (for स). D_6 पृथ्वी-पाल° (for स हि वर्ष°).

26 [a]) T G2. 4 ततो (for स्वधो). N (except Ś1) T G3 M नाभ्याम्; G1 नाभेर् (for नाभ्या). — [b]) Ś1 धामाशयः; K1-3 D1. 2 चामा˚ (for आमा˚). B4 T G1. 2. 4 स्मृतः (for स्थितः). — [c]) K3 नाति˚; K4 D1. 5 नाभी˚; D1 नाभिर् (for नाभि˚). — [d]) B3m नाड्यः सर्वाः (for प्राणाः सर्वे). Ś1 K1. 2 D5 सुसंस्थिताः (for प्रतिष्ठिताः).

27 [a]) Ś1 K1. 2 De Dn2. n3 T2 G सर्वे (for सर्वास्). — [c]) T2 ˚मया (for ˚रसान्). — [d]) De प्राणाः (for प्राण-). Ś1 ˚समीरिताः; D5 ˚प्रणोदिताः; T2 ˚प्रयोजिताः.

28 [a]) D2 वै (for तु). — [b]) K1. 2. 4 B2. 4 D2. 5 तत्पदं; G1 तत्पुरं (for तत्परम्). — [c]) K3 B2. 4 ˚माशना; K4 ˚मासतो; B1. 3 De Dn D4. 6 G3 ˚माः समा; T1 ˚माश्रमा; T2 ˚मा नरा; G1 ˚मश्रमा (for ˚मासना). G2. 4 ˚क्लमासनो धीरो. — [d]) B4 T1 G1 M आदधन्; G2. 4 आदधत् (for आदधुः). — [f]) Ś1 K D1-3 स्म; B1 तु (for हि). B2 शरीरिषु; B4 हि देहिनां; T2 हि जंतुषु (for हि देहिषु). — After 28, S (except G3) ins.:

1035* तावग्निसहितौ ब्रह्मन्विद्धि वै प्राणमात्मनि ।

[T2 वन्हि˚ (for [अ]ग्नि˚). G2. 4 तौ तावदग्निसहितौ (for the prior half).]

29 [b]) T1 कर्ता (for कला-). K2 M2 ˚संभृतं; D2. 5 ˚संवृतः (for ˚संभृतः). — [c]) D2 मूर्ध्नि भूतं (for मूर्तिमन्तं). T1 स्थितं; T2 स्तुतं; G1. 2. 4 M1 स्म तं (for हि तं). — [d]) K3. 4 D3 T नित्य- (for नित्यं). B Dn2 D2 योग˚ (for कर्म˚).

30 [a]) K3 De G2. 4 M1 वह्निर्; K4 D1-3 नित्यं (D3 ˚त्यो); B1. 3 [S]ग्निस्तु (for ह्यग्निर्). — [b]) K4 D1-3 वन्हिः (for नित्यं). B2. 4 इव स्थितः; D2 समाहितः; T2 इवास्थितः (for इवाहितः). — [c]) G2 जीवात्मानं (for आत्मानं तं). — [d]) B1 योगे; D3 कर्म-; T2 ज्ञान- (for योग-).

31 Ś1 K3 D2 T2 om. (hapl.) 31. — [a]) De संश्रितस्. K1 D1 ह्यस्मिन्; K4 यस्मिन्; D3 स्वस्मिन् (for तस्मिन्). — [c]) M1 आत्मानं (for क्षेत्रज्ञं). — [d]) K1. 2. 4 G1. 2. 4 M त्याग˚; (as in text); De T1 ज्ञान˚; the rest योग˚).

32 [a]) T2 G2. 4 ˚त्मकं वि- (for ˚त्मकानि). Ś1 K1-3 D5. 6 यानीह; G1 च तथा (for जानीहि). — [b]) K B4 D1-3. 5 transp. रजः and तमः. — [c]) Ś1 K1. 2 ˚समं (for

C. 3. 13980
B. 3. 213. 21
K. 3. 216. 37

जीवमात्मगुणं विद्धि तथात्मानं परात्मकम् ॥ ३२
सचेतनं जीवगुणं वदन्ति
स चेष्टते चेष्टयते च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति
प्राकल्पयद्यो भुवनानि सप्त ॥ ३३
एवं सर्वेषु भूतेषु भूतात्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया ज्ञानवेदिभिः ॥ ३४
चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमानन्त्यमश्नुते ॥ ३५
लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपेत् ।
निवाते वा यथा दीपो दीप्येत्कुशलदीपितः ॥ ३६
पूर्वरात्रे परे चैव युञ्जानः सततं मनः ।
लघ्वाहारो विशुद्धात्मा पश्यन्नात्मानमात्मनि ॥ ३७
प्रदीप्तेनेव दीपेन मनोदीपेन पश्यति ।
दृष्ट्वात्मानं निरात्मानं तदा स तु विमुच्यते ॥ ३८
सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः ।
एतत्पवित्रं यज्ञानां तपो वै संक्रमो मतः ॥ ३९
नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेत मत्सरात् ।
विद्यां मानापमानाभ्यामात्मानं तु प्रमादतः ॥ ४०
आनृशंस्यं परो धर्मः क्षमा च परमं बलम् ।
आत्मज्ञानं परं ज्ञानं परं सत्यव्रतं व्रतम् ॥ ४१
सत्यस्य वचनं श्रेयः सत्यं ज्ञानं हितं भवेत् ।

°गुणं). G1 जीवात्मगुणकं विद्धि. — d) Ś1 K1. 2 यथा° (for तथा°). K1. 2 परार्थकं (for परात्मकम्).

33 a) B1. 2. 4 De Dn3m S (except G3) अचे° (for सचे°). — b) Ś1 K1. 2 स्पर्शे°; B1 De चेत° (for चेष्टयते). K4 विश्वं (for सर्वम्). — The portion of the text from 33c up to st. 20 of the next adhy. is lost in D3 on a missing fol. (279). — c) Ś1 अतः (for ततः). T1 M3 क्षेत्रमिति ब्रुवंति. — d) Ś1 K B3. 4 D1. 2. 5. 6 T2 G3 प्राव(B3 °त्व)तैं° (for प्राकल्प°).

34 D3 missing (cf. v.l. 33). — a) Ś1 K1. 2 D1. 2 G2 M3 एषु; B1. 4 D5 T1 G4 एष (for एवं). B1 भूतार्थो (for भूतेषु). — b) B1 महात्मा (for भूता°). B2. 4 Dn1. n3 D4. 6 G3 सं-; D2 तु; T2 नु; G1 यः (for न). — d) Ś1 K1. 2 ज्ञानबुद्धिभिः; B2 सूक्ष्मवेदिभिः; G1 सूक्ष्मदर्शिभिः.

35 D3 missing (cf. v.l. 33). — a) D1 च; D5 [अ]पि; S (except G3) तु (for हि). — c) Ś1 K1. 2 प्रसन्नात्मनि सं(Ś1 सु)स्थित्वा; De प्रसन्न आत्मनि स्थित्वा. — d) B4 D5 अत्यंतम् (for आनन्त्यम्).

36 D3 missing (cf. v.l. 33). G1 om. 36–37. — a) T1 G4 प्रसन्नस्य (for प्रसा°). — b) T1 भवेत् (for स्वपेत्). — After 36ab, T2 G2. 4 ins.:

1036* सुखदुःखे हि संत्यज्य निर्द्वंद्वो निष्परिग्रहः ।

— c) B2. 4 D2 निर्वाते. D1 च; G4 हि (for वा). — d) K2 D2 दीपेत्; T2 वसेत्; G1 तिष्ठेत् (for दीप्येत्). T2 कौशल° (for कुशल°). K4 दीप्यतेवायुनोदितः.

37 D3 missing (cf. v.l. 33). G1 om. 37 (cf. v.l. 36). — a) K2 पूर्वरात्रपररात्रे च (hypermetric); D2 पूर्वरात्रापरात्रे च. — b) B4 युंजीयात् (for युञ्जानः). — c) T2 वाश्वा° (for लघ्वा°). — d) K4 D1. 2 युंजत्या°; K2 D5 T2 G1. 2 M पश्यत्या°; T1 G4 पश्येता° (for पश्यन्ना°).

38 D3 missing (cf. v.l. 33). — a) K2 B1 Dn1 G1 प्रदीपेन. B2. 3 De T2 G1. 2 M [प्र]व (for [द्र]व). B1 Dn1 दीप्तेन (for दीपेन). K4 दीप्तेनैव तु दीपेन. — b) S (except G3) पश्यत्यात्मानमात्मना (cf. 37d). — c) K1 लब्धा°; D2 वृथा° (for दृष्ट्वा°). M3 तदा° (for निरा°). G1 दृष्ट्वेनमंतरात्मानं. — d) B4 स तदा (by transp.). B1–3 De Dn D4. 6 G3 स तदा विप्रमुच्यते.

39 = (var.) B. 12. 189. 9. — D3 missing (cf v.l. 33). — c) Ś1 K D1. 2. 5 ज्ञानानां; B1–3 De Dn D4. 6 G3 लोकानां (Dn3 °कस्य); T1 G1 M1 विज्ञानं (for यज्ञानां). T2 एतत्प्रवृत्तं यज्ज्ञानात्. — d) D1. 2 संयमो; D5 सत्तमं (for संक्रमो). Ś1 K1. 2 D5 मतं (for मतः).

40 = (var.) B. 12. 189. 10cdef. — D3 missing (cf. v.l. 33). — b) Ś1 B De Dn D4. 6 G3 धर्मं; K3 प्रियं; D2 श्रियो (for श्रियं). Ś1 K1. 2. 4 B Dn D1. 2. 4–6 T2 G1–3 रक्षेत् (for रक्षेत). Ś1 K1. 2. 4 B2. 3 D4. 6 अमत्सरात्; B1. 4 Dn D1. 5 G3 च मत्स°; D2 विमत्स°; T2 G1. 2 तु मत्स° (for मत्स°). — c) Ś1 K1–3 D1 T2 G1. 2. 4 मानाव° (for मानाप°). — d) K4 च (for तु). G1 ज्ञानं रक्षेत्प्रमादतः.

41 D3 missing (cf. v.l. 33). — a) K2 De2 D4 अनृ° (for आनृ°). — b) Ś1 K1. 2 हि; K3. 4 D2. 5 तु (for च). — c) Ś1 K1. 2 आत्मानं (Ś1 °त्मा तु) परमं ज्ञानं. — d) Ś1 K D1–3. 5 सत्यं व्रतपरिग्रहः; B De Dn D4. 6 G3 सत्यं व्रतं (B1–3 ब्रह्म-; B4 Dn व्रत-) परं व्रतं; G4 परं सत्यव्रतस्थितं.

यद्भूतहितमत्यन्तं तद्वै सत्यं परं मतम् ॥ ४२
यस्य सर्वे समारम्भाः निराशीर्बन्धनाः सदा ।
त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् ॥ ४३
यतो न गुरुरप्येनं च्यावयेदुपपादयन् ।
तं विद्याद्ब्रह्मणो योगं वियोगं योगसंज्ञितम् ॥ ४४
न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत् ।
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ॥ ४५
आकिंचन्यं सुसंतोषो निराशित्वमचापलम् ।
एतदेव परं ज्ञानं यदात्मज्ञानमुत्तमम् ॥ ४६
परिग्रहं परित्यज्य भव बुद्ध्या यतव्रतः ।
अशोकं स्थानमातिष्ठेन्निश्चलं प्रेत्य चेह च ॥ ४७
तपोनित्येन दान्तेन मुनिना संयतात्मना ।
अजितं जेतुकामेन भाव्यं सङ्गेष्वसङ्गिना ॥ ४८
गुणागुणमनासङ्गमेककार्यमनन्तरम् ।
एतद्ब्राह्मण ते वृत्तमाहुरेकपदं सुखम् ॥ ४९
परित्यजति यो दुःखं सुखं चाप्युभयं नरः ।

C. 3. 1390; B. 3. 213. 39; K. 3. 116. 55

42 D_3 missing (cf. v.l. 33). — [a]) G_4 सेवनं (for वचनं). D_5 श्रेष्ठं (for श्रेयः). — [b]) B_1 सत्यादपि; Dc_2 D_1 T_2 सत्यज्ञानं (for सत्यं ज्ञानं). $K_{1.\,3.\,4}$ D_2 $G_{1.\,2.\,4}$ M ज्ञानहितं (for ज्ञानं हितं). B_1 वदेत् (for भवेत्). — [d]) B_2 तच्च (for तद्वै). $K_{1.\,2}$ T_1 हितं; $K_{3.\,4}$ B_2 Dc_2 $D_{1.\,2.\,5}$ स्मृतं; B_4 व्रतं (for मतम्). G_1 तत्तत्सत्यं हितं परं; G_4 तद्वै सत्यमसं मतं.

43 = B. 12. 189. 12. Cf. Gītā (Vulg.) 4. 19. — D_3 missing (cf. v.l. 33). — 43^a = Gītā (Vulg.) 4. 19^a. — [b]) T G_1 निराशाबंधनाः. M_2 निराबाधाः सदैव तु. — [c]) B_4 योगे (for त्यागे). D_5 हितं; T कृ˚ (for हु˚). T_1 सत्यं (for सर्वं). — [d]) B_4 योगी (for त्यागी). B_3 च स; T_1 कृत˚; T_2 स तु (for स च).

44 D_3 missing (cf. v.l. 33). — [a]) T_2 वा हि (for अपि). Dc एवं; D_5 एतं (for एनं). $Ś_1$ K_{1-3} $B_{2.\,4}$ यतो गुरुर्न चाप्येनं; T_1 $G_{1.\,2}$ M_1 यतो न गुरुता ह्येवं (T_1 ˚प्येवं; G_2 चैनं); G_4 यदा न कुरुतां चैनं. — [b]) B Dc Dn $D_{4.\,6}$ G_3 श्रावयेद्; T_2 यापयेद् (for च्यावयेद्). $Ś_1$ K $D_{1.\,2.\,5}$ आपदागमः; B Dc Dn $D_{4.\,6}$ T_1 $G_{1.\,3}$ उपपादयेत् (for ˚यन्). — 44^{cd} = (var.) Gītā (Vulg.) 6. 23^{ab}. — [c]) $Ś_1$ K_{2-4} Dc_2 $D_{1.\,2.\,5}$ $G_{2.\,4}$ M ब्राह्मणो; B_{2m} आत्मनो (for ब्रह्मणो). — [d]) S (except T_2 G_3) अयोगं (for वि˚). D_1 योगसंज्ञकं.

45 = B. 12. 278. 5; = (var.) B. 12. 329. 18. Cf. B. 12. 189. 13^{ab}. — D_3 missing (cf. v.l. 33). — [b]) $Ś_1$ K_3 मैत्रायणमनश्; K_1 ˚यणमतश्; K_4 $B_{3.\,4}$ D (except D_6; D_3 missing) $G_{1.\,3}$ ˚यणगतिश्; T_1 मैत्रेयगुणतश्; T_2 G_4 मैत्राय सुगतिं; G_2 ˚यणगतिं (for ˚यणगतश्). K_4 D_1 चरन्. — [c]) M_2 आद्यं वै (for आसाद्य). — G_1 om. 45^d–47^c. — [d]) K_2 D_6 कुर्वंति; D_2 कुर्वंतु (for कुर्वीत).

46 D_3 missing (cf. v.l. 33). G_1 om. 46 (cf. v.l. 45). — [a]) D_5 अकिंचनः. T $G_{3.\,4}$ M अकिंचनत्वं संतोषो. — [b]) $Ś_1$ K_4 D_1 M_2 निराशत्वम्; Dc ˚शीत्वम्; T_2 $G_{2.\,4}$ M_1 ˚शीस्त्वम्. — [c]) $Ś_1$ K B_1 $D_{1.\,2.\,5}$ तदेव परमं ज्ञानं. — [d]) K_4 $D_{1.\,2}$ तदात्म˚ (for यदात्म˚). D_5 उत्तमं परिकीर्तितं.

47 = (var.) 12. 189. 13^{cdef}. — D_3 missing (cf. v.l. 33). G_1 om. 47^{abc} (cf. v.l. 45). — [b]) $Ś_1$ $K_{1.\,2.\,4}$ B Dn $D_{1.\,2}$ T_2 $G_{2.\,3}$ भवेद्; D_5 स चेद् (for भव). $Ś_1$ K $D_{1.\,2.\,5}$ जितेंद्रियः (for यत˚). — [c]) B_1 अशोच्यं (for अशोकं). K_3 B_4 D_1 T_1 M_2 आतिष्ठ; $B_{1.\,2}$ Dc Dn_1 $D_{4.\,6}$ G_3 आश्रित्य; B_3 $Dn_{2.\,n3}$ आसाद्य; G_2 M_1 आतिष्ठन् (for आतिष्ठेत्). — [d]) $Ś_1$ K Dc_2 $D_{1.\,2.\,5}$ निर्मलं; G_4 निष्कलं (for निश्चलं). G_1 चैव हि (for चेह च). — After 47, K_4 ins.:

1037* ब्राह्मस्पर्शेषु मक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
तद्ब्रह्मयोगयुक्ता[त्मा] सुखम[क्षयम]श्नुते ।
[= (var.) Gita (Vulg.) 5. 21]

48 = B. 12. 189. 14. — D_3 missing (cf. v.l. 33). — [b]) K_3 संजिता˚; D_5 संवृता˚ (for संयता˚). — [c]) G_1 जित˚ (for जितु˚).

49 D_3 missing (cf. v.l. 33). — [a]) D_3 गुणानां तु (for गुणागुणम्). $Dn_{1.\,n2}$ अनारंभम् (for ˚सङ्गम्). — [b]) $Ś_1$ K B_3 $D_{1.\,2.\,5}$ ˚चर्यम् (for ˚कार्यम्). — [c]) K_3 एकं (for एतद्). D_1 ब्राह्मण तद्; M ब्राह्मणतो (M_2 ˚को) (for ब्राह्मण ते). B Dc Dn $D_{4.\,6}$ $G_{1.\,3}$ एतत्तद् (B_1 G_1 ˚द्वै) ब्र(B_3 ब्रा)ह्मणो वृत्तं; T_1 G_4 एतद्ब्रह्मांडवृत्तांतं; G_2 एतद्वै कथितं ब्रह्मन्. — [d]) K_3 एके; $B_{2.\,4}$ D_5 एकं; T_2 एतत् (for एक˚). $Ś_1$ $K_{1.\,2}$ आहुरेके परं पदं; T_1 आहुरेतत्सुखप्रदं.

50 D_3 missing (cf. v.l. 33). — [b]) $Ś_1$ K_2 D_5 वा˚ (for चा˚). T_1 [अ]भ्युदयं (for [अ]प्युभयं). — [c]) $Ś_1$ K Dc $D_{1.\,2}$ (by transp.) प्राप्नोति ब्रह्म ($Ś_1$ K_2 शर्म; K_1 मोक्षं). T_1 चा˚ (for सो˚). D_5 प्राप्नोति ब्राह्मणो नित्यं. — [d]) B_3 अशक्तेन; B_4 अमंगे स (for असङ्गेन). T_1 $G_{1.\,2.\,4}$ M आ($G_{1.\,2}$ अ)संगे च न गच्छति; T_2 आधिं गच्छन्न गच्छति.

C. 3. 13998
B. 3. 213. 39
K. 3. 216. 55

ब्रह्म प्राप्नोति सोऽत्यन्तमसङ्गेन च गच्छति ॥ ५०
यथाश्रुतमिदं सर्वं समासेन द्विजोत्तम ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥ ५१

इति श्रीमहाभारते आरण्यकपर्वणि त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

२०४

मार्कण्डेय उवाच ।
एवं संकथिते कृत्स्ने मोक्षधर्मे युधिष्ठिर ।
दृढं प्रीतमना विप्रो धर्मव्याधमुवाच ह ॥ १
न्याययुक्तमिदं सर्वं भवता परिकीर्तितम् ।
न तेऽस्त्यविदितं किंचिद्धर्मेष्विह हि दृश्यते ॥ २

व्याध उवाच ।
प्रत्यक्षं मम यो धर्मस्तं पश्य द्विजसत्तम ।
येन सिद्धिरियं प्राप्ता मया ब्राह्मणपुंगव ॥ ३
उत्तिष्ठ भगवन्क्षिप्रं प्रविश्याभ्यन्तरं गृहम् ।
द्रष्टुमर्हसि धर्मज्ञ मातरं पितरं च मे ॥ ४

मार्कण्डेय उवाच ।
इत्युक्तः स प्रविश्याथ ददर्श परमार्चितम् ।
सौधं हृद्यं चतुःशालमतीव च मनोहरम् ॥ ५
देवतागृहसंकाशं दैवतैश्च सुपूजितम् ।
शयनासनसंबाधं गन्धैश्च परमैर्युतम् ॥ ६
तत्र शुक्लाम्बरधरौ पितरावस्य पूजितौ ।

---

51 D_3 missing (cf. v.l. 33). — [a]) D_1 तथा (for यथा). T_1 -भूतम् (for -श्रुतम्). — [c]) $Ś_1$ $K_{1.2}$ मया ते सम्यगाख्यातं.

Colophon om. in B_4. D_3 missing. — *Major parvan:* $Ś_1$ K_2 T_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* G_1 मार्कंडेयसमस्या. $K_{3.4}$ B_{1-3} De Dn $D_{1.4-6}$ G_3 (all om. sub-parvan name) mention only पतिव्रतो(D_5 धर्मव्याधो)-पाख्यान. — *Adhy. name:* G_1 धर्मव्याधकौशिकसंवादः; G_3 कौशिकव्याधसंवादः. — *Adhy. no.* (figures, words or both): Dn1 (marg.), ns 212; Dn2 D_1 211; T G_1 M (M_3 *inf. lin.*) 206; $G_{2.4}$ M_2 (orig.) 208. — *Śloka no.:* Dn 40; D_1 41.

204

☞ Stanzas 1-20 are lost in D_3 on a missing fol. (279); cf. v.l. 3. 203. 33. The MS. is ignored up to st. 20.

1 [a]) $Ś_1$ $K_{1.2.4}$ च; T_2 M स; G_1 सु- (for सं-). — [b]) G_1 तेन धर्मो (for मोक्षधर्मे). — [c]) De $D_{2.4.5}$ दृढ-; T_2 गूढं (for दृढं).

2 Before 2, K_4 $D_{1.2}$ ins. ब्राह्मण उ°. — [a]) D_2 व्याध युक्तम्; T_2 $G_{2.4}$ मम धर्म्यम् (for न्याययुक्तम्). — $2^c = 1.57.12^c$: 5. 16. 7^c. — [d]) K_3 B_{1-3} Do D_{4-6} G_3 धर्मेभ्य इह दृ°; K_4 स्वधर्मेष्विह दृ°; T $G_{1.2.4}$ M धर्मेष्वभिसमीक्ष्यते.

3 [a]) T_1 प्रत्यक्षं मम धर्मस्तं. — [b]) B Dn $D_{4.6}$ G_3 तं (D_4 त्वं) च पश्य द्विजोत्तम; T_1 त्वं पश्य द्विजसत्तम. — [d]) D_1 °सत्तम (for °पुंगव).

4 [a]) D_5 [आ]गच्छ च (for भगवन्). Dc S (except G_3) विप्र (for क्षिप्रं). — [b]) Dc प्रविशा° (for प्रविश्या°). D_5 [अ]नंतरं (for [आ]भ्यन्तरं). — [c]) K_2 [अ]धर्मज्ञ; K_3 मे धर्मं (for धर्मज्ञ). — [d]) T_2 पितरं मातरं (by transp.). D_1 मम (for च मे).

5 B_3 $G_{2.4}$ om. the ref. — [ab]) T G_2 सं- (for स). $Ś_1$ $K_{1.2}$ transp. प्रविश्य and ददर्श. — K_1 om. (hapl.) 5^c–6^d. — [c]) B_4 इत्युक्तां हि (for सौधं हृद्यं). — [d]) M_1 सु- (for च). $B_{1.2.4}$ Dc Dn $D_{4.6}$ $G_{1.3}$ M मनोरमं.

6 K_1 om. 6 (cf. v.l. 5). — [a]) $Ś_1$ K_2 D_5 °संबाधं; cf. 6^c. — K_2 om. (hapl.) 6^{bc}. — [d]) $Ś_1$ $K_{2.4}$ B_2 $D_{1.5}$ °श्च परमार्चितं.

7 [a]) B_1 सूक्ष्मा° (for शुक्ला°). — [c]) $Ś_1$ $K_{1.2.4}$ Dc $D_{1.2}$ T_1 G_1 सुपुष्टौ तौ; K_3 सुसंपुष्टौ; $B_{1.2.4}$ Dn $D_{4.6}$ सु(B_2 D_6 तु)संतुष्टौ; B_3 सुतुष्टौ च; G_3 सुसंहृष्टौ (for सुतुष्टौ तौ). D_5 कृतौ सुपुष्टौ हृष्टौ तु. — [d]) D_5 शुप° (for उप° — After 7^{cd}, S (except G_3) ins.:

कृताहारौ सुतुष्टौ तावुपविष्टौ वरासने ।
धर्मव्याधस्तु तौ दृष्ट्वा पादेषु शिरसापतत् ॥ ७

वृद्धावूचतुः ।

उत्तिष्ठोत्तिष्ठ धर्मज्ञ धर्मस्त्वामभिरक्षतु ।
प्रीतौ स्वस्तव शौचेन दीर्घमायुरवाप्नुहि ।
सत्पुत्रेण त्वया पुत्र नित्यकालं सुपूजितौ ॥ ८
न तेऽन्यदैवतं किंचिद्दैवतेष्वपि वर्तते ।
प्रयतत्वाद्द्विजातीनां दमेनासि समन्वितः ॥ ९
पितुः पितामहा ये च तथैव प्रपितामहाः ।
प्रीतास्ते सततं पुत्र दमेनावां च पूजया ॥ १०
मनसा कर्मणा वाचा शुश्रूषा नैव हीयते ।
न चान्या वितथा बुद्धिर्दृश्यते सांप्रतं तव ॥ ११
जामदग्न्येन रामेण यथा वृद्धौ सुपूजितौ ।
तथा त्वया कृतं सर्वं तद्विशिष्टं च पुत्रक ॥ १२

मार्कण्डेय उवाच ।

ततस्तं ब्राह्मणं ताभ्यां धर्मव्याधो न्यवेदयत् ।
तौ स्वागतेन तं विप्रमर्चयामासतुस्तदा ॥ १३
प्रतिगृह्य च तां पूजां द्विजः पप्रच्छ तावुभौ ।
सपुत्राभ्यां सभृत्याभ्यां कच्चिद्वां कुशलं गृहे ।
अनामयं च वां कच्चित्सदैवेह शरीरयोः ॥ १४

वृद्धावूचतुः ।

कुशलं नो गृहे विप्र भृत्यवर्गे च सर्वशः ।
कच्चित्त्वमप्यविघ्नेन संप्राप्तो भगवन्निह ॥ १५

मार्कण्डेय उवाच ।

बाढमित्येव तौ विप्रः प्रत्युवाच मुदान्वितः ।
धर्मव्याधस्तु तं विप्रमर्थवद्वाक्यमब्रवीत् ॥ १६
पिता माता च भगवन्नेतौ मे दैवतं परम् ।
यद्दैवतेभ्यः कर्तव्यं तदेताभ्यां करोम्यहम् ॥ १७

C. 3. 14018
B. 3. 214. 18
K. 3. 217. 19

1038* तस्य व्याधस्य पितरौ ब्राह्मणः संददर्श ह ।

— [f]) T1 G1 पाद्योः (for पादेषु).

8 G1. 4 पितरौ (for वृद्धौ), om. ऊचतुः. — [c]) Dc धर्मेण (for शौचेन). — After 8[cd], N (except B2–4 D4. 6; B1 marg.) ins. :

1039* गतिमिष्टां तथा ज्ञानमेवं च परवान्भव ।

[Dn तपो (for तथा). Dn D5 मेधां (for एवं). B1 परमं तव; Dc परमस्तु ते; Du D5 परमां गतः (for परवान्भव).] — D5 om. 8[c]–9[d]. — [e]) K3. 4 D2 सुपुत्रेण. — [f]) Ś1 K Dc D1. 2 दीर्घकालं; B Dn D4. 6 G3 नित्यं काले; T2 नित्यं कालं. — After 8, S (except G3) ins. :

1040* सुखमावां वसावोऽत्र देवलोकगताविव ।

9 D5 om. 9 (cf. v.l. 8). — [a]) K2 तेन (for तेऽन्यद्). — [b]) Ś1 K B3 Dc D1. 2 G1 विद्यते (for वर्त°). — [d]) Ś1 धर्मेणापि; K1. 2 B3 दमेनापि; K4 दमेनाभि- (for °नासि).

10 [d]) K3 B3 D1. 2. 5 T1 G1 पूजितौ (for पूजया).

11 [b]) G1 ते न (for नैव). — [c]) B Dn D4. 6 G3 हि तथा; Dc D1. 2. 5 T G1. 2. 4 M [अ]पि तथा (for वितथा). — [d]) Ś1 K Dc D1. 2 वर्तते (for दृश्य°).

12 [b]) D1 तथा वृद्धौ प्रपूजितौ. — [c]) Ś1 K1. 2. 4 Dc2 D1. 2 transp. त्वया and कृतं.

13 N G1–3 om. the ref. — [d]) T2 अर्हया° (for अर्चया°). K3 B3 D5 तथा (for तदा).

14 [a]) B1. 3 Dc1 Dn D4. 6 G3 °पूज्य (for °गृह्य). Ś1 K1. 2 T1 G1 M2 तु; M1 स (for च). — [c]) Dc2 सवृद्धाभ्यां; T1 ममातृभ्यां; G1 सुभृत्याभ्यां; G4 सभ्रातृभ्यां; M1 सुपुत्राभ्यां (for सभृ°). — [d]) G1 वा; M1 त्वं; M2 वः (for वां). — [e]) A few MSS. कश्चित् (for कच्चित्). — [f]) G2. 4 सुखं वेह (for सदैवेह). T1 हि (for [इ]ह).

15 [a]) Ś1 K1 B Dc Dn D2 T1 G1. 3. 4 नौ (for नो). — [b]) T1 G2. 4 M °वर्गेषु (for °वर्गे च). Ś1 K1. 2 D1 तथानामयमेव च. — [c]) T2 G2. 4 असि (for अपि). — [d]) Dc1 Dn1. n2 इति (for इह).

16 [a]) T1 G M [आ]ह (for [ए]व). K2 D1 तं (for तौ). — [b]) S (except G3) कौतूहलसमन्वितः. — [c]) B Dn D4. 6 G3 निरीक्ष्याथ (for तु तं विप्रम्). — [d]) B Dn D4. 6 G3 ततस्तं (for अर्थवद्). Ś1 K Dc D1. 2. 5 अभ्यर्च्येदं वचोऽब्रवीत्.

17 Before 17, all MSS. except Ś1 K1. 2 ins. व्याध उ° (resp. व्याधः). — [a]) Ś1 K1. 2 माता पिता (by transp.). — [b]) B1 उभौ; D1 इदं (for एतौ). B2. 4 मद्- (for मे). K1 एनं मे भगवन्परं. — [c]) K2. 3 G3 यदैव तेभ्यः; G1. 4 यद्देवतेभ्यः. — [d]) T1 G1. 2. 4 M2 तदेवाभ्यां; T2 तदावाभ्यां.

18 [d]) B2 अपि (for मम).

19 [a]) Dn2. n3 T2 G3 उपाहारान्. — [b]) K1. 2 Dc2

C. 3. 14019
B. 3. 214. 19
K. 3. 217. 20

त्रयस्त्रिंशद्यथा देवाः सर्वे शक्रपुरोगमाः ।
संपूज्याः सर्वलोकस्य तथा वृद्धाविमौ मम ॥ १८
उपहारानाहरन्तो देवतानां यथा द्विजाः ।
कुर्वते तद्वदेताभ्यां करोम्यहमतन्द्रितः ॥ १९
एतौ मे परमं ब्रह्मन्पिता माता च दैवतम् ।
एतौ पुष्पैः फलैः स्नैस्तोपयामि सदा द्विज ॥ २०
एतावेवाग्नयो मह्यं यान्वदन्ति मनीषिणः ।
यज्ञा वेदाश्च चत्वारः सर्वमेतौ मम द्विज ॥ २१
एतदर्थं मम प्राणा भार्या पुत्राः सुहृज्जनाः ।
सपुत्रदारः शुश्रूषां नित्यमेव करोम्यहम् ॥ २२
स्वयं च स्नापयाम्येतौ तथा पादौ प्रधावये ।
आहारं संप्रयच्छामि स्वयं च द्विजसत्तम ॥ २३
अनुकूलाः कथा वच्मि विप्रियं परिवर्जयन् ।
अधर्मेणापि संयुक्तं प्रियमाभ्यां करोम्यहम् ॥ २४
धर्ममेव गुरुं ज्ञात्वा करोमि द्विजसत्तम ।
अतन्द्रितः सदा विप्र शुश्रूषां वै करोम्यहम् ॥ २५
पञ्चैव गुरवो ब्रह्मन्पुरुषस्य बुभूषतः ।
पिता माताग्निरात्मा च गुरुश्च द्विजसत्तम ॥ २६
एतेषु यस्तु वर्तेत सम्यगेव द्विजोत्तम ।
भवेयुरग्नयस्तस्य परिचीर्णास्तु नित्यशः ।
गार्हस्थ्ये वर्तमानस्य धर्म एष सनातनः ॥ २७

इति श्रीमहाभारते आरण्यकपर्वणि चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

D$_6$ दैवतानां. Dn$_1$. n$_2$ तथा (for यथा). — ^{c}) B Dn D$_{4.6}$ G$_3$ कुर्वंति (for कुर्वते). D$_5$ तावद् (for तद्वद्). G$_{2.4}$ एताभ्यां (for एताभ्यां).

20 K$_3$ D$_1$ om. 20^{ab}. — ^{a}) K$_{1.2}$ एष (for एतौ). G$_1$ परमौ (for °मं). D$_2$ T$_2$ ब्रह्म. B$_2$ एतौ हि मे परं ब्रह्म. — ^{c}) K$_{1.2}$ एतैः (for एतौ). Ś$_1$ K Dc$_2$ D$_{1.2.5}$ पुष्प- (K$_4$ स्न)फलैः. K$_2$ B$_1$ G$_{1.4}$ अन्यैः; K$_4$ पुष्पैः; B$_3$ अन्नैः; D$_5$ G$_3$ M अन्नैः (for स्नैः). — ^{d}) Ś$_1$ K Dc D$_{1.2.5}$ G$_1$ द्विजोत्तम (for सदा द्विज).

21 D$_3$ resumes! — ^{a}) Ś$_1$ K Dc D$_{1-3.5}$ नित्यं; Dn$_3$ ब्रह्मन् (for मह्यं). — ^{b}) T$_1$ यं; T$_2$ यद्; G$_1$ यद् (for यान्). — ^{d}) G$_1$ द्विजोत्तम (for मम द्विज).

22 ^{a}) K$_1$ °र्थो मम प्राणौ. — ^{b}) K$_{1.2}$ D$_5$ भार्याः; B$_2$ दाराः (for भार्या). B$_{1.4}$ D$_4$ G$_4$ पुत्रः; B$_3$ Dc Dn D$_6$ पुत्रः. B$_{1.3.4}$ Dc Dn D$_{3-6}$ G$_3$ सुहृज्जनः; B$_2$ तथैव च. — ^{d}) D$_{4.6}$ G$_3$ एवं (for एव).

23 Ś$_1$ K$_1$. $_2$ om. 23; M$_2$ om. 23–24. — ^{a}) D$_3$ T$_2$ स्नाप° (for स्नाप°). — ^{b}) B$_4$ तदा; T$_1$ G$_{1.3.4}$ सदा (for तथा). K$_3$ D$_3$ पादान् (for पादौ). G$_{3.4}$ च (for प्र-). T$_2$ यदा पादौ च तर्पये. — ^{c}) B$_{1.4}$ D$_4$ च (for सं-). — ^{d}) K$_{3.4}$ B$_{3.4}$ Dc D$_{1.2.5}$ T G$_{1.3.4}$ M$_1$ स्वयं चैव द्विजोत्तम (B$_{3.4}$ द्विजर्षभ).

24 M$_2$ om. 24 (cf. v.l. 23); T$_2$ om. (hapl.) 24^a–25^b. — ^{a}) B$_{1.3}$ Dc °कूलां कथां; B$_{3.4}$ Dn D$_{4.6}$ °कूलं तथा. G$_1$ ब्रूयां; M$_1$ दद्मि (for वच्मि). T$_1$ अनुरूपकथावादी. — ^{b}) Ś$_1$ K$_{1.2}$ च विवर्जयन्; K$_3$ B Dn D$_{3.4.6}$ G$_3$ परिवर्जये (K$_3$ °येत्). — ^{c}) K$_{1.2}$ संयुक्तः (for °क्तं).

25 T$_2$ om. 25^{ab} (cf. v.l. 24); Ś$_1$ G$_4$ om. (hapl.) 25. — ^{a}) B$_{1.4}$ Dc$_1$ Dn D$_{4.6}$ G$_3$ एवं (for एव). K$_2$ M गुरू (for गुरुं). K B$_{1.4}$ D$_{1-3.5}$ T$_1$ G$_{1.2}$ M मत्वा (for ज्ञात्वा). — ^{b}) T$_1$ G$_{1.2}$ M साक्षादेतौ द्विजोत्तम. — K$_1$ om. (hapl.) 25^c–26^d. — ^{c}) K$_{2-4}$ D$_{2.3.5}$ स्वयं विप्र; T G$_{1.2}$ M तु सततं (for सदा विप्र).

26 K$_1$ om. 26 (cf. v.l. 25). — ^{a}) B$_2$ राजन् (for ब्रह्मन्). — ^{d}) T$_1$ गुरुश्च द्विजोत्तम.

27 G$_1$ om. (hapl.) 27^{ab}. — ^{a}) G$_4$ एषु यस्य प्रवर्तेत. — ^{b}) K$_3$ T$_1$ एतद्; K$_4$ B$_1$ Dc D$_{1-3.5}$ एवं (for एव). — ^{c}) S (except G$_{1.3}$) तेन (for तस्य). — ^{d}) Ś$_1$ K$_{1.2}$ T$_2$ परिपूर्णास्तु. K$_4$ सर्वशः (for नित्यं). — ^{e}) K$_{1.2.4}$ D$_1$ गार्हस्थे. — ^{f}) K$_4$ B D (except D$_{1-3.5}$) T$_1$ G$_3$ एष धर्मः (by transp.); T$_2$ धर्म एव. — After 27, M ins.:

1011* कथितस्ते मया विप्र किं भूयः श्रोतुमिच्छसि ।

Colophon. — *Major parvan:* Ś$_1$ K$_{1-3}$ Dn$_2$ G$_{2.4}$ आरण्य. — *Sub-parvan:* G$_1$ मार्कंडेयसमस्या. K$_{3.4}$ B Dc Dn$_1$. n$_3$ D$_{1-6}$ G$_3$ (all om. sub-parvan name) mention only पतिव्रतो(D$_5$ धर्मव्याधो)पाख्यान. — *Adhy. name:* G$_1$ धर्मव्याधकौशिकसंवादः; G$_2$ कौशिकव्याधसंवादः. — *Adhy. no.* (figures, words or both): Dn$_1$ (marg.). n$_3$ 213; Dn$_2$ D$_1$ 212; T G$_1$ M (M$_2$ *inf. lin.*) 207; G$_{3.4}$ M$_2$ (orig.) 209. — *Śloka no.:* Dn$_1$ 30; Dn$_2$. n$_3$ D$_1$ 29.

२०५

मार्कण्डेय उवाच ।
गुरू निवेद्य विप्राय तौ मातापितरावुभौ ।
पुनरेव स धर्मात्मा व्याधो ब्राह्मणमब्रवीत् ॥ १
प्रवृत्तचक्षुर्जातोऽस्मि संपश्य तपसो बलम् ।
यदर्थमुक्तोऽसि तया गच्छस्व मिथिलामिति ॥ २
पतिशुश्रूषपरया दान्तया सत्यशीलया ।
मिथिलायां वसन्व्याधः स ते धर्मान्प्रवक्ष्यति ॥ ३

ब्राह्मण उवाच ।
पतिव्रतायाः सत्यायाः शीलाढ्याया यतव्रत ।
संस्मृत्य वाक्यं धर्मज्ञ गुणवानसि मे मतः ॥ ४

व्याध उवाच ।
यत्तदा त्वं द्विजश्रेष्ठ तयोक्तो मां प्रति प्रभो ।
दृष्टमेतत्तया सम्यगेकपल्या न संशयः ॥ ५
त्वदनुग्रहबुद्ध्या तु विप्रैतद्दर्शितं मया ।
वाक्यं च शृणु मे तात यत्ते वक्ष्ये हितं द्विज ॥ ६
त्वया विनिकृता माता पिता च द्विजसत्तम ।
अनिसृष्टोऽसि निष्क्रान्तो गृहात्ताभ्यामनिन्दित ।
वेदोच्चारणकार्यार्थमयुक्तं तत्त्वया कृतम् ॥ ७
तव शोकेन वृद्धौ तावन्धौ जातौ तपस्विनौ ।
तौ प्रसादयितुं गच्छ मा त्वा धर्मोऽत्यगान्महान् ॥ ८
तपस्वी त्वं महात्मा च धर्मे च निरतः सदा ।
सर्वमेतदपार्थं ते क्षिप्रं तौ संप्रसादय ॥ ९
श्रद्दधस्व मम ब्रह्मन्नान्यथा कर्तुमर्हसि ।
गम्यतामद्य विप्रर्षे श्रेयस्ते कथयाम्यहम् ॥ १०

C. 3. 14040
B. 3. 215. 10
K 3. 218. 11

205

1 [a]) K$_3$ D$_1$ गुरुं; K$_4$ °रौ (for °रू). — [c]) Ś$_1$ K$_{1-3}$ Dc$_2$ D$_8$ M$_1$ तु (for स). — [d]) Ś$_1$ K Dc Dn$_{1.\,n3}$ D$_{1-3.\,5}$ वचनम् (for ब्राह्मणम्).

2 [a]) T$_1$ प्रवृद्ध° (for प्रवृत्त°). Ś$_1$ K$_{1.\,2}$ [S]सि (for sसि). — [b]) G$_1$ तत्पश्य; M$_1$ पश्य मे (for संपश्य). K$_3$ D$_6$ च तपोबलं (for तपसो बलम्). Ś$_1$ प्रणष्टं च तमो महत्; K$_{1.\,2}$ सांप्रतं च तपो महत्; D$_1$ M$_3$ सं(M$_3$ तं)पश्यत तपोबलं. — [c]) S (except G$_3$) भगव(G$_1$ M$_1$ °वा)न् (for sसि तया). K$_4$ तथा (m तया as in text). — [d]) K$_4$ B$_{1.\,2}$ D$_{1-3}$ S गच्छ त्वं (T$_1$ गच्छध्वं) (for °स्व). M$_1$ प्रति (for इति). Dc मिथिलां गम्यतामिति.

3 M$_3$ om. 3. — [a]) G$_1$ M$_1$ गुरु (for पति-). K$_{3.\,4}$ D$_{1-3.\,5}$ T G$_{1.\,2.\,4}$ M$_1$ °रतया (for °परया). Dc पतिशुश्रूषणतया. — [c]) B Dn D$_{4.\,6}$ G$_3$ वसेद् (for वसन्). — [d]) Dc धर्मं (for धर्मान्).

4 [a]) T$_3$ सानार्या (sic); M$_3$ सुपुत्राया: (hypermetric) (for सत्याया:). — [b]) A few N MSS. शीलाढ्याया; T$_3$ °त्माया. D$_1$ जितव्रत; G$_3$. $_4$ च सुव्रत. — [c]) T$_1$ स्मृतवानसि धर्मज्ञ. — [d]) D$_3$ मतिः (for मतः).

5 [a]) Ś$_1$ K$_{1.\,2}$ यदा तु; S (except G$_3$) यत्त(M$_3$ °त्व)या (for यत्तदा). — [b]) B$_{3.\,4}$ तयोक्तं; S (except G$_3$) नि-(T$_3$ प्र)युक्तो. B$_4$ द्विज (for प्रभो). — [c]) Dn एव (for एतत्). K$_4$ (marg. *sec. m.*) मया; Dc$_3$ Dn$_3$ D$_{1.\,5}$ S (except T$_3$) त्वया (for तया).

6 [a]) K$_{2.\,3}$ Dc D$_5$ तदनु° (for त्वदनु°). — [c]) Ś$_1$ K Dc D$_{1-3.\,5}$ तु (for च). Ś$_1$ K Dc$_2$ D$_{1-3.\,5}$ T$_3$ G$_2$ तावद् (for तात). — [d]) K$_1$ D$_6$ G$_1$ यत्ते वक्ष्यामि तद् (K$_1$ ते) द्विज; D$_1$ यावद्वक्ष्ये हि ते द्विज.

7 [a]) Ś$_1$ विनिहता; T$_1$ [अ]पि निकृता; G$_{2.\,4}$ न पूजिता. — [c]) Ś$_1$ K$_{1.\,2}$ T$_1$ G$_4$ अविसृ°; K$_3$ D$_1$ T$_2$ G$_3$ अतिसृ°; K$_4$ अनुशि° (for अनिसृ°). B$_1$ [S]पि; G [S]ति- (for sसि). — [d]) G$_1$ अतंद्रित (for अनिन्दित). — [f]) K$_3$ तु त्वया; G$_4$ तद्विधा (for तत्त्वया). G$_3$ अर्थयुक्तं त्वया कृतं.

8 K$_3$ om. from 8[a] up to धर्मो. — [a]) Ś$_1$ K$_{1.\,2}$ तेन; T$_1$ G$_1$ M ततः (for तव). B$_3$ D$_{3.\,5}$ तौ वृद्धौ (by transp.). — [b]) B D (except D$_{1-3}$) G$_3$ [अं]धीभूतौ; T G$_{1.\,2.\,4}$ [अं]धौ स्यातां (for [अ]न्धौ जातौ). — [d]) Ś$_1$ K$_{1.\,2}$ स (for मा). K$_4$ D$_{2.\,3}$ ते; B Dc Dn D$_{1.\,4-6}$ T$_3$ G$_3$ M$_3$ त्वां (for त्वा). B$_{1.\,3.\,4}$ [S]भ्य°; G$_4$ [S]ति° (for sत्य°). B$_3$ Dn$_{1.\,n3}$ D$_{4.\,6}$ G$_3$ अयं (for महान्).

9 T$_3$ om. 9[a]–10[b]. — [a]) Ś$_1$ K D$_{1-3}$ कृतात्मा (for महा°). — [b]) K$_1$ धर्मी (for धर्मे). D$_5$ धर्मो वै चरितः सदा. — [d]) K$_3$ संप्रदाय च; G$_1$ संप्रपूजय (for °सादय). — After 9, S (except G$_3$; T$_3$ om.) ins.:

C. 3. 14040
B. 3. 215. 11
K. 3. 218. 12

ब्राह्मण उवाच ।

यदेतदुक्तं भवता सर्वं सत्यमसंशयम् ।
प्रीतोऽस्मि तव धर्मज्ञ साध्वाचारगुणान्वित ॥ ११

व्याध उवाच ।

दैवतप्रतिमो हि त्वं यस्त्वं धर्ममनुव्रतः ।
पुराणं शाश्वतं दिव्यं दुष्प्रापमकृतात्मभिः ॥ १२
अतन्द्रितः कुरु क्षिप्रं मातापित्रोर्हि पूजनम् ।
अतः परमहं धर्मं नान्यं पश्यामि कंचन ॥ १३

ब्राह्मण उवाच ।

इहाहमागतो दिष्ट्या दिष्ट्या मे संगतं त्वया ।
ईदृशा दुर्लभा लोके नरा धर्मप्रदर्शकाः ॥ १४
एको नरसहस्रेषु धर्मविद्विद्यते न वा ।
प्रीतोऽस्मि तव सत्येन भद्रं ते पुरुषोत्तम ॥ १५
पतमानो हि नरके भवताऽस्मि समुद्धृतः ।
भवितव्यमथैवं च यदृष्टोऽसि मयानघ ॥ १६
राजा ययातिर्दौहित्रैः पतितस्तारितो यथा ।
सद्भिः पुरुषशार्दूल तथाहं भवता त्विह ॥ १७
मातापितृभ्यां शुश्रूषां करिष्ये वचनात्तव ।
नाकृतात्मा वेदयति धर्माधर्मविनिश्चयम् ॥ १८
दुर्ज्ञेयः शाश्वतो धर्मः शूद्रयोनौ हि वर्तता ।
न त्वां शूद्रमहं मन्ये भवितव्यं हि कारणम् ।
येन कर्मविपाकेन प्राप्तेयं शूद्रता त्वया ॥ १९
एतदिच्छामि विज्ञातुं तत्त्वेन हि महामते ।
कामया ब्रूहि मे तथ्यं सर्वं त्वं प्रयतात्मवान् ॥ २०

1042* तौ प्रसाद्य द्विजश्रेष्ठ यच्छ्रेयस्तदवाप्स्यसि ।

10 T₂ om. 10^{ab} (cf. v.l. 9). — [a]) K₁. ₂. ₄ Dc Dn₃ D₂. ₃. ₅ च मे; K₃ D₁ वचो; G₂. ₄ तथा (for मम). Ś₁ श्रद्धस्व चैव मे ब्रह्मन्; B₂ श्रद्धस्व मे वचो ब्र॰. — [b]) D₁ नान्यस्त्वं (for °था). — Ś₁ K₁. ₂ om. 10^{cd}. — [c]) T G₁. ₂. ₄ इति (for अद्य). — [d]) D₅ तु (for ते).

11 [b]) K₃ सत्यमेतद् (for सर्वं सत्यम्). K₃ B₃ T₂ M₂ न संशयः (for असंशयम्). — [c]) B Dn₁. n₂ D₄. ₆ G₃ भद्रं ते (for धर्मज्ञ). — [d]) B Dn₁. n₂ D₄. ₆ G₃ धर्माचार॰ (for साध्वाचार॰). Ś₁ K₂. ₃ B₁. ₃ Dc D₃ °गुणान्वितः; D₄. ₆ G₃ °गुणान्वितं; T G₁. ₂ M °समन्वित; G₄ °समन्वितः.

12 [a]) B₃ T₂ दैवता॰ (for दैवत॰). Ś₁ K Dc Dn₃ D₁–₃. ₅ [s]सि (for हि). — [b]) B₁ यस्त्वं; S (except T₂ G₃) यस्मात् (for यस्त्वं). — [d]) B₂. ₄ Dn₂ G₃ दुष्प्राप्यम्. — After 12, K₂ B D (except D₁–₃. ₅) S ins.:

1043* मातापित्रोः सकाशं हि गत्वा त्वं द्विजसत्तम ।

[Before the above, T G₁. ₂. ₄ ins. व्याधः.]

13 [b]) D₂ तु (for हि). — [c]) K₄ ततः (for अतः). G₂ महद् (for अहं). K₃. ₄ Dc Dn₃ D₁–₃. ₅ ब्रह्मन् (for धर्मं). — [d]) K₄ Dc Dn₃ D₁–₃ नान्यत्; T₂ नानु॰ (for नान्यं). G₁ वक्ष्यामि (for पश्यामि). K₁. ₂. ₄ B₁–₃ Dc Dn₃ D₁–₃ G₁. ₂ M₂ किंचन (for कं॰). — After 13, Ś₁ K₁. ₂ ins. an addl. colophon.

14 [a]) B₃ दिव्य (for दिष्ट्या). — [b]) M₂ संशयं (for संगमं). K₃ च तत् (for त्वया). T₂ मे समं संगतिस्त्वया. — [c]) Ś₁ K₁. ₂ त्वादृशा (for ईदृशा).

15 [a]) Dn₁. n₂ D₄. ₆ G₁. ₃ नरः (for नर॰). — [b]) G₂. ₄ धर्मवान् (for °विद्). D₅ वर्तते (for विद्यते). G₄ [s]नघ (for न वा). — G₄ om. (hapl.) 15^c–16^d. — [c]) B₁–₃ Dc₂ Dn₃ D₄ G₃ सत्येन (for सत्येन). — [d]) Ś₁ K₁. ₂ B Dn D₂. ₄. ₆ G₃ पुरुषर्षभ (for °षोत्तम).

16 G₄ om. 16 (cf. v.l. 15). — [a]) K₄ D₁–₃ G वर्तं॰ (for पत॰). Ś₁ K₁. ₂ [s]स्मि; B Dn D₄. ₆ G₃ [s]द्य (for हि). — [b]) Ś₁ K₁. ₂ हि (for [अ]स्मि). — [c]) K₄ D₁. ₂ अथैतच्च; Dc Dn₃ अथैकं च; G₂ तथैव त्वं (for अथैवं च).

17 [a]) D₃ ययातिराजा दौ॰. — [b]) B₃ तारितः पतितो यथा. — [d]) Ś₁ K₁. ₂ तारितस्; D₁ T₂ भविता (for भवता). Ś₁ K₁. ₂ त्वया; B₁. ₃ Dn₁. n₂ D₄ G₃ द्विजः (for त्विह).

18 [b]) S (except G₃) करोमि (for करिष्ये). — After 18, D₁ reads 20^c, omitting it in its proper place.

19 [b]) B₄ Dn₁. n₂ D₁. ₃. ₅ T₂ हि वर्तते; D₄ T₁ G₁ M₂ हि वर्ततां; G₄ प्रवर्ततः. — [c]) Ś₁ K₁. ₂ G₂. ₄ M₂ त्वा (for त्वां). — [d]) K₃ भविता ब्रूहि कारणं. — [e]) Ś₁ K₁. ₄ D₂ केन (for येन). Ś₁ T₁ धर्म॰; G₄ [अ]धर्म॰ (for कर्म॰). B₁. ₃ Dn₁. n₂ D₄. ₆ T₁ G₃. ₄ M °विशेषेण (for °विपाकेन). — [f]) T₂ G₂. ₄ तव (for त्वया). T₁ M₁ तव धर्मभृतां वर; G₁ संवृत्ता तव शूद्रता.

20 [a]) D₄ यत्तद्; G₁. ₃. ₄ M एतां (for एतद्). M₂ त्विच्छामि. G₁ transp. इच्छामि and विज्ञातुं. Ś₁ K Dc Dn₃ D₁–₃. ₅ [अ]हं श्रोतुं (for विज्ञातुं). — [b]) Ś₁ K Dc Dn₃ D₁–₃. ₅ [इ]ह (for हि). Dc Dn₃ °द्युते (for °मते).

व्याध उवाच ।
अनतिक्रमणीया हि ब्राह्मणा वै द्विजोत्तम ।
शृणु सर्वमिदं वृत्तं पूर्वदेहे ममानघ ॥ २१
अहं हि ब्राह्मणः पूर्वमासं द्विजवरात्मज ।
वेदाध्यायी सुकुशलो वेदाङ्गानां च पारगः ।
आत्मदोषकृतैर्ब्रह्मन्नवस्थां प्राप्तवानिमाम् ॥ २२
कश्चिद्राजा मम सखा धनुर्वेदपरायणः ।
संसर्गाद्धनुषि श्रेष्ठस्ततोऽहमभवं द्विज ॥ २३
एतस्मिन्नेव काले तु मृगयां निर्गतो नृपः ।
सहितो योधमुख्यैश्च मन्त्रिभिश्च सुसंवृतः ।
ततोऽभ्यहन्मृगांस्तत्र सुबहूनाश्रमं प्रति ॥ २४
अथ क्षिप्तः शरो घोरो मयापि द्विजसत्तम ।
ताडितश्च मुनिस्तेन शरेणानतपर्वणा ॥ २५
भूमौ निपतितो ब्रह्मन्नुवाच प्रतिनादयन् ।
नापराध्याम्यहं किंचित्केन पापमिदं कृतम् ॥ २६
मन्वानस्तं मृगं चाहं संप्राप्तः सहसा मुनिम् ।
अपश्यं तमृषिं विद्धं शरेणानतपर्वणा ।
तमुग्रतपसं विप्रं निष्टनन्तं महीतले ॥ २७
अकार्यकरणाच्चापि भृशं मे व्यथितं मनः ।
अजानता कृतमिदं मयेत्यथ तमब्रुवम् ।

C. 3. 1106o
B 3. 215. 30
K. 3. 218. 29

S (except G3) तत्त्वेन तत्र शूद्रतां. — D1 reads 20c after 18. — c) Ś1 K1 Dc Dn3 D1. 5 काम्यया ब्रूहि; D3 कामं प्रब्रूहि. B Dn1. n2 D4. 6 G3 सर्वं; M सत्यं (for तथ्यं). T G1. 2. 4 कामयानस्य मे शंस (T1 G1 ब्रूहि). — d) B Dn1. n2 D4. 6 G3 सत्येन (for सर्वं त्वं). Ś1 संशयात्मवान्; K1 2 संयता°; Dn1. n2 D4 G3 प्रयतात्मना; D1 नियतात्मवान्.

21 a) B3 °क्रमशीला. B1. 3. 4 Dn1. n2 D4. 6 T1 G3 वै (for हि). — b) B Dn2 D4. 6 G3 मे (for वै). — c) S (except G3) यथा- (for इदं). B3 वाक्यं; Dc Dn3 सत्यं (for वृत्तं). — d) Dc D6 T1 मया (for मम).

22 b) Ś1 K1. 3. 4 Dc Dn3 D1–3. 5 G2. 4 द्विजवरोत्तम (G2 °मः); K2 वरद्विजोत्तमः; B3 द्विज परात्मक; B4 Dn1 T1 °वरात्मजः. — c) K1 मुक्तशलो; K2 D1 सकुशलो; M2 कुशलवो (for सुकु°). — d) Ś1 K1–3 B2 Dc Dn3 D5 M2 वेदवेदांगपारगः. — e) Ś1 K1. 2 °दोषैः कृतैर्; K3. 4 B3. 4 D1. 2. 5 M °दोषकृते; D3 °दोषकृतां. — f) K2 B1. 3. 4 Dc1 Dn1. n2 D4. 6 G3 अवस्थामाप्त°.

23 b) S (except G3 M1) °परोभवत् (for °परायणः). — d) G2. 4 transp. अहं and अभवं.

24 b) Ś1 K1–3 B2 D4 T M2 मृगयानिर्गतो. — c) T2 नृप°; G1 M यौध° (for योध°). — d) B3 चैव सं°; T1 G1 चाभिसं° (for च सुसं°). — e) D5 न्यहन्; T1 ह्यघ्न; T2 G1. 2. 4 M [S]भ्यघ्नन् (for S्यहन्). — f) G1 स (for सु-). Ś1 T2 आश्रमान्प्रति; G1 राजसत्तमः.

25 a) B2 D1 अथाक्षिप्तः; M2 ततः क्षिप्तः. D3 अतिक्षिप्ताः शरा घोराः. — After 25ab, D3 (marg. sec. m.) ins.:

1044* ततो मृगान्वराहांश्च महिषांश्च महीपतिः ।
जघान पुरुषव्याघ्रः स राजा ब्राह्मणोत्तम ।
ततोऽहमपि क्रीडार्थं राज्ञः प्रियहिते रतः ।
वराञ्जिघ्नन्वराहांश्च शरैः संनतपर्वभिः ।
वनदुर्गेषु धर्मज्ञ समं राज्ञा महात्मना । [5]
व्यचरं धनुरादाय मृगहा लुब्धको यथा ।
तत्राश्रमसमभ्याशे मया धर्मविदां वर ।
मृगस्य वज्रसंकाशः शरः क्षिप्तस्तदा द्विज ।

— c) Ś1 K1. 2 तु (for च). B1–3 Dn1. n2 D4. 6 G3 ऋषिं (for मुनिं). — d) = 27d. K1. 3 D1–3. 5 S (except G3) नतं° (for [आ]नत°).

26 b) K4 प्रतिवादयन्; M1 [अ]भिनिनाद°. — c) T1 नापराधा°. D1. 2. 5 M1 कंचित्.

27 b) K1. 4 M1 संप्राप्तं. B1. 3 Dn2 D4. 6 G3 प्रभो; Dn1 विभो; Dn3 मुनेः (for मुनिम्). — c) Ś1 K B3 Dc Dn3 D1–3. 5 अहं (for ऋषिं). D1 विद्धन् (for विद्धं). — d) = 25d. S (except G1. 3) नतं° (for [आ]नत°). Ś1 K Dc Dn3 D1–3. 5 शरेण निशितेन वै. — B2 om 27ef. B1. 3 Dn1. n2 D4. 6 G3 transp. 27ef and 28ab. — e) Ś1 K1. 2. 4 D1–3 वृद्धं; K3 B4 Dc Dn3 विद्धं; T2 G1. 2 दीप्तं (for विप्रं). — f) Ś1 K1. 2 D1 विचेष्टतं; K4 Dn3 D2 तिष्ठतं तं (D2 तु); B1 D3 निश्चसंतं; D6 T1 निपतंतं; T2 G1. 2. 4 वेष्टमानं (for निष्टनन्तं).

28 B1. 3 Dn1. n2 D4. 6 G3 transp. 27ef and 28ab. — a) Dc2 Dn2 M1 °कारणाच्चापि; G4 °कारिणश्चापि. T1 चैव (for चापि). — b) B3 प्र- (for मे). — d) Dc Dn3 मयात्यर्थं; Dn2 उपेत्याहम् (for मयेत्यथ). B1 [ए]वम्; B2. 3 Dn1 D4–6 G3 [अ]हम् (for [अ]थ). B1–3 Dn1. n2 D4–6 G3 अथ (for तम्). M1 अकार्यं च मयाद्य वै. — e) Ś1 K1. 2 विप्र; B1. 3 Dn1. n2 D4. 6 G3 सर्वम् (for ब्रह्मन्).

C. 3. 14061
B. 3. 215. 30
K. 3. 218. 30

क्षन्तुमर्हसि मे ब्रह्मन्निति चोक्तो मया मुनिः ॥ २८
ततः प्रत्यब्रवीद्वाक्यमृषिर्मां क्रोधमूर्छितः ।
व्याधस्त्वं भविता क्रूर शूद्रयोनाविति द्विज ॥ २९

इति श्रीमहाभारते आरण्यकपर्वणि पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

२०६

व्याध उवाच ।
एवं शप्तोऽहमृषिणा तदा द्विजवरोत्तम ।
अभिप्रसादयमृषिं गिरा वाक्यविशारदम् ॥ १
अजानता मयाकार्यमिदमद्य कृतं मुने ।
क्षन्तुमर्हसि तत्सर्वं प्रसीद भगवन्निति ॥ २

ऋषिरुवाच ।
नान्यथा भविता शाप एवमेतदसंशयम् ।
आनृशंस्यादहं किंचित्कर्तानुग्रहमद्य ते ॥ ३
शूद्रयोनौ वर्तमानो धर्मज्ञो भविता ह्यसि ।
मातापित्रोश्च शुश्रूषां करिष्यसि न संशयः ॥ ४
तया शुश्रूषया सिद्धिं महतीं समवाप्स्यसि ।
जातिस्मरश्च भविता स्वर्गं चैव गमिष्यसि ।
शापक्षयान्ते निर्वृत्ते भवितासि पुनर्द्विजः ॥ ५

व्याध उवाच ।
एवं शप्तः पुरा तेन ऋषिणास्म्युग्रतेजसा ।
प्रसादश्च कृतस्तेन ममैवं द्विपदां वर ॥ ६

— *f*) K4 प्रोक्तो (for चो°). G1 महामुनिः.

29 *a*) G1 स ततः प्रब्रवीद्वाक्यम्. — *b*) Ś1 K1. 2 मुनि° (for ऋषि°). — *c*) Ś1 K1. 2 B2 D1–3 T2 M1 क्रूरः. — *d*) K2 Dn1 T2 G1. 2. 4 [इ]ति द्विजः; K3 द्विजाधम (for [इ]ति द्विज).

Colophon om. in Ś1 K1–3 D5. — *Major parvan:* T2 G3. 4 आरण्य. — *Sub-parvan:* G1 मार्कंडेयसमस्या. N (Ś1 K1–3 D5 om.) G3 M3 (all om. sub-parvan name) mention only पतिव्रतोपाख्यान. — *Adhy. name:* G1 धर्मव्याधकौशिकसंवादः. — *Adhy. no.* (figures, words or both): Dn1 214; Dn3 D1 213; T G1 M (M3 *inf. lin.*) 208; G3. 4 M3 (orig.) 210. — *Śloka no.:* Dn1. n2 31; D1 32.

206

1 *a*) K3 Dc3 हि ऋषिणा; T3 महर्षिणा (for ऽहमृषिणा). — *b*) Ś1 K1. 2 ततो; D3 तथा (for तदा). B4 S (except G3. 4) द्विजवरात्मज. — *c*) Dc अतिप्र°; Dn3 अत्यप्र°; D1 M3 अभ्यप्र°; T1 G3 अथ प्र°; T3 G3. 4 अहं प्र° (for अभिप्र°). — *d*) Ś1 K1. 2 वाचा (for गिरा). Ś1 K1. 4 B4 Dc D1–3 G4 °रदः; K2. 3 D3 °रद (for °रदम्). B1–3 Dn D4. 5 G3 गिरा त्राहीति मां तदा.

2 *a*) S (except G3) कृतमिदम् (for मयाकार्यम्). — *b*) Ś1 K1. 2 कृतम् (for इदम्). Ś1 मया; K1. 2 महा (for कृतं). B4 पुनः (for मुने). S (except G3) अकार्यं तु मयाद्य वै. — *c*) Ś1 K Dc Dn3 D1–3. 5 [अ]तस्तन्मे; B4 S (except G3) मे ब्रह्मन् (for तत्सर्वं). — *d*) K4 D3. 5 इह (for इति).

3 *b*) To avoid hiatus, G3. 4 ह्येवम् (for एवम्). T1 G4 M3 न संशयः (for असंशयम्). — *c*) B2–4 Dn1. n3 D4. 5 त्वहं (for अहं). Ś1 K1. 2 B3 D1. 5 M1 कंचित्; B3 ब्रूयात् (for किं°). — *d*) Ś1 K1–3 D5 दाता (for कर्ता). Ś1 K Dc Dn3 D1–3. 5 एव (for अद्य). B4 T G1. 3. 4 वै (for ते).

4 *a*) N (except Ś1 K1. 2 B3 D1) G3 °योन्यां (for (for °योनौ). — *b*) Ś1 K Dc Dn3 D1–3. 5 भवितासि वै; B1–3 Dn1. n3 D4. 5 G3 हि भविष्यसि (for भविता ह्यसि) — *c*) B3 हि (for च).

5 *a*) G1 तथा; G3. 4 M1 तयोः (for तया). — *b*) Dn1. n3 G3 महत्वं (for °तीं). B1. 3 त्वमवाप्स्यसि; B3 त्वं गमिष्यसि; D4. 5 त्वं समाप्स्यसि (for समवा°). — After 5*cd*, S (except G3) ins.:

1045* भूत्वा च धार्मिको व्याधः पित्रोः शुश्रूषणे रतः ।

— *e*) Ś1 K3 Dc Dn3 D1. 3. 5 T3 G3 °क्षयेथ; K1. 2 4 D3

शरं चोद्धृतवानस्मि तस्य वै द्विजसत्तम ।
आश्रमं च मया नीतो न च प्राणैर्व्ययुज्यत ॥ ७
एतत्ते सर्वमाख्यातं यथा मम पुराभवत् ।
अभितश्चापि गन्तव्यं मया स्वर्गं द्विजोत्तम ॥ ८

ब्राह्मण उवाच ।

एवमेतानि पुरुषा दुःखानि च सुखानि च ।
प्राप्नुवन्ति महाबुद्धे नोत्कण्ठां कर्तुमर्हसि ।
दुष्करं हि कृतं तात जानता जातिमात्मनः ॥ ९
कर्मदोषश्च वै विद्वन्नात्मजातिकृतेन वै ।
कंचित्कालं मृष्यतां वै ततोऽसि भविता द्विजः ।
सांप्रतं च मतो मेऽसि ब्राह्मणो नात्र संशयः ॥ १०
ब्राह्मणः पतनीयेषु वर्तमानो विकर्मसु ।
दाम्भिको दुष्कृतप्रायः शूद्रेण सदृशो भवेत् ॥ ११
यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः ।
तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्द्विजः ॥ १२
कर्मदोषेण विषमां गतिमाप्नोति दारुणाम् ।
क्षीणदोषमहं मन्ये चामितस्त्वां नरोत्तम ॥ १३
कर्तुमर्हसि नोत्कण्ठां त्वद्विधा ह्यविषादिनः ।
लोकवृत्तान्तवृत्तज्ञा नित्यं धर्मपरायणाः ॥ १४

व्याध उवाच ।

प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञानसामर्थ्यं न बालैः समतां व्रजेत् ॥ १५

C. 3. 14079
B. 3. 216. 17
K. 3. 219. 18

'क्षये च; Dn1. n2 D4. 6 G3 'क्षये तु (for 'क्षयान्ते). — f) B1. 3 भविष्यसि; D2 भविता च (for 'तासि). — After 5, B3 ins. an addl. colophon.

6 All MSS. except B3 om. व्याध उ'. — b) T G1. 2. 4 द्विजेन; M मुनिना (for ऋषिणा). K2 [अ]भ्युग्र'; B1. 4 D2 [अ]भ्युग्र'; T2 स्वभ्र'; G3. 4 [आ]दित्य' (for [अ]भ्युग्र'). — d) Ś1 K1–3 T2 ममैष; B2. 4 Dc1 D2 T1 G2. 3 'च (for 'वं). B1. 3 S (except G3) वदतां (for द्विपदां). K2 D4 वरः.

7 b) G4 वै (for [ए]व). G1 शरं चैव द्विजोत्तम. — Ś1 K1 (which om. 7c–8d) ins. an addl. colophon after 7ab. — d) T1 G1 मम (for न च). K2 वियुज्यतः; K3 व्यजह्यत; K4 D1 T1 वियुज्यते; B1 D5 व्यमुच्य (B1m 'ह्य)-त. Dc न प्राणैर्व्यवयुज्यत.

8 Ś1 K1 om. 8 (cf. v.l. 7). — b) B4 पुरातनं (for पुराभवत्). — c) K3 अमितं ह्यपि; T1 अहितेनापि; T2 G4 अहितश्चापि. K4 D2. 3 S (except G3) गंतव्यो. — d) K3. 4 D2. 3 S (except G3) मया (K3. 4 D2. 3 यथा) स्वर्गो; D1 यथा स्वर्गं. K4 न संशयः (for द्विजो'). — After 8, K2 ins. an addl. colophon.

9 b) B3 धर्माणि (for दुःखानि). — c) B4 Dn1. n2 D4. 6 G3 आप्नु' (for प्राप्नु'). K4 यथाबुद्धेः; G4 महायुद्धे. — d) Ś1 गंतुम् (for कर्तुम्). — T2 om. 9f–10e. — e) K2. 3 Dc2 T1 G1. 2 M दुष्कृतं; B3 दुष्टत्वं (for दुष्करं). B D (except D1–3. 5) G3 कर्म (for तात). — f) G1 गंता जानाति यन्मम. — After 9, B (B1 marg.) D (except D1. 5) G3 ins.:

1016* लोकवृत्तान्ततत्त्वज्ञ नित्यं धर्मपरायण ।
[Cf. 14cd. Dc Dn3 'धर्मज्ञ (for' तत्त्वज्ञ). Dc2 D2. 6' परायणः.]

10 T2 om. 10abcde (cf. v.l. 9). — a) Ś1 M कर्मदोषैश्च; Dc2 धर्मदोषश्च; D2. 3 कर्मदोषेण; G2. 4 'दोषाच्च. Ś1 K B2 D1–3. 5 ब्रह्मन् (for विद्वन्). — b) M2 नाम्ना (for आत्म-). Ś1 K1. 2 -कृतानि च (for -कृतेन वै). Dc Dn3 D5 ते (for वै). — c) K3 क्वचित्कालं; B4 Dc2 D2. 3. 6 किंचित्कालं; G1 M कश्चित्कालो. K2 ऋषे तात; K3 D5 उपेतं वै; B1 Dn1. n2 D4. 6 G2–4 उष्यतां वै. Ś1 ते; K1 च; K4 हि (for वै). — d) Ś1 गोत्रो' (for ततो'). K3 D2. 5 द्विज. — e) Ś1 K3 D5 त्वं; K1 न; K4 हि (for च).

11 c) Some S MSS. डांभिको. K3 दुष्कृतः पापः; B1 Dn1. n2 'तः प्राज्ञः.

12 ab) Ś1 K B4 Dc Dn3 D1. 3. 5 transp. सत्ये and धर्मे. Ś1 K1. 2 समवस्थितः (for सततो'). — c) G2. 4 अहं ब्राह्मणं (by transp.). — d) Ś1 वृत्तिर्न; K1. 2 जात्या न (for वृत्तेन). B4 च (for हि). S (except G3) भविता (for हि भवेद्).

13 a) T2 धर्म' (for कर्म'). — b) D2. 5 S (except T2 G3) प्राप्नोति (for आप्नोति). — d) G1 चादित'; G4 चाहित' (for 'भित'). Dc Dn3 G1 त्वं (for त्वां).

14 b) B1 चा' (for ह्य'). T1 'जातिनः (for 'षादिनः). — c) Ś1 K B4 D1–3. 5 G2 'वृत्तांततत्त्वज्ञा; B1–3 Dc Dn D4. 6 G3 'वृत्तानुवृत्तज्ञा; T1 G4 'वृत्तांतवृत्तज्ञो; G1 'वृत्तांतविज्ञानी. — d) K1. 2 Dn2 नित्य'. T1 G1. 4 'परायणः.

15 Ś1 K1. 3. 4 D1–3. 5 T G1 om. the ref. — d) Dc Dn3 चान्यैः; D2 बाल'; T1 बालः (for बालैः). T1

C. 3. 14080
B. 3. 216. 18
K. 3. 219. 19

अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च ।
मानुषा मानसैर्दुःखैर्युज्यन्ते *अल्पबुद्धयः ॥ १६
गुणैर्भूतानि युज्यन्ते वियुज्यन्ते तथैव च ।
सर्वाणि नैतदेकस्य शोकस्थानं हि विद्यते ॥ १७
अनिष्टेनान्वितं पश्यंस्तथा क्षिप्रं विरज्यते ।
ततश्च प्रतिकुर्वन्ति यदि पश्यन्त्युपक्रमम् ।
शोचतो न भवेत्किंचित्केवलं परितप्यते ॥ १८
परित्यजन्ति ये दुःखं सुखं वाप्युभयं नराः ।
त एव सुखमेधन्ते ज्ञानतृप्ता मनीषिणः ॥ १९
असंतोषपरा मूढाः संतोषं यान्ति पण्डिताः ।
असंतोषस्य नास्त्यन्तस्तुष्टिस्तु परमं सुखम् ।
न शोचन्ति गताध्वानः पश्यन्तः परमां गतिम् ॥ २०

न विषादे मनः कार्यं विषादो विषमुत्तमम् ।
मारयत्यकृतप्रज्ञं बालं क्रुद्ध इवोरगः ॥ २१
यं विषादोऽभिभवति विषमे समुपस्थिते ।
तेजसा तस्य हीनस्य पुरुषार्थो न विद्यते ॥ २२
अवश्यं क्रियमाणस्य कर्मणो दृश्यते फलम् ।
न हि निर्वेदमागम्य किंचित्प्राप्नोति शोभनम् ॥ २३
अथाप्युपायं पश्येत दुःखस्य परिमोक्षणे ।
अशोचन्नारभेतैव युक्तश्चाव्यसनी भवेत् ॥ २४
भूतेष्वभावं संचिन्त्य ये तु बुद्धेः परं गताः ।
न शोचन्ति कृतप्रज्ञाः पश्यन्तः परमां गतिम् ॥ २५
न शोचामि च वै विद्वन्कालाकाङ्क्षी स्थितोऽस्म्यहम् ।
एतैर्निदर्शनैर्ब्रह्मन्नावसीदामि सत्तम ॥ २६

सततं (for समतां). B Dn1. n2 D4. 6 G2 इयात् (for व्रजेत्).

16 c) N (except Ś1 K1. 2) G1. 2 मनुष्या (for मानुषा). B1. 2 T1 मानुषैः (for मानसैः). — d) Dc Dn2 मुह्यंते (for युज्यन्ते). To avoid hiatus, Ś1 K1. 2. 4 Dc Dn2 D1–2 येल्प°; K2 D5 ह्यल्प°; B Dn1. n2 D4. 6 G2 चाल्प°; T1 G1. 2. 4 M स्वल्प°; T2 बह्व° (for *अल्प°).

17 M2 om. 17a–18b. — a) K1 गुणे; D1 गणैर् (for गुणैर्). — c) D1 सर्वेषां (for सर्वाणि). D1 चैतदे°; T2 G2 सर्वदै° (for नैतदे°). G4 एवास्य (for एकस्य). — d) Ś1 K1. 2 भविष्यति; K4 B1 D5 न विद्यते (for हि वि°).

18 M2 om. 18ab (cf. v.l. 17). — a) N (except Ś1 K2 D1–2) T2 G2 M1 अनिष्टं चान्वितं. T1 पुण्यं; M1 पश्य (for पश्यन्). — b) K2 विराजते; T2 G1 विमृज्य° (for विर°). — c) T2 °कर्वंति (for °कुर्वन्ति). — d) Ś1 K1. 2 D1 त(D1 थ)था कुर्वंति (for यदि पश्यन्ति). B1. 2 Dn1. n2 D4. 6 G2 [उ]पक्रमात् (D6 °न्); D2. 2 M2 [अ]नुक्रमं (for [उ]पक्रमम्). — Before 18e/f, Dc Dn2 ins. ब्राह्मण उ°! — e) Ś1 K2 Dn2 न शोचते; K1. 2. 4 B4 Dc D1–2. 5 G2 न शोचतो (by transp.); T G1. 2. 4 M शोकेन न. — T2 om. 18f–19a. — f) K1 प्रतितप्यते; D2 परितप्यसे.

19 T2 om. 19a (cf. v.l. 18). — a) Dc मे (for ये). — b) K2 वाप्युभये; B2 चाप्युभयं; T1 G1. 2. 4 M वानंतरं. — T1 G4 M om. 19cd; B1 reads it in marg. — c) T2 त एवं दुःखमेधंते.

20 K2 D5 read 20ef before 20ab. — c) T1 G1 [अं]तं (for [अ]न्तस्). — d) B2 तुष्टे° (for तुष्टि°). Ś1 K1. 2 हि; B2 च (for तु). — e) K2 T1 गताध्वानं; D2 (?gloss) ज्ञानवृद्धाः. — f) = 25d. K4 पश्यंते; D2 पश्यतः; T2 G1. 2 पश्यंति.

22 a) T1 यद् (for यं). B1 [s]ति-; Dn1 T1 G4 हि (for sभि-). — b) B Dn1. n2 D4. 6 G1. 2 विक्रमे; T1 दुःखे तु; M क्रमे तु (for विषमे).

23 a) K1 अवशं. — b) T1 विद्य° (for दृश्य°). — c) B1 आपन्नः; T1 आगत्य; M2 आपन्नं (for आगम्य).

24 a) D2. 2 यथा (for अथ). Ś1 K Dc D1–2. 5 [अ]भ्यु° (for [अ]प्यु°). — b) K2 दुःखेन परिमोच्यते. — c) Ś1 K1. 2. 4 °भेत्तं वै; B1 Dn1 G2 °भेतैवं; B2. 4 D5 °भेचैव (B2 °वं); Dn2 °भेतैनं (for °भेतैव). — d) B D (except D1–2. 6) T1 G2 M मुक्त° (for युक्त°).

25 a) B2 Dc2 Dn2 D2 T1 भूतेषु भावं (Dn2 m भूते स्वभावं); G1 भूतेष्टभावं. — 25d = 20f.

26 M1 om. 26–27. Before 26, Ś1 K Dc Dn2 D1–2. 5 T G1 M2 ins. व्याध उ° (resp. व्याधः). — a) K2. 4 D2. 2. 5 T1 G1. 2 M2 रमे; B1 T2 G4 न मे (for च वै). B4 विप्र (for विद्वन्). Ś1 K1 न च शोच्याम्यहं (K1 °मि वै) विद्वन्. — b) K1 D2 T G1. 2. 4 कालकांक्षी. Ś1 K1. 2 T G1. 2. 4 [अ]स्मि (for हि). — d) B4 Dc D2. 4 om. न. T1 न सीदामि द्विजोत्तम.

27 M1 om. 27 (cf. v.l. 26). — a) Ś1 K1. 2 कृत-प्रज्ञस्य; K4 Dc Dn2 D2. 2 °प्रज्ञश्च. Ś1 T मेधाविन्. — b) B1. 2 Dn1. n2 हि (for च). — c) K2 जानामि (for

ब्राह्मण उवाच ।

कृतप्रज्ञोऽसि मेधावी बुद्धिश्च विपुला तव ।
नाहं भवन्तं शोचामि ज्ञानतृप्तोऽसि धर्मवित् ॥ २७
आपृच्छे त्वां स्वस्ति तेऽस्तु धर्मस्त्वा परिरक्षतु ।
अप्रमादस्तु कर्तव्यो धर्मे धर्मभृतां वर ॥ २८

मार्कण्डेय उवाच ।

बाढमित्येव तं व्याधः कृताञ्जलिरुवाच ह ।
प्रदक्षिणमथो कृत्वा प्रस्थितो द्विजसत्तमः ॥ २९
स तु गत्वा द्विजः सर्वां शुश्रूषां कृतवांस्तदा ।
मातापितृभ्यां वृद्धाभ्यां यथान्यायं सुसंशितः ॥ ३०
एतत्ते सर्वमाख्यातं निखिलेन युधिष्ठिर ।
पृष्टवानसि यं तात धर्मं धर्मभृतां वर ॥ ३१
पतिव्रताया माहात्म्यं ब्राह्मणस्य च सत्तम ।
मातापित्रोश्च शुश्रूषा व्याधे धर्मश्च कीर्तितः ॥ ३२

युधिष्ठिर उवाच ।

अत्यद्भुतमिदं ब्रह्मन्धर्माख्यानमनुत्तमम् ।
सर्वधर्मभृतां श्रेष्ठ कथितं द्विजसत्तम ॥ ३३
सुखश्रव्यतया विद्वन्मुहूर्तमिव मे गतम् ।
न हि तृप्तोऽस्मि भगवञ्शृण्वानो धर्ममुत्तमम् ॥ ३४

C. 3. 14099
B. 3. 216. 37
K. 3. 219. 38

इति श्रीमहाभारते आरण्यकपर्वणि षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

शोचामि). T_2 G_1. 2. 4 M_3 पापान्निवृत्तश्च सदा. — [d]) K_3 ज्ञानतुष्टो˚; B_3 ˚दृष्टो˚; T_3 G_3. 4 ˚वृद्धो˚; G_1 अज्ञानात्तो˚. $Ś_1$ K_1. 4 D_2 धर्मतः (for ˚वित्).

28 [a]) $Ś_1$ आपृच्छेद्वा. K_1. 2 G_4 M त्वा (for त्वां). — [b]) B Dn D_1. 4. 6 G_1. 3 त्वां (for त्वा). $Ś_1$ K De D_{n3} D_{1-3}. 5 अभि˚ (for परि˚). — [c]) K_3m न प्रमाद˚. $Ś_1$ K_1. 2. 4 De D_{n3} D_{1-3} च (for तु).

29 [a]) K_3 D_1. 3 विप्रं (for व्याधः). — [b]) $Ś_1$ K B_4 D_{1-3}. 5 अभाषत (for उवाच ह). — [c]) M_1 तु तं (for अथो). K_4 D_3. 3 प्रदक्षिणीकृतस्तेन. — [d]) $Ś_1$ K_1. 3 प्रस्थितं. $Ś_1$ K_1. 3 D_4. 6 द्विजसत्तमं; K_3 D_1 ˚म.

30 [a]) K_3 D_2 सर्व˚; B_{1-3} De D_{n3} सर्वाः; D_3 तेषां; D_5 सर्वं (for सर्वां). G_1 गत्वा गृहं द्विजश्रेष्ठः. — [b]) B_3. 3 De D_{n3} शुश्रूषाः. D_1. 3. 5 सदा; G_1 तु सः (for तदा). — [c]) T G_3. 4 M_3 अंधाभ्यां; G_1 धर्माभ्यां; M_1 धर्मात्मा (for वृद्धा˚). — [d]) K_1 यथान्याय्यं. $Ś_1$ K_1. 3 महामतिः; K_3 D_{n1}. n_3 (after corr.) D_3. 6 सुशंसितः; K_4 B_3 D_{n3} D_3 सुसंयतः; B_4 G_1 (before corr.) ˚स्थितः; T ˚श्रितः; G_3 ˚हितः; M_1 समाहितः. D_1 सर्वैरप्यभिनंदितः.

31 G_1 om. 31–32. — [c]) $Ś_1$ K_{1-3} $B_{3.4}$ De D_{n3} D_{1-3}. 5 T $G_{3.4}$ यत् (for यं). B_1 तावद् (for तात). — [d]) M सर्व˚ (for धर्म). De D_4 वरः (for वर).

32 G_1 om. 32 (cf. v.l. 31). — [c]) T_1 ˚पितृभ्यां (for ˚पित्रोश्च). De D_{n3} तु (for च). — [d]) N G_3 धर्मव्याधेन ($B_{1.4}$ ˚धस्य) कीर्तिता.

33 [b]) T_3 धर्मज्ञानम् (for धर्माख्यानम्). $Ś_1$ K_1. 3 धर्मव्याधेन भार्गव; B_3 G_1 धर्ममाख्यानमुत्तमं. — [c]) B D (except D_{1-3}. 5) G_3 ˚विदां (for ˚भृतां). — [d]) K_3. 4 B D (except $D_{1.3}$) G_3 मुनिसत्तम; M ते द्विजोत्तम.

34 K_3 om. 31. — [a]) K_4 D_{n3} $D_{1.5}$ T $G_{1.3.4}$ M सुख(B₄ ˚खं)श्राव्यतया (T_3 ˚व्यं त्वया). $Ś_1$ $K_{1.3.4}$ $B_{1.2}$ De D_{1-3}. 5 G_1 ब्रह्मन्; B_4 विप्र (for विद्वन्). — [b]) B $D_{n1.n3}$ $D_{4.6}$ G_3 M मुहूर्तं इव मे गतः.

Colophon. — *Major parvan:* K_2 T_2 $G_{2.4}$ आरण्य. — *Sub-parvan:* G_1 मार्कंडेयसमस्या. N T_1 G_3 M (all om. sub-parvan name) mention only पतिव्रतो(D₅ धर्मव्याधो)पाख्यान; to it K B_4 D T_1 G_3 M add समाप्त. — *Adhy. name:* G_1 धर्मव्याधकौशिकसंवादः; G_2 कौशिकव्याधसंवादे पतिव्रतामाहात्म्यकथनं. — *Adhy. no.* (figures, words or both): D_{n1} 215; D_{n3} D_1 214; T G_1 M (M_3 *inf. lin.*) 209: $G_{3.4}$ M_3 (orig.) 211. — *Śloka no.:* $D_{n1.n3}$ 37; D_1 36.

☞ After adhy. 206, $K_{1.4}$ D_{1-3} ins. (with transposition) a passage given in App. I (No. 21), which is ins. in some other MSS. after adhy. 190 (q. v.).

207

1 M om. 1. — [b]) D_3 शुभां कथां (by transp.). — [d]) $Ś_1$ K D_{1-3}. 5 G_3 यशस्विनं; B_{1-3} $D_{n1.n3}$ $D_{4.6}$ इदं तदा (for तपस्विनम्).

२०७

C 3. 14100
B. 3. 217. 1
K. 3. 220. 1

वैशंपायन उवाच ।

श्रुत्वेमां धर्मसंयुक्तां धर्मराजः कथां शुभाम् ।
पुनः पप्रच्छ तमृषिं मार्कण्डेयं तपस्विनम् ॥ १

युधिष्ठिर उवाच ।

कथमग्निर्वनं यातः कथं चाप्यङ्गिराः पुरा ।
नष्टेऽग्नौ हव्यमवहदग्निर्भूत्वा महानृषिः ॥ २
अग्नियदा त्वेक एव बहुत्वं चास्य कर्मसु ।
दृश्यते भगवन्सर्वमेतदिच्छामि वेदितुम् ॥ ३
कुमारश्च यथोत्पन्नो यथा चाग्नेः सुतोऽभवत् ।
यथा रुद्राच्च संभूतो गङ्गायां कृत्तिकासु च ॥ ४
एतदिच्छाम्यहं त्वत्तः श्रोतुं भार्गवनन्दन ।
कौतूहलसमाविष्टो यथातथ्यं महामुने ॥ ५

मार्कण्डेय उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा क्रुद्धो हुतवहस्तपस्तप्तुं वनं गतः ॥ ६
यथा च भगवानग्निः स्वयमेवाङ्गिराभवत् ।
संतापयन्स्वप्रभया नाशयंस्तिमिराणि च ॥ ७
आश्रमस्थो महाभागो हव्यवाहं विशेषयन् ।
तथा स भूत्वा तु तदा जगत्सर्वं प्रकाशयन् ॥ ८
तपश्चरंश्च हुतभुक्संतप्तस्तस्य तेजसा ।
भृशं ग्लानश्च तेजस्वी न स किंचित्प्रजज्ञिवान् ॥ ९
अथ संचिन्तयामास भगवान्हव्यवाहनः ।
अन्योऽग्निरिह लोकानां ब्रह्मणा संप्रवर्तितः ।
अग्नित्वं विप्रनष्टं हि तप्यमानस्य मे तपः ॥ १०
कथमग्निः पुनरहं भवेयमिति चिन्त्य सः ।
अपश्यदग्निवल्लोकांस्तापयन्तं महामुनिम् ॥ ११
सोपासर्पच्छनैर्भीतस्तमुवाच तदाङ्गिराः ।
शीघ्रमेव भवस्वाग्निस्त्वं पुनर्लोकभावनः ।

---

2 b) Śi Ka om. च. Ks De Ds G1 वा° (for चा°). Śi तथा (for पुरा). — d) B1–3 Dn1. n2 D4. 6 G3 °द्युतिः; B4 T G1. 2. 4 M °मुनिः (for °नृषिः).

3 a) S (except T1 G3) यथा (for यदा). B4 G1 एक; T2 G2. 4 M चैक (for त्वेक). T1 अग्नियदा हि चैवैको. — c) G4 त्वत्त (for सर्वम्).

4 b) D2 वा° (for चा°). — c) D2 तथा (for यथा). — d) De कृत्तिकासुतः (for °सु च).

5 ab) Śi K De Dn3 D1–3. 5 transp. त्वत्तः and श्रोतुं. B Dn1. n2 D4. 6 G3 °सत्तम (for °नन्दन). — c) Śi K1. 2 कौतूहलं संप्रविष्टो. — d) K1. 2 या(K2 य)थातथ्यान्; K4 B1. 2. 4 De1 Dn1. n3 D2–4. 6 T1 G3 M2 याथातथ्यं; T2 G1. 2. 4 य(G1 या)थातत्वं. — After 5, B2 De Dn3 ins.:

1047* वक्तुमर्हसि मे ब्रह्मन्निहासमिमं शुभम् ।

7 a) K3 D5 तथा च; B3 यथोक्तो; T2 G2 यथा हि (for यथा च). — c) B Dn D1. 4. 6 G3 च (for स्व-). — d) G2. 4 निमिरावलि (for °राणि च). — After 7, N (except B2. 3) G3 ins.:

1048* पुराङ्गिरा महाबाहो चचार तप उत्तमम् ।
[K3 D5 व्रतम् (for तप).]

8 a) S (except G3) आश्रमस्थं. Śi K2 De °बाहो (for °भागो). — b) De2 Dn2 D6 G1. 3 विशेषयत् (for °यन्). — c) B2 T2 G2 यथा; D3 तदा; G4 यदा (for तथा). K4 B4 भूत्वा तु स; G1 तु भूत्वा स; G2. 4 [अ]ग्निर्भूत्वा तु (for स भूत्वा तु). T1 तथा भूत्वा तथा चाग्निर्. — d) B Dn1. n2 D1. 4. 6 G3 M1 व्यकाशयत् (Dn2 D1. 6 °यन्) (for प्रका°).

9 a) K3. 4 B3. 4 Dn D1. 3–6 G3 तु; D2 T1 G1 स (for च). De तपश्चरन्हुतवहः. — b) T1 सप्तार्चिश्च (for संतप्तस्). T1 G4 च सु-; T2 G1 M2 च स्व- (for तस्य). — c) Śi K De D1–3. 5 कृशो (for भृशं). K3 लीनस्तु; K4 सानश्च (for ग्लान°). — d) K4 B2 Dn D1–4. 6 G3 च (for स). T G1. 2. 4 M न किंचित्प्रतिजज्ञिवान्.

10 c) Śi K D2. 3 कोन्यो (for अन्यो). G1. 2. 4 इव (for इह). — d) T G2. 4 ब्राह्मणः. B1. 2. 4 Dn1. n3 D4. 6 G3 संप्रकल्पितः; De Dn3 °कीर्तितः. — e) D3. 5 प्रविनष्टं; a few MSS. विप्रणष्टं. — f) K3 T1 ते (for मे). D3 तेजसा (for मे तपः).

11 b) K3. 4 De Dn3 D2. 3. 5 चिंतयन् (for चिन्त्य

विज्ञातश्चासि लोकेषु त्रिषु संस्थानचारिषु ॥ १२
त्वमग्ने प्रथमः सृष्टो ब्रह्मणा तिमिरापहः ।
स्वस्थानं प्रतिपद्यस्व शीघ्रमेव तमोनुद ॥ १३

अग्निरुवाच ।

नष्टकीर्तिरहं लोके भवाञ्ज्ञातो हुताशनः ।
भवन्तमेव ज्ञास्यन्ति पावकं न तु मां जनाः ॥ १४
निक्षिपाम्यहमग्नित्वं त्वमग्निः प्रथमो भव ।
भविष्यामि द्वितीयोऽहं प्राजापत्यक एव च ॥ १५

आङ्गिरा उवाच ।

कुरु पुण्यं प्रजास्वग्र्यं भवाग्निस्तिमिरापहः ।
मां च देव कुरुष्वाग्ने प्रथमं पुत्रमञ्जसा ॥ १६

मार्कण्डेय उवाच ।

तच्छ्रुत्वाङ्गिरसो वाक्यं जातवेदास्तथाकरोत् ।
राजन्बृहस्पतिर्नाम तस्याप्यङ्गिरसः सुतः ॥ १७
ज्ञात्वा प्रथमजं तं तु वह्नेराङ्गिरसं सुतम् ।
उपेत्य देवाः पप्रच्छुः कारणं तत्र भारत ॥ १८
स तु पृष्टस्तदा देवैस्ततः कारणमब्रवीत् ।
प्रत्यगृह्णंस्तु देवाश्च तद्वचोऽङ्गिरसस्तदा ॥ १९
अत्र नानाविधानग्नीन्प्रवक्ष्यामि महाप्रभान् ।
कर्मभिर्बहुभिः ख्याताञ्नानात्वं ब्राह्मणेष्विह ॥ २०

C. 3. 14121
B. 3. 217. 21
K. 3. 220. 21

इति श्रीमहाभारते आरण्यकपर्वणि सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

मः). — [c]) K₃ Dc D₅ सोपश्यं (for अपश्यं).

12 [a]) Dc T₂ G₄ M₂ सोपसर्पन्; T₁ सोपश्यत. Ś₁ ततो; K₂ तु तं; K₃ क्षणे (for शनैर्). — [b]) Ś₁ K₁. ₂ T₂ G₁ ततो (for तदा). — [d]) K₂ D₂. ₄ भावन. — [e]) K₁. ₂ D₅ T₂ G₂. ₄ [अ]पि (for [अ]सि). — [f]) = 1. 179. 11[d]. K₁. ₂ स(K₂ सं)स्थानुचारिषु; K₃ corrupt; K₄ M₂ सस्थाणुं; D₂. ₃. ₆ संस्थाणुं; G₂. ₄ स्थावरं; M₁ सस्थाचुं. G₁ त्रिसंस्थानप्रचारिषु. Cf. B. 7. 10. 68; and P W *s.v.* संस्थानचारिन्.

13 [ab]) B Dn₁. n₂ D₄–₆ G₃ अग्निः (for अग्ने). Ś₁ transp. प्रथमः and ब्रह्मणा. K₄ B Dn D₄. ₆ G₁. ₃ M₁ प्रथमं (for °मः). K₃ D₄ तिमिरापह. — After 13[ab], Dc reads 16[cd], *repeating* it in its proper place. — [c]) K₁. ₂ D₅ T M स्वं स्थानं; K₃. ₄ Dn₂ D₂ संस्थानं. — [d]) K₂ T₂ तमोनुदः.

15 [a]) K₁. ₂ विक्षेप्यां (for निक्षिपां). — [d]) Ś₁ K₁. ₂ °पत्याग्निरेव च; B₃ °पत्यस्तथैव च; B₄ T G₁. ₂. ₄ M °पत्यस् (B₄ T₂ °पत्यं) तथैकतः.

स्कन्दस्य पार्षदान्घोराञ्शृणुष्वाद्भुतदर्शनान् ।
वज्रप्रहारात्स्कन्दस्य जज्ञुस्तत्र कुमारकाः ।
ये हरन्ति शिशूञ्जातान्गर्भस्थांश्चैव दारुणाः ॥ १
वज्रप्रहारात्कन्याश्च जज्ञिरेऽस्य महाबलाः ।
कुमाराश्च विशाखं तं पितृत्वे समकल्पयन् ॥ २
स भूत्वा भगवान्संख्ये रक्षंश्छागमुखस्तदा ।
वृतः कन्यागणैः सर्वैरात्मनीनैश्च पुत्रकैः ॥ ३
मातृणां प्रेक्षतीनां च भद्रशाखश्च कौशलः ।
ततः कुमारपितरं स्कन्दमाहुर्जना भुवि ॥ ४
रुद्रमग्निमुमां स्वाहां प्रदेशेषु महाबलाम् ।
यजन्ति पुत्रकामाश्च पुत्रिणश्च सदा जनाः ॥ ५
यास्तास्त्वजनयत्कन्यास्तपो नाम हुताशनः ।
किं करोमीति ताः स्कन्दं संप्राप्ताः समभाषत ॥ ६
मातर ऊचुः ।
भवेम सर्वलोकस्य वयं मातर उत्तमाः ।
प्रसादात्तव पूज्याश्च प्रियमेतत्कुरुष्व नः ॥ ७
मार्कण्डेय उवाच ।
सोऽब्रवीद्बाढमित्येवं भविष्यध्वं पृथग्विधाः ।
अशिवाश्च शिवाश्चैव पुनः पुनरुदारधीः ॥ ८

C. 3. 11395
B. 3. 225. 9
K. 3. 226. 67

217

1 T G1. 2. 4 om. the ref. — a) K4 B D G3 M2 स्कंदपारिषदान् (for °स्य पार्षदान्). Ś1 K1. 2 देवान् (for घोरान्). — b) T2 G2. 4 दृष्ट्वा च (for शृणुष्व). M °विक्रमान् (for °दर्शनान्). — c) S (except G3) देवस्य (for स्कन्द°). — d) K3 जञ्जुस्तस्य; T1 G1 जातास्तत्र; M जज्ञिरेस्य (for जज्ञुस्तत्र). — e) Ś1 हरंत; K2 हरंते. B1 शिशूञ्जातान्ये हरंति. — f) D3 अपि (for चैव). K4 Dc D2. 3 दारुणान्.

2 a) T2 G4 M अन्यां(M2 °न्या)श्च (for कन्याश्च). — b) M जज्ञुः कन्या (for जज्ञिरेऽस्य). — c) K4 Dn D4. 6 G3 कुमारास्ते; T G1 M °रस्य; G2. 4 °रः स. Ś1 K2 D2 विशाखश्च (for °खं तं). B ते; Dc Dn D4. 6 G3 च; T G1. 2. 4 M तु (for तं). — d) S (except G3) पुत्रत्वे (for पितृ°). B Dc M पर्यं°; G2. 4 समकल्पयत्. Ś1 K2 तं पितृत्वेभ्यकल्प°; K3 D1–3. 5 पितृ(D2. 3 [before corr.] पुत्र)त्वेनाभ्यकल्पयन् (K3 D2. 3 °यत्).

3 a) Ś1 K D1–3. 5 तं (D2. 3 तत्) श्रुत्वा (for स भूत्वा). K3 सांख्ये; Dc शाखो; T1 G2. 4 M संखे (for संख्ये). — b) K1 °मुखाः; D4. 6 G3 °मुखं; T1 °मुखान् (for °मुखः). D3 (m as in text) T G2. 4 तथा (for तदा). — d) K3 आत्मवीयैश्च; K4 B2. 4 Dc Dn D4. 6 T2 G3 M आत्मीयैः सह (T2 चैव; M च स-); B1. 3 आत्मकीयैः स-; D3 T1 G2. 4 आत्मनीयैश्च; G1 °कीयैश्च.

4 a) Dc D1–3. 5 प्रेक्षमाणानां; T G1. 2. 4 प्रेषितानां च; M प्रेक्षतां चैव (for °तीनां च). — b) D1–3 रुद्र° (for भद्र°). B T1 G1. 2. 4 M तु; T2 स्म (for च). B Dc कौ(Dc को)शले; T1 G1. 2. 4 M कोमलैः; T2 G2 कोमलः (for कौशलः). — c) Ś1 K2 Dn1. n2 T G1. 2. 4 कुमारं; B1 कुमारी- (for कुमार-). T G1. 2. 4 मंजातं (for -पितरं).

5 a) Ś1 K1 अग्निमुखा; B2. 4 Dn1 M2 °मुखां (for अग्निमुमां). T2 स्कंदं (for स्वाहां). — b) Ś1 K2 °बलान्; K1 B Dc Dn D1. 4. 6 G3 °बलं; K3 D2. 3 °बलान्; K4 °बल; T G2 °बलाः; G1 °बलः. — c) D2. 3 यजंते (for यजन्ति). — d) Ś1 K2 महाबलाः; K1 महाजनाः; D1 तदा जनाः; T1 सभाजनाः (for सदा जनाः).

6 a) K3 B1 Dc T1 G1 एतास्; T2 यस्तास्; M1 यास्त्वां (for यास्तास्). — b) K1. 3 तमो (for तपो). — c) T1 कुर्मेति च (for करोमीति). K3 Dc D1–3. 5 स्कंदः (for स्कन्दं). G1 किं कुर्मेति द्विजाः स्कंदं; G2 किंकराः स्मेति ताः स्कंदं. — d) D3 ताः (for सं-). Ś1 K1. 2 संबभाषिरे; T2 [अ]र्थमभाषत (for समभाषत). The reading समभाषयन् of some old printed ed. was not found in any of the MSS. collated!

7 D (except D1–3. 5) G3 कुमार्यः (for मातरः). — b) Dn D4. 6 G3 मातरो वयमुत्तमाः.

8 All MSS. om. मार्कण्डेय उ°! — a) Ś1 K2 S (except G3) [ए]व (for [ए]वं). — b) K1. 2 भविष्यथ (for °ध्वं). — T2 (which om. 8cd) reads 3. 215. 18–23 (with colophon) after 8ab. — c) M चेति (for चैव). K4 Dn D4. 6 G3 शिवाश्चैवाशिवाश्चैव. — After 8, T1 G1. 2. 4

C. 3. 14395
R. 3. 228. 9
K. 3 229. 1

ततः संकल्प्य पुत्रत्वे स्कन्दं मातृगणोऽगमत् ।
काकी च हलिमा चैव रुद्राथ बृहली तथा ।
आर्या पलाला वै मित्रा सप्तैताः शिशुमातरः ॥ ९
एतासां वीर्यसंपन्नः शिशुर्नामातिदारुणः ।
स्कन्दप्रसादजः पुत्रो लोहिताक्षो भयंकरः ॥ १०
एष वीराष्टकः प्रोक्तः स्कन्दमातृगणोद्भवः ।
छागवक्त्रेण सहितो नवकः परिकीर्त्यते ॥ ११
षष्ठं छागमयं वक्त्रं स्कन्दस्यैवेति विद्धि तत् ।
षट्शिरोभ्यन्तरं राजन्नित्यं मातृगणार्चितम् ॥ १२
षण्णां तु प्रवरं तस्य शीर्षाणामिह शब्द्यते ।
शक्तिं येनासृजद्दिव्यां भद्रशाख इति स्म ह ॥ १३
इत्येतद्विविधाकारं वृत्तं शुक्लस्य पञ्चमीम् ।
तत्र युद्धं महाघोरं वृत्तं षष्ठ्यां जनाधिप ॥ १४

इति श्रीमहाभारते आरण्यकपर्वणि सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

२१८

मार्कण्डेय उवाच ।
उपविष्टं ततः स्कन्दं हिरण्यकवचस्रजम् ।
हिरण्यचूडमुकुटं हिरण्याक्षं महाप्रभम् ॥ १
लोहिताम्बरसंवीतं तीक्ष्णदंष्ट्रं मनोरमम् ।

---

read 3. 215. 23, followed by a colophon (*adhy. no.*: T1 G1 218; G2. 4 220) and by the rof. मार्कंडेयः.

9 a) G1 मातः (for ततः). K2. 3 संकल्प-; S (except G3) प्रकल्प्य (for सं°). — b) T2 °गणागमन् (for °गणोऽगमत्). Ś1 K D2. 3. 5 तदा (for [अ]गमत्). — c) M काची (for काकी). Ś1 हिमिला; K1 मिहिला; K3 मिहला; K3 D1–3. 5 हिलिमा; B1 हलिना. — d) K1. 4 D1–3. 5 भद्रा च (K1 D5 [अ]थ); K3 रुद्रा च; B Dc Dn D4. 6 G3 मालिनी; M रुचाथ (for रुद्राथ). Ś1 पृथला; K1. 4 D1–3. 5 बृपला; K2 प्रखला; K3 पृपता; B Dc Dn D4. 6 G3 बृंहिना (Dc1 Dn D6 °ता; Dc2 °मा; D4 G3 °ला) (for बृहली). T G1. 2. 4 माता चैव (T2 G2. 4 चाथ) हली तथा. — e) Ś1 K1. 3 आर्या पलोला. T आर्याबला वा (T2 या) वै धात्री (T2 °त्र्या); G1 आर्याबला तथा धात्री; G2. 4 आर्या बाला च धात्री च. — f) M1 शिव° (for शिशु°).

10 Ś1 D2 om. 10. — c) K3 Dc G1. 4 स्कंदः प्रसादजः. — d) M1 महाप्रभः (for भयं°).

11 a) D2 एकवीरो° (for एष वीरा°). T1 G1 वीर्यो (G1 °रो)ष्टमः; T2 वीराष्टके. — b) G3 स्कंदो (for स्कन्द-). Ś1 K D1–3. 5 °गणोद्भुतः; M °गणोद्वहः (for °गणोद्भवः). — c) T2 एक° (for छाग°). — d) T1 G1 M नवमः (for °कः). K1. 2 T1 G1 °कीर्तितः (for °कीर्त्यते). T2 G2. 4 महासेनः प्रकीर्त्यते.

12 a) Ś1 इष्टं; T1 षष्ठ्यां (for षष्ठं). T1 च गमयद्; M2 जगाम यं (for छागमयं). — b) Ś1 Dc1 G1 [इ]व (for [ए]व). Bsm T2 G1. 2. 4 विद्धि तं; T1 G1 वर्धितं. — c) Ś1 K2 °शिरोभ्यंतरा; Dc °शिराभ्यंतरं; T G1. 2. 4 षण्णामभ्यंतरं (T2 °रा); M2 षड्भिराभ्यंतरं. — d) T1 G1. 2. 4 M यत्तन् (T1 G1 °त्तं); T2 यत्तु. K4 B1 °न्वितं; S (except G3) °श्रितं (for °चितम्).

13 b) M शिरसाम् (for शीर्षाणाम्). Ś1 K1–3 Dc D1–3. 5 इश्यते; T2 G2. 4 शस्य° (for शब्द्य°). — d) D3 °शीर्ष; S (except G3) °शाखाम् (for °शाख).

14 a) K1. 4 Dn3 D1 इत्येते; B1 इत्येवं; Dc इत्येतं. — b) K2 Dc D3. 4 पंचमी (for °मीम्). — c) Ś1 K2. 3 D3 तत्तु (for तत्र). T G1. 2. 4 M घोरं महद्यु(M1 महायु)द्धं. — d) G1 ततः; M2 वृद्धं (for वृत्तं). Ś1 K1–3 Dc D1–3. 5 नरा° (for जना°).

Colophon om. in T1 G1. 2. 4. — *Major parvan:* Ś1 K2 Dn3 T2 आरण्य. — *Sub-parvan:* K3. 4 B Dc Dn1. n3 D1–6 G3 (all om. sub-parvan name) mention only आंगिरस. — *Adhy. name:* Dn D4. 6 G3 M2 कुमारोत्पत्तिः. — *Adhy. no.* (figures, words, or both): Dn1 (marg.). n3 227; Dn2 226; D1 230; T2 218; M (M2 *inf. lin.*) 220 (M2 orig. 222). — *Śloka no.:* Dn1. n3 14; Dn2 D1 15.

218

1 a) B1. 2 Dn D4. 6 G3 तु तं (for ततः). — b) B4

सर्वलक्षणसंपन्नं त्रैलोक्यस्यापि सुप्रियम् ॥ २
ततस्तं वरदं शूरं युवानं मृष्टकुण्डलम् ।
अभजत्पद्मरूपा श्रीः स्वयमेव शरीरिणी ॥ ३
श्रिया जुष्टः पृथुयशाः स कुमारवरस्तदा ।
निषण्णो दृश्यते भूतैः पौर्णमास्यां यथा शशी ॥ ४
अपूजयन्महात्मानो ब्राह्मणास्तं महाबलम् ।
इदमाहुस्तदा चैव स्कन्दं तत्र महर्षयः ॥ ५
हिरण्यवर्ण भद्रं ते लोकानां शंकरो भव ।
त्वया षड्रात्रजातेन सर्वे लोका वशीकृताः ॥ ६
अभयं च पुनर्दत्तं त्वयैवैषां सुरोत्तम ।
तस्मादिन्द्रो भवानस्तु त्रैलोक्यस्याभयंकरः ॥ ७

स्कन्द उवाच ।

किमिन्द्रः सर्वलोकानां करोतीह तपोधनाः ।
कथं देवगणांश्चैव पाति नित्यं सुरेश्वरः ॥ ८

ऋषय ऊचुः ।

इन्द्रो दिशति भूतानां बलं तेजः प्रजाः सुखम् ।
तुष्टः प्रयच्छति तथा सर्वान्दायान्सुरेश्वरः ॥ ९
दुर्वृत्तानां संहरति वृत्तस्थानां प्रयच्छति ।
अनुशास्ति च भूतानि कार्येषु बलसूदनः ॥ १०
असूर्ये च भवेत्सूर्यस्तथाचन्द्रे च चन्द्रमाः ।
भवत्यग्निश्च वायुश्च पृथिव्यापश्च कारणैः ॥ ११
एतदिन्द्रेण कर्तव्यमिन्द्रे हि विपुलं बलम् ।
त्वं च वीर बलश्रेष्ठस्तस्मादिन्द्रो भवस्व नः ॥ १२

शक्र उवाच ।

भवस्वेन्द्रो महाबाहो सर्वेषां नः सुखावहः ।
अभिषिच्यस्व चैवाद्य प्राप्तरूपोऽसि सत्तम ॥ १३

C. 3. 1414
B. 3. 229. 13
K. 3. 229. 20

सुवर्ण-; S (except G₂) आमुक्त (for हिरण्य-). B₂ °कवचावृतं (for °कवचत्रजम्). — K₂ om. 1cd. — c) D₂ M₁ °चूडा- (for °चूड-). Ś₁ K (K₂ om.) D₁₋₃. ₅ °वलयं; S (except G₂) °मकुटं (for °मुकुटं). — d) K₄ हिरण्याख्यं; D₂ लोहिताक्षं. Ś₁ K (K₂ om.) Dc D₁₋₃. ₅ महाबलं; G₁ °द्युतिं.

2 b) B₄ D₁ G₂. ₄ °हरं (for °रमम्). — c) B₂. ₃ °संपूर्ण. — d) K₂ सुप्रभं (for °प्रियम्).

3 c) Ś₁ K₁₋₃ B₁m Dc D₁₋₃. ₅ M₁ पद्महस्ता श्रीः; T₂ °निलया.

4 a) Ś₁ पृथुवक्षाः; K₁. ₂ पृथ्वाजुष्टः; T₂ श्रिया स्पृष्टः (for श्रिया जुष्टः). — b) Ś₁ K₁. ₂ B₁. ₃ Dc D₂. ₄. ₆ G₁ M सु- (for स). Ś₁ K₂ °तरस्; T₁ G₁ M₁ °वपुस् (for °वरस्). Ś₁ K₁. ₂ B₂ T₁ तथा (for तदा). B₄ G₂. ₄ कुमारो वरदस्तदा. — c) T G₂. ₄ M दृश्ये (for दृश्यते). — d) K₄ D₂. ₃ पूर्ण° (for पौर्ण°). K₂ B₂. ₄ D₂. ₅ T G₁. ₂. ₄ M₁ शशी यथा (by transp.); M₂ इवोडुराट्.

5 a) K₂ G₂. ₄ °स्मानं (for °स्मानो). — d) B₂ D₂ चैव (for तत्र).

6 Before 6, N (except Ś₁ K₁; B₁. ₃ marg.) G₂ ins. ऋषय ऊचुः (resp. ऋषयः). — a) K₄ B₁₋₃ D (except D₁₋₃. ₅) G₂ °गर्भ; T₁ G₁ °रूप (for °वर्ण). — c) Ś₁ K₂ यत्तात (for षड्रात्र-). — d) K₁. ₂ B₁. ₂. ₄ Dc Dn₂. ₁₁ D₂. ₅. ₆ T₁ सर्व- (for सर्वे). D₂ G₂. ₄ सर्वलोको °कृतः; T₂ सर्व लोकं °कृतं.

7 a) B₁ वै; M₁ तु (for च). D₂ पुरा (for पुनर्). T₁ G₁ दत्वा (for दत्तं). — b) D₂ त्वया चैषां; T₁ एतैरेषां; G₁ त्वमेवैषां (for त्वयैं°). Ś₁ K₂ सुरेश्वर (for सुरो°). — c) Ś₁ K₂₋₄ Dc D₁₋₃. ₅ तत (for तस्माद्). — d) Ś₁ K D₁₋₃. ₅ हिताय वै (for [अ]भयंकरः).

8 a) G₄ °भूतानां (for °लोकानां). — d) S (except G₂) सर्वान् (for नित्यं).

9 a) B₁₋₃ D (except D₁₋₃. ₅) G₂ दधाति (for दिश°). — b) K₁. ₂. ₄ B₁. ₂. ₄ Dc Dn D₄₋₆ G₂ प्रजा-; D₁ प्रजां; T₁ प्रियं (for प्रजाः). — c) Ś₁ K₁₋₃ D₁₋₃. ₅ प्रज्ञां; T₁ G₁. ₂ हृष्टं (for तुष्टः). B₂ यथा; D₁. ₅ G₂. ₄ तदा; T G₁ सदा (for तथा). B₄ तुष्टः प्रज्ञां धृतिश्चैव. — d) Ś₁ K₁. ₂ सर्वा मायाः; B Dc Dn D₄₋₆ G₂ M सर्वान्कामान्; D₂ सर्वदा च; D₃ सर्वथायं; T₁ सर्वदायान्; T₂ सर्वान्देवान्; G₂ सर्वान्देयान्. Ś₁ K₁ सुरेश्वर; B₄ सुरोत्तम.

10 b) B₂ G₂ व्रत°; B₄ वृत्ति° (for वृत्त°). — c) T₁ G₁. ₄ हि (for च). Dc भूतात्मा (for °नि). — d) Ś₁ K₁. ₂ कालेषु.

11 a) Ś₁ K Dc Dn₂ D₂. ₄. ₆ G₂ [अ]भवत् (for भवेत्). D₂ सूर्ये च स भवत्सूर्यः. — b) Dc °चंद्रेण; M₁ °चंद्रेषु (for °चंद्रे च). — d) K₄ च कारणे; T₁ G₁. ₂. ₄ M च खं तथा; T₂ चकार वै.

12 a) T₂ इंद्रो हि (for इन्द्रेण). D₂ वर्तव्यं (for क°). — b) G₁ M₁ इंद्रो (for इन्द्रे). D₂ च (for हि). B₄ Dc परमं (for विपुलं). — c) K₂ G₂ M₁ वीर्य- (for वीर)

C. 3. 14415
B. 3. 229. 14
K. 3. 229. 21

स्कन्द उवाच ।

शाधि त्वमेव त्रैलोक्यमव्यग्रो विजये रतः ।
अहं ते किंकरः शक्र न ममेन्द्रत्वमीप्सितम् ॥ १४

शक्र उवाच ।

बलं तवाद्भुतं वीर त्वं देवानामरीञ्जहि ।
अवज्ञास्यन्ति मां लोका वीर्येण तव विस्मिताः ॥ १५
इन्द्रत्वेऽपि स्थितं वीर बलहीनं पराजितम् ।
आवयोश्च मिथो भेदे प्रयतिष्यन्त्यतन्द्रिताः ॥ १६
भेदिते च त्वयि विभो लोको द्वैधमुपेष्यति ।
द्विधाभूतेषु लोकेषु निश्चितेष्वावयोस्तथा ।
विग्रहः संप्रवर्तेत भूतभेदान्महाबल ॥ १७
तत्र त्वं मां रणे तात यथाश्रद्धं विजेष्यसि ।
तस्मादिन्द्रो भवानद्य भविता मा विचारय ॥ १८

स्कन्द उवाच ।

त्वमेव राजा भद्रं ते त्रैलोक्यस्य ममैव च ।
करोमि किं च ते शक्र शासनं तद्ब्रवीहि मे ॥ १९

शक्र उवाच ।

यदि सत्यमिदं वाक्यं निश्चयाद्भाषितं त्वया ।
यदि वा शासनं स्कन्द कर्तुमिच्छसि मे शृणु ॥ २०
अभिषिच्यस्व देवानां सेनापत्ये महाबल ।
अहमिन्द्रो भविष्यामि तव वाक्यान्महाबल ॥ २१

स्कन्द उवाच ।

दानवानां विनाशाय देवानामर्थसिद्धये ।
गोब्राह्मणस्य त्राणार्थं सेनापत्येऽभिषिञ्च माम् ॥ २२

D (except $D_{2-4.\ 6}$) G_3 बली (for बल॰).

13 $Ś_1$ $K_{1.\ 2}$ B_4 D_5 S (except G_3) इंद्रः (for शक्रः). — [a]) G_2 भव इंद्रो. — [c]) $Ś_1$ K_{1-3} T_1 $G_{1.\ 2}$ अभिषिंचस्व; G_4 अभ्यषिच्यस्वम्. $Ś_1$ वै चाद्य; D_1 वै राज्ये; T $G_{1.\ 2.\ 4}$ M चा(G_4 अ)द्यैव. — [d]) $Ś_1$ प्राप्तरूपेपि. Some MSS. सत्तमः.

14 [d]) T_2 G_2 न मे शक्रत्वम्; G_4 न मे इंद्रत्वम्; M_3 न ममेंद्रत्वम्. D_1 ईक्षितं (for ईप्सितम्).

15 $Ś_1$ K $D_{1-3.\ 5}$ T $G_{1.\ 2.\ 4}$ इंद्रः (for शक्रः). — [a]) T $G_{1.\ 2.\ 4}$ [अ]तुलं (for [अ]द्भुतं). — [b]) K_4 देवतानाम्; D_5 तंहवानाम् (for त्वं देवानाम्). T_1 $G_{1.\ 2.\ 4}$ अरिं. — [c]) Dc अवज्ञास्यमि. D_{c1} G_2 मा (for मां). — [d]) B_1 तव वीर्येण (by transp.). B_1 संवृताः.

16 [a]) K_4 $B_{1.\ 2.\ 4}$ Dn $D_{1.\ 6}$ G_3 नु; B_3 T_1 G_1 [S]व॰; M_1 हि (for sपि). T_2 corrupt. — After 16[ab], S (except G_3) ins.:

1069* त्वत्तेजसावमंस्यन्ति लोका मां सुरसत्तम ।

— [c]) Dc भेदैः (for भेदे).

17 [a]) T_2 तथा (for विभो). — [b]) $Ś_1$ $K_{1.\ 2}$ B_3 ॰मुपेष्यति; K_3 D_3 ॰त्वमेष्यति; T $G_{1.\ 2.\ 4}$ M को द्वैध(T_1 G_1 वै म)मपनेष्यति. — [c]) $Ś_1$ K B_4 Dc $D_{2.\ 3.\ 5}$ द्वैधी॰ (for द्विधा॰). D_5 दैवं॰ (for लोकं॰). — [d]) $Ś_1$ K_3 B_1 $D_{1.\ 2.\ 5}$ M तदा; K_4 यथा (for तथा). — [e]) $Ś_1$ K_2 संप्रपद्येत (for ॰वर्तेत). T $G_{1.\ 2.\ 4}$ विग्रहाः ॰वर्तंते. — [f]) $K_{2.\ 3}$ D_{c2} $D_{1.\ 3}$ ॰बलः; B_3 G_4 ॰बलाः.

18 [a]) B_2 अत्र. $Ś_1$ $K_{2.\ 3}$ $D_{2.\ 5}$ त्वं मा; K_4 मां त्वं (by transp.). T_2 तत्र (for तात). — [b]) K_3 D_{c3} विजेष्यति; D_3 ॰ते. — [c]) S (except G_3) त्वमेव (for भवान्). $K_{1.\ 4}$ B $D_{1.\ 4.\ 6}$ G_3 एव (for अद्य). — [d]) K_3 भवतां; B_1 विधाता (for भविता). S (except G_3) भव मा च वि॰.

19 [b]) $Ś_1$ D_3 [अ]पि; D_2 [इ]ति (for [ए]व). — [c]) $Ś_1$ किं करोमि (by transp.). $Ś_1$ किं च तं; K_3 किं च मे; T_1 किंकरः; T_2 तदहं; $G_{1.\ 2.\ 4}$ M किमहं. B_1 तात (for शक्र). — [d]) $G_{2.\ 4}$ शासनात्. B_1 च (for तद्). T M मां (for मे). K_4 Dc $D_{1-3.\ 5}$ शासनं ब्रूहि तन्मम.

20 $K_{1.\ 2}$ $B_{1.\ 3.\ 4}$ D (except $D_{2.\ 3.\ 5}$) S इंद्रः (for शक्रः). — After the ref., B Dn $D_{1.\ 4-6}$ G_3 read 21[cd]. — [a]) K_3 D_2 शक्यम् (for सत्यम्). — [b]) K_3 G_4 निश्चितं; D_{c3} निश्चयं (for निश्चयाद्). T_2 कांक्षितं (for भाषितं). — [d]) K_4 $B_{1.\ 4}$ D_1 अर्हसि (for इच्छसि). D_3 प्रियः (marg. *sec. m.* कुरु) (for शृणु).

21 [a]) $Ś_1$ $K_{1.\ 2}$ D_5 T_2 $G_{1.\ 2}$ अभिषिंचस्व. — [b]) $K_{1.\ 3}$ B_{2-4} D_{c1} D_{n1} $D_{1.\ 4-6}$ T_1 G_4 सैना॰. $K_{2.\ 3}$ B Dc D_{n1} $D_{1-4.\ 6}$ T_2 $G_{3.\ 4}$ ॰बलः. — B Dn $D_{1.\ 4-6}$ G_3 read 21[cd] after the ref. in 20. — [d]) $Ś_1$ K Dc D_1 महायशाः; D_2 ॰प्रभो; D_3 G_4 M_1 ॰प्रभ (for ॰बल). — After 21, $Ś_1$ ins. an addl. colophon.

22 [c]) $D_{2.\ 3}$ T $G_{1.\ 2}$ M_1 गोब्राह्मणानां. K_3 D_1 त्राणार्थे; K_4 $D_{2.\ 3}$ चार्थाय; T_2 रक्षार्थं. B_{1-3} Dc Dn $D_{4.\ 6}$ G_3 गोब्राह्मणहितार्थाय. — [d]) K_3 B D_{c1} $D_{n1.\ n3}$ $D_{4.\ 6}$ सैना॰. B_2 [S]भिषिच्यतां.

23 K_3 $D_{2.\ 3}$ om. the ref. — After the ref., G_1 ins.:

1070* तस्य तद्वचनं श्रुत्वा स्कन्दस्य बलवृत्रहा ।

मार्कण्डेय उवाच ।

सोऽभिषिक्तो मघवता सर्वैर्देवगणैः सह ।
अतीव शुशुभे तत्र पूज्यमानो महर्षिभिः ॥ २३
तस्य तत्काञ्चनं छत्रं ध्रियमाणं व्यरोचत ।
यथैव सुसमिद्धस्य पावकस्यात्ममण्डलम् ॥ २४
विश्वकर्मकृता चास्य दिव्या माला हिरण्मयी ।
आबद्धा त्रिपुरघ्नेन स्वयमेव यशस्विना ॥ २५
आगम्य मनुजव्याघ्र सह देव्या परंतप ।
अर्चयामास सुप्रीतो भगवान्गोवृषध्वजः ॥ २६
रुद्रमग्निं द्विजाः प्राहू रुद्रसूनुस्ततस्तु सः ।
रुद्रेण शुक्रमुत्सृष्टं तच्छ्वेतः पर्वतोऽभवत् ।
पावकस्येन्द्रियं श्वेते कृत्तिकाभिः कृतं नगे ॥ २७
पूज्यमानं तु रुद्रेण दृष्ट्वा सर्वे दिवौकसः ।
रुद्रसूनुं ततः प्राहुर्गुहं गुणवतां वरम् ॥ २८
अनुप्रविश्य रुद्रेण वह्निं जातो ह्ययं शिशुः ।
तत्र जातस्ततः स्कन्दो रुद्रसूनुस्ततोऽभवत् ॥ २९
रुद्रस्य वह्नेः स्वाहायाः पण्णां स्त्रीणां च तेजसा ।
जातः स्कन्दः सुरश्रेष्ठो रुद्रसूनुस्ततोऽभवत् ॥ ३०
अरजे वाससी रक्ते वसानः पावकात्मजः ।
भाति दीप्तवपुः श्रीमान्रक्ताभ्राभ्यामिवांशुमान् ॥ ३१
कुक्कुटश्चाग्निना दत्तस्तस्य केतुरलंकृतः ।
रथे समुच्छ्रितो भाति कालाग्निरिव लोहितः ॥ ३२
विवेश कवचं चास्य शरीरं सहजं ततः ।
युध्यमानस्य देवस्य प्रादुर्भवति तत्सदा ॥ ३३

C. 3. 1443G
B. 3. 229. 35
K. 3. 229. 43

ऋषिभिस्तं महासेनं हृष्टो देवगणैः सह ।
सौवर्णे रत्नखचिते तरुणारुणभास्वरे ।
दिव्यासने समास्थाप्य विमलैः पुण्यवारिभिः ।
महासेनं तदा शक्रः सेनापत्येऽभिषिक्तवान् ।

— [b]) T G1 M3 सर्व° (for सर्वैर्). — [c]) G3. 4 तेन; M2 स्कंदः (for तत्र).

24 [a]) K4 B3 Dn D4. 6 G3 तत्र (for तस्य). — [b]) T G1 M व्यराजत; G2. 4 विराजते (for व्यरो°).

25 [a]) T1 रम्या; T2 चैव; G1 दिव्या (for चास्य). — [b]) T G3. 4 दिव्य-; G1 रम्या (for दिव्या). — [d]) D3 रुद्रेण च (for स्वयमेव).

26 [a]) T3 °श्रेष्ठ (for °व्याघ्र). — [b]) Ś1 K D3. 5 मात्रा (K1 *sup. lin.* पत्न्या) (for देव्या). — [c]) M2 तनयं लालयामास. — [d]) K3 वृषभ° (for गोवृष°).

27 [b]) Ś1 °सूर्यस्तनुस् (for °सूनुस्ततस्). Dc च (for तु). — After 27[ab], S (except G3) ins.:

1071* कीर्त्यते सुमहातेजाः कुमारोऽद्भुतदर्शनः ।

— D1 om. 27[c]–28[d]. — [c]) S (except G3) शुक्रम् (for शुक्रम्). — [d]) B4 S (except G3) तेन (T3 येन) श्वेतोभवद्गिरिः. — After 27[cd], T1 G1 M1 ins.:

1072* तच्छुक्रं भक्षयामास वह्निस्तस्माद्बृहोऽभवत् ।

— G1 om. 27[c]–29[d]. — [e]) Ś1 K3 D5 प्रियं (for [इ]न्द्रियं). — [f]) B1 Dc कृते; T3 G3 घृतं (for कृतं). B1 युगे (for नगे).

28 D1 G1 om. 28 (cf. v.l. 27). — [c]) T1 गुहं (for ततः). Dc3 स रुद्रसूनुस्तत्प्राहुः. — [d]) T1 ततो (for गुहं).

29 G1 om. 29 (cf. v.l. 27). — [b]) D1. 3. 5 T3 G3 वह्निः; T1 रुद्र; M1 वह्नेर् (for वह्निं). B3 यतः; T3 [S]ष्ययं (for ह्ययं). Ś1 K3 शुचिः (for शिशुः). — [c]) Ś1 K3 ततो (for तत्र). B4 यतः (for ततः). — 29[d]=30[d].

30 Ś1 K3 om. (hapl.) 30; D1. 3 read it in marg. — [a]) T G3. 4 स्वाहायां. — [b]) K1. 2 तु (for च). K4 B1–3 Dn D3. 4. 6 G3 भारत (for तेजसा). — [c]) K1 ततः (for जातः).

31 [a]) Dc2 T3 अजरे; T1 G1. 2. 4 M विरजे (for अरजे). — [c]) K3 D5 अति-; T1 अहो; T3 G3. 4 M बभौ (for भाति). K1–3 B3 Dc D3. 5. 6 G4 M3 धीमान् (for श्रीमान्). G1 अतीव शुशुभे श्रीमान्. — [d]) Ś1 मध्याह्न इव भास्करः; K3 भ्राजमान इवांशुमान्; T1 G1 अनुरक्तो यथांशु°; T3 मुक्तोभ्रेषु यथांशु°; M1 रक्ताभ्रैरिव चांशु°.

32 [ab]) D3. 5 transp. दत्तः and तस्य. — After 32, N G3 ins.:

1073* या चेष्टा सर्वभूतानां प्रभा शान्तिर्बलं तथा ।
अग्रतस्तस्य सा शक्तिर्देवानां जयवर्धिनी ।

[(L. 1) K1 D1 °लोकानां (for °भूतानां). Ś1 K1. 2 D3 शक्तिर् (for शान्तिर). — (L. 2) Ś1 K1. 3. 4 D3. 5 भयनाशिनी (K4 m as in text); B1 प्रीतिवर्धिनी (for जय°).]

33 [b]) Ś1 K3–4 Dn D1. 4. 6 T1 G1 शरीरे (for °रं). K4 Dn D4. 6 T3 तथा; G4 M3 तदा (for ततः). — [c]) Ś1 K1–3 Dc D1. 5 तस्यैव (for देवस्य). — [d]) D1 T3 सर्वदा; D3 नान्यदा (for तत्सदा).

34 [a]) K4 B1–3 Dn D1. 3–6 धर्मो; Dc मेधा; T1 G1 वर्ष्म; T3 G3. 4 वीर्यं (for वर्म). — [b]) Dc D3 T3 G3 M

C. 3. 14437
B. 3. 229. 36
K. 3. 229. 44

शक्तिर्वर्म बलं तेजः कान्तत्वं सत्यमक्षतिः ।
ब्रह्मण्यत्वमसंमोहो भक्तानां परिरक्षणम् ॥ ३४
निकृन्तनं च शत्रूणां लोकानां चाभिरक्षणम् ।
स्कन्देन सह जातानि सर्वाण्येव जनाधिप ॥ ३५
एवं देवगणैः सर्वैः सोऽभिषिक्तः स्वलंकृतः ।
बभौ प्रतीतः सुमनाः परिपूर्णेन्दुदर्शनः ॥ ३६
इष्टैः स्वाध्यायघोषैश्च देवतूर्यरवैरपि ।
देवगन्धर्वगीतैश्च सर्वैरप्सरसां गणैः ॥ ३७
एतैश्चान्यैश्च विविधैर्हृष्टतुष्टैरलंकृतैः ।
क्रीडन्निव तदा देवैरभिषिक्तः स पावकिः ॥ ३८
अभिषिक्तं महासेनमपश्यन्त दिवौकसः ।

विनिहत्य तमः सूर्यं यथेहाभ्युदितं तथा ॥ ३९
अथैनमभ्ययुः सर्वा देवसेनाः सहस्रशः ।
अस्माकं त्वं पतिरिति ब्रुवाणाः सर्वतोदिशम् ॥ ४०
ताः समासाद्य भगवान्सर्वभूतगणैर्वृतः ।
अर्चितश्च स्तुतश्चैव सान्त्वयामास ता अपि ॥ ४१
शतक्रतुश्चाभिषिच्य स्कन्दं सेनापतिं तदा ।
सस्मार तां देवसेनां या सा तेन विमोक्षिता ॥ ४२
अयं तस्याः पतिर्नूनं विहितो ब्रह्मणा स्वयम् ।
इति चिन्त्यानयामास देवसेनां स्वलंकृताम् ॥ ४३
स्कन्दं चोवाच बलभिदियं कन्या सुरोत्तम ।
अजाते त्वयि निर्दिष्टा तव पत्नी स्वयंभुवा ॥ ४४

कांतित्वं; T1 G1. 4 क्षांति(G4 °त)त्वं. B1 आकृतिः; B2. 3 De D4. 6 G3 अच्युतिः; Dn उन्नतिः (for अक्षतिः).

35 G4 om. (hapl.) 35ab. — a) Ś1 विकर्तनं; K1. 2 निकर्तनं. M2 तु (for च). B1 शक्तानां; B3 शक्राणां (for शत्रू°). — b) Ś1 K1. 2 अपि; K3 D3. 5 चापि (for चाभि°). — G1 om. (? hapl.) from 35c up to रवैः (in 37b). — d) Ś1 नराधिप; K2. 3 जनाधिपः; D2 जनार्दनः (for °धिप). T1 सर्वाण्येतानि पार्थिव.

36 G1 om. 36 (cf. v.l. 35). — b) T1 महाबलः (for स्वलं°). — c) B3m अतीव; B4 चातीव; G2 प्रदीप्तः (for प्रतीतः). T2 सुमहान्. — d) T G2. 4 M2 प्रति° (for परि°). Ś1 K B De D1–3. 5 °संनिभः (B4 °लक्षणः); Dn D4. 6 G3 °मंडलः (for °दर्शनः).

37 G1 om. up to रवैः (in 37b). — a) Ś1 K2–4 De D1–3 शुभैः (for इष्टैः). — b) Ś1 K De D1–3. 5 वेणु° (for देव°). B Dn3 D4 °वरैर् (for °रवैर्). Ś1 K De D1–3. 5 तथा (for अपि). — d) M1 नृत्तैः (for सर्वैः). Ś1 K1–3 B4 De D1–3. 5 M चाप्सरसां (for अप्सरसां).

38 a) B1–3 Dn D1. 4. 6 G3 बहुभिर् (for विविधैर्). — b) K4 B1 De D2 हृष्टपुष्टैः; B2. 3 Dn D1. 4. 6 G3 M तुष्टैर्हृष्टैः; B4 T G1 तुष्टैरिष्टैः; G2. 4 मृष्टैस्तुष्टैः (for हृष्टतुष्टैः). K3 B1. 3. 4 D (except D2. 3) G3 M स्वलंकृतैः; K4 G2. 4 अलंकृतैः (for अलंकृतैः). — After 38ab, B D (except D1–3. 5) G3 ins. :

1074* सुसंवृतः पिशाचानां गणैर्देवगणैस्तथा ।

— c) B1–3 Dn D4. 6 G3 भाति (for इव). — d) Ś1 B2 Dn D4. 6 G3 च; B1. 3 तु (for स).

39 a) Ś1 °देवम् (for °सेनम्). — c) K2 विनिहन्य; Dn1. n2 °हत्य. — d) K4 D2. 3 S (except G3) यथैव (for यथेह). Ś1 K1. 2 [अ]भ्युदये (for °दितं). K1 तदा; K3 यथा (for तथा).

40 a) Ś1 K3. 4 D1–3. 5 T G4 M1 तथैनम्; G1 तदैनम् (for अथैनम्). T1 सेना (for सर्वा). — d) T2 G2. 4 ब्रुवंत्यः (for ब्रुवाणाः). B Dn D1. 4. 6 G3 सर्वतो दिशः; T1 G1 सर्वदेवताः.

41 b) K2. 3 B1 D1. 5 सर्वैर् (for सर्व°). B1 G2. 4 °देव° (for °भूत°). Ś1 K1–3 D1. 5 विभुः (for वृतः). — c) K4 Dn D1. 4. 6 G3 तु (for च). De Dn2 तत° (for स्तुत°). T1 G1 चापि (for चैव). — d) K3 तास्त्वयि; De तानपि; T2 G2. 4 तास्तदा (for ता अपि).

42 b) K3 D2 तथा (for तदा). — c) De2 देवसेनां तां (by transp.). — d) T1 G1 पूर्व; G4 [अ]नेन (for तेन). K1. 4 विमोचिता (for °क्षिता).

43 a) M2 अस्याः (for तस्याः). T2 दत्तो (for नूनं). — b) K3 पुरा (for स्वयम्). — T2 om. 43c–44d. — c) K1. 4 D1–3. 5 विचिंत्येत्या(D1 °त्यैवा)नयामास (D2 °ह्वयामासुर्); K3 इति तामानयामासुर्; T1 G1. 3. 4 M संचिंत्य चा(G3. 4 °त्य त्वा-; M °त्येत्या)नयामास. — d) K1. 4 B2 Dn D4–6 G3 ह्वलं°; B1 D1 अलं° (for स्वलं°).

44 T2 om. 44 (cf. v.l. 43). — a) K1. 4 B1 Dn D1. 6 प्रोवाच (for चो°). B4 नृपते; M वल° (for बल°). G2. 4 स्कंदायोवाच वलभिद्. — d) Ś1 भार्या (for पत्नी).

45 a) T1 G1 तस्यास् (for तस्मात्). T2 स्वमस्या विधिवत्पाणिं. — b) T2 होम° (for पाणिं). — d) B1 Dn G2

तस्मात्त्वमस्या विधिवत्पाणिं मन्त्रपुरस्कृतम् ।
गृहाण दक्षिणं देव्याः पाणिना पद्मवर्चसम् ॥ ४५
एवमुक्तः स जग्राह तस्याः पाणिं यथाविधि ।
बृहस्पतिर्मन्त्रविधिं जजाप च जुहाव च ॥ ४६
एवं स्कन्दस्य महिषीं देवसेनां विदुर्बुधाः ।
षष्ठीं यां ब्राह्मणाः प्राहुर्लक्ष्मीमाशां सुखप्रदाम् ।
सिनीवालीं कुहूं चैव सद्वृत्तिमपराजिताम् ॥ ४७
यदा स्कन्दः पतिर्लब्धः शाश्वतो देवसेनया ।
तदा तमाश्रयल्लक्ष्मीः स्वयं देवी शरीरिणी ॥ ४८
श्रीजुष्टः पञ्चमीं स्कन्दस्तस्माच्छ्रीपञ्चमी स्मृता ।
षष्ठ्यां कृतार्थोऽभूद्यस्मात्तस्मात्षष्ठी महातिथिः ॥ ४९

इति श्रीमहाभारते आरण्यकपर्वणि अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

२१९

मार्कण्डेय उवाच ।
श्रिया जुष्टं महासेनं देवसेनापतिं कृतम् ।
सप्तर्षिपत्न्यः षड् देव्यस्तत्सकाशमथागमन् ॥ १
ऋषिभिः संपरित्यक्ता धर्मयुक्ता महाव्रताः ।
द्रुतमागम्य चोचुस्ता देवसेनापतिं प्रभुम् ॥ २
वयं पुत्र परित्यक्ता भर्तृभिर्देवसंमितैः ।

C 3. 14456
B. 3. 230. 3
K. 3. 230. 3

पद्मवर्चसा. T₂ पाणिना वर्चसा श्रियाः. — After 45, G₁ ins.:

1075* एवमुक्तो भगवता महासेनो महाबलः ।
दृष्ट्वा कमलपत्राक्षीं तनुमध्यां यशस्विनीम् ।
अतीव रूपसंपन्नां सर्वाभरणभूषिताम् ।
सर्वलक्षणसंपन्नां देवसेनां शुचिस्मिताम् ।

46 ᵃ) G₁ प्रीत्या परमया युक्तस्. — ᵇ) D₃ पाणिं तस्या (by transp.). — After 46ᵃᵇ, G₁ ins.:

1076* जग्राह भरतश्रेष्ठ देवसेनापतिस्ततः ।

— ᵉ) Dn₁. n₃ मंत्रविद्धि (for मन्त्रविधिं).

47 ᵇ) B₁. ₃ Dn D₄. ₆ T₂ G₃ M जनाः (for बुधाः). — ᵉ) Ś₁ K₂ षष्ठी. — ᵈ) Ś₁ K₂. ₃ B Dn D₃–₆ आसां (for आशां). D₄. ₆ G₃ °प्रभां (for °प्रदाम्). — ᶠ) T₁ G₁. ₄ M सुवृत्तिम् (for सद्वृत्तिम्). — After 47, S (except G₃) ins.:

1077* इत्येवमादिभिर्देवी नामभिः परिकीर्त्यते ।

48 ᵃ) G₄ यथा (for यदा). K₃ प्रतिलब्धः; T₁ प्रीतिलब्धः. — ᵉ) Ś₁ K₁–₃ D₁–₃ समाश्रयल् (K₁. ₃ °श्रया); D₃ [ए]नमाश्रयल्; M₁ तमाश्रया. — D₄ reads 48ᵈ–49ᵈ after the ref. in 3. 219. 7. — ᵈ) M₂ एव (for देवी).

49 For D₄ cf. v.l. 48. — ᵃ) K₃ °तुष्टः (for °जुष्टः). T G₁. ₃ श्रिया जुष्टः स पंचम्यां. — ᵇ) K₃ तदा (for तस्मात्). Ś₁ K₄ S (except G₃. ₄) श्रीः पंचमी. — ᵉ) Ś₁ D₁–₃. ₅ यच्च; K G₃. ₄ M₂ यश्च (for यस्मात्).

Colophon. — *Major parvan:* Ś₁ K₃ Dn₃ T₃ G₃. ₄ आरण्य. — *Sub-parvan:* G₁ मार्कंडेयसमस्या. K₄ B₁–₃ De Dn₁. n₃ D₁. ₃. ₄–₆ G₃ M₃ (all om. sub-parvan name) mention only आंगिरस. — *Adhy. name:* B₃ स्कंदाभिषेकः; B₄ कुमारोत्पत्तिः; G₁ स्कंदचरित्रे स्कंदपट्टाभिषेकमहोत्सवदेवसेनाविवाहः; M₃ सुब्रह्मण्यविवाहः. — *Adhy. no.* (figures, words or both): Dn₁. n₃ 228; Dn₂ 227; D₁ 231; T G₁ 219; G₃. ₄ M (M₃ *inf. lin.*) 221; M₃ (orig.) 223. — *Śloka no.:* Dn 51; D₁ 49, D₆ 52.

219

1 ᵇ) G₃. ₄ °पती- (for °पतिं). B₃ प्रभुं (for कृतम्). — ᵈ) B₃ तत्समीपम् (for तत्सकाशम्). B₁ उपा° (for अथा°).

2 ᵃ) D₃. ₅ °ताः परित्यक्ता; D₅ परिसंत्यक्ता. — ᵇ) T₃ पति° (for महा°). — G₃ om. 2ᵉ–3ᵈ. — ᵉ) Ś₁ K₁. ₃ De आगत्य (for आगम्य). T₁ ते; G₁ तं (for ता).

3 G₃ om. 3 (cf. v.l. 2). — After 3ᵃ, K₁. ₃ ins.:

1078* धर्मयुक्ता महाव्रताः ।
भवदीयैकशरणाः.
[Line 1 = 2ᵇ.]

— ᵇ) Ś₁ D₃. ₅ °संमतैः; D₁ °संनिभैः (for °संमितैः).

C. 3. 14456
B 3. 230. 3
K 3. 230. 3

अकारणाद्रुषा तात पुण्यस्थानात्परिच्युताः ॥ ३
अस्माभिः किल जातस्त्वमिति केनाप्युदाहृतम् ।
असत्यमेतत्संश्रुत्य तस्मान्नस्त्रातुमर्हसि ॥ ४
अक्षयश्च भवेत्स्वर्गस्त्वत्प्रसादाद्धि नः प्रभो ।
त्वां पुत्रं चाप्यभीप्सामः कृत्वैतदनृणो भव ॥ ५

स्कन्द उवाच ।

मातरो हि भवत्यो मे सुतो वोऽहमनिन्दिताः ।
यच्चाभीप्सथ तत्सर्वं संभविष्यति वस्तथा ॥ ६

मार्कण्डेय उवाच ।

एवमुक्ते ततः शक्रं किं कार्यमिति सोऽब्रवीत् ।
उक्तः स्कन्देन ब्रूहीति सोऽब्रवीद्वासवस्ततः ॥ ७
अभिजित्स्पर्धमाना तु रोहिण्या कन्यसी स्वसा ।
इच्छन्ती ज्येष्ठतां देवी तपस्तप्तुं वनं गता ॥ ८
तत्र मूढोऽसि भद्रं ते नक्षत्रं गगनाच्च्युतम् ।
कालं त्विमं परं स्कन्द ब्रह्मणा सह चिन्तय ॥ ९
धनिष्ठादिस्तदा कालो ब्रह्मणा परिनिर्मितः ।
रोहिण्याद्योऽभवत्पूर्वमेवं संख्या समाभवत् ॥ १०
एवमुक्ते तु शक्रेण त्रिदिवं कृत्तिका गताः ।
नक्षत्रं शकटाकारं भाति तद्वह्निदैवतम् ॥ ११
विनता चाब्रवीत्स्कन्दं मम त्वं पिण्डदः सुतः ।
इच्छामि नित्यमेवाहं त्वया पुत्र सहासितुम् ॥ १२

स्कन्द उवाच ।

एवमस्तु नमस्तेऽस्तु पुत्रस्नेहात्प्रशाधि माम् ।
स्नुषया पूज्यमाना वै देवि वत्स्यसि नित्यदा ॥ १३

— [a]) T1 G1 अकारणरुषा; M °रणं रुषा. G4 दृष्य (for रुषा). B1 तैश्च; D (except D2. 3. 5) G3 तैस्तु (for तात). — [d]) K1. 3. 4 D5 T G1 M पुण्यात् (for पुण्य-).

4 [b]) K3 अथ (for इति). D1 [उ]पा° (for [उ]दा°). — [c]) K4 B D (except D2. 3. 5) G3 तत्सत्यम्; T2 G1. 2. 4 अपत्यम् (for असत्यम्). S (except G3) संस्मृत्य (for संश्रुत्य).

5 [a]) G2. 4 तु (for च). — [c]) S (except G3) पुत्रं च त्वामभीप्सामः (T2 °मवाप्स्यामः).

6 K1 om. 6 (with the ref.). — [a]) Ś1 K3. 4 Dn D1. 3. 5 G4 भवंत्यो (for °त्यो). — [c]) B1–3 Dn (Dnim as in text) D4. 6 G3 M यद्वा(M3 °च्चा)पीच्छत (M °थ); T2 यदवाप्स्यथ (for यच्चाभीप्सथ). — [d]) Ś1 K (K1 om.) Dc D2. 3. 5 सदा; D1 T2 तदा (for तथा). B4 भविष्यति वरस्तथा; G2. 4 भविष्यति च सर्वदा.

7 M om. the ref. — After the ref., D4 reads 3. 218. 48[d]–49[d]. — [a]) K3 D1. 5 एवमुक्त्वा; B Dc Dn D4. 6 T2 G2. 3 विवक्षं(T2 °क्षि)तं; G1. 4 एवमुक्तस्. Ś1 K3 G4 M शक्रः (for शक्रं). T1 विवक्षितं ते शक्रश्च. — [b]) Ś1 K1. 2. 4 Dc D3 चा° (for सो°). — [c]) K4 उक्तं; Dc ततः; D2 उक्ते (for उक्तः). K3 देहीति (for ब्रूं). S (except G3) स्कन्देनोक्तः प्रब्रवीहि. — [d]) D1. 3 G4 तदा (for ततः

8 [a]) D5 सर्वनामा; G1 स्पर्धमानं. D3 च (for तु). — [b]) Ś1 K1. 2 अनुजा; K4 चानुजा; D2. 3 ह्यनुजा (for कन्यसी). T1 G1 रोहिण्या कनकाह्वया; T2 G2–4 रोहिण्यास्तु (T2 G3 °ण्या तु) कनीयसी. — [c]) Ś1 K1–3 D2. 3. 5. 6 T1 M1 इच्छती. K3 श्रेष्ठतां. — [d]) K3 D5 वने (for वनं).

9 [a]) K4 Dc1 D1 अत्र (for तत्र). — [c]) G2. 4 त्वमपरं (for त्विमं परं). Ś1 प्रति (for परं). K3. 3 स्कंदं (for स्कन्द). — [d]) Ś1 स हि चिंतय; K3 D1 पर्यचिंतयत् (D1 °यं); D3 G4 M सह चिंतया; D3 T1 G1 सह चिंतयन् (G1 °त्).

10 T3 om. 10[ab]. — [a]) Ś1 K1. 2. 4 B4 D3 (*sup. lin. sec. m.* as in text) G1. 2. 4 M तथा (for तदा). — [b]) Ś1 K B4 Dc D1–3. 5 परिकीर्तितः; B1–3 Dn D4. 6 G3 °कल्पितः. — [c]) K3 रोहिण्या योभवत्; B Dc Dn D4. 6 G3 रोहिणी ह्यभवत्; D1. 5 रोहिण्याश्चभवत्; T1 G1 रोहिण्याश्चाभवत्; T2 धाता प्रजापतिः. — [d]) Ś1 K2. 3 D3. 5 एवा; K4 D2 एषां (for एवं). Ś1 K1. 2 सदा°; T G1. 4 समो° (for समा°). B1 Dc M भवेत्.

11 [a]) Dc2 उक्ते च; D5 उक्तेन (for उक्ते तु). — [b]) K1. 4 B1. 3 Dc Dn2 T2 M1 गता (for गताः). — [c]) K4 D3 सर्पशीर्षाभं; B Dc Dn D1. 2. 4. 6 G3 सप्तशीर्षाभं for शकटा°). — [d]) T1 G1 नित्याग्नि°; T2 तथ्यग्नि° (for तद्वह्नि°).

12 [b]) Ś1 K D2. 3. 5 दयितः (for पिण्डदः). T2 सदा (for सुतः). — D2 om. (hapl.) 12[c]–15[b]. — [c]) T G1 M नित्यं सहिता; G4 नित्यं भवता (for नित्यमेवाहं).

13 D2 om. 13 (cf. v.l. 12). — [b]) K4 पुत्रं (for पुत्र-). — [d]) K3. 4 Dc D1. 3. 5 दिवि; Dn D4. 6 T G1. 3 देवी (for देवि). D3 वै सदा (for नित्यदा).

मार्कण्डेय उवाच ।
अथ मातृगणः सर्वः स्कन्दं वचनमब्रवीत् ।
वयं सर्वस्य लोकस्य मातरः कविभिः स्तुताः ।
इच्छामो मातरस्तुभ्यं भवितुं पूजयस्व नः ॥ १४
स्कन्द उवाच ।
मातरस्तु भवत्यो मे भवतीनामहं सुतः ।
उच्यतां यन्मया कार्यं भवतीनामथेप्सितम् ॥ १५
मातर ऊचुः ।
यास्तु ता मातरः पूर्वं लोकस्यास्य प्रकल्पिताः ।
अस्माकं तद्भवेत्स्थानं तासां चैव न तद्भवेत् ॥ १६
भवेम पूज्या लोकस्य न ताः पूज्याः सुरर्षभ ।
प्रजास्माकं हृतास्ताभिस्त्वत्कृते ताः प्रयच्छ नः ॥ १७
स्कन्द उवाच ।
दत्ताः प्रजा न ताः शक्या भवतीभिर्निषेवितुम् ।
अन्यां वः कां प्रयच्छामि प्रजां यां मनसेच्छथ ॥ १८
मातर ऊचुः ।
इच्छाम तासां मातृणां प्रजा भोक्तुं प्रयच्छ नः ।
त्वया सह पृथग्भूता ये च तासामथेश्वराः ॥ १९
स्कन्द उवाच ।
प्रजा वो दधि कष्टं तु भवतीभिरुदाहृतम् ।
परिरक्षत भद्रं वः प्रजाः साधु नमस्कृताः ॥ २०
मातर ऊचुः ।
परिरक्षाम भद्रं ते प्रजाः स्कन्द यथेच्छसि ।
त्वया नो रोचते स्कन्द सहवासश्चिरं प्रभो ॥ २१

C. 3. 14475
B. 3. 230. 21
K. 3. 230. 21

---

14 D₂ om. 14 (cf. v.l. 12). — [a]) Ś₁ K₁ °गणं सर्वं; Dn₁ G₁ °गणाः सर्वे; T °गणाः सर्वाः. — [b]) Ś₁ K₁. ₂ स्कंदो (for स्कन्दं) Dn₁ T₁ अब्रुवन् (for अब्रवीत्). — K₁ om. 14[c]–14[f]. — [c]) B₂ एवं (for वयं). — [d]) D₂ T G₁. ₂. ₄ स्मृताः (for स्तुताः). — Ś₁ K₂ om. 14[e/f]. — [e]) K₃ D₅ T₁ G₁. ₄ M इच्छाम (for °मो). — After 14, K₃. ₄ Dc D₁. ₂. ₅ S (except G₃) ins.:

1079* स तासां वचनं श्रुत्वा स्कन्दो वचनमब्रवीत् ।

[S (except G₃) तासां तु (for स तासां). T G₁ M भाषितं (for the first वचनं).]

15 D₂ om. 15[ab] (cf. v.l. 12). — Ś₁ K₁. ₃ D₃. ₅ S (except G₃) om. the ref. — [a]) B₂ Dn D₁. ₄. ₆ G₃ हि (for तु). — [c]) K₃ D₅ तन् (for यन्). — [d]) Ś₁ K₂ यथे°; K₃. ₄ Dc D₂. ₃. ₅ S (except G₃) इहे°; B₄ अभी° (for अथे°).

16 [a]) D₃ यथा सु (for यास्तु ता). — [b]) K₃ D₁. ₅ प्रवर्तिताः; K₄ D₃ S (except G₃) प्रकीर्तिताः; B₂ प्रकाशिताः; Dc प्रवर्तकाः. — [c]) K₁. ₂ D₁–₃. ₅ आस्मासु (for °कं). K₄ B₁. ₃ Dn₂. n₃ तु; B₂ Dn₁ D₄. ₆ T₂ G₃ च (for तद्). G₄ स्थानात् (for स्थानं).

17 [a]) Ś₁ K Dc D₁–₃. ₅ सर्व (for पूज्या). — [b]) Ś₁ K Dc D₁–₃. ₅ नित्यं (Ś₁ K₁. ₂ °त्य) (for न ताः). T G₁. ₂. ₄ °र्षिभिः (for °र्षभ). — [c]) Ś₁ K₁. ₂ हिताः; K₃ D₃ T G₁. ₂. ₄ हताः (for हृताः). T₂ G₂. ₄ [अ]स्माभिस् (for ताभिस्). — [d]) K₃. ₄ D₂. ₅ T₂ G₂. ₄ तां; M₁ तत् (for ताः).

18 Ś₁ K₁. ₂ D₂ om. (hapl.) 18[a]–19[b]; G₁ om. 18–21. — [a]) B₁ Dn वृत्ताः (Dn₁ हृताः); D₁ न ताः (for दत्ताः). K₄ D₁. ₃. ₅ दत्ता प्रजा न सा शक्या; G₂. ₄ दत्ता न ताः प्रजाः शक्याः. — [b]) K₄ निषेधितुं; T₁ निषीदितुं. — [c]) B₃. ₄ अन्या वः काः; T₁ अन्यां कां वः; G₁ कन्यां कामं; G₂. ₄ अन्यं कामं (for अन्यां वः कां). — [d]) K₄ B₃. ₄ प्रजा या; Dn₂. n₃ D₁. ₆ प्रजा यां; T M पूजां यां. T₁ मम मातरः (for मनसेच्छथ).

19 Ś₁ K₁. ₂ D₁ om. 19[ab]; G₁ om. 19 (cf. v.l. 18); K₄ om. (hapl.) 19–20. — [a]) B₁ इच्छामि; T₂ ब्रह्मा तु (for इच्छाम). G₂ भोक्तुं (for तासां). G₄ परिरक्षाम भोक्तुं त्वं. — [b]) B D₃. ₅ T₁ प्रजां (for प्रजा). G₂. ₄ स्कंद (for भोक्तुं). G₄ ह (for नः). — [d]) D₅ महे° (for अथे°).

20 K₄ G₁ om. 20 (cf. v.l. 19, 18). — [a]) M₂ पूजां (for प्रजा). T₁ च (for तु). — [c]) D₁ T₂ परिरक्षंतु; D₅ °रक्षतु; T₁ °रक्षथ.

21 G₁ om. 21 (cf. v.l. 18). — [b]) Ś₁ K Dc D₃. ₅. ₆ साधु; T₂ देहि (for स्कन्द). G₄ प्रयच्छ ह (for यथे°). — [c]) G₂. ₄ न (for नो). — [d]) Ś₁ K D₃. ₅. ₆ T₂ विभो (for प्रभो).

22 [b]) B₁. ₃ भवेद्धि; D₁ भवित्री (for भवन्ति). Ś₁ K₁. ₂. ₄ B₁. ₃ D₁. ₃ तरुणी (Ś₁ K₂ °णीः). B₁. ₃ प्रजा. — [c]) Ś₁ K₂ प्रधावत; K₃ °धावति; K₄ D₁. ₃ °बाधनं; T₁ G₁ M₁ °बाधध्वं; M₃ °बाध त्वं. — [d]) K₄ तावद्भूतैः; B₁ G₁ तादृग्रूपैः; T₂ G₃ तत्तद्रूपैः.

C. 3. 14475
B. 3. 230. 22
K. 3. 230. 22

स्कन्द उवाच ।

यावत्षोडश वर्षाणि भवन्ति तरुणाः प्रजाः ।
प्रबाधत मनुष्याणां तावद्रूपैः पृथग्विधैः ॥ २२
अहं च वः प्रदास्यामि रौद्रमात्मानमव्ययम् ।
परमं तेन सहिता सुखं वत्स्यथ पूजिताः ॥ २३

मार्कण्डेय उवाच ।

ततः शरीरात्स्कन्दस्य पुरुषः काञ्चनप्रभः ।
भोक्तुं प्रजाः स मर्त्यानां निष्पपात महाबलः ॥ २४
अपतत्स तदा भूमौ विसंज्ञोऽथ क्षुधान्वितः ।
स्कन्देन सोऽभ्यनुज्ञातो रौद्ररूपोऽभवद्ग्रहः ।
स्कन्दापस्मारमित्याहुर्ग्रहं तं द्विजसत्तमाः ॥ २५
विनता तु महारौद्रा कथ्यते शकुनिग्रहः ।
पूतनां राक्षसीं प्राहुस्तं विद्यात्पूतनाग्रहम् ॥ २६
कष्टा दारुणरूपेण घोररूपा निशाचरी ।
पिशाची दारुणाकारा कथ्यते शीतपूतना ।
गर्भान्सा मानुषीणां तु हरते घोरदर्शना ॥ २७
अदितिं रेवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः ।
सोऽपि बालाञ्शिशून्घोरो बाधते वै महाग्रहः ॥ २८
दैत्यानां या दितिर्माता तामाहुर्मुखमण्डिकाम् ।
अत्यर्थं शिशुमांसेन संप्रहृष्टा दुरासदा ॥ २९
कुमाराश्च कुमार्यश्च ये प्रोक्ताः स्कन्दसंभवाः ।
तेऽपि गर्भभुजः सर्वे कौरव्य सुमहाग्रहाः ॥ ३०
तासामेव कुमारीणां पतयस्ते प्रकीर्तिताः ।
अज्ञायमाना गृह्णन्ति बालकान्रौद्रकर्मिणः ॥ ३१
गवां माता तु या प्राज्ञैः कथ्यते सुरभिर्नृप ।
शकुनिस्तामथारुह्य सह भुङ्क्ते शिशून्भुवि ॥ ३२
सरमा नाम या माता शुनां देवी जनाधिप ।
सापि गर्भान्समादत्ते मानुषीणां सदैव हि ॥ ३३

---

23 a) G4 चेमं (for च वः). — b) G1 वरम् (for रौद्रम्). — c) Ś1 परमेतेन (for परमं तेन). — d) G2. 4 नित्यदा (for पूजिताः).

24 Ś1 K B1. 3. 4 Dc D1–3. 5 S (except G3) om. the ref. — a) B4 ततः स्कंदस्य पुरुषः. — b) B4 शरीरात् (for पुरुषः). Ś1 K1. 3 शाश्वतः प्रभुः (K1 °भः); B1–3 D (except D1–3. 5) G3 पावकप्रभः (for काञ्चन°). — c) D4 स्म; T2 तु (for स). — d) K4 D3 निपपात. Ś1 K B4 Dc D2. 3. 5 महाग्रहः; Dn D1 °प्रभः.

25 a) B D (except D2. 3. 5) G3 सहसा; T2 स ततो (for स तदा). — b) D4. 6 G3 संविग्नो° (for विसंज्ञो°). B2. 3 D (except D1–3. 5) G3 °र्दितः (for °न्वितः). — c) K2. 4 Dc D2. 5 T2 G2. 4 M1 °पस्मार (for °पस्मारम्). — f) B4 तु; T G1. 2. 6 M1 तद् (for तं).

26 a) Ś1 K2–4 B1. 3 Dc D4–6 G3 M °रौद्रः (for °रौद्रा). — b) Ś1 K1. 3 T G1 शत्रुनिग्रहः; B4 G1 शकुनिग्रहः. — c) T G1. 2. 4 मातृणां; M पितॄणां (for पूतनां). M रक्षसां (for राक्षसीं). B3 D1 आहुस्; Dc ह्याहुस् (for प्राहुस्). Dc T2 G1. 2. 4 तां (for तं).

27 a) Ś1 नष्टा (for कष्टा). Ś1 चनक°; K D2. 5 T1 M दारक° (for दारुण°). — c) M दारुणाचारा. — d) D3 सा तु पूतना; G2. 4 शीघ्रसूदना (for शीत°).

28 a) K3 Dc D4 M3 आहुर् (for प्राहुर्). — c) Ś1 बालः (for बालान्). Ś1 K1–3 Dc D3 शिशुभूंत्वा; B1–3 Dn D4. 6 महाघोरो (for शिशून्घोरो). K4 D2 T2 घोरान् (for घोरो). — d) D1 हि; D3 स (for वै).

29 b) T1 G1. 2. 4 M2 मुखमंडितां. — d) K3 संप्रतुष्टा; B2 सा प्रहृष्टा; D1 T1 G1 संप्रदुष्टा; D2. 3 °पुष्टा; T2 °हृष्टा (for °हृष्टा). G2. 4 M संप्रहृष्टां °सदां.

30 a) K B1. 3 Dc D1–3. 5 T G1 M कुमार्यश्च कुमाराश्च. — b) Ś1 K3 याः (for ये).

31 a) Ś1 K1–3 B4 Dc D1–3. 5 च (K3 B4 D1 तु) नारीणां; B1–3 Dn D4. 6 G3 तु पत्नीनां (for कुमा°). K4 तानेव चैव नारीणां. — c) B1. 2 Dn1. n3 T1 आजायमानान् (T1 °माना); B3. 4 D1. 3 आज्ञायमाना; Dn3 अज्ञायमानान्. G4 प्राहंति (for गृह्णन्ति). — d) Ś1 K Dc D2. 3. 5 दारका° (for बालका°). D2. 3 T G1. 2. 4 °कर्मणः (for °कर्मिणः).

32 a) K3 च (for तु). — b) T2 नव (for नृप). — c) M1 शकुनिं तु समारुह्य. — d) Ś1 K1. 3 D3 शिशुं. Dc प्रति (for भुवि).

33 ab) Ś1 K Dc D2. 3. 5 transp. माता and देवी. B3 या देवी; B4 माता या (by transp.); T1 G1 या तात. B1 गुणान्; B3 शुनो (for शुनां). T G1. 2. 4 तेषां (for देवी). — c) T2 तु; G2. 4 हि (for [अ]पि). D2. 3. 5 गर्भं (for गर्भान्). K4 समाधत्ते. — d) K1 Dc1 मानुषाणां; D3 मनुष्याणां. K4 हिताय (for सदैव). Ś1 B1 ह; K4 वै;

पादपानां च या माता करञ्जनिलया हि सा ।
करञ्जे तां नमस्यन्ति तस्मात्पुत्रार्थिनो नराः ॥ ३४
इमे त्वष्टादशान्ये वै ग्रहा मांसमधुप्रियाः ।
द्विपञ्चरात्रं तिष्ठन्ति सततं सूतिकागृहे ॥ ३५
कद्रूः सूक्ष्मवपुर्भूत्वा गर्भिणीं प्रविशेद्यदा ।
भुङ्क्ते सा तत्र तं गर्भं सा तु नागं प्रसूयते ॥ ३६
गन्धर्वाणां तु या माता सा गर्भं गृह्य गच्छति ।
ततो विलीनगर्भा सा मानुषी भुवि दृश्यते ॥ ३७
या जनित्री त्वप्सरसां गर्भमास्ते प्रगृह्य सा ।
उपविष्टं ततो गर्भं कथयन्ति मनीषिणः ॥ ३८
लोहितस्योदधेः कन्या धात्री स्कन्दस्य सा स्मृता ।
लोहितायनिरित्येवं कदम्बे सा हि पूज्यते ॥ ३९
पुरुषेषु यथा रुद्रस्तथार्या प्रमदास्वपि ।
आर्या माता कुमारस्य पृथक्कामार्थमिज्यते ॥ ४०
एवमेते कुमाराणां मया प्रोक्ता महाग्रहाः ।
यावत्षोडश वर्षाणि अशिवास्ते शिवास्ततः ॥ ४१
ये च मातृगणाः प्रोक्ताः पुरुषाश्चैव ये ग्रहाः ।
सर्वे स्कन्दग्रहा नाम ज्ञेया नित्यं शरीरिभिः ॥ ४२
तेषां प्रशमनं कार्यं स्नानं धूपमथाञ्जनम् ।
बलिकर्मोपहारश्च स्कन्दस्येज्या विशेषतः ॥ ४३

C. 3. 14498
B. 3. 230. 44
K. 3. 230. 44

B$_3$. $_4$ तु (for हि).

34 Ś$_1$ K$_1$. $_2$ om. 34^{ab}. — ^{a}) K$_4$ D$_2$. $_3$ हि; S (except G$_3$) तु (for च). — ^{b}) T$_1$ G$_1$ °या शुभा; G$_4$ °याभिधा (for °या हि सा). — After 34^{ab}, B D (except D$_1$–$_3$. $_5$) G$_3$ ins.:

1080* वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी ।
[B$_1$ दंतुरा (for वरदा).]

— ^{c}) K$_1$. $_2$ करंजैस्. K$_1$. $_2$ Dc D$_4$ T$_1$ तान् (for तां). Ś$_1$ करांश्चैतान्प्रयच्छंति. — ^{d}) Ś$_1$ K$_1$. $_2$. $_4$ जनाः; T$_2$ पराः (for नराः).

35 ^{a}) T$_1$ °दश ह्येवं; T$_2$ G$_1$. $_2$. $_4$ °दश ह्येते (for °दशान्ये वै). Ś$_1$ K$_1$. $_2$. $_4$ च (for वै). — ^{c}) T$_1$ G$_1$ दिवं च रात्रिं; T$_2$ G$_2$. $_4$ M दिवारात्रं च (T$_2$ तु) (for द्विपञ्चरात्रं). — ^{d}) Ś$_1$ सततः.

36 ^{a}) D$_6$ G$_3$ रुद्रः (for कद्रूः). K$_3$ Dc D$_1$. $_5$ सूक्ष्मं (Dc D$_1$ °क्ष्म) वपुः कृत्वा. — ^{b}) T$_1$ G$_1$ गर्भान्सं (for गर्भिणीं). B$_2$. $_4$ Dn D$_4$. $_6$ G$_3$ प्रविशति (for °शेद्). B$_1$. $_3$ मुदा; B$_2$ [ड]त; B$_4$ [अ]पि; Dn [अ]थ; D$_1$ यदि; D$_4$. $_6$ G$_2$ [अ]यं (for यदा). — ^{c}) D$_1$ सा भुंक्ते (by transp.). D$_4$. $_6$ G$_2$ स (for सा). B$_1$ तद्भुतं; B$_4$ तत्र तद् (for तत्र तं). — ^{d}) Ś$_1$ K$_1$. $_2$. $_4$ D$_2$. $_3$ कथयंति मनीषिणः (=38^d).

37 T$_2$ om. 37. — ^{a}) Ś$_1$ K$_1$–$_3$ G$_2$ च (for तु). T$_1$ G$_1$. $_4$ M सुजाता हरिणी या तु. — ^{b}) K$_4$ D$_1$–$_3$. $_5$ गृह्य तिष्ठति; T$_1$ G$_1$. $_4$ M पिबति प्रभो (for गृह्य गच्छति). — ^{c}) Ś$_1$ K Dc D$_1$–$_3$. $_5$ तु (for सा).

38 ^{a}) D$_5$ जनयित्री (for या जनित्री). — ^{b}) G$_1$ प्रसह्य (for प्रगृ°). D$_5$ च (for सा). — ^{c}) Ś$_1$ K$_1$. $_2$ Dn D$_1$. $_5$ °नष्टं (for °विष्टं). — ^{d}) Ś$_1$ K$_1$. $_2$. $_4$ D$_2$ सा (K$_1$ स; D$_2$ या) तु नागं प्रसूयते (=36^d).

39 ^{b}) B$_2$ या; T$_2$ सं-; M च (for सा). — ^{c}) K$_4$ लोहितायिति; D$_5$ °यति; T$_2$ °ता धात्रि; G$_3$ °येति (for °यनिर्). S (except G$_3$) [ए]व (for [ए]वं). — ^{d}) Ś$_1$ K$_1$ कदंबे. B$_4$ T G$_1$ M तु; D$_5$ [अ]भि-; G$_2$. $_4$ प्र- (for हि). B$_1$ गृह्य° (for पूज्य°).

40 ^{a}) B$_2$ G$_3$ यदा (for यथा). K$_1$. $_2$ रुद्रास्; G$_4$ रौद्रस् (for रुद्रम्). — ^{b}) Dc प्रमदा अपि (for °स्वपि). — ^{d}) Ś$_1$ कार्यार्थम्; D$_2$ मासार्थम् (for कामार्थम्). K$_3$ D$_1$ इष्यते; B$_1$ ईक्ष्यते (for इज्यते).

41 ^{a}) B$_4$ कुमारीणां. — ^{b}) Ś$_1$ K$_1$. $_2$ तु वै; D$_5$ परि- (for महा-). — ^{d}) To avoid hiatus, Ś$_1$ K B$_1$. $_3$. $_4$ Dc D$_1$–$_6$ T M ह्यशिवा° (for अशिवा°). Ś$_1$ शिवास्तथा; B$_1$ शिवास्तुतः; D$_1$ तथा शिवाः; T$_1$ G$_1$ शिवा ग्रहाः; T$_2$ G$_2$. $_4$ M शिवाः स्मृताः. B$_2$ Dn G$_3$ शिशूनां ह्यशिवास्ततः.

42 ^{a}) S (except G$_3$) एवं (for ये च). G$_4$ °गणः प्रोक्तः. — ^{b}) K$_3$ वै ग्रहाः; B$_3$ विग्रहाः (for ये ग्रहाः). — ^{c}) Ś$_1$ K$_1$. $_2$ राजन् (for नाम). — ^{d}) K$_4$ मनीषिभिः (for शरी°).

43 ^{a}) S (except G$_3$ M$_1$) कुर्यात् (for कार्यं). — ^{b}) Dc D$_3$ स्थानं (for स्नानं). D$_3$ धूपस् (for धूपं). K B$_4$ Dc D$_1$–$_3$. $_5$ T G$_1$. $_2$. $_4$ तथा (for अथ). K$_4$ B$_1$ D$_1$–$_3$ [अ]र्चनं; T$_1$ G$_1$ जपं (for [अ]ञ्जनम्). M स्नानधूपांज(M$_1$ °पास)नादिभिः. — ^{c}) Ś$_1$ K$_1$ (m as in text). $_2$ बल्युद्वर्तनमभ्यंगः; K$_3$ B$_2$ Dn D$_1$. $_5$ बलिकर्मोपहाराश्च; B$_1$ T$_1$ G$_1$ M °हारैश्च; T$_2$ G$_2$. $_4$ °हारं च. — ^{d}) D$_1$. $_3$ [इ]ष्टा; T$_2$ G$_2$. $_4$ M$_1$ [इ]ज्यां (for [इ]ज्या).

44 D$_2$ om. 44. — ^{a}) B$_2$. $_4$ Dn D$_4$. $_6$ G$_3$ अभ्यर्चिताः; T$_1$ G$_1$ एवा° (for एते°). D$_1$ सम्यक् (for सर्वे). — ^{b}) K$_2$ Dc$_2$ D$_5$ शुभां; T$_1$ °भान् (for °भं). — ^{c}) T$_1$ G$_1$. $_2$. $_4$

C. 3. 14499.
B. 3. 230. 45
K. 3. 230. 45

एवमेतेऽर्चिताः सर्वे प्रयच्छन्ति शुभं नृणाम् ।
आयुर्वीर्यं च राजेन्द्र सम्यक्पूजानमस्कृताः ॥ ४४
ऊर्ध्वं तु षोडशाद्वर्षाद्ये भवन्ति ग्रहा नृणाम् ।
तानहं संप्रवक्ष्यामि नमस्कृत्य महेश्वरम् ॥ ४५
यः पश्यति नरो देवाञ्जाग्रद्वा शयितोऽपि वा ।
उन्माद्यति स तु क्षिप्रं तं तु देवग्रहं विदुः ॥ ४६
आसीनश्च शयानश्च यः पश्यति नरः पितॄन् ।
उन्माद्यति स तु क्षिप्रं स ज्ञेयस्तु पितृग्रहः ॥ ४७
अवमन्यति यः सिद्धान्क्रुद्धाश्चापि शपन्ति यम् ।
उन्माद्यति स तु क्षिप्रं ज्ञेयः सिद्धग्रहस्तु सः ॥ ४८
उपाघ्राति च यो गन्धान्रसांश्चापि पृथग्विधान् ।
उन्माद्यति स तु क्षिप्रं स ज्ञेयो राक्षसो ग्रहः ॥ ४९
गन्धर्वाश्चापि यं दिव्याः संस्पृशन्ति नरं भुवि ।
उन्माद्यति स तु क्षिप्रं ग्रहो गान्धर्व एव सः ॥ ५०
आविशन्ति च यं यक्षाः पुरुषं कालपर्यये ।
उन्माद्यति स तु क्षिप्रं ज्ञेयो यक्षग्रहस्तु सः ॥ ५१
अधिरोहन्ति यं नित्यं पिशाचाः पुरुषं क्वचित् ।
उन्माद्यति स तु क्षिप्रं पैशाचं तं ग्रहं विदुः ॥ ५२
यस्य दोषैः प्रकुपितं चित्तं मुह्यति देहिनः ।
उन्माद्यति स तु क्षिप्रं साधनं तस्य शास्त्रतः ॥ ५३
वैक्लव्याच्च भयाच्चैव घोराणां चापि दर्शनात् ।
उन्माद्यति स तु क्षिप्रं सत्त्वं तस्य तु साधनम् ॥ ५४

M दीर्घं; T₂ दिव्यं (for वीर्यं). T₁ G राज्यं च (for राजेन्द्र). — [d]) B₄ कुर्यात् (for सम्यक्). Ś₁ K₁. ₂. ₄ D₃. ₅ पूज्य (for पूजा-). T₂ G₁. ₂. ₄ -नमस्कृतैः (for -नमस्कृताः).

45 [a]) T₁ G₁ षोडशकाद् (for तु षोडशाद्). — [b]) T₁ न (for ये). T₂ ग्रहंति (for भवन्ति). — [c]) B₂ अनहं (for तानहं). — [d]) K₁ महेश्वरीं; K₂ °रीः (for °रम्).

46 [a]) K₄ M₂ देवं (for देवान्). — [b]) T G₂. ₄ जाग्रन्वा. — K₃ om. 46[c]–47[b]. — [c]) =47[c], 48[c], etc., etc. G₂. ₅ उन्माद्य तु (for उन्माद्यति). T₁ उन्मादि तु क्षिप्रमेव. — [d]) Dn देव° (for देव°)!

47 K₃ om. 47[ab] (cf. v.l. 46). The sequence of K₃ is extremely confused; it is ignored here. — [b]) S (except G₃) transp. यः and नरः. — [c]) D₂. ₃ च (for तु). — [d]) B transp. 47[d] and 48[d]. Ś₁ K₂. ₃ D₁–₃ विज्ञेयः (for स ज्ञेयः). Ś₁ K₁. ₃ च; T₁ हि (for तु).

48 G₂. ₄ om. 48; K₃ om. 48[ab]. — [a]) Ś₁ K (K₃ om.) D₁. ₃ अवमन्यंति; T₁ G₁ °मन्येत; T₂ अवेक्ष्यते हि. Ś₁ K (K₃ om.) D₁–₃ यं; D₅ वः (for यः). Ś₁ क्रुद्धाः; K (K₃ om.) D₁–₃. ₅ सिद्धाः; D₅ क्रुद्धान्; T₂ सिद्धः (for सिद्धान्). — [b]) D₅ क्रुराश्; M क्रुद्धश् (for क्रुद्धाश्). M₁ चाभि- (for चापि). D₅ विशंति यं; T₁ G₁ M शपत्यपि (for शपन्ति यम्). K₄ D₁–₃ च (for यम्). Ś₁ सिद्धाश्च शमयंति यं; T₂ सिद्धान्पश्यन्युपेत्य च. — K₁ (hapl.) om. 48[d]–49[c]. — [d]) B transp. 47[d] and 48[d]. D₃. ₅ °गण° (for °ग्रह°). — After 48, G₂. ₄ read 52.

49 K₁ om. 49[abc] (cf. v.l. 48); G₁ om. 49–50. — [a]) K₃ D₁. ₅ उपघ्राति तु (D₁ च); B₁ T₂ G₄ M उपा- (G₄ °प)घ्रायति; B₄ उपजिघ्रति. K₄ D₂. ₃ तु (for च). D₅ यं गन्धा (for यो गन्धान्). — [b]) D₅ तासां; T₂ नृणां (for रसान्). T G₄ M चापि (for चैव). K₃ विशेषतः; D₅ पृथग्विधं. — K₃ om. (hapl.) 49[d]–50[c]. — [d]) Ś₁ K₃ D₃. ₅ वि- (for स). B₂. ₄ Dc T₁ M₁ राक्षसग्रहः.

50 G₁ om. 50; K₃ om. 50[abc] (cf. v.l. 49). — [a]) B₄ या; D₂ ये; T₁ यद् (for यं). — [b]) B₁–₃ D (except D₂. ₃) G₃ संविशंति (for °स्पृशन्ति). B₁ वनं; T₂ M₂ नरा (for नरं). — [d]) Ś₁ B₁ D₃ गंधर्व. S (except G₃; G₁ om.) उच्यते (for एव सः).

51 B₁. ₃ D (except D₁–₃. ₅) transp. 51 and 52. — [a]) Ś₁ K₁–₃ B₁ T₁ G₁ M तु; T₂ G₄ [अ]पि (for च). Ś₁ तं; K₁ यां; G₃ कं (for यं). K₁ यक्षः; T₁ वृक्षः; T₂ कामाः; G₂. ₄ कामात् (for यक्षाः). — [b]) K₁ G₄ पुरुषः; K₄ पौरुषं; T₂ G₃ पुरुषान्. — K₃ lacuna for 51[cd]. — [d]) B₃ ग्रहो गंधर्व एव सः (cf. 50[d]); B₄ साधनं तत्र संस्तुतः; G₂. ₄ पैशाचं तं ग्रहं विदुः (=52[d]).

52 G₂. ₄ read 52 after 48. B₁. ₃ D (except D₁–₃. ₅) transp. 51 and 52. T₂ om. 52. — [a]) B₄ अभि° (for अधि°). K₁. ₂. ₄ ये (for यं). D₃ क्षिप्रं (for नित्यं). — [b]) B₁–₃ Dn D₁. ₄. ₅ G₃ प्रति (for क्वचित्). — [d]) B Dn D₄. ₅ G₃ ग्रहः पैशाच एव सः; G₂. ₄ ज्ञेयः सिद्धग्रहस्तु सः (=48[d]).

53 [a]) Ś₁ पर-; K₁. ₃ सर्व-; D₄ G₃ तस्य (for यस्य). T₁ G₁ M प्रकुपितैश्. — [b]) Ś₁ K₃ D₂. ₄ M₂ मुह्यंति; Dc माद्यति (for मुह्यति). — [c]) G₃ ततः (for स तु). — [d]) M₂ विधानं (for साधनं).

54 [a]) Ś₁ K₁–₃ Dc D₂. ₃ चापि (for चैव). — [b]) T₁ G₁ M₁ चैव (for चापि). — [d]) Ś₁ B Dn D₂. ₃ सांत्वं (B₁

कश्चित्क्रीडितुकामो वै भोक्तुकामस्तथापरः ।
अभिकामस्तथैवान्य इत्येष त्रिविधो ग्रहः ॥ ५५
यावत्सप्ततिवर्षाणि भवन्त्येते ग्रहा नृणाम् ।
अतः परं देहिनां तु ग्रहतुल्यो भवेज्ज्वरः ॥ ५६
अप्रकीर्णेन्द्रियं दान्तं शुचिं नित्यमतन्द्रितम् ।
आस्तिकं श्रद्दधानं च वर्जयन्ति सदा ग्रहाः ॥ ५७
इत्येष ते ग्रहोद्देशो मानुषाणां प्रकीर्तितः ।
न स्पृशन्ति ग्रहा भक्तान्नरान्देवं महेश्वरम् ॥ ५८

इति श्रीमहाभारते आरण्यकपर्वणि एकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥

२२०

मार्कण्डेय उवाच ।
यदा स्कन्देन मातृणामेवमेतत्प्रियं कृतम् ।
अथैनमब्रवीत्स्वाहा मम पुत्रस्त्वमौरसः ॥ १
इच्छाम्यहं त्वया दत्तां प्रीतिं परमदुर्लभाम् ।
तामब्रवीत्ततः स्कन्दः प्रीतिमिच्छसि कीदृशीम् ॥ २

स्वाहोवाच ।
दक्षस्याहं प्रिया कन्या स्वाहा नाम महाभुज ।
बाल्यात्प्रभृति नित्यं च जातकामा हुताशने ॥ ३
न च मां कामिनीं पुत्र सम्यग्जानाति पावकः ।
इच्छामि शाश्वतं वासं वस्तुं पुत्र सहाग्निना ॥ ४

स्कन्द उवाच ।
हव्यं कव्यं च यत्किंचिद्द्विजा मन्त्रपुरस्कृतम् ।
होष्यन्त्यग्नौ सदा देवि स्वाहेत्युक्त्वा समुद्यतम् ॥ ५
अद्य प्रभृति दास्यन्ति सुवृत्ताः सत्पथे स्थिताः ।

C. 3. 14519
B. 3. 231. 6
K. 3. 231. 6

शास्त्रं) (for सत्त्वं). Ś1 K1. 2 प्र-; D2 हि (for तु). M1 साधयेत् (for साधनम्). De सत्त्वं साधनशास्त्रतः.

55 a) K3 क्वचित्; T1 किंचित्; G2 कञ्चित् (for कश्चित्). K1. 4 De क्रीडति कामो; K3 क्रीडतुकामो; D1 क्रीडन्सकामो; T2 G2 क्रीडनकामो. K3. 4 De D1–3. 5 M वा; B4 T2 G1. 2 हि (for वै). — b) T1 हातुं (for भोक्तुं). B4 [अ]परे; D1 [अ]पि वा; T1 G2. 4 ग्रहः; T2 [अ]ग्रतः (for [अ]परः). — T2 om. 55cd. — c) Ś1 K1. 2 D1 अतिक्रामंस्; D5 रतिकामस् (for अभिकामस्). — d) B2 T1 G1. 2. 4 M2 [ए]वं (for [ए]ष). M2 त्रिविधा ग्रहाः.

56 a) Ś1 K1. 3 D1–3. 5 यावत्तु सप्त वर्षाणि. — b) B1 तावंत्येते (for भवन्त्येते). D1 भृशं (for नृणाम्). — c) S (except G3) तु मर्त्यानां (for देहिनां तु). — d) S (except T1 G3) °तुल्या (for °तुल्यो). D5 ज्वरो भवेत् (by transp.). K4 नरः; S (except G3) जरा (for ज्वरः).

57 a) Ś1 K1. 2 °यमानं (for °यं दान्तं). — c) D4. 6 G3 शुद्धाचारं च; M1 दैवतपरं (for श्रद्दधानं च).

58 b) S (except G1. 3) मनुष्याणां. — c) K3. 4 D1–3. 5 T1 G1 नरान्; G3 सदा (for ग्रहा). — d) K3 G1 ग्रहो; K4 D3. 5. 6 T1 ग्रहा; D1 देव (for नरान्). K2 देवो महेश्वरः; S (except G3 M1) देवे महेश्वरे.

Colophon. — *Major parvan:* Ś1 K1. 2 T2 G3. 4 आरण्य. — *Sub-parvan:* G1 मार्कंडेयसमस्या. B1–3 D G3 (all om. sub-parvan name) mention only आंगिरस (De °रसोपाख्यान). — *Adhy. name:* B3. 4 Dn1. n3 D4. 6 T2 G3 कुमारोत्पत्तिः; G1 कुमारचरित्रे ग्रहानुकथनं; G2 ग्रहादेशः. — *Adhy. no.* (figures, words or both): Dn1. n3 229; Dn2 228; D1 232; T1 221; T2 G1. 2. 4 M (M3 *inf. lin.*) 220 (M3 orig. 224). — *Śloka no.:* Dn1 55; Dn2. n3 59; D1. 6 60.

220

1 b) B1 तत्तत् (for एतत्). B4 कृतं प्रियं (by transp.); S (except G3) प्रकीर्तितं.

2 c) Ś1 K1. 2 तदा (for ततः).

3 c) D5 ज्ञानात् (for बाल्यात्).

4 a) K1 B Dn D4. 6 G3 स (for च). — b) T2 पुत्रक (for पावकः). — c) T1 G1 M वस्तुं (for वासं). — d) T1 G1 बाढं; M वासं (for वस्तुं).

5 a) B4 पवित्रं हि (for च यत्किंचिद्). — b) B1. 4 G1 द्विज (for द्विजा). K4 B3 Dn D4. 6 G3 द्विजानां मंत्रसंस्तु- (D4. 6 G3 °स्कृ)तं. — c) B1 होमस्त्वग्नौ (for होष्यन्त्यग्नौ). D5 तदा (for सदा). T1 सर्वे (for देवि). — d) K1 समद्युतिं; B3 (m as in text) सदा हुतं; B4 Dn D4. 6 G3

C. 3. 14519
B. 3. 231. 6
K. 3. 231. 6

एवमग्निस्त्वया सार्धं सदा वत्स्यति शोभने ॥ ६
मार्कण्डेय उवाच ।
एवमुक्ता ततः स्वाहा तुष्टा स्कन्देन पूजिता ।
पावकेन समायुक्ता भर्त्रा स्कन्दमपूजयत् ॥ ७
ततो ब्रह्मा महासेनं प्रजापतिरथाब्रवीत् ।
अभिगच्छ महादेवं पितरं त्रिपुरार्दनम् ॥ ८
रुद्रेणाग्निं समाविश्य स्वाहामाविश्य चोमया ।
हितार्थं सर्वलोकानां जातस्त्वमपराजितः ॥ ९
उमायोन्यां च रुद्रेण शुक्रं सिक्तं महात्मना ।
आस्ते गिरौ निपतितं मिञ्जिकामिञ्जिकं यतः ॥ १०
संभूतं लोहितोदे तु शुक्रशेषमवापतत् ।
सूर्यरश्मिषु चाप्यन्यदन्यच्चैवापतद्भुवि ।
आसक्तमन्यद्वृक्षेषु तदेवं पञ्चधापतत् ॥ ११
त एते विविधाकारा गणा ज्ञेया मनीषिभिः ।
तव पारिषदा घोरा य एते पिशिताशनाः ॥ १२
एवमस्त्विति चाप्युक्त्वा महासेनो महेश्वरम् ।
अपूजयदमेयात्मा पितरं पितृवत्सलः ॥ १३
अर्कपुष्पैस्तु ते पञ्च गणाः पूज्या धनार्थिभिः ।
व्याधिप्रशमनार्थं च तेषां पूजां समाचरेत् ॥ १४
मिञ्जिकामिञ्जिकं चैव मिथुनं रुद्रसंभवम् ।
नमस्कार्यं सदैवेह बालानां हितमिच्छता ॥ १५
स्त्रियो मानुषमांसादा वृद्धिका नाम नामतः ।

समुद्भूतं.

6 [a]) B₂ होष्यंति (for दास्यन्ति). — [b]) D₆ संवृताः; T₂ सुव्रताः. K₃ B₄ D₅ सत्पथि; G₂. ₄ °थ (for °थे).

7 [a]) K₁. ₃ Dc₂ D₃. ₆ M₂ एवमुक्त्वा. K₁. ₂ तदा (for ततः). — [b]) T₁ G₁ स्कंदेन तु सुपूजिता. — [d]) Ś₁ K₁. ₂ भक्ता; B₄ तत्र; T₁ G₁ ततः (for भर्त्रा).

8 [a]) G₄ अतो (for ततो). — [b]) S (except G₃) अभाषत (for अथाब्रवीत्). — [d]) Ś₁ K₁. ₂ G₁ त्रिपुरांतकं; M₁ ते महेश्वरं.

9 [a]) B₄ पुत्रेण (for रुद्रेण). — [d]) D₁ G₁ अपराजित.

10 [a]) Ś₁ K₁. ₂ तु (for च). — D₂ om. (hapl.) from सिक्तं (in 10[b]) up to शुक्र (in 11[b]). — [b]) S (except G₃) शुक्रं (for शुक्रं). — [c]) Ś₁ K₁–₃ D₃ (before corr.). ₅ अस्ते; K₄ B₂–₄ Dc Dn D₃ (by corr.). ₄. ₆ G₃ अस्मिन् (for आस्ते). — [d]) Cf. 15[a]. Ś₁ K₁. ₂ मिंजिका(K₂ °कां)-मिंजिको (Ś₁ °के); K₄ मञ्जिकामञ्जिकं; B₄ मिंजिकामिंजितं; D₃ मिंजिकामिंजिकं; T₁ G₁ M₁ मुंजको मुंज(M₁ °जि)का; T₂ मिंजिरो मिंजिका; G₂. ₄ मुंजि(G₄ मुष्टि)को मुष्टिका; M₂ मुंजिको मुंजिका. K₄ B₁. ₃ T G₁. ₂. ₄ M₁ ततः; Dc च यत्; M₂ तथा (for यतः). — After 10, S (except G₃) ins.:

1081* मिथुनं वै महाभाग तत्र तद्रुद्रसंभवम् ।

11 D₂ om. 11[a] (cf. v.l. 10). — [a]) T₁ G₁ संभूतं. Ś₁ K₁ लोहितोदेति; K₄ °ताहे तु; D₅ °तं हेतु; T₁ G₁ °ते देशे; G₂. ₄ M °तोहेशे (for °तोदे तु). T₂ द्रुतं लोकहितो-हेशे. — [b]) Ś₁ K₁–₃ D₁. ₃. ₅ शुक्रं; T₁ शुद्धं; T₂ M₁ शुक्र°; G₁. ₂. ₄ M₂ शुक्रं (for शुक्र°). K₁ इवापतत्; K₄ अवाप्त-वान्; B₄ समापतत्; T₁ G₁. ₄ M अपातयत् (for अवापतत्). B₂ शुक्राशयमवाप्य तत्. — [c]) G₄ [अ]ग्राव् (for [अ]न्यद्). — [d]) Ś₁ K₁. ₂ चापि (for चैव). — [f]) Ś₁ K B₂. ₃ Dc D₁–₃. ₅ एतत् (for एवं). T₁ G₁ M₂ [अ]भवत् (for [अ]-पतत्).

12 [a]) Ś₁ K₁. ₂. ₄ तदेते; B D (except D₂. ₃) तत्र ते (B₁ एते हि); T₂ एतेषु; G₂. ₄ एते तु (for त एते). — [b]) G₄ गुह (for गणा). Ś₁ मनीषिणा; B₂ महर्षिभिः. — T₁ G₁ om. (hapl.) 12[c]–14[b]. — [c]) B₁ एवं (for तव). Ś₁ K₁–₃ Dc D₁. ₅ T₂ G₄ M त एव (Ś₁ भवंति; K₁ भवते; K₂ ततस्ते; K₃ तव ये; Dc तवैव; D₁ न चैते; D₅ तवैते) पार्षदा घोरा. — [d]) Ś₁ T₂ एतेपि (for य एते). Ś₁ B₁–₃ Dn₁. n₂ D₁. ₄. ₆ पिशिताशिनः.

14 Before 14, K₃ B D (except D₁. ₂. ₅; D₃ marg. *sec. m.*) S (T₁ G₁ om.) ins. मार्कंडेय उ° (rosp. मार्कंडेयः). — T₁ G₁ om. 14[ab] (cf. v.l. 12). — [a]) K₄ अर्धं° (for अर्क°). B₁ D₂ च (for तु). T₂ मे (for ते). — [c]) S (except G₃) व्याधेः (for व्याधि-). D₂ °र्थाय (for °र्थं च). B₃ तु (for च). — [d]) Ś₁ K Dc D₁–₃. ₅ T₂ पूजा. Ś₁ K D₁–₃. ₅ समंततः; T₁ G₁. ₂. ₄ M अथारभेत्; T₂ यथा-र्थतः (for समा°).

15 [a]) Cf. 10[d]. Ś₁ K₁ मिंजिकामिंजिकञ्च (K₁ °का); K₂ °मिंजितं; K₄ D₃ मञ्जिकामञ्जिकं; D₂ मंजिकामंजिकं; T₁ G₁ मुंजको मुंजका; T₂ मंजको मंजका; G₂. ₄ M मुंजि(G₄ मुष्टि-; M₂ मुंज)को मुष्टि(M मुंजि)का. — [d]) K₃ Dc D₁. ₅ लोकानां (for बाला°). D₅ शमम् (for हितम्).

16 [b]) K₃ D₂ विद्धिका; T G₁. ₂. ₄ वृक्ष(T₂ G₂ °क्षि)का (for वृद्धिका). — [c]) Ś₁ K₁–₃ Dc D₃. ₅. ₆ नार्यो (for

वृक्षेषु जातास्ता देव्यो नमस्कार्याः प्रजार्थिभिः ॥ १६
एवमेते पिशाचानामसंख्येया गणाः स्मृताः ।
घण्टायाः सपताकायाः शृणु मे संभवं नृप ॥ १७
ऐरावतस्य घण्टे द्वे वैजयन्त्याविति श्रुते ।
गुहस्य ते स्वयं दत्ते शक्रेणानाय्य धीमता ॥ १८
एका तत्र विशाखस्य घण्टा स्कन्दस्य चापरा ।
पताका कार्तिकेयस्य विशाखस्य च लोहिता ॥ १९
यानि क्रीडनकान्यस्य देवैर्दत्तानि वै तदा ।
तैरेव रमते देवो महासेनो महाबलः ॥ २०
स संवृतः पिशाचानां गणैर्देवगणैस्तथा ।
शुशुभे काञ्चने शैले दीप्यमानः श्रिया वृतः ॥ २१
तेन वीरेण शुशुभे स शैलः शुभकाननः ।
आदित्येनेवांशुमता मन्दरश्चारुकन्दरः ॥ २२
सावित्र्युवाच ।

च्युतः स्वराज्याद्वनवासमाश्रितो
विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृप-
स्तव प्रसादाज्ज्वलनार्कसंनिभः ॥ २६

यम उवाच ।

ददानि ते सर्वमनिन्दिते वरं

C 3. 1o775
B. 3. 297. 28
K 3. 298. 29

भर्तारमनुगच्छन्ती तथावस्थं सुमध्यमा ।

[T1 transp. lines 1 and 2. — (L. 2) T1 तथावृत्तं.] — a) K (K3 missing) Dc D2. 3. 5 °संपन्ना. — b) K2. 4 B3 D4. 6 यतव्रता (for पति°).

19 K3 श्रीयमः. — a) T3 G4 निवर्त्य. — b) K (K3 missing) D5 T3 कुरुष्वास्यौर्ध्वदैहिकं; Dc D2. 3 °ष्वास्यो-र्ध्वदे(D2. 3 °दै)हिकं. — After 19, D3 ins.:

1322* एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ।

20 a) Dc2 (marg. *sec. m.*) एष (for यत्र). Dc नियमे (for नीयते). — c) B Dn D4. 6 T3 G3 मया च (for मयापि). — $20^d = 1.113.13^d$: $4.50.7^d$; etc., etc.

21 a) K4 B D (except D3. 5) T1 G3 गुरुभक्त्या. — b) K3 Dc1 D2. 3. 5 G4 भर्तृस्नेहाद् ; T1 M भर्तृस्नेह°. — c) G3 तवैव च (for तव चैव).

22 a) = (var.) 3. 246. 35a. K4 B4 Dn D3. 4. 6 G3 M1 साप्तपदं. K1. 4 B2–4 D (except D3. 5) G3 M1 मैत्रं. — b) D3 वृद्धास् (for बुधास्). G4 न्यायार्थं° (for तत्त्वार्थ°). — c) = 3. 246. 35c. K1. 4 B3. 4 D5 T1 तु ; K3 तत् ; D3 ते (for च). — d) D3 ते (for तत्).

23 Before 23, T1 ins. सावित्री. — a) B4 नानार्थ-वंतस्. K (K3 missing) Dc D2. 3. 5 हि ; T1 M च (for तु). — b) K (K3 missing) Dc D2. 3. 5 सत्यं (for वासं). B Cnp (!) प्रतिश्रयं ; Dn1. n3 परिश्रयं ; Dn3 प्रतिश्रमं. — c) D5 M विजानतो ; T G1. 3. 4 विज्ञा(T1 °ज्ञा)नंतो. — d) = 24d. B3 तस्यां वसंतो ; T1 तद्वै संतो (for तस्मात्सन्तो).

24 K1. 3. 4 D2 om. (hapl.) 24. — a) G1 एतस्य. Dc D3. 5 S (except G3) धर्मस्य. — b) D3 स्म तन् ; D5 सतां ; T1 स्वतन् (sic) ; T2 G1. 3. 4 मतं ; M3 स्म सन् (for स्म तं). — c) Dc om. वै. D5 om. the second मा. B3 Dc Dn D4. 6 च वांछेत् ; S (except G3) चतुर्थं. — $24^d = 23^d$.

25 K3 श्रीयमः. — a) B3 गच्छस्व (for तुष्टोऽस्मि). — b) B4 सुधाक्षर° ; G4 स्फुटाक्षर°. — c) M1 वृणीष्वेव. G1 विनाथ. — d) = 27a. K4 Dc2 D3. 3 G1. 3 ददामि. K (K3 missing) D3 सम्यग् ; M1 धर्मम् ; M3 धर्म्यम् (for सर्वम्).

26 a) K2 D5 G1. 4 स राज्याद् ; D4 G3 स्वराड्राद् ; T1 च राज्याद्. — d) B4 °नार्कसप्रभ.

27 K3 श्रीयमः. — a) = 25d. K4 D3 G3. 4 ददामि. B3 Dn D4. 6 G3 [S]हं नम् (for सर्वम्). — b) Dc D3 transp. यथा and त्वया. — c) K1. 4 Dc D3. 3 T तवा-(T1 °था)ध्वनि. T1 क्लेश° ; G1. 3. 4 क्लांति° (for ग्लानि°).

C. 3. 16775
B. 3. 297. 28
K. 3. 298. 29

यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वना ग्लानिमिवोपलक्षये
निवर्त गच्छस्व न ते श्रमो भवेत् ॥ २७

सावित्र्युवाच ।

कुतः श्रमो भर्तृसमीपतो हि मे
यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः
सुरेश भूयश्च वचो निबोध मे ॥ २८
सतां सकृत्संगतमीप्सितं परं
ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण संगतं
ततः सतां संनिवसेत्समागमे ॥ २९

यम उवाच ।

मनोनुकूलं बुधबुद्धिवर्धनं
त्वयाहमुक्तो वचनं हिताश्रयम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं द्वितीयं वरयस्व भामिनि ॥ ३०

सावित्र्युवाच ।

हृतं पुरा मे श्वशुरस्य धीमतः
स्वमेव राज्यं स लभेत पार्थिवः ।
जह्यात्स्वधर्मं न च मे गुरुर्यथा
द्वितीयमेतं वरयामि ते वरम् ॥ ३१

यम उवाच ।

स्वमेव राज्यं प्रतिपत्स्यतेऽचिरा-
न्न च स्वधर्मात्परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे
निवर्त गच्छस्व न ते श्रमो भवेत् ॥ ३२

सावित्र्युवाच ।

प्रजास्त्वयेमा नियमेन संयता
नियम्य चैता नयसे न कामया ।
अतो यमत्वं तव देव विश्रुतं
निबोध चेमां गिरमीरितां मया ॥ ३३
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ ३४

---

28 a) B Dn $D_{4.6}$ T_1 G_3 M transp. कुतः and श्रमः. K (K_3 missing) Dc $D_{2.5}$ [अ]द्य; D_3 च (for हि). — b) D_3 गतिर्ध्रुवं. — d) K_4 $D_{2.3}$ सुरेश भूयोपि; Dc स्वरेण भूयश्च; T_1 सुरोत्तमान्यच्च.

29 a) B_3 °त्संगमम् (for °त्संगतम्). Dn_3 वरं; S (except G_3) मतं (for परं). K_4 सकृत्सतां संगतमीप्सितं वरं. — c) K_4 S (except G_3) सत्पुरुषेषु. — d) K_4 D_3 (marg. *sec. m.*) ततः सतां संगतमेव मन्ये.

30 K_3 श्रीयमः. — a) K_4 बत; Dc_2 बहु-; D_2 G_3 M बल- (for बुध-). — b) $K_{1.2}$ त्वयेदमुक्तं; B Dn D_{4-6} G_3 त्वया यदुक्तं. — $30^a = 36^a$. — d) $B_{3.4}$ Dc $D_{2.5}$ भाविनि (for भामिनि).

31 T_1 om. the ref. — a) M_1 परैर् (for पुरा). T $G_{1.2.4}$ हृतं हि राज्यं श्वशुरस्य मे परैः. — b) K_3 प्रतिपत्स्यतेचिरात् (cf. 32^a); K_4 B D (except D_5) G_3 लभतां स पार्थिवः. — c) B_{1-3} Dn $D_{4.6}$ G_3 स्वधर्मान्. T_3 $G_{2.4}$ ransp. न and च. G_1 M यम (for यथा). $K_{1.2.4}$ Dc $D_{2.3.5}$ न च स्वधर्मं प्र(K_4 वि)जहीत मे गुरुर् — d) $B_{1.2.4}$ Dn $D_{4.6}$ T_1 G_3 एतद्; Dc $D_{2.5}$ $G_{2.4}$ M$_3$ एवं; T_3 G_1 एनं (for एतं).

32 a) B_1 पुनः स्वराज्यं. K_4 स हि लप्स्यते; D_3 प्रतिलप्स्यते; G_1 प्रतिपद्यते. — b) K_3 प्रतिहास्यते; K_4 परिहार्यते; T_1 $G_{1.2.4}$ M$_1$ परिहीयते.

33 a) K_4 प्रजा त्वयेयं; B_{1-3} D (except $D_{2.5}$; D_1 missing) G_3 प्रजास्त्वयैता. T_1 प्रजास्त्वमेतां च नियम्य चैव. — b) K_4 नियम्य चैतां; D_3 °म्य चैतान्; D_5 °म्य चैना; T_1 त्वमेव सर्वा; T_3 नियम्यते ता; G_1 °म्य चेतो; $G_{2.4}$ °म्य चैवं. K (K_3 missing) B_3 Dc Dn_3 $D_{2.3.5}$ G_3 न काम्यया; $B_{1.2}$ Dn_1 Cn निकामया; G_1 M$_1$ न कामतः; Cnp न कामया (as in text). ❀ Cn: निकामया कामिनेनार्थेन । ❀ — c) B Dn $D_{4.6}$ $G_{2.3}$ ततो (for अतो).

34 a) D_3 सर्वभूतानां.

35 b) $B_{2.4}$ Dn_1 (*sup. lin.* as in text). n_3 D_4 G_3 Cnp (see below) भक्तिं; G_1 शांतिं (for शक्तिं). ❀ Cn: अशक्तिपेशलाः शक्तिकौशलहीनाः । पाठान्तरे भक्तिः श्रद्धा कौशलं च ताभ्यां हीनाः । संधिरार्षः । ❀ — c) $K_{1.3.4}$ Dc $D_{2.3.5}$ संतस्त्वपि ज्ञमित्रेषु; Dn_3 °स्ते चाप्य°; T_3 $G_{1.2.4}$ संतः स्वेष्वप्य(G$_3$ °पि)मित्रेषु.

एवंप्रायश्च लोकोऽयं मनुष्याः शक्तिपेशलाः ।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ॥ ३५

यम उवाच ।

पिपासितस्येव यथा भवेत्पय-
स्तथा त्वया वाक्यमिदं समीरितम् ।
विना पुनः सत्यवतोऽस्य जीवितं
वरं वृणीष्वेह शुभे यदिच्छसि ॥ ३६

सावित्र्युवाच ।

ममानपत्यः पृथिवीपतिः पिता
भवेत्पितुः पुत्रशतं ममौरसम् ।
कुलस्य संतानकरं च यद्भवे-
त्तृतीयमेतं वरयामि ते वरम् ॥ ३७

यम उवाच ।

कुलस्य संतानकरं सुवर्चसं
शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ ३८

सावित्र्युवाच ।

न दूरमेतन्मम भर्तृसंनिधौ
मनो हि मे दूरतरं प्रधावति ।
तथा व्रजन्नेव गिरं समुद्यतां
मयोच्यमानां शृणु भूय एव च ॥ ३९
विवस्वतस्त्वं तनयः प्रतापवां-
स्ततो हि वैवस्वत उच्यसे बुधैः ।
शमेन धर्मेण च रञ्जिताः प्रजा-
स्ततस्तवेहेश्वर धर्मराजता ॥ ४०
आत्मन्यपि न विश्वासस्तावान्भवति सत्सु यः ।
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ ४१
सौहृदात्सर्वभूतानां विश्वासो नाम जायते ।
तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ॥ ४२

यम उवाच ।

उदाहृतं ते वचनं यदङ्गने
शुभे न तादृक्त्वदृते मया श्रुतम् ।
अनेन तुष्टोऽस्मि विनास्य जीवितं
वरं चतुर्थं वरयस्व गच्छ च ॥ ४३

सावित्र्युवाच ।

ममात्मजं सत्यवतस्तथौरसं
भवेदुभाभ्यामिह यत्कुलोद्वहम् ।

C. 3. 16792
B. 3. 297. 45
K. 3. 298. 46

---

36 K₂ श्रीयम उ°. — [a]) K₁. ₂ T₁ G₄ °स्यैव (for °स्येव). B₁–₃ Dn D₄–₆ G₃ transp. यथा and भवेत्. T₂ G₁. ₂. ₄ जलं (for पयस्). — [b]) D₅ मया चाहम् (for त्वया वाक्यम्). — [c]) =30[c]. T₂ G₁. ₄ °तो हि (for °तोऽस्य). K₄ जीवितात्. — [d]) K₄ D₅ सुते (for शुभे). K₁. ₂ T₁ M यमिच्छसि; K₄ यमीप्ससि; B₂. ₃ D₃. ₅ T₂ G₂ यदीच्छसि. B₄ वरं तृतीयं वरयस्व भाविनि.

37 [b]) B (B₃m as in text) Dn D₄. ₆ T₂ G₃ तथौ° (for ममौ°). — [c]) T₁ न (? read नु); G₂ हि (for च). K₁. ₂ D₃. ₅ S (except G₂) तद् (for यद्). — [d]) B Dn D₄. ₆ T₁ G₃ एतद्; D₅ T₂ G₁. ₂. ₄ एनं (for एतं).

38 K₂ श्रीयमः. — [a]) K₁. ₄ Dc₁ D₂. ₃. ₅ G₁ M सुवर्चसां; K₂ च तद्भवेत् (cf. 37[c]); T₂ समुच्चयं. — [d]) =45[d]. D₅ पथं; T₂ G₂ पतिं; G₁. ₄ पथि. Dc D₂ त्वयागता.

39 [c]) K₁. ₂ T G₁ यथा; B₁–₃ Dn D₄. ₆ G₃ अथ; B₄ G₂. ₄ पथा; D₅ परि- (for तथा). T₁ व्रजंस्त्वैव. — [d]) K₁. ₂ B₄ D₃. ₅ T₁ हि; K₄ Dc₂ D₂ ह; B₃ तत् (for च).

40 [b]) K (K₂ missing) D₃ T₁ M अतोसि; B₃ ततोसि (for ततो हि). B₄ Dc Dn₂ D₂ G₁. ₃ उच्यते. — [c]) K₄ B₁. ₂. ₄ D (except D₅; D₁ missing) समेन; T₂ G₁. ₄ श्रमेण (for शमेन). B₁. ₂. ₄ Dn D₆ G₃ M चरंति ताः; G₃. ₄ चिरं जिताः (for च रञ्जिताः). — [d]) D₅ ततः स वेदेत्र च धर्मराजः.

41 [b]) K₁. ₂ T₁ तावद्; B Dn D₄. ₆ G₃ तथा; D₅ स वै (for तावान्). K₁. ₂ संमतः (for सत्सु यः). — [c]) =42[c]. K₁. ₂ यस्मात्. — [d]) T G₁. ₂. ₄ सर्वः प्रणयते नरः (T₁ °यते जनः; G₂ °मते नरः).

42 [b]) B₄ विश्वास उपजायते. — K₄ om. 42[cd]. — [c]) =41[c]. D₃ S (except G₂) सत्सु तस्माद् (by transp.).

43 K₂ श्रीयमः. — [a]) T₂ तव (for ते). T₁ उदाहृतं यद्वचनं त्वयांगने. — [b]) K (K₂ missing) Dc D₂. ₃. ₅ शुभं. G₂. ₄ तावत् (for तादृक्). B₁. ₂ Dn D₄. ₆ G₃ श्रुतं

C. 3. 16792
B. 3. 297. 45
K. 3. 298. 46

शतं सुतानां बलवीर्यशालिना-
मिदं चतुर्थं वरयामि ते वरम् ॥ ४४
यम उवाच ।
शतं सुतानां बलवीर्यशालिनां
भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे
निवर्त दूरं हि पथस्त्वमागता ॥ ४५
सावित्र्युवाच ।
सतां सदा शाश्वती धर्मवृत्तिः
सन्तो न सीदन्ति न च व्यथन्ति ।
सतां सद्भिर्नाफलः संगमोऽस्ति
सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥ ४६
सन्तो हि सत्येन नयन्ति सूर्यं
सन्तो भूमिं तपसा धारयन्ति ।
सन्तो गतिर्भूतभव्यस्य राज-
न्सतां मध्ये नावसीदन्ति सन्तः ॥ ४७
आर्यजुष्टमिदं वृत्तमिति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥ ४८
न च प्रसादः सत्पुरुषेषु मोघो
न चाप्यर्थो नश्यति नापि मानः ।
यस्मादेतन्नियतं सत्सु नित्यं
तस्मात्सन्तो रक्षितारो भवन्ति ॥ ४९
यम उवाच ।
यथा यथा भाषसि धर्मसंहितं
मनोनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा
वरं वृणीष्वाप्रतिमं यतव्रते ॥ ५०
सावित्र्युवाच ।
न तेऽपवर्गः सुकृताद्विनाकृत-
स्तथा यथान्येषु वरेषु मानद ।

मया (by transp.). — [d]) K1 च वक्तुं (for चतुर्थं).

44 T3 om. (hapl.) 44–45. — [a]) G1 मदात्मजं सत्यवतस्तदौरसं. — [b]) B2. 3 इति; Dc D3 अपि (for इह). — [c]) =45[a]. K (K3 missing) B4 Dc D2. 3. 5 बलिनां महात्मनाम् (for बलवीर्य°). — [d]) K (K3 missing) Dc D2. 3. 5 इमं (for इदं). T1 G1 M चतुर्थमेकं (T1 °मेतद्; G1 °मेनं) वरयामि ते वरं. — For 44, G2. 4 subst.:

1323* वरं वृणे सत्यवतो मयि प्रभो
भवेत्सुतानां शतमेतदीप्सितम् ।
[Cf. 1324*.]

45 T3 om. 45 (cf. v.l. 44). — [a]) =44[c]. B2 एवं (for शतं). T1 M कुल° (for बल°). — [b]) K4 तथा; Dc तदा (for तव). — [c]) K4 D3 भविता (for न भवेन्). — 45[d]=38[d]. — For 45, G2. 4 subst.:

1324* तथास्तु ते पुत्रशतं शुभानने
द्रुतं निवर्तस्व परिश्रमो न ते ।
[Cf. 1323*.]

46 [a]) K (K3 missing) Dc D2. 3. 5 हिता (for सदा). B Dn D4. 6 G3 शाश्वत- (for शाश्वती). — [b]) K1. 3 B4 Dc D2. 5 S (except G3) व्यथंते. — [c]) T3 G1. 3. 4 संगमो (T3 G1 °तो) नाफलो (for नाफलः संगमो). — [d]) K (K3 missing) Dc D2. 3. 5 नानुभवंति; [3] नानुपश्यंति.

47 K1. 3 om. (hapl.) 47. — [a]) G4 सत्यो हि. Dc D3 भवंति शूराः (for नयन्ति सूर्यं). — [b]) K4 D3 G3 संतो हि भूमिं; Dc D3 सतां भूमिं. G4 संतो हि भूमिं तपसा चरंति. — [c]) K4 D4 G3 T1 °भवस्य (for °भव्यस्य). — [d]) Dc D3 न विषीदंति (for नावसी°).

48 [a]) K1. 3 आर्यवृत्तम्; Dc D3 °दृष्टम्. — [d]) B1–3 Dn D4. 6 G3 नावेक्षंति; T3 G1. 3. 4 नापेक्षंते. B1. 3 Dn D4. 6 G3 M परस्परं (for प्रति°).

49 [a]) D3 न सत्; T1 नराः (for न च). B2 Dn3 D4 सत्पुरुषेण; D3 सत्यभाषेषु; S पुरुषेषु (G3 °ण). T1 सत्सु (for मोघो). K4 न प्रमादः (sic) सत्यभाषिषु मोघो [marg. *sec. m.* न च प्रमादः (sic) सत्पुरुषेष्वमोघो]. — [b]) T1 न चाप्यनर्थो. K4 D3 नश्यते. K4 D3 नाभिमानः; B2 नापमानः; B4 वापि मानः. — [c]) B2. 3 तस्मादेतत्; Dc2 D3 यस्मादेनं; D3 यस्मादेव; G1 यस्मादेतं.

50 K3 श्रीयमः. — [a]) G1 भाषिणि (for भाषसि). — [b]) Dc D3 स्व- (for सु-). — [c]) D3 च (for मे). — [d]) B D (except D3; D1 missing) G3 पति° (for यत°).

51 [a]) K1. 3 तेस्ति किंचित् (for तेऽपवर्गः). D3 न तेपवर्गः सुकृतां तथा कृतो; T1 न मे स्वर्गः सत्यवताकृतो यथा; G1 न मेपवर्गः सुकृताद्विनाकृतास्. — [b]) K4 D3. 5 यथा (for तथा). T1 [अ]हम°; G1 [अ]यम° (for यथा°). — [d])

वरं वृणे जीवतु सत्यवानयं
यथा मृता ह्येवमहं विना पतिम् ॥ ५१
न कामये भर्तृविनाकृता सुखं
न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता श्रियं
न भर्तृहीना व्यवसामि जीवितुम् ॥ ५२
वरातिसर्गः शतपुत्रता मम
त्वयैव दत्तो ह्रियते च मे पतिः ।
वरं वृणे जीवतु सत्यवानयं
तवैव सत्यं वचनं भविष्यति ॥ ५३

मार्कण्डेय उवाच ।

तथेत्युक्त्वा तु तान्पाशान्मुक्त्वा वैवस्वतो यमः ।
धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥ ५४
एष भद्रे मया मुक्तो भर्ता ते कुलनन्दिनि ।
अरोगस्तव नेयश्च सिद्धार्थश्च भविष्यति ॥ ५५
चतुर्वर्षशतं चायुस्त्वया सार्धमवाप्स्यति ।
इष्ट्वा यज्ञैश्च धर्मेण ख्यातिं लोके गमिष्यति ॥ ५६
त्वयि पुत्रशतं चैव सत्यवाञ्जनयिष्यति ।
ते चापि सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः ।
ख्यातास्त्वन्नामधेयाश्च भविष्यन्तीह शाश्वताः ॥ ५७
पितुश्च ते पुत्रशतं भविता तव मातरि ।
मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः ।
भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्रिदशोपमाः ॥ ५८
एवं तस्यै वरं दत्त्वा धर्मराजः प्रतापवान् ।
निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ ॥ ५९
सावित्र्यपि यमे याते भर्तारं प्रतिलभ्य च ।
जगाम तत्र यत्रास्या भर्तुः शावं कलेवरम् ॥ ६०
सा भूमौ प्रेक्ष्य भर्तारमुपसृत्योपगूह्य च ।
उत्सङ्गे शिर आरोप्य भूमावुपविवेश ह ॥ ६१
संज्ञां च सत्यवाँल्लब्ध्वा सावित्रीमभ्यभाषत ।

C. 3. 16811
B. 3. 297. 64
K. 3. 298. 65

K1. 2 ह्येनमहं; G2. 4 [अ]स्म्येवमहं. B2 Dn D4. 6 T1 G3 M transp. विना and पतिम्.

52 T2 om. 52ab. Dn2 transp. the lines of the stanza. — b) B3. 4 श्रियं (for दिवम्). — c) Dc D2 भर्तृविनाकृतं. B4 दिवं; Dc D2. 3 श्रियं (for श्रियं). — d) K1. 2 D5 [अ]भ्यवसामि (for व्यव°).

53 a) T1 वरातिसर्गे. — b) K2 B1. 2 T1 G1. 2 M1 दत्ता; M2 यत्ता (for दत्तो). T G1. 2. 4 म्रियते (for ह्रि°). — d) G1 तथैव; G4 त्वयैव. — After 53, K4 D3 ins. (an addl.) colophon.

54 K1. 2 T1 om. the ref. M2 श्रीमार्कंडेयः. — a) K4 D3 च (for तु). B Dn D4. 6 G3 तं पाशं; Dc D2 वै पाशान्. — b) S (except G3) सत्यवतो (for वैवस्वतो).

55 Before 55, B4 D4. 6 G3 ins. यम उ°; M1 धर्मः. — a) T2 G1. 2 एहि; G4 एवं (for एष). Dc D2 भर्ता (for भद्रे). — b) Dc2 D2 कुलवर्णिनि; T2 (m as in text) वरवर्णिनि. — After 55ab, S (except G3) ins.:

1325* तोषितेन त्वया साध्वी वाक्यैर्धर्मार्थसंहितैः ।
[G2. 4 तोषितोहं. T2 M साध्वि.]

— c) K2 आरोग्यस्तव. K1 नीयश्च; K3 नोजाश्च; T2 G1. 2. 4 देहश्च. — d) Dn D4. 6 G3 स (for च).

56 K1 om. (hapl.) 56a–57b. — a) B2 Dn D4. 6 G3 चतुर्वर्षशतायुश्च. — b) K2 तव; Dc2 D2 तया (for त्वया). K2 Dc2 D2 अवाप्स्यसि; K4 D3 उपेष्यति. — c) T1 यज्ञांश्च. — d) S (except G3) transp. ख्यातिं and लोकं. K2 गमिष्यसि.

57 = (var.) Matsyapurāṇa 213. 14–15ab. K1 om. 57ab (cf. v.l. 56). — a) K2. 4 Dc D2. 3. 5 T1 चापि (for चैव). — K1. 2 T1 M om. (hapl.) 57a–58d. — c) K4 D3. 5 °ख्यामपुत्राख्या; Dc D2 °ख्यामका पुत्रा; T2 G1. 2. 4 °ख्यामधेयाख्या. — f) K4 D3. 5 [इ]ति (for [इ]ह).

58 = Matsyapurāṇa 213. 15cd–16. K1. 2 T1 M om. 58abcd (cf. v.l. 57). — b) D5 भविष्यत् (for भविता). — c) Cf. 3. 277. 22b. T2 °व्यां मालवानां च.

59 Before 59, M1 ins. मार्कंडेयः. — a) Dc D2. 3. 5 वरान् (for वरं). — c) D5 निवर्त्य चैव सावित्री.

60 b) M ह (for च). — cd) Dc2 D2 यत्रासा; D4–6 यत्रास्य. T G1. 2. 4 M जगाम यत्र तच्छापं (T1 °च्चापं; G1 °च्छावं) भर्तुस्तस्य विचेतनं.

61 a) K4 D3 भूमौ संप्रेक्ष्य भर्तारं. — b) K4 Dc D2. 3. 5 [अ]भि° (for [उ]प°). N (except K1. 2 D5; K3 D1 missing) T2 G [उ]पगूह्य (for °गूह्य). — c) K1. 2 उत्संगेस्य शिरः स्थाप्य.

62 a) T1 G1 स संज्ञां (for संज्ञां च). B Dn D4. 6 G3

C. 3. 16811
B. 3. 297. 64
K. 3. 298. 65

प्रोष्यागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै ॥ ६२

सत्यवानुवाच ।

सुचिरं बत सुप्तोऽस्मि किमर्थं नावबोधितः ।
क्व चासौ पुरुषः श्यामो योऽसौ मां संचकर्ष ह ॥ ६३

सावित्र्युवाच ।

सुचिरं बत सुप्तोऽसि ममाङ्के पुरुषर्षभ ।
गतः स भगवान्देवः प्रजासंयमनो यमः ॥ ६४
विश्रान्तोऽसि महाभाग विनिद्रश्च नृपात्मज ।
यदि शक्यं समुत्तिष्ठ विगाढां पश्य शर्वरीम् ॥ ६५

मार्कण्डेय उवाच ।

उपलभ्य ततः संज्ञां सुखसुप्त इवोत्थितः ।
दिशः सर्वा वनान्तांश्च निरीक्ष्योवाच सत्यवान् ॥ ६६
फलाहारोऽस्मि निष्क्रान्तस्त्वया सह सुमध्यमे ।
ततः पाटयतः काष्ठं शिरसो मे रुजाभवत् ॥ ६७
शिरोभितापसंतप्तः स्थातुं चिरमशक्नुवन् ।
तवोत्सङ्गे प्रसुप्तोऽहमिति सर्वं स्मरे शुभे ॥ ६८
त्वयोपगूढस्य च मे निद्रयापहृतं मनः ।
ततोऽपश्यं तमो घोरं पुरुषं च महौजसम् ॥ ६९
तद्यदि त्वं विजानासि किं तद्ब्रूहि सुमध्यमे ।
स्वप्नो मे यदि वा दृष्टो यदि वा सत्यमेव तत् ॥ ७०
तमुवाचाथ सावित्री रजनी व्यवगाहते ।
श्वस्ते सर्वं यथावृत्तमाख्यास्यामि नृपात्मज ॥ ७१
उत्तिष्ठोत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत ।
विगाढा रजनी चेयं निवृत्तश्च दिवाकरः ॥ ७२
नक्तंचराश्चरन्त्येते हृष्टाः क्रूराभिभाषिणः ।
श्रूयन्ते पर्णशब्दाश्च मृगाणां चरतां वने ॥ ७३
एताः शिवा घोरनादा दिशं दक्षिणपश्चिमाम् ।
आस्थाय विरुवन्त्युग्राः कम्पयन्त्यो मनो मम ॥ ७४

सत्यवानुवाच ।

वनं प्रतिभयाकारं घनेन तमसा वृतम् ।

स पुनर् (for सत्यवान्). — [b]) T1 G2. 4 M प्रत्य° (for अभ्य°). — [d]) K4 उदैक्षत.

63 M2 om. the ref. — [a]) D5 तव (for बत). K4 सुप्तोहं. — [b]) K4 वानि° (for नाव°). — [c]) T2 वा स; G2. 4 वासौ (for चासौ). — [d]) K1 यो मां; K2 यो मा; T G1. 2. 4 योथ (for योऽसौ). K1. 2 संप्रचकर्ष ह; K4 मां संप्रकर्षितः; D3 S (except G2) मां संप्रकर्षति; D5 मां विचकर्ष ह.

64 [a]) K2 तव; B D (except D3) G3 त्वं प्र- (for बत). — [b]) K1. 2 ममांगे.

65 [a]) Dc D2 विश्रांतश्च; T2 विरुजश्च. — [c]) K1 D5 सत्वं; K2 S (except G2) सद्यं; D3 शक्यः. — [d]) D5 विशालां; T1 G1 विगाढं.

66 K1. 2. 4 D3 om. the ref. — [a]) M पुनः (for ततः). — [b]) B2 सोथ (for सुव्र-). — [c]) K1 D5 दिगंतांश्च; a few MSS. वनांताश्च.

67 Before 67, M1 ins. सत्यवान्. — [a]) K1. 2 [s]स्मि विश्रांतस्; B4 T1 [s]सि निष्क्रांतस्; T2 [s]भिनि°; G1. 2 हि नि°; G4 विनि°. — [d]) G4 रुजो°.

68 K4 om. 68-70. — [a]) K1. 2 °तापसंयुक्तः. — [b]) M2 स्थातुं चाशक्नुवन्पुनः. — [cd]) B2 ततोत्संगं. B1. 2. 4 Dn D4. 6 G2 प्रसुप्तोस्मि इति (with hiatus!).

69 K4 om. 69 (cf. v.l. 68). — [c]) K1. 2 तदा; T2 G2. 4 अहं (for तमो). — [d]) K1. 2 सु- (for च).

70 K4 om. 70 (cf. v.l. 68). — [a]) T1 G1. 2. 4 तं (for तद्). — [b]) Dc2 D2 किंचिद् (for किं तद्). — [c]) K1. 2 स्वप्नो न; B2. 3 Dn D4. 6 स्वप्नेन; Dc D2 स्वप्ने तु; D3 स्वप्नोत्र; D5 स्वप्नोयं; T G स्वप्नो हि; M1 स्वप्नोथ; M2 स्वप्नोस्य; only B1. 4 as in text! K1. 2 Dc D2. 3. 5 स मया (for यदि वा). — [d]) Dn D4 मयि (for यदि). K1. 2 D5 तथ्यम्; Dc D2 [s]स्वप्नम् (for सत्यम्). B2 तु (for तत्).

71 Before 71, S (except G2) ins. मार्कंडेयः. — [b]) K4 Dc D2 व्यवगाहत; T1 G1 व्यवगाहते. — [c]) K1 सुप्ते; K2 स्वप्ने (for श्वस्ते). — [d]) B2 व्याख्यास्यामि.

72 [b]) S (except G3) पितरं पश्य सुव्रतं. — [c]) G4 चैव.

73 [a]) G1 °श्च दृश्यंते. — [b]) D5 G2. 4 दुष्टाः; G1 घृष्टाः (for हृष्टाः). — [c]) B2 संतु°; D3 G2. 4 पूर्ण°; M वर्ण° (for पर्ण°).

74 [a]) K (K3 missing) Dc D2. 3 घोररूपा. B Dn D4. 6 एतान्घोरान् (B1. 4 °ता घोरं; B2 °ता घोरान्) शिवा नादान्. — [c]) K4 अह्वाय (for आस्थाय). K4 विचरंत्युग्राः; Dc D2 विरुवं°. — [d]) A few MSS. कंपयंतो.

75 [a]) M2 °घोरं (for °कारं). — [b]) K (K3 missing)

न विज्ञास्यसि पन्थानं गन्तुं चैव न शक्ष्यसि ॥ ७५

सावित्र्युवाच ।

अस्मिन्नद्य वने दग्धे शुष्कवृक्षः स्थितो ज्वलन् ।
वायुना धम्यमानोऽग्निर्दृश्यतेऽत्र क्वचित्क्वचित् ॥ ७६
ततोऽग्निमानयित्वेह ज्वालयिष्यामि सर्वतः ।
काष्ठानीमानि सन्तीह जहि संतापमात्मनः ॥ ७७
यदि नोत्सहसे गन्तुं सरुजं त्वाभिलक्षये ।
न च ज्ञास्यसि पन्थानं तमसा संवृते वने ॥ ७८
श्वः प्रभाते वने दृश्ये यास्यावोऽनुमते तव ।
वसावेह क्षपामेतां रुचितं यदि तेऽनघ ॥ ७९

सत्यवानुवाच ।

शिरोरुजा निवृत्ता मे स्वस्थान्यङ्गानि लक्षये ।
मातापितृभ्यामिच्छामि संगमं त्वत्प्रसादजम् ॥ ८०
न कदाचिद्विकाले हि गतपूर्वो मयाश्रमः ।
अनागतायां संध्यायां माता मे प्ररुणद्धि माम् ॥ ८१
दिवापि मयि निष्क्रान्ते संतप्येते गुरू मम ।
विचिनोति च मां तातः सहैवाश्रमवासिभिः ॥ ८२
मात्रा पित्रा च सुभृशं दुःखिताभ्यामहं पुरा ।
उपालब्धः सुबहुशश्चिरेणागच्छसीति ह ॥ ८३
का त्ववस्था तयोरद्य मदर्थमिति चिन्तये ।
तयोरदृश्ये मयि च महद्दुःखं भविष्यति ॥ ८४
पुरा मामूचतुश्चैव रात्रावस्रायमाणकौ ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयुतौ ॥ ८५
त्वया हीनौ न जीवाव मुहूर्तमपि पुत्रक ।

C. 3. 16835
B. 3. 297. 88
K. 3. 298. 89

Dc Ds. 8 घोरेण (for घनेन). — c) T G1. 2. 4 M1 विज्ञास्यामि; M2 °स्यति. — d) K2 सक्ष्यति; B2 शक्ष्यसे; Dc D2 शक्यसे; T1 G1. 2. 4 M शक्यते; T2 शक्ष्यते.

76 T2 om. 76-77. — b) K1. 2. 4 D2 G2 शुष्क(K1 °ष्के)वृक्षे; D5 शुष्को वृक्षः. — c) T1 G1. 2. 4 धूय°; M1 धाम्य°. B D (except D2. 8) G2 [S]त्र (for Sग्निर्). — d) K (K3 missing) D3 तु; K4 (marg. *sec. m.*) D5 च; B Dc Dn D2. 4. 6 G2 [S]ग्निः; M2 हि (for Sत्र). K4 (marg. *sec. m.* as in text) पृथक् पृथक् (for क्वचित्क्वचित्).

77 T2 om. 77 (cf. v.l. 76). — a) K4 D5 S (except G2; T2 om.) अतो (for ततो). K1. 3 °यत्वेह; D3 °यित्वेदं; G1 °यित्वाहं; G2. 4 °यस्वेह. — b) K1. 3 D4 ज्वल°. K (K3 missing) D2. 8 पावकं; Dc1 D2 T1 G1. 2. 4 सर्वशः.

78 Before 78, T2 ins. सावित्री. — b) B Dc Dn D2. 4. 6 G2 त्वां हि; D5 चोप-; T1 G1 चापि; T2 चाभि-. — c) K4 विज्ञास्यसि; B2 च जानासि. — d) D5 संवृते पथि; T2 °ते तु वै; G2. 4 °तेन वै (for °ते वने).

79 a) T G1. 2. 4 प्रभाते तु (for श्वः प्रभाते). — b) K (K3 missing) D5 यास्यामो. — c) K2. 4 Dc D2 वसामे-(K4 °मी)ह. K4 B Dn D2-6 G2 M2 एकां; T2 एतद् (for एतां). — d) T G1. 2. 4 उचितं; M1 रुचिरं. K4 विभो (for Sनघ).

80 a) M1 विवर्ता (for निवृत्ता). — d) S (except G2 M2) संयोगं (for संगमं).

81 a) K1. 3 च काले; B1. 4 Dn (Dn3 before corr.) D6 G2 विकालं; B2. 3 D2 हि काले; Dc D2 विकाले; Dn3 (after corr.) D4 हि कालं. D5 च; T2 [S]पि (for हि). — b) K4 गतपूर्वोयमाश्रमः; B2 T2 G2. 4 M °र्वोहमाश्रमात्; T1 G1 °र्वो मयाश्रमान्. — d) D3 वै (for मे). K (K3 missing) Dc D2. 3. 5 माता वै संरुण(Dc3 D2 संरुजा-; D3 प्ररुण)द्धि मां; S (except G2) रुणद्धि यदा हि मां सदा.

82 c) K4 B D (except D2. 8) G2 हि (for च). Dc D2 मे (for मां). K (K3 missing) Dc D2. 3. 5 माता (for तातः). — d) Dc D2 सहेत्याश्रम°.

83 a) A few MSS. माता- (for मात्रा). Dc D2 तु (for च). T2 G2. 4 मातापितृभ्यां सुभृशं. — c) T1 उपालभ्य. B1. 4 Dn D4. 6 G2 च (for सु-). — d) K1. 3 B1. 2. 4 Dn D4. 6 G2 हि; K4 T G1. 2. 4 च (for ह).

84 a) S (except T2 G2) स्ववस्था. — c) B2 transp. मयि and च. K (K3 missing) Dc D2. 3. 5 अदृश्ये मयि ताभ्यां हि.

85 b) K4 रात्रावश्रायमानकौ (marg. *sec. m.* रात्र्यावस्थानमागतं); D3 °वाश्राय°; T G1. 2. 4 °वाघ्रा(T1 °वाह्रा; G4 °घ्याघ्रा)य मां तदा; M °वास्रायमाणकौ. — c) K (K3 missing) D3. 5 सुभृशं (for भृशं सु-). — d) T1 G1 बहुशः प्रतिसंयतौ.

86 a) K4 (marg. *sec. m.* as in text) हीनौ (for हीनौ). K1. 3. 4 (marg. *sec. m.* as in text) B2 Dc1 D5 M2 जीवेव; B2. 4 D2 T1 G1. 2. 4 जीवावो; Dc2 D2 जीवेद्य (for जीवाव). — b) K1. 3 इव (for अपि). — c) K4 (marg. *sec. m.* as in text) स्वरिष्यते; T1 G1. 4 धरि-

C. 3. 14835
B. 3. 297. 88
K. 3. 298. 89

यावद्धरिष्यसे पुत्र तावन्नौ जीवितं ध्रुवम् ॥ ८६
वृद्धयोरन्धयोर्यष्टिस्त्वयि वंशः प्रतिष्ठितः ।
त्वयि पिण्डश्च कीर्तिश्च संतानं चावयोरिति ॥ ८७
माता वृद्धा पिता वृद्धस्तयोर्यष्टिरहं किल ।
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ॥ ८८
निद्रायाश्चाभ्यसूयामि यस्या हेतोः पिता मम ।
माता च संशयं प्राप्ता मत्कृतेऽनपकारिणी ॥ ८९
अहं च संशयं प्राप्तः कृच्छ्रामापदमास्थितः ।
मातापितृभ्यां हि विना नाहं जीवितुमुत्सहे ॥ ९०
व्यक्तमाकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम ।
एकैकमस्यां वेलायां पृच्छत्याश्रमवासिनम् ॥ ९१
नात्मानमनुशोचामि यथाहं पितरं शुभे ।
भर्तारं चाप्यनुगतां मातरं परिदुर्बलाम् ॥ ९२
मत्कृतेन हि तावद्य संतापं परमेष्यतः ।
जीवन्नावनुजीवामि भर्तव्यौ तौ मयेति ह ।
तयोः प्रियं मे कर्तव्यमिति जीवामि चाप्यहम् ॥ ९३

मार्कण्डेय उवाच ।

एवमुक्त्वा स धर्मात्मा गुरुवर्ती गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्तः सस्वरं प्ररुरोद ह ॥ ९४
ततोऽब्रवीत्तथा दृष्ट्वा भर्तारं शोककर्शितम् ।
प्रमृज्याश्रूणि नेत्राभ्यां सावित्री धर्मचारिणी ॥ ९५
यदि मेऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि ।
श्वश्रूश्वशुरभर्तॄणां मम पुण्यास्तु शर्वरी ॥ ९६
न स्माराम्युक्तपूर्वां वै स्वैरेष्वप्यनृतां गिरम् ।

ष्यते. — [d]) K1. 2 De D8 G4 तावन्नौ.

87 [a]) D5 G1 आवयोर्; M1 अंतयोर् (for अन्धयोर्). K1 (by corr.) B4 Dn T2 M1 दृष्टिस् (for यष्टिस्). — [b]) T G1. 2. 4 प्राणः; M1 वत्स (for वंशः). — [d]) T1 G2. 4 M2 संतानञ्च. K4 अपि; D5 त्वयि (for इति).

88 [a]) K1 (*sup. lin. sec. m.*). 2 त्वंधस्; K4 De D2. 3. 5 [अ]प्यंधस् (for वृद्धस्). T1 G1 वृद्धौ च मातापितरौ; T2 G2. 4 माता पिता च वृद्धौ च. — [c]) S (except G3) पुत्रं (for रात्रौ).

89 [a]) K1. 2. 4 (marg. *sec. m.*) निद्रामेवाभ्य(K2 °भि)सूयामि; K4 (orig.) De D2. 3. 5 T1 G1 M1 निद्रां चैवा(De2 D2 °व)भ्य°. — [b]) K2 यस्यां; T1 G1. 2. 4 यस्य. — G1 om. (hapl.) 89c–91b. — [c]) D4 प्राप. — [d]) K1. 2 त्वत्कृते च सुमध्यमे; T2 मत्कृतेनोपका°; G4 मत्कृतेनापि का°.

90 G1 om. 90 (cf. v.l. 89). — [b]) G4 M1 (*sup. lin.* as in text) कृच्छ्रादा°. — [c]) K (K3 missing) De D2. 3. 5 रहितो (for हि विना).

91 G1 om. 91ab (cf. v.l. 89). — [a]) De D2 व्यक्तयाम् (for व्यक्तम्). — [d]) B3. 4 De Dn3 D2 M °वासिनां; T1 G1. 2. 4 °वासिनः; T2 °वासिभिः.

92 92a = 3. 277. 1a. — [d]) K1. 2 चैव दुर्बलां; T G1 भृशदु°; G2. 4 भृशदुःखितां; M प्रति दुर्बलां.

93 [a]) T G1. 2. 4 मत्कृते पितरावद्य; M1 °ते चापि ता°; M1 °तेपि च ता°. — [b]) G2. 4 भृशम् (for परम्). — [c]) D5 यावत्तौ; G1 एवं तौ (for जीवन्तौ). B3 अनुपश्यामि. — [d]) De D2 ममेति च; T G1. 2. 4 मया स्विति (for मयेति ह). B4 मृतावनुस्त्रिये च तौ. — [e]) K4 T2 तथा (for तयोः). K (K3 missing) D3 च (for मे). — [f]) B1. 2. 4 D (except D3) T2 G3 इति जानामि; B3 अनिजीवामि. D3 नापरं; G4 वाप्यहं. — After 93, S (except G3) ins.:

1326* परमं दैवतं तौ मे पूजनीयौ सदा मया ।
[M मम (for मया).]

T G1. 2. 4 cont.: K1. 2 ins. after 93:

1327* तयोस्तु मे सदास्त्येवं व्रतमेतत्पुरातनम् ।
[K1 तयोर्हितमवास्त्येयं; K2 तयोर्हि मे ममास्त्येयं; T1 तयोर्हीमे तथास्त्येवं; T2 ततो हि मे यथा मेऽस्यं; G1 तयोः सकाशं गच्छामि.]

94 K (K3 missing) D3 T1 G1 M3 om. the ref. — [a]) K1 D3 तु; K4 च (for म). — [b]) B Dn D4. 5 G3 गुरुभक्तो; De2 D2 °वृत्ति; D5 °धर्मं (for °वर्ती). T G1. 2. 4 गुरुप्रियहिते रतः. — [c]) K1 D3 उत्सृज्य; B1. 4 D5 G1. 2. 4 उद्धृत्य. Dn3. n3 चाह (for बाहू). — [d]) =3. 73. 25d. K1. 4 B1. 2 De2 Dn D3. 3. 5. 6 G3 सुस्वरं; D3 सस्वनं.

95 Before 95, K (K3 missing) D3. 5 ins. मार्कं°. — [a]) T2 G1. 2. 4 तदा (for तथा). — [b]) K (K3 missing) De D3. 3. 5 शोकपीडितं; B Dn D4. 5 °कर्षितं. — [c]) K4 De D2 वि- (for प्र-). D5 T2 G2 M पाणिभ्यां; T1 G1. 4 बाहुभ्यां.

96 Before 96, M1 ins. सावित्री. — [a]) T1 G1 मेस्त (for मेऽस्ति). — [b]) T2 भवेत् (for the second यदि). — [d]) K (K3 missing) De D2 क्षेमास्तु; M1 रम्या° (for

तेन सत्येन तावद्य ध्रियेतां श्वशुरौ मम ॥ ९७

सत्यवानुवाच ।

कामये दर्शनं पित्रोर्याहि सावित्रि माचिरम् ।
पुरा मातुः पितुर्वापि यदि पश्यामि विप्रियम् ।
न जीविष्ये वरारोहे सत्येनात्मानमालभे ॥ ९८
यदि धर्मे च ते बुद्धिर्मां चेज्जीवन्तमिच्छसि ।
मम प्रियं वा कर्तव्यं गच्छस्वाश्रममन्तिकात् ॥ ९९

मार्कण्डेय उवाच ।

सावित्री तत उत्थाय केशान्संयम्य भामिनी ।
पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥ १००
उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणिना ।
दिशः सर्वाः समालोक्य कठिने दृष्टिमादधे ॥ १०१

तमुवाचाथ सावित्री श्वः फलानीह नेष्यसि ।
योगक्षेमार्थमेतत्ते नेष्यामि परशुं त्वहम् ॥ १०२
कृत्वा कठिनभारं मा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुं भर्तुः सकाशं पुनरागमत् ॥ १०३
वामे स्कन्धे तु वामोरूर्भर्तुर्बाहुं निवेश्य सा ।
दक्षिणेन परिष्वज्य जगाम मृदुगामिनी ॥ १०४

सत्यवानुवाच ।

अभ्यासगमनाद्भीरु पन्थानो विदिता मम ।
वृक्षान्तरालोकितया ज्योत्स्नया चापि लक्षये ॥ १०५
आगतौ स्वः पथा येन फलान्यवचितानि च ।
यथागतं शुभे गच्छ पन्थानं मा विचारय ॥ १०६
पलाशषण्डे चैतस्मिन्पन्था व्यावर्तते द्विधा ।

C. 3. 16855
B. d. 247. 110
K. 3. 298. 112

पुण्या°). D₅ अस्तु क्षेमाशु शर्वरी; T G₁. ₂. ₄ स्वस्थ(G₂. ₄ °स्थो)भावो भवत्युत.

97 ᵃ) B D (except D₃. ₅; D₁ missing) T₁ G₁ [ड]त्फूर्वं. — ᵇ) G₄ [अ]हितां (for [अ]नृतां). — ᵈ) Dc D₂ म्रियेतां; B₃ भवेतां. K₁. ₃ म्रियतां श्वशुरो मम.

98 ᵃ) T₁ माचिरं (for दर्शनं). — ᵇ) K₁. ₃ यावत् (for याहि). — After 98ᵃᵇ, S (except G₃) ins.:

1328* अपि नाम गुरू तौ हि पश्येयं म्रियमाणकौ ।
[G₄ प्रपश्येद् (for पश्येयं).]

— T₁ om. 98ᶜ-99ᵈ. — ᵈ) Cf. 1. 205. 29ᵈ.

99 T₁ om. 99 (cf. v.l. 98). — ᵃ) D₅ चेन्मत्किर्मे; S (except G₃; T₁ om.) च(G₄ क)तुं धर्मं (for यदि धर्मे). T₂ मे (for ते). — ᵇ) D₃. ₄ मा (for मां). K (K₃ missing) B₃ Dc D₂. ₃. ₅ G₁ च जी(K₄ D₅ संजी-; B₃ G₁ चेजी)वितुम् (for चेज्जीवन्तम्). — ᶜ) K (K₃ missing) चेत्; D₅ च (for वा). — ᵈ) K₄ B₁. ₃. ₄ Dc₁ Dn D₃. ₄. ₆ T₂ गच्छाव; B₃ Dc₂ गच्छ च; D₂. ₅ गच्छ वा. K (K₃ missing) D₃. ₅ [आ]श्रममंडलं; Dc D₂ °मुत्तमं.

100 K₄ T₁ G₁ om. the ref. K₁ मार्कांडेयः; M₃ श्रीमार्कंडेयः. — ᵃ) K₄ D₅ सावित्री तं स(D₃ च त)मादाय; S (except G₃) तत उत्थाय सावित्री. — ᵇ) B D (except D₅) G₃ भाविनी. — ᵈ) D₅ तं (for वै).

101 D₃ om. 101. — ᵇ) T₁ G₁. ₂. ₄ वि- (for प्र-). — ᵉ) Dn D₄. ₅ G₃ transp. दिशः and सर्वाः.

102 ᵇ) K₄ D₅ ह नेष्यसि (K₄ marg. *sec. m.* [आ]हरिष्यसि); B Dn D₄. ₆ G₃ हरिष्यसि; T G₁. ₂. ₄ [ह]हरिष्यसि. — ᶜ) K₁. ₃ B₁. ₂. ₄ Dn₁ D₂ एतं (for एतत्). — ᵈ) S (except G₃) दास्यामि (for नेष्यामि). K₄ (marg. *sec. m.*) शुभम् (for त्वहम्).

103 ᵇ) B₃ वृक्षमूलां. — ᵈ) B₃ Dn D₄. ₆ G₃ सकाशे; T₁ समीपं.

104 ᵃ) K₄ वामस्कंधे. B₃ स्कंधेन (for स्कन्धे तु). K₁. ₃ तु वामूरू (K₃ °रूर्); K₄ सुवामोरुर्; Dc तु वामोरू; D₃ G₄ [S]थ वामोरु(G₄ °रू)र्. — ᵇ) K₁. ₃ निवेश्य. B Dn D₄. ₆ G₃ च (for सा). — ᶜ) K₄ परिगृह्य. — ᵈ) K (K₃ missing) D₃ मृदुभाषिणी; B Dn D₄. ₆ G₃ गजगामिनी.

105 ᵃ) K₁. ₃. ₄ (marg. *sec. m.*) D₃. ₅ नित्याभ्या- (K₄ orig. °भि)गमनाद्. — ᵇ) K₁. ₃ [S]धिगता (for विदिता). — ᶜ) K₁. ₃ वृक्षारामालोकितया; K₄ वृक्षांतरालोकनया (marg. *sec. m.* वृक्षांतरालानि तथा). — ᵈ) G₂. ₄ transp. च and अपि. K (K₃ missing) Dc D₂. ₃. ₅ चोपलक्षये; T₂ चापि लक्ष्यसे; M₁ चाभिलक्षये.

106 ᵃ) K₁. ₄ D₂. ₃ स्व (for स्वः). S (except G₃) [अ]नेन (for येन). — ᵇ) T₂ G₁. ₂. ₄ फलान्यप(G₄ पि)चितानि च; M फलान्युपचितान्यतः. — ᵈ) T₂ G₂. ₄ अ- (for मा).

107 ᵃ) K₂. ₄ D (D₁ missing) G₃ °खंडे (for °षण्डे). B₂. ₄ Dc D₂ वा; M₁ हि (for च). — ᶜ) T G₁. ₂. ₄ अस्य; M अत्र (for तस्य). — ᵈ) G₄ तेन गच्छस्व च त्वरा. — ᵉ) T G₁ चास्मि (for अस्मि).

108 All MSS. except M₁ (K₃ D₁ missing) om. the ref. — ᵃ) K₁ B Dc₁ Dn₁. ₂ T G ब्रुवन्नेव. K₁

C. 3. 16856
B. 3. 297. 110
K. 3. 298. 112

तस्योत्तरेण यः पन्थास्तेन गच्छ त्वरस्व च ।
स्वस्थोऽस्मि बलवानस्मि दिदृक्षुः पितरावुभौ ॥ १०७

मार्कण्डेय उवाच ।
ब्रुवन्नेवं त्वरायुक्तः स प्रायादाश्रमं प्रति ॥ १०८

इति श्रीमहाभारते आरण्यकपर्वणि एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥

२८२

मार्कण्डेय उवाच ।
एतस्मिन्नेव काले तु द्युमत्सेनो महावने ।
लब्धचक्षुः प्रसन्नात्मा दृष्ट्या सर्वं ददर्श ह ॥ १
स सर्वानाश्रमान्गत्वा शैब्यया सह भार्यया ।
पुत्रहेतोः परामार्तिं जगाम मनुजर्षभ ॥ २
तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।
तांस्तान्देशान्विचिन्वन्तौ दंपती परिजग्मतुः ॥ ३
श्रुत्वा शब्दं तु यत्किंचिदुन्मुखौ सुतशङ्कया ।
सावित्रीसहितोऽभ्येति सत्यवानित्यधावताम् ॥ ४
भिन्नैश्च परुषैः पादैः सव्रणैः शोणितोक्षितैः ।
कुशकण्टकविद्धाङ्गावुन्मत्ताविव धावतः ॥ ५
ततोऽभिसृत्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
परिवार्य समाश्वास्य समानीतौ स्वमाश्रमम् ॥ ६
तत्र भार्यासहायः स वृतो वृद्धैस्तपोधनैः ।

Dn2 त्वया युक्तः; Dc1 तया युक्तः; Dc2 D2 तथा युक्तः (for त्वरा°). — b) B1. 2. 4 D (except D5) G2 संप्रायाद्; G1 संप्रयाता; G4 संप्रदाद् (for स प्रायाद्). M यतः (for प्रति). — After 108, M1 ins.:

1329* सावित्रीसहितः श्रीमान्सत्यवान्संशितव्रतः ।

Colophon. K3 D1 missing. — *Major parvan:* K1. 2 Dn2 G2. 4 आरण्य. — *Sub-parvan:* N (K3 D1 missing) T1 G1. 3 M1 (all om. sub-parvan name) mention only सावित्र्युपाख्यान. — *Adhy. name:* M2 सावित्रीवरप्रसादः. — *Adhy. no.* (figures, words or both): Dn1 (marg.). n2 295; Dn3 296; T1 G1 282; T2 M (M2 *inf. lin.*) 285 (M2 orig. 287); G2 284; G4 corrupt. — *Śloka no.:* Dn1. n2 108; Dn3 111.

282

☞ This adhy. is missing in K3 D1 (cf. v.l. 3. 279. 14, 8); the MSS. are mostly ignored here.

1 G4 om. the ref. K1 मार्कांडेयः; M2 श्रीमार्कंडेयः. — a) Standing phrase! Cf. Hopkins, *Great Epic*, p. 406 (No. 31). T2 G4 तस्मिन्नेव तु काले वै. — b) B Dc Dn D2. 4–6 G2 महाबलः (B1. 4 °बले) (..or °वने). — c) B Dn D4–6 G2 M2 प्रसन्नायां (for °त्मा). Dc D2. 3 प्रसन्नया लब्धचक्षुः. — d) K1. 2 सर्वदृष्ट्या; K4 D3 सर्वं दृष्ट्या; B1. 3. 4 दृष्ट्यां सर्वां; B2 Dn D4. 6 G3 दृष्ट्यां सर्वं; Dc D2 सर्वं दृष्ट्वा; D5 सर्वदृष्ट्यां; T1 दृष्ट्वा सर्वं; T2 भूत्वा सर्वं; G2. 4 दृष्ट्या सर्वान्. D3 सः (for ह).

2 b) B D3. 4 सैब्यया (for शै°). — d) B Dc1 Dn D4. 6 G3 भरतर्षभ; Dc2 D2 पुरुष°; D5 T1 G1 मनुजर्षभः.

3 a) T2 तानाश्रमान्. — c) B D (except D3. 5; D1 missing) G3 तस्यां निशि (for तांस्तान्देशान्). — d) D5 परिमार्गतुः.

4 a) S (except G3) च (for तु). K1. 2 B Dc Dn D2. 4. 6 G3 M2 यं (for यत्). K (K3 missing) B3. 4 Dn D4. 6 G3 M2 कंचिद् (for किंचिद्). — c) K4 D5 T1 °भ्येत्य (for °भ्येति). — d) K (K3 missing) M1 इति धावतां; B Dc Dn D2. 3 (marg. *sec. m.*). 4. 6 G3 इत्यभाषतां; D3 अभ्यधावतां.

5 a) K (K3 missing) पुरुषैः. M1 प्रासैः (for पादैः). — b) K1 (corrupt) सव्रणैः शोणितैः क्षणैः; G2 सव्रणौ शोणितोक्षितौ. — c) K (K3 missing) D5 °दिग्धांगावू. — d) S (except G3) धावतां.

6 a) T G1. 2. 4 [S]भिगम्य (T1 °त्य). M1 सर्वैः (for विप्रैः). — b) M1 द्विजैर् (for सर्वैर्). — d) B Dn D4. 6 T2 G3 तावानीतौ (for समा°).

7 a) T1 G1. 2. 4 ततो (for तत्र). — b) K4 D3 वृद्धो (for वृतो). — c) Dn1 G3 आश्वासितोपि चित्राथैः; T2 °तौ पवित्रार्थैः. — d) K4 पूर्वराज्ञां कथानकैः; T2

आश्वासितो विचित्रार्थैः पूर्वराज्ञां कथाश्रयैः ॥ ७
ततस्तौ पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।
बाल्ये वृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ॥ ८
पुनरुक्त्वा च करुणां वाचं तौ शोककर्शितौ ।
हा पुत्र हा साध्वि वधूः क्वासि क्वासीत्यरोदताम् ॥ ९

सुवर्चा उवाच ।

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १०

गौतम उवाच ।

वेदाः साङ्गा मयाधीतास्तपो मे संचितं महत् ।
कौमारं ब्रह्मचर्यं मे गुरवोऽग्निश्च तोषिताः ॥ ११
समाहितेन चीर्णानि सर्वाण्येव व्रतानि मे ।
वायुभक्षोपवासश्च कुशलानि च यानि मे ॥ १२
अनेन तपसा वेद्मि सर्वं परिचिकीर्षितम् ।
सत्यमेतन्निबोध त्वं ध्रियते सत्यवानिति ॥ १३

शिष्य उवाच ।

उपाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम् ।
नैतज्जातु भवेन्मिथ्या तथा जीवति सत्यवान् ॥ १४

ऋषय ऊचुः ।

यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः ।
अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान् ॥ १५

भारद्वाज उवाच ।

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १६

दाल्भ्य उवाच ।

यथा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम् ।
गताहारमकृत्वा च तथा जीवति सत्यवान् ॥ १७

माण्डव्य उवाच ।

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवी च प्रवृत्तिस्ते तथा जीवति सत्यवान् ॥ १८

C. 3. 16876
B. 3. 296. 18
K. 3. 299. 18

G₂. ₄ पूर्वराजकथाश्रयैः.

8 [ab]) D₅ ˚स्वस्थौ (for ˚श्वस्तौ). T₂ दंपती तौ ततः संतौ दृष्टौ पुत्रं˚. — [c]) K₁ De D₂ बाल्य˚ (for बाल्ये). B₃ transp. वृत्तानि and पुत्रस्य. — After 8[c], T₂ G₂. ₄ ins.:

1330* सावित्र्या दर्शनानि च ।
शोकं जग्मतुरन्योन्यं.

9 [a]) K (K₃ missing) D₂ म˚ (for च). S (except G₃) पुनश्च करुणां वाचं. — [b]) T₁ G₁. ₂. ₄ M वदंतौ; T₂ स्मरंतौ (for वाचं तौ). K₁. ₂ B₂. ₄ Dn D₄. ₆ ˚कर्षितौ. — [c]) K₄ पुत्रि (for पुत्र). S (except G₃) (by transp.) वधूः साध्वि (T₁ साध्वी). K (K₃ missing) De₂ D₂. ₃ वधु; B₄ De₁ वधू (for वधूः, Vocative!). — [d]) K₁. ₂ B₃ [अ]द्य रोदतां; K₄ [इ]ति रोदतां; D₅ [इ]त्यवोचतां (for [इ]त्यरोदताम्). De D₂ क्वापि क्वासित्यवाद(De₁ ˚सीत्यवादि)-तां. — After 9, B Dn D₄. ₆ G₃ ins.:

1331* ब्राह्मणः सत्यवाक्तेषामुवाचेदं तयोर्वचः ।

10 =16. K₁ सुवर्चः; K₂ सुवर्णः; De₂ ब्राह्मण उ˚; D₃ सुवर्चोवाच; S (except G₃) ब्राह्मणाः. — [a]) =15[a]. K₁ यथासि भार्या; De D₂ T₁ G₁ अथास्य भार्या. 10[d]=14[d], etc.

11 [a]) K₁. ₂ वेदाः सांगाश्च या गीतास्; D₅ T₂ G₂. ₄ M वेदः सांगो मयाधीतस्. — [c]) D₅ G₄ कौमार˚; M₁ कौमार्यं. B₂ Dn D₄. ₆ G₂–₄ च (for मे).

12 [b]) De D₂ G₁ च; T G₂. ₄ वै (for मे). — K₁. ₂ om. (hapl.) 12[cd]. — [d]) B Dn D₄. ₆ G₃ कृतो मे विधिवत्सदा.

13 [b]) B₂ D (except D₃; D₁ missing) T₁ G₃ M सर्वं पर˚; B₃ सत्यं प्रिय˚. — [c]) T G₁. ₂. ₄ मम (for एतत्). B₄ निबोधस्व; Dn D₄. ₆ G₃ M निबोधध्वं.

14 [a]) K₂ यद् (for मे). T₁ G₁ वाक्याद् (for वक्त्राद्). — [b]) K₁. ₂ विनिर्गतं. — [c]) B Dn D₄. ₆ G₃ नैव (for नैतज्). — 14[c]=10[d], 15[d], 16[d], 17[d], 18[d], 19[d].

15 T₂ om. (hapl.) 15–17; G₃ (hapl.) om. 15–16. — [a]) =16[a]. D₄. ₆ यथा च (for यथास्य). K₁ भार्यासि; K₄ D₃ भार्यास्य (by transp.). — De₁ D₂ om. (hapl.) 15[b]–16[a]. — [b]) K₄ D₅. ₆ T₁ G₁ M स्व˚ (for सु˚). D₄ तपसा च दमेन च (=16[b]). — [c]) D₄ आचारेण च संयुक्ता (=16[c]). — After 15, K₂ reads 18, *repeating* the stanza in its proper place.

16 =10. K₁. ₂ T₂ G₃ om. 16; De₁ D₂ om. 16[a] (cf. v.l. 15). K₄ B₃. ₄ Dm. n₂ D₃ G₁. ₂ M भरद्वाज उ˚ (G₁. ₂ M om. उ˚). — [a]) =15[a]. K₄ यथा भार्या च सावित्री.

17 T₂ om. 17 (cf. v.l. 15). — [c]) T₁ G₁. ₂. ₄ [ए]व (for च).

C. 3. 16876
B. 3. 298. 19
K. 3. 299. 19

धौम्य उवाच ।

सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान् ॥ १९

मार्कण्डेय उवाच ।

एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान्विगणयन्नर्थानवस्थित इवाभवत् ॥ २०
ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥ २१

ब्राह्मणा ऊचुः ।

पुत्रेण संगतं त्वाद्य चक्षुष्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं ते पृथिवीपते ॥ २२
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रिभिर्दिष्टया विवर्धसे ॥ २३
सर्वैरस्माभिरुक्तं यत्तथा तन्नात्र संशयः ।
भूयो भूयश्च वृद्धिस्ते क्षिप्रमेव भविष्यति ॥ २४

मार्कण्डेय उवाच ।

ततोऽग्निं तत्र संज्वाल्य द्विजास्ते सर्व एव हि ।
उपासांचक्रिरे पार्थ द्युमत्सेनं महीपतिम् ॥ २५
शैब्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः ।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ॥ २६
ततो राज्ञा महासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ॥ २७
प्रागेव नागतं कस्मात्समभार्येण त्वया विभो ।
विरात्रे चागतं कस्मात्कोऽनुबन्धश्च तेऽभवत् ॥ २८
संतापितः पिता माता वयं चैव नृपात्मज ।
नाकस्मादिति जानीमस्तत्सर्वं वक्तुमर्हसि ॥ २९

---

18 K_2 reads 18 after 15, *repeating* it here. K_4 B Dn $D_{4.6}$ G_3 आपस्तंब ऊ॰; T $G_{1.2.4}$ वामदेवः; M पांक्तेयः. — [a]) Dc D_2 G_2 वदति; T_2 वै दिशि (for वदन्ति). — [b]) D_3 T_2 वदंति (for दिशि वै). — [c]) D_5 पार्थिवी च वृत्तिस्तेन; T_2 $G_{1.2.4}$ पार्थिवीं चैव वृद्धिं ते; M पार्थिवी चैव वृद्धिस्ते.

19 K_1 om. (hapl.) 19. — [b]) T $G_{2.4}$ M द्विजप्रियः; G_1 द्विजोत्तमः (for जन॰).

20 K_1 मार्कंडेयः; M_2 श्रीमार्कंडेयः. — [a]) $B_{3.4}$ च; S (except T_1 G_3) नैः (for तु). D_5 एवमाश्वासितौ तौ तु. — [c]) $B_{1.2.4}$ Dn $D_{4.6}$ G_3 सर्वान् (for अर्थान्). — [d]) B Dn D_6 ततः (B_4 °त्र) स्थिर; Dc D_3 अवस्थिर; D_4 G_3 ततः शिष्य (for अवस्थित). T_2 इह (for इव).

21 [b]) S (except G_3) सह सत्यवता तदा. — [d]) K_1 प्रविष्टः; T_1 $G_{1.2}$ M_2 प्रविष्टा. — After 21, T $G_{2.4}$ M_1 ins.:

1332* इष्ट्वा चोत्पतिताः सर्वे हर्षं जग्मुश्च ते द्विजाः ।
कण्ठं माता पिता चास्य समालिङ्ग्याभ्यरोदताम् ।

22 $K_{1.2}$ Dc D_3 ब्राह्मण ऊ॰. — [a]) $B_{1.2}$ Dn $D_{4.6}$ G_3 त्वां तु; B_4 त्वं च; G_1 त्वद्य (for त्वाद्य). — [c]) K_4 (marg. *sec. m.*) वै यच्छामो; T $G_{1.2.4}$ हि पश्या॰ (for वै पृच्छा॰). — [d]) $B_{1.2}$ Dn $D_{4.6}$ G_3 वै (for ते).

23 [b]) M_1 °त्र्यागमनेन च. — [d]) S (except G_3) [अ]भि- (for वि-).

24 [a]) D_3 च (for यत्). T_1 $G_{1.4}$ यथा सर्वैर्मुदाप्युक्तं; T_2 G_2 यथा सर्वे मुदा युक्तास्. — [b]) Dc $D_{2.3}$ तत्तथा नात्र; D_5 यत्तथा तत्र (for तथा तन्नात्र). — [c]) $B_{1.4}$ Dn $D_{4.6}$ G_3 समृद्धिं; B_2 संवृद्धिं (for च वृद्धिं). — [d]) Dn_2 $D_{2.3}$ गमिं (for भविं).

25 N (except K_2 B_3; K_3 D_1 missing) T_1 G_3 om. the ref. M_2 श्रीमार्कंडेयः. — [a]) B_3 तथा (for ततो). K_3 प्रज्वाल्य. T_2 G_2 ततोग्निं ते समुज्वाल्य; G_4 ततोग्निहोत्रं सं॰. — [b]) T_2 ब्राह्मणाः (for द्विजास्ते). D_5 M_1 ह (for हि). — [d]) नराधिपं (for महीं).

26 [b]) K_1 G_1 चैकता; $G_{2.4}$ च ततस्. K (K_3 missing) Dn $D_{2.4.6}$ T_1 G_1 स्थिता; $G_{2.4}$ तथा. — [d]) K (K_3 missing) विशोका °विशत्.

27 [a]) D_3 $G_{1.2.4}$ M_2 समासीनाः. — [c]) K_4 सर्वे (for पार्थ).

28 Before 28, B D (except $D_{3.6}$; D_1 missing) G_3 ins. ऋषय ऊ॰. — [a]) G_1 प्रागेवानागतं. — [b]) $K_{1.2}$ त्वयानघ (for त्वया विभो). — [c]) T_2 विरात्रौ चागतं; G_3 चिरात्त्वैवागतं. K (K_3 missing) T_1 G_1 चागतः; B_1 चागतं; Dn_1 चागमः. — [d]) K_1 को विरत्वं च; K_2 को विलंबश्च; K_4 को नु विघ्न॰; B_3 क च बाधा॰; M_1 को वा बंधा॰. $B_{1.2}$ Dn $D_{4.6}$ G_3 तव (for च ते). B_4 सभार्येण त्वया विभो (marg. कोनुबंधस्त्वाभवत्).

29 [a]) B_3 संतापिता; T_2 °पिताः. — [b]) Dc D_2 तथा नृप; M [अ]नुतापिताः. — [c]) $K_{1.2}$ Dc D_2 T $G_{1.2.4}$ न कस्माद् (for नाकस्माद्). T_1 G_1 M एव (for इति). B

सत्यवानुवाच ।

पित्राहमभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मेऽभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ॥ ३०
सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
तावत्कालं च न मया सुप्तपूर्वं कदाचन ॥ ३१
सर्वेषामेव भवतां संतापो मा भवेदिति ।
अतो विरात्रागमनं नान्यदस्तीह कारणम् ॥ ३२

गौतम उवाच ।

अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्थ सावित्री वक्तुमर्हति ॥ ३३
श्रोतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ॥ ३४
त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम् ।
रहस्यं यदि ते नास्ति किंचिदत्र वदस्व नः ॥ ३५

सावित्र्युवाच ।

एवमेतद्यथा वेत्थ संकल्पो नान्यथा हि वः ।
न च किंचिद्रहस्यं मे श्रूयतां तथ्यमत्र यत् ॥ ३६
मृत्युर्मे भर्तुराख्यातो नारदेन महात्मना ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥ ३७
सुप्तं चैनं यमः साक्षादुपागच्छत्सकिंकरः ।
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् ॥ ३८
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान्मम ॥ ३९
चक्षुषी च स्वगज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं पुत्राणामात्मनः शतम् ॥ ४०
चतुर्वर्षशतायुर्मे भर्ता लब्धश्च सत्यवान् ।
भर्तुर्हि जीविनार्थं तु मया चीर्णं स्थिरं व्रतम् ॥ ४१
एतत्सत्यं मयाख्यातं कारणं विस्तरेण वः ।

C. 3. 16899
B. 3. 298. 42
K. 3. 295. 43

Dn D_4. 6 G_3 कस्मादिति न जा°. — d) K_1. 3 सर्वं वक्तुमिहार्हसि.

30 c) D_3 (marg. *sec. m.*) अद्य (for अथ). — d) K (K_3 missing) D_3 (marg. *sec. m.* as in text). 5 कुर्वतः; T G_1. 3 भिद्यतः; M छिंदतः.

31 c) K_1. 3 -काले (for -कालं). K_1 B Dn D_3 (*sup. lin. sec. m.*). 4. 6 G_3 transp. च and न. — d) K_1 कथंचन.

32 b) D_3 न (for मा). — c) K_1 अतश्चिराभ्यागमने; K_3 अतो विरात्रगमनं; G_3 अतो विरात्र्या° ; G_4 अतो विरात्रावगमं. — d) B_3 Dc D_3 [इ]ति (for [इ]ह).

33 a) T_3 M नाक° (for अक°). — c) B_3 नान्यत्; T_1 G_1 न स (for नास्य). B D (except D_5; D_1 missing) T_1 G_1. 3 वेत्सि (for वेत्थ). — d) D_3 वेत्तुम्.

34 a) M इच्छाम. — b) K_3 परापरं. — c) D_3 त्वा (for त्वां). K_4 B_4 D_3 G_1. 2. 4 त्वां हि जानीम; M_1 त्वाभिजानाम; M_3 त्वां विजानाम. — d) K_1. 3 °त्रीमेव.

35 a) S (except G_3) त्वामत्र. T_1 G_1. 2. 4 M जानीमस्; T_3 जानामि (for जानीषे). — b) S (except G_3) सत्यं (for सत्यं). K_3 निरुच्यतां. — c) K_1. 3 transp. रहस्यं and यदि. — d) M किंचिदेव. D_3 ब्रवीहि नः.

36 a) D_3 एवमेव. G_4 वेत्थं; M वित्त (for वेत्थ). — b) M_1 [अ]पि (for हि). — c) B Dc Dn D_2. 4. 6 G_3 हि (for च). Dc D_2 च (for मे). — d) T G_1. 3. 4 कृतम् (for तथ्यम्). B_1. 2 Dn D_4. 6 G_3 एव; B_3 अस्य (for अत्र).

37 a) B Dc_1 Dn D_4. 6 T_3 G_3 पत्युर् (for भर्तुर्). — b) K (K_3 missing) Dc D_2. 3 °न महर्षिणा. — c) K (K_3 missing) D_3 स चास्य. G_4 दिव्यं संप्राप्तस्. — d) B_3 मैनं; G_4 नैतं (for नैनं).

38 a) G_4 चैतं. — b) G_3 उपगच्छत्. — c) T_1 G_1. 3. 4 चैनम् (for एनम्). G_1 आनयद्. T_3 स वै चैनं यमो बध्वा.

39 a) D_3 व्यतोषयम्; T G_1. 3. 4 अतोषयम् (for अस्तौषं तम्). — b) K_3 विभुः; G_4 भुवम्. — c) S (except G_3) transp. वै and मे. K_1 पंच चैतेन; B_1. 2 पंचैव तेन; B_4 पंचायतेन; D_3 पंच तेनैव (for पञ्च वै तेन). B_3. 4 transp. मे and दत्ता. — d) K_1 Dc D_2 G_3 M_3 वराञ्. K_3 ता मम; D_3 चात्मना; G_1 तानिह (for तान्मम).

40 a) K (K_3 missing) D_3. 6 चक्षुष्मत्ता (D_3 °तां; D_6 °त्तां); Dc D_2 चक्षुष्मतं (for चक्षुषी च). — c) K_1. 3 पित्रोः (for पितुः). — d) B_1. 2. 4 Dn D_4. 6 G_3 चात्मनः.

41 b) K_1. 2 लब्धं (K_1 °ब्धां) भर्ता; K_4 Dc D_3. 5. 6 लब्धो भर्ता (by transp.). — c) K (K_3 missing) D_3. 6 जीवितार्थाय; Dc D_3 जीवनार्थाय (for °र्थं तु). B_3 हि; M तन् (for तु). — d) K_1. 3 G_3 (by transp.) व्रतं स्थिरं;

C. 3. 16899
B. 3. 298. 42
K. 3. 299. 43

यथा वृत्तं सुखोदर्कमिदं दुःखं महन्मम ॥ ४२

ऋषय ऊचुः ।

निमज्जमानं व्यसनैरमिद्रुतं
कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशीले धृतधर्मपुण्यया
समुद्धृतं साध्वि पुनः कुलीनया ॥ ४३

मार्कण्डेय उवाच ।

तथा प्रशस्य ह्यभिपूज्य चैव ते
वरस्त्रियं तामृषयः समागताः ।
नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा
शिवेन जग्मुर्मुदिताः स्वमालयम् ॥ ४४

इति श्रीमहाभारते आरण्यकपर्वणि द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८२ ॥

२८३

मार्कण्डेय उवाच ।

तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ।
कृतपूर्वाह्णिकाः सर्वे समेयुस्ते तपोधनाः ॥ १
तदेव सर्वं सावित्र्या महाभाग्यं महर्षयः ।
द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २
ततः प्रकृतयः सर्वाः शाल्वेभ्योऽभ्यागता नृप ।
आचख्युर्निहतं चैव स्वेनामात्येन तं नृपम् ॥ ३
तं मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम् ।

B1. 2. 4 Dn D4. 6 G3 त्विदं व्रतं.

42 a) B Dn D4. 6 T G3 M सर्वं (for सत्यं). K (K3 missing) B3 D3 M समा° (for मया°). — b) K4 D3. 3. 5 च (for वः). — d) T G1. 2. 4 मह(°म)र्षयः; M महन्मया.

43 G1 om. the ref. M3 ऋषिः. — a) Some MSS. निमज्यमानं. B3 उपद्रुतं; D5 अभिद्रुतं. — c) K (K3 missing) D6 D3. 2. 5 सुशीलव्रतधर्मयुक्त(D6 °नित्य)या; B Dn D4. 6 G3 सुशीलव्रतपुण्यया कुलं (B3 °चर्यया); T3 सुशीले धृतपुण्यधर्मया; G1 सुशीलधृतधर्म°.

44 K (K3 missing) S (except G3 M3) om. the ref. — a) B1 ततः. K1. 2 प्रशंस्य; T G1 M प्रशस्याम्; G2. 4 प्रशस्ताम्. K1 ह्रदि पूज्य; B1. 4 ह्रतिपूज्य; S (except G3) अभिपूज्य (for ह्यभि°). B1. 2. 4 Dn D3. 4. 6 G3 om. ते. — b) K (K3 missing) D3. 5 M तां मुनयः; T1 ता ऋषयः. — c) K (K3 missing) D3. 5 transp. नरेन्द्रम् and सपुत्रम्. — d) S (except G3) शुभेन जग्मुर्मुदिता यथालयं.

Colophon. K3 D1 missing. — *Major parvan:* K1. 2 T3 G3. 4 आरण्य. — *Sub-parvan:* K4 B D (D1 missing) T1 M (all om. sub-parvan name) mention only सावित्र्युपाख्यान; G3 °ख्युवाच (sic). — *Adhy. name:* M3 आश्रमप्रवेशः. — *Adhy. no.* (figures, words or both): Dn1 (marg.). n3 296; Dn3 297; T1 G1 283; T3 G4 M (M3 *inf. lin.*) 286 (M3 orig. 288); G3 285. — *Śloka no.:* Dn 44.

283

☞ This adhy. is missing in K3 D1 (cf. v.l. 3. 279. 14, 8); the MSS. are mostly ignored here.

1 K1 मार्कं°; M3 श्रीमार्कं°. — a) T G1. 2. 4 ततो (for तस्यां). — c) K4 Dc D3–4 T1 °पूर्वाह्णिकाः; Dn3 T3 G3 M °पौर्वाह्णिकाः. — d) K (K3 missing) B3. 4 Dc D3. 2. 5 समीयुस्.

2 a) K1. 3 तदेवं. — b) B3. 4 °महो भाग्यं; Dc M3 माहा°; T1 माहात्म्यं च.

3 b) K3. 4 D3 G1. 2. 4 M साल्वेभ्यो. K1. 3 D3. 5 [S]भ्यागमन्; K4 [S]भ्यगमन्; Dc D3 G3 M3 [S]भ्यागतान्. K (K3 missing) B3 T G1. 2. 4 नृपं. — K1 om. (hapl.) 3cd. — c) G4 आचरेन् (for आचख्युर्). — d) B1–3 Dn D4. 6 G1. 3 द्विषं (for नृपम्).

4 a) K1. 3 D3 ते (for तं). S (except G3) प्रोच्य (for श्रुत्वा). — b) G1. 3 °सहायं सहबांधवं. — T3 om. 4cd. — c) K1. 3 B1. 3 Dn D4. 6 G3 यथावृत्तं (for °तत्त्वं).

न्यवेदयन्यथातत्त्वं विदुतं च द्विषद्बलम् ॥ ४
ऐकमत्यं च सर्वस्य जनस्याथ नृपं प्रति ।
सचक्षुर्वाप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५
अनेन निश्चयेनेह वयं प्रस्थापिता नृप ।
प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६
प्रयाहि राजन्भद्रं ते घुष्टस्ते नगरे जयः ।
अध्यास्स्व चिररात्राय पितृपैतामहं पदम् ॥ ७
चक्षुष्मन्तं च तं दृष्ट्वा राजानं वपुषान्वितम् ।
मूर्धभिः पतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८
ततोऽभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः ।
तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९
शैव्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।
नरयुक्तेन यानेन प्रययौ सेनया वृता ॥ १०
ततोऽभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ।
पुत्रं चास्य महात्मानं यौवराज्येऽभ्यषेचयन् ॥ ११
ततः कालेन महता सावित्र्याः कीर्तिवर्धनम् ।
तद्वै पुत्रशतं जज्ञे शूराणामनिवर्तिनाम् ॥ १२
भ्रातॄणां मोदराणां च तथैवास्याभवच्छतम् ।
मद्राधिपस्याश्वपतेर्मालव्यां सुमहाबलम् ॥ १३
एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम् ॥ १४
तथैवैषापि कल्याणी द्रौपदी शीलसंमता ।
तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना ॥ १५

वैशंपायन उवाच ।

एवं स पाण्डवस्तेन अनुनीतो महात्मना ।
विशोको विज्वरो राजन्काम्यके न्यवसत्तदा ॥ १६

C. 3. 16917
B 3 299 16
K. 3. 300. 16

इति श्रीमहाभारते आरण्यकपर्वणि त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥ समाप्तं द्रौपदीहरणपर्व ॥

— [d]) D_3 विहतं. K_3 तद् (for च).

5 [a]) T_1 G_1 ऐकमत्येन (for °मत्यं च). — [b]) $K_{1.2}$ जनस्यासुं; K_4 D_3 °स्यास्य; B_3 D_3 T M °स्य त्वां (T_2 त्वा); D_c D_2 °स्यासीन्. G_1 सांत्वयन्नृपतिं प्रति. — [c]) K_2 वापि चक्षुर् (for वाप्यचक्षुर्). B_3 अचक्षुर्वा सचक्षुर्वा. — [d]) $K_{1.2}$ भवेदिति; K_4 D_{c3} D_2 भविष्यति.

6 [a]) M_1 अनेन व्यवसायेन. — [b]) T_2 सर्वे (for वयं).

7 [b]) D_{c3} D_2 नगरं. — [c]) Almost all MSS. अध्यास्व. D_3 चिरराज्याय.

8 Before 8, B_3 S (except T_2 G_3) ins. मार्कंडेयः (M_2 श्रीमार्कं°). — [a]) D_c D_2 तु (for च). K_4 D_3 ते (for तं). — [b]) D_3 राजानं च सुपान्वितं. — [c]) K_4 मूर्ध्नाभिपतिताः; B D_c D_R $D_{2-4.6}$ G_3 मूर्ध्ना निप°.

9 [a]) $K_{1.2}$ विप्रान् (for वृद्धान्). — [b]) $K_{1.2}$ वृद्धान् (for द्विजान्). D_3 ये चाश्रमनिवासिनः. — [cd]) $B_{3.4}$ T_3 $G_{3.4}$ M चापि (for चाभि°). D_{c3} D_2 ते चाभि(D_2 चापि)-पूजिताः सर्वैः. K (K_3 missing) $D_{3.6}$ प्रययौ स्वपुरं हृष्टस्तैः सर्वैरभिपूजितः.

10 [a]) B_4 देव्या (for शैव्या). T_3 [अ]पि (for च). — [b]) T_3 स्वास्तीर्णैः सुरवर्चसा. — [c]) K_4 नाग° (for नर°). — [d]) B_3 M सेनया वृतः; T_1 G_1 सह सेनया; T_3 $G_{3.4}$ सेनाया सह.

11 [a]) G_3 अतो. D_3 T_1 °सिषिचुः. D_3 प्रीता; S (except G_3) सर्वे. — [b]) $K_{1.2}$ D_3 नराधिपं (for पुरो°). — [c]) T $G_{1.2.4}$ महाभागं (for °स्मानं). — [d]) T_1 G_1 [s]भिषेचयन्.

13 $K_{1.2}$ om. 13. — [b]) S (except T_2 G_3) °वाप्या° (for °वास्या°). — [c]) D_c D_2 यत्राधिगम्याश्च (D_2 °श्च-) पतिर्. — [d]) B_3 D_n $D_{4.6}$ G_3 सुमहद्बलं.

14 [a]) D_c D_2 चैव (for माता).

15 [a]) K_4 $D_{3.6}$ G_3 हि; D_3 च (for [अ]पि). — [b]) $K_{1.2}$ B_4 D_2 °संपदा (for °संमता).

16 G_1 om. 16[ab]. — [ab]) K (K_3 missing) D_3 स्वनु- (for अनु-). T_2 एवं ते पांडवास्तेन अनुनीता महा°. — [c]) K_4 $G_{3.4}$ राजा (for राजन्). T_2 विशोका विज्वरा राजन्. — [d]) K_4 न्यवसत्काम्यके तदा; T_2 काम्यके न्यवसंस्तदा. — After 16, B D (except D_3) G_{3-4} ins. (the *phalaśruti*):

1333* यश्चेदं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम् ।
स सुखी सर्वसिद्धार्थो न दुःखं प्राप्नुयान्नरः ।

[(L. 2) G_3 चार्धमाप्नुयात् (for the posterior half). — This stanza occurs (with v l.) also in *one* MS. of the Matsyapurāṇa (214. 23).]

Colophon. K_3 D_1 missing. — *Major parvan:* $K_{1.2}$ $G_{3.4}$ आरण्य. — *Sub-parvan:* N (K_3 D_1 missing)

२८४

C. 3. 16919
B. 3. 300. 1
K. 3. 301. 1

जनमेजय उवाच ।
यत्तत्तदा महाब्रह्मल्लोमशो वाक्यमब्रवीत् ।
इन्द्रस्य वचनादेत्य पाण्डुपुत्रं युधिष्ठिरम् ॥ १
यच्चापि ते भयं तीव्रं न च कीर्तयसे क्वचित् ।
तच्चाप्यपहरिष्यामि सव्यमाचाविहागते ॥ २
किं नु तद्विदुषां श्रेष्ठ कर्णं प्रति महद्भयम् ।
आसीन्न च स धर्मात्मा कथयामास कस्यचित् ॥ ३

वैशंपायन उवाच ।
अहं ते राजशार्दूल कथयामि कथामिमाम् ।
पृच्छते भरतश्रेष्ठ शुश्रूषस्व गिरं मम ॥ ४
द्वादशे समतिक्रान्ते वर्षे प्राप्ते त्रयोदशे ।
पाण्डूनां हितकृच्छक्रः कर्णं मिक्षितुमुद्यतः ॥ ५
अभिप्रायमथो ज्ञात्वा महेन्द्रस्य विभावसुः ।
(L. 1) K₂ D₃ कदाचित्त्वथ देवेशः; K₄ D₂ आदाथ चित्तमस्याथ; B₂. ₃ De D₁ आदावेव च तं (B₂ °व तु तं; B₃ °वागतं) शक्रः; S कदाचित्स हि देवेंद्रश् (for the prior half). K₂ वचो; D₃ अथ; T₁ अथो (for रहो). — (L. 2) K₂. ₄ D₂. ₃ S त(K₄ य)स्यां विज्ञाय (G₁ उर्वश्यां) (for चक्षुरुर्वश्यां). K₂ D₂. ₃ S (G₁ damaged) सक्तं चक्षुः प्रसंगतः (D₂ पुरंदरः); K₄ चक्षुः सक्तं पुरंदरः. — (L. 3) D₃ S (G₁ damaged) गंधर्वराजा(D₃ °जो)त्र मया. S (G₁ damaged) प्रहिता (for °तो). K₄ D₁. ₄. ₆ S (G₁ damaged) वरा (for वराम्). — After line 3, D₂. ₃ ins.:

कटाक्षेक्षणमाधुर्यैः रूपभावैः सविभ्रमैः ।
एकदृष्ट्या फाल्गुनेन नृत्यन्ती प्रेक्षिता किल ।

— (L. 4) K₄ D₁–₄. ₆ S (G₁ damaged) उर्वशी. B₃ De D₁. ₆ पुरुषव्याघ्रं; D₂. ₃ रूपसंपन्ना. K₂ सोपि निष्ठतु; K₄ B De₂ Dn₃ D₁. ₅. ₆ S उपनिष्ठतु (D₅ °निष्ठेत्); D₂. ₃ प्रेम्णा निष्ठतु (D₃ निष्ठेत्). S फल्गुनं. — (L. 5) De₂ D₁ तथा° (for यथा°). K₁ यथार्थितामनिसृतां; D₂. ₃ यथाचित्तमभिस्मृ (D₃ °श्रि)त्य; S यथार्चि(G₂ न; G₁ च)तामभिसृतां (G₁ °ता) (for the prior half). K₄ D₂ विद्यादस्मा(D₂ °स्मि)न्नियोगतः; B De D₁. ₅. ₆ विधावान् मन्त्रि(De D₁ मुनि)योगतः; D₃. ₄ T₂ G₁–₃ M₁ विद्यादस्रा(D₃ °स्रा-; G₁ °स्मि)न्नियोगतः; T₁ G₄ M₂ विद्यादस्मि(M₂ °स्म)न्नियोगगां (for the posterior half). — (L. 6) B₂ (m as above). ₃ De Dn₃ D₄. ₆ T₁ G₁ विधातव्यः; M₁ °व्या (for °र्यं). K₄ D₁–₃ T₁ G₁. ₂ M स्त्रीसंसर्गविशारद (K₄ D₂ M °दः); B₂ m. ₄ स्त्रीसंगमविशारदः; D₆ स्त्रीप्रसंगविशारद. — (L. 8) De D₁ [s]मरसाम्, D₆ सोभ्यगाद्; M₂ अभ्या°. — (L. 9) K₄ तं (for तां). K₄ विदितं; D₂. ₃ मुदितो (for विदितो). D₆ समागतं ततो दृष्ट्वा. K₂ De₁ त्वया; Dn₂ D₂ G₁ तथा (for तया). — (L. 10) D₂. ₃ स चैवैनां (D₃ °नां). S (by transp.) सुखासीनां सुखासनः. — (L. 11) B₂ T₂ G₂. ₃ हि (for ऽस्तु). D₂. ₃ कल्याणमस्तु सुश्रोणि; T₁ विदितस्ताव सुं°; G₁ M₂ विदितस्तेस्तु सुं°; G₄ damaged. S प्रेषितो (for प्रहितो). T₁ M उषा° (for इहा°). — (L. 12) K₄ [s]ह (for [ए]क). D₂. ₃ नो(D₃ नो)दितो देवराजेन; G₁ damaged. D₂. ₃ त्वत्प्रसादमभिनंदिने. — (L. 13) S (G₁ damaged) स (for तु).

वर्चस्वी तेजसा युक्तः क्षमावान्दीनमत्सरः ।
साङ्गोपनिषदान्वेदांश्चतुराख्यानपञ्चमान् ।
योऽधीते गुरुशुश्रूषां मेधां चाष्टगुणाश्रयाम् ।
ब्रह्मचर्येण दाक्ष्येण प्रसवैर्वयसापि च ।
एको वै रक्षिता चैव त्रिदिवं मघवानिव । [20]
अकत्थनो मानयिता स्थूललक्ष्यः प्रियंवदः ।
सुहृदश्चान्नपानेन विविधेनाभिवर्षति ।
सत्यवाक्पूजितो वक्ता रूपवाननहंकृतः ।
भक्तानुकम्पी कान्तश्च प्रियश्च स्थिरसंगरः ।
प्रार्थनीयैर्गुणगणैर्महेन्द्रवरुणोपमः । [25]
विदितस्तेऽर्जुनो वीरः स स्वर्गफलमाप्नुयात् ।
तत्र शक्राभ्यनुज्ञातः पादावद्य प्रपद्यताम् ।
तदेवं कुरु कल्याणि प्रपद्यस्वां धनंजयः ।
एवमुक्ता स्मितं कृत्वा संमानं बहुमन्य च ।
प्रत्युवाचोर्वशी प्रीता चित्रसेनमनिन्दिता । [30]
यस्त्वस्य कथितः सत्यो गुणोद्देशस्त्वया मम ।
तं श्रुत्वाप्यथयं पुंसो वृणुयां किमतोऽर्जुनम् ।
महेन्द्रस्य नियोगेन त्वत्तः संप्रणयेन च ।
तस्य चाहं गुणैर्धीन फाल्गुनं जातमन्मथा ।
गच्छ त्वं हि यथाकाममागमिष्याम्यहं सुखम् । [35]

Colophon.

वैशंपायन उवाच ।
ततो विसृज्य गन्धर्वं कृतकृत्यं शुचिस्मिता ।
उर्वशी चाकरोत्स्नानं पार्थप्रार्थनलालसा ।

— (L. 14) D_6 कुलेन (for शी°). T_1 M_2 रूपेण शीलेन (by transp.); G_4 श्रियेन रूपेण. $D_{1-3.5}$ S श्रुतेन (G_4 शीलेन) च बलेन च. — (L. 15) D_2 3 श्रुत- (D_3 marg. *sec. m.* बल-); D_5 श्रुति-; S (G_4 damaged) शौर्य (for बल-). K_4 $D_{2.3.5}$ S (G_4 damaged) चीर्याभ्यां (for चीर्येण). D_3 संभृतः; T $G_{2.3}$ प्रपन्नः; G_1 M संपन्नः; G_4 damaged (for संततः). B_3 प्रतिमावानः; D_1 प्रतिभावि नत्. — (L. 16) S क्षेत्रज्ञो सौम्यशीलश्च (for the prior half). D_5 क्षेमं° (for क्षमा°). S (except M_1; G_4 damaged) क्षिप्रं° (for क्षिप्तं°). — (L. 17) D_3 (corrupt) ग साधि निं° (for साङ्गोपनिं°). S (G_1 damaged) गुरुशुश्रूषुपुराणवान् (for the posterior half). — (L. 18) D_2 om. line 18; G_1 is damaged. B_3 वेदांश्च. D_3 G_4 चतुरो वेदान्; D_6 चतुरो भीमान्; T $G_{2.3}$ M चतुरः सर्वान् (for गुरुशुश्रूषां). K_2 मेधां (for मेधां). B_4 मेधां चाष्टगुणाम्बु यः (*sup. lin.* °श्रयः); D_1 मेधाविष्टगुणाश्रयां; D_3 मेधसो राक्षिपेन्द्रः; D_5 मेधामष्टगुणां तथा; T $G_{2.3}$ M मेधावी गुणवानिह (T$_2$ G_3 °नपि; M_2 °निव) (for the posterior half). — (L. 19) B_1 प्रवंरैर (for प्रसवैर्). K_4 D_5 स्वधयापि च; T G_{1-3} M_1 स्वधया च सः (for वयसापि च). D_2 पार्थिवैश्च महागुणैः; D_3 पार्थिवैश्चर्षिभिर्गुणैः; G_4 damaged; M_2 प्रश्नैः स्वधिया च सः (for the posterior half). — (L. 20) $D_{2.3}$ रक्षोभि; S (G_4 damaged) एकश्च (for एको वै). K_4 D_3 त्रिदिवे; D_5 देवपु. — (L. 21) T_1 अथमानो; M_2 अकत्थमानो (hypermetric!) (for अकत्थनो). D_3 सूक्ष्मं° (for स्थूल°). — (L. 23) K_4 $D_{2.3.5}$ T_2 $G_{2.3}$ M सत्यवागूर्जितो ($D_{2.3}$ °तं); G_4 °वाग्दर्जितो. — (L. 24) $D_{2.3.5}$ क्षांश्च; T_1 भक्तं° (for कान्तं°). $D_{2.3}$ T_2 G_3 प्रियो वः; T_1 प्रियोन्वः; $G_{1.2.4}$ M प्रियो(G_1 °या)थ (for प्रियश्च). K_4 $B_{1.3.4}$ De $D_{1.2}$ °संगरः (for °संगरः). — (L. 25) K_4 B De $D_{1.6}$ S (G_4 damaged) प्रार्थनीयो; $D_{2.3}$ प्रार्थनीयैर (for प्रार्थनीयैर). — (L. 26) S आप्तवान् (for आप्नुयात्). K_4 संदेहः स्वर्गमाप्नुयां; D_{1-3} मर्त्यलोकादिहागतः (for the posterior half). — (L. 27) B_1 नं च (for तत्र). D_{1-3} त्वं तु शक्राभ्यनुज्ञातो. D_5 प्रसादयां (for प्रप°). D_{1-3} तस्य पादांतिकं व्रज (for the posterior half). — D_3 om. lines 28–29. — (L. 28) K_4 D_3 प्रसन्नम् (for प्रपन्नम्). D_1 च पार्थिवः (for धनंजयः). — (L. 29) D_3 om. line 29. K_4 T_2 G_{2-4} M_1 स्वागतं; B_2 D_5 M_2 सागतं (for संमानं). D_1 M_1 बहुमान्य च; G_4 अनुमान्य च. — (L. 30) Before line 30, $D_{1.3.5}$ ins. वैशं° उ°. D_{1a} प्रीत्या (for प्रीता). D_5 मित्रसूनुम् (for चित्रसेनम्). — (L. 31) K_4 $D_{2.3.5}$ $G_{2.4}$ M_1 यस्तस्य; T_1 यस्त्वत्त्य; G_1 यः सर्त्य; M_2 यत्तस्य. $B_{1.3}$ सर्यो; De साधो; $D_{2.3}$ शंके; T_1 सखे; M_2 सत्यस्य (for सत्यो). B_2 (= as above) S [अ]तस्य (for मम). — (L. 32) B_2 तत्त्वज्ञत्वा. K_4 [अ]थापित्वं पुंसां; B_2 प्रार्थिता पुंसो; B_4 प्रार्थयेदन्यं; $D_{1.2}$ तु वरा नारी; D_3 [अ]थ नृपं नारी; S [अ]थ (G$_2$. $_4$ °न्यं) प्रियं नारी (for [अ]न्ययं पुंसो). K_4 D_{1-3} वृणुयात्; B_4 वरेण्यं; S प्रणयेत् (for वृणुयां). K_4 B_3 $D_{1-3.5}$ S किमुतार्जुनं. — (L. 33) $B_{1.4}$ De $D_{4.6}$ तु (for च). D_{1-3} युष्माकं प्रणयेन च (for the posterior half). — (L. 34) K_4 अहं तस्य (for तस्य चाहं). De$_2$ T_1 $G_{2.4}$ M फल्गुनं. — (L. 35) K_4 D_{1-3} T_1 $G_{2.4}$ M तदच्छ त्वं (for गच्छ त्वं हि). K_4 $D_{1-3.5}$ S सत्यं (for सुखम्). — Colophon. *Adhy. no.* (figures, words or both): Dn. n$_3$ 15; D_1 46. — (L. 36) D_4 T_2 G_{1-3} M_2 कृतकृत्या. D_{1-3} उर्वशी कृतकृत्यवत् (for the posterior half). — (L. 37) S साकरोत्. G_1 M मानं (for स्नानं). B_{3m} D_5 °दर्शनं° (for °प्रार्थनं°). D_{1-3} अलंकारादिभिर्दिव्यै-रात्मानं तद्दिदृक्षया. — (L. 38) D_{1-3} ततो(D_3 तैर)लंकरणीयैश्च; S स्नाना(T_1 °ता)लंकारनेपथ्यैर् (G_2 °नैपुण्यैर्). D_{1-3}

स्नानालंकरणैर्हृद्यैर्गन्धमाल्यैश्च सुप्रभैः ।
धनंजयस्य रूपेण शर्वर्मन्मथचोदितः ।
अतिविद्धेन मनसा मन्मथेन प्रदीपिता । [40]
दिव्यास्तरणसंस्तीर्णे विस्तीर्णे शयनोत्तमे ।
चित्तसंकल्पभावेन सुचित्तानन्यमानसा ।
मनोरथेन संप्राप्तं रमन्त्येनं हि फाल्गुनम् ।
निर्गम्य चन्द्रोदयने विगाढे रजनीमुखे ।
प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति । [45]
मृदुकुञ्चितदीर्घेण कुमुदोत्करधारिणा ।
केशहस्तेन ललना जगामाथ विराजती ।
भ्रूक्षेपालापमाधुर्यैः कान्त्या सौम्यतयापि च ।
शशिनं वक्त्रचन्द्रेण साह्वयन्तीव गच्छती ।
दिव्याङ्गरागौ सुमुखौ दिव्यचन्दनरूषितौ । [50]
गच्छन्त्या हारविकचौ स्तनौ तस्या ववल्गतुः ।
स्तनोद्वहनसंक्षोभान्नाम्यमाना पदे पदे ।
त्रिवलीदामचित्रेण मध्येनातीव शोभिना ।
अधो भूधरविस्तीर्णं नितम्बोन्नतपीवरम् ।
मन्मथायतनं शुभ्रं रसनादामभूषितम् । [55]
ऋषीणामपि दिव्यानां मनोव्याघातकारणम् ।
सूक्ष्मवस्त्रधरं रेजे जघनं निरवद्यवत् ।
गूढगुल्फधरौ पादौ ताम्रायततलाङ्गुली ।
कूर्मपृष्ठोन्नतौ चापि शोभेते किङ्किणीकिणौ ।
सीधुपानेन चालस्येन तृष्ट्याथ मदेन च । [60]
विलासनैश्च विविधैः प्रेक्षणीयतरा भवत् ।
सिद्धचारणगन्धर्वैः सा प्रयाता विलासिनी ।
ब्रह्माश्चर्येऽपि वै स्वर्गे दर्शनीयतमाकृतिः ।

संस्कृता ; S शोभनैः (for सुप्रभैः). — (L. 39) K₄ D₁₋₃ S शक्रस्याभ्यर्थनेन च ; B₃ सर्वलोकाभिगेन वै (for the posterior half). — (L. 40) S₁ B₃ D₁₋₃ S (G₁ damaged) वाक्यैश्च (D₁. ₃ सुवाक्यैश्च) चित्रसेनस्य (for the prior half). K₄ च दीपिता ; D₁₋₃. ₅ S च (D₁ [आ]पि ; D₂ [आ]भि- ; D₃ सु- ; D₅ प्र-) पीडिता. — (L. 41) B₃ D₃ दिव्यास्तरणसंवीर्णे ; D₁₋₃ °भरणसंपन्ना ; T₂ G₁. ₃ °स्तरणास्तीर्णे. B₄ विचित्रे (for विस्तीर्णे). — (L. 42) D₁₋₃ S om. line 42. K₄ B₃ भाविता-नन्य° ; B₄ सुचित्तागत° ; De D₃ स्थचितानन्य° ; Dn₁ सचितानन्य° (for the posterior half). — (L. 43) D₃ T₁. ₂ (before corr.) G₂. ₄ M संप्राप्ता ; G₁ °सौ (for °सं). D₁. ₂ मनोरथे (D₂ °थैः) समासाद्य (for the prior half). K₄ रमस्वैनं हि ; B₂ De Dn₁. ₃ D₃ रमस्वैनं हि ; B₃ S रमस्वैनं ; D₁₋₃ काम-यस्वेव (for रमन्त्येनं हि). S फल्गुनं. — (L. 44) S निशाम्य (for निर्गम्य). K₄ निशम्य चंद्रोदयनं ; D₁₋₃ चंद्रोदयं समासाद्य (for the prior half). — (L. 45) S (except G₁ M₂) पृथुसु° (for सा पृथु°). K₄ D₁. ₂ M भ(K₄ भु)वनं महत् ; D₃ शयन प्रति ; T G₂₋₄ सदनं (T₁ शयनं) महत्. — (L. 46) D₃ °दीर्घास्तु (for °दीर्घेण). B₃ D₁₋₃. ₅. ₆ कुमुदोत्करधारिणा (D₅ °र्णा) ; De कुमुदोत्कर° ; S (G₁ damaged) कुमुदोत्तम° (for the posterior half). — (L. 47) D₁ S °पाशेन (for °हस्तेन). D₃ केशान्हस्तेन संयम्य (for the prior half). D₅ [आ]शु (for [आ]थ). S गच्छमाना व्यराजत. — (L. 48) D₃ रूपलावण्यमाधुर्यैः (for the prior half). D₃ श्रिया (for [अ]पि च). — (L. 49) D₃ मुख- (for वक्त्र-). K₄ -चर्येण ; D₁. ₂ -चीर्येण (for -चन्द्रेण). K₄ आह्वयंतीव ; D₁. ₂ S आह्व° ; D₃ शान° (for साह्व°). De D₅ T₂ G₃ M₂ गच्छति ; D₅ तर्जितं. — (L. 50) T G₂₋₄ M₁ °रागरुचिरौ ; M₂ °रागरुचिनौ (for °रागौ सुमुखौ). D₃ °गंधेन (for °चन्दन-). K₄ De D₁₋₃. ₅. ₆ -भूषितौ (for -रूषितौ). — (L. 51) B₁. ₃. ₄ Dn₂. ₃ D₃₋₅ °र्गचरौ (for °र्विकचौ). K₄ De D₁₋₃. ₅ तास्या (for तस्या). — (L. 52) B₁. ₄ Dn नम्य° (for नाभ्य°). — (L. 53) K₄ मध्ये चातीव. K₄ D₁. ₂ शोभनौ ; B₁ G₃ M₁ शोभना ; D₅ M₂ शोभिता. — (L. 54) K₄ D₁. ₂ अथ (for अधो). De D₅ S रथकूबरविस्तीर्णं ; D₃ तस्यास्तद-र्विवं° (for the prior half). — (L. 55) Dn₁ D₃ S रशना- (for रसना-). K₄ B₃. ₄ D₁. ₂. ₄. ₆ S -शोभितं (for -भूषितम्). — (L. 56) D₃ मुनीनामपि साध्यानां (for the prior half). K₄ De D₁₋₃. ₅ T₁ M °कारकं ; B₃. ₄ °कारिणं (for °कारणम्). — (L. 57) D₃ °वस्त्रावृतं ; D₅ °वस्त्रपरं. D₅ S (G₁ damaged) भाति (for रेजे). K₄ B De D₁. ₂. ₅ S चानवद्यया (D₅m सार्ध्यनिंदितं) ; D₄. ₆ निरवद्यया (for °वत्). — (L. 58) K₄ B De D₁. ₂. ₅ S गूढगुल्फौज(S °ल्फि)नौ पादौ (G₃ बाहू) ; D₃ गूढगुल्फोन्नतौ पादौ (for the prior half). K₄ D₁. ₂ ताम्रपत्रतला(D₂ °तलां)गुल्यौ ; De D₃. ₄ ताम्रपद्म(De₁ ताम्रोपल)तलां° (D₃ °तलौ ; D₅ °नखौ) ; S ताम्रपादतलौ°. — (L. 59) S चास्याः (M₁ तस्याः) (for चापि). D₁ T₁ G₁ M₁ शो(D₁ शु)भाते ; D₃ शुशुभौ (for शोभेते). De₂ D₃. ₅ °धुनौ ; D₁ °तलौ ; D₄. ₆ S °किनौ (for °किणौ). K₄ D₂ शु(D₂ सु)शुभौ किंकिणीकिणौ (for the posterior half). — (L. 60) S (except G₄) सीधुं° (for सीधु°). D₁. ₃ तृष्ट्या च ; T₁ तृष्टाथ ; T₂ G₂₋₄ तृष्टा च ; G₁ damaged ; M₁ तृष्टाश्व (for तृष्ट्याथ). B₄ De मदनेन (for मदं°). — (L. 61) K₄ B₃ De D₁. ₂. ₅ S (G₁ damaged) विलासिनैश्च (for °नैश्च). — (L. 62) T G M₁ सार्ध्यै(T₁ °ध्रै)र्यातः ; M₂ प्रार्थिता या (for सा प्रयाता). — (L. 63) S om. line 65. B₁. ₃ लोभ° ; De D₅ शोभ° (for दर्श°). K₄ D₁. ₂ आश्चर्यमिव लक्ष्यते ; D₃ आश्चर्यपदभागता (for the posterior half). — D₃ om. lines 65–68. — (L. 65) K₄ D₃. ₄₋₆ तन्वभ्राधावृता ; B₃ तनुत्राधावृते ; B₄ तन्वभ्रांगावृता ;

सुसूक्ष्मेणोत्तरीयेण मेघवर्णेन राजता ।
तनुरभ्रावृता व्योम्नि चन्द्रलेखेव गच्छती । [65]
ततः प्राप्ता क्षणेनैव मनःपवनगामिनी ।
भवनं पाण्डुपुत्रस्य फाल्गुनस्य शुचिस्मिता ।
तत्र द्वारमनुप्राप्ता द्वारस्थैश्च निवेदिता ।
अर्जुनस्य नरश्रेष्ठ उर्वशी शुभलोचना ।
उपातिष्ठत तद्वेश्म निर्मलं सुमनोहरम् । [70]
स शङ्कितमना राजन्प्रत्युद्गच्छत तां निशि ।
दृष्ट्वैव चोर्वशीं पार्थो लज्जासंवृतलोचनः ।
तदाभिवादनं कृत्वा गुरुपूजां प्रयुक्तवान् ।

अर्जुन उवाच ।

अभिवादये त्वां शिरसा प्रवराप्सरसां वरे ।
किमाज्ञापयसे देवि प्रेष्यस्तेऽहमुपस्थितः । [75]

वैशंपायन उवाच ।

फाल्गुनस्य वचः श्रुत्वा गतसंज्ञा तदोर्वशी ।
गन्धर्ववचनं सर्वं श्रावयामास तं तदा ।

उर्वश्युवाच ।

यथा मे चित्रसेनेन कथितं मनुजोत्तम ।
तत्तेऽहं संप्रवक्ष्यामि यथा चाहमिहागता ।
उपस्थाने महेन्द्रस्य वर्तमाने मनोरमे । [80]
तवागमनतो वृत्ते स्वर्गस्य परमोत्सवे ।
रुद्राणां चैव सांनिध्यमादित्यानां च सर्वशः ।
समागमेऽश्विनोश्चैव वसूनां च नरोत्तम ।
महर्षीणां च संघेषु राजर्षिप्रवरेषु च ।
सिद्धचारणयक्षेषु महोरगगणेषु च । [85]
उपविष्टेषु सर्वेषु स्थानमानप्रभावतः ।
ऋद्ध्या प्रज्वलमानेषु अग्निसोमार्कवर्चसु ।
वीणासु वाद्यमानासु गन्धर्वैः शक्रनन्दन ।
दिव्ये मनोरमे गेये प्रवृत्ते पृथुलोचन ।
सर्वाप्सरःसु मुख्यासु प्रनृत्तासु कुरूद्वह । [90]
त्वं किलानिमिषः पार्थ मामेकां तत्र दृष्टवान् ।
तत्र चावभृथे तस्मिन्नुपस्थाने दिवौकसाम् ।

De1 (corrupt) तत्रर्षा व्याकुले ; De2 D1 नवाभ्रव्यावृते ; T G2–4 M तन्वभ्रावृता (M2 °व्याहता) ; G1 न च भूत्रावृता (for तनुरभ्रावृता). Du2 D6 T2 G2. 3 M2 गच्छति (for °ती). — (L. 66) S [अ]निदुःप्राप्ता (G1 damaged ; T1 M1 °पं) (for क्षणेनैव). S (G1 damaged) मनसापि विकर्म(M1 °मिं)भिः (for the posterior half). — (L. 67) S (except G4 ; G1 damaged) फल्गुनस्य. K4 D2 S (G1 damaged) गुणाधिका (for शुचि°). — (L. 68) T2 G3 °मपि (for °मनु-). K4 D2 द्वारस्थैस्तस्य ; T1 द्वारस्थैनापि ; T2 G2–4 M1 द्वारस्थैरपि (T2 G3 °भि-) ; G1 M2 द्वारस्थैश्च वि- (for द्वारस्थैश्च). — (L. 69) B3 नरव्याघ्र ; S नृपश्रेष्ठ (for नर°). K4 D2. 3 S परमाप्सराः ; B3 स्वर्गभूषणा (for शुभ°). — D6 om. lines 70–72 ; T1 om. line 70. — (L. 70) De D1 उपातिष्ठत्तदा वेश्म (for the prior half). B1 De मनोरमं (for °हरम्). K4 D2. 3 S (T1 om.) तत्र चौ(K4 D1. 2 तत्र उ)त्थाय शयनाद्वासविर्वासवोपमः. — (L. 71) S अशंकितमना. B4 प्रत्युद्गच्छच्च ; De D1 M प्रत्यागच्छत ; T G3. 4 प्रत्यगच्छत ; G2 प्रत्यवेक्षत (for प्रत्युद्गं°). Du2 प्रत्युद्गच्छत्ततो निशि ; D3 अभ्युत्थानं चकार ह (for the posterior half). — (L. 72) G2. 4 प्राप्तां (for पार्थो). De ननामावृतलोचनः ; T2 G2. 3 लज्जावृताखिलोचनः. — (L. 73) B2 De S (G1 damaged) पादाभिवं(De D6 T1 °वा)दनं कृत्वा. — (L. 74) Hypermetric ! T G1. 3 M2 त्वा (for त्वां). S प्रमदे° (for प्रवरा°). — (L. 75) K4 D2. 3 S किं चा(D2 वा- ; T1 त्वा)गमनकृत्यं ते श्रोतुं सर्वं यथातथं. — (L. 76) K4 D2. 3 S (G1 damaged) अकामं फा(S फ)ल्गुनं ज्ञात्वा(K4 दृष्ट्वा) (for the prior half). K4 D2. 3 S (G1 damaged) इंगितज्ञा (for गतसंज्ञा). G2. 4 तनो° (for तदा°). — (L. 77) De D1. 4 तत्तदा ; D3 पांडवं ; S (G1 damaged) फल्गुनं (for तं तदा). — (L. 79) K4 B1. 3. 4 De D1–3. 5 S सर्वं (for ऽहं सं-). D3 om. lines 81–88. — (L. 81) K4 B3 De D1. 2. 5 S (T2 before corr.) नवागमनतुष्ट्या च (De D1 ते) (for the prior half). — (L. 82) K4 D2 मरुतां (for रुद्राणां). K4 De D1. 2. 5 S (G1 damaged) सांनिध्यं (for °ध्यम्). — (L. 83) S (G1 damaged) चापि (for चैव). D2 समागमे (for नरो°). — (L. 84) M2 सर्वेषां (for संघेषु). M2 राजर्षीणां वरेषु च (for the posterior half). — (L. 85) D2 om. line 85. — (L. 86) De D1 om. line 86. K4 D2 S (except G4) दृष्टेषु (for सर्वेषु). K2 स्थानमात्र° ; G4 मानस्थान° (by transp.). — (L. 87) G2 रूच्या (for ऋद्ध्या). T2 G2–4 प्रज्वाल्य° (for प्रज्वल°). K4 D2 T1 G2 M अग्नीषोमार्क°. K4 D2. 5 °र्चसु ; T1 M1 °र्चर्मसु (for °वर्ष्मसु). — (L. 88) B2–4 De D2. 4. 5 वह्निमानासु ; D1 पद्म° ; D5 वर्ण° (for वाद्य°). K4 वीणामुद्यम्यमानासु. A few MSS. शत्रुनंदनः ; B3 शत्रुमर्दन. — (L. 89) S गीते (for गेये). K4 De D1. 2 °लोचने (for °लोचन). D3 गेये प्रवृत्ते नृत्येथ गंधर्वे पृथुलोचना. — (L. 90) K4 D2 G2 सर्वाप्सरसमुख्यासु ; De D1 °रःसु मुख्येषु ; D4 °रःसु पुण्यासु ; T1 °रसमाजेषु ; G1 M °र(M2 °रः)समास्यासु ; G4 °रःसमाख्यासु. K4 B1. 2. 4 De Du1 D1. 2 G1. 2. 4 प्रवृत्तासु ; D3 प्रपन्नासु ; T1 समास्यासु (for प्रनृत्तासु). S °त्तम (for °द्वह). — (L. 91) K4 किलाभिलषन् ; D1. 2 कुलाभिलखं (for किलानिमिषः). B3 मामेकां दृष्टवानसि ; De D3 मामेकाग्रं (D3 °ग्रः) प्रदृष्टवान्. — (L. 92) B3m De D1 ततः (B3m तत्र) चैवं-

तव पित्राभ्यनुज्ञाता गताः स्वं स्वं गृहं सुराः ।
तथैवाप्सरसः सर्वा विसृष्टाः स्वगृहं गताः ।
अपि चान्याश्च शत्रुघ्न तव पित्रा विसर्जिताः । [95]
ततः शक्रेण संदिष्टश्चित्रसेनो ममान्तिकम् ।
प्राप्तः कमलपत्राक्ष स च मामब्रवीदथ ।
त्वत्कृतेऽहं सुरेशेन प्रेषितो वरवर्णिनि ।
प्रियं कुरु महेन्द्रस्य मम चैवात्मनश्च ह ।
शक्रतुल्यं रणे शूरं रूपौदार्यगुणान्वितम् । [100]
पार्थं प्रार्थय सुश्रोणि त्वमित्येवं तदाब्रवीत् ।
ततोऽहं समनुज्ञाता तेन पित्रा च तेऽनघ ।
तवान्तिकमनुप्राप्ता शुश्रूषितुमरिंदम ।
त्वद्गुणाकृष्टचित्ताहमनङ्गवशमागता ।
चिराभिलषितो वीर ममाप्येष मनोरथः । [105]

वैशंपायन उवाच

तां तथा ब्रुवतीं श्रुत्वा भृशं लज्जावृतोऽर्जुनः ।
उवाच कर्णौ हस्ताभ्यां पिधाय त्रिदशालये ।
दुःश्रुतं मेऽस्तु सुभगे यन्मां वदसि भाविनि ।
गुरुदारैः समाना मे निश्चयेन वरानने ।
यथा कुन्ती महाभागा यथेन्द्राणी शची मम । [110]
तथा त्वमपि कल्याणी नात्र कार्या विचारणा ।
यच्चेक्षितासि विस्पष्टं विशेषेण मया शुभे ।
तच्च कारणपूर्वं हि शृणु सत्यं शुचिस्मिते ।
इयं पौरववंशस्य जननी मुदितेति ह ।
त्वामहं दृष्टवांस्तत्र विज्ञायोत्फुल्ललोचनः । [115]
न मामर्हसि कल्याणि अन्यथा ध्यातुमप्यसः ।
गुरोर्गुरुतरी मे त्वं मम वंशविवर्धिनी ।

उर्वश्युवाच ।

अनावृताश्च सर्वाः स्म देवराजाभिनन्दन ।
गुरुस्थाने न मां वीर नियोक्तुं त्वमिहार्हसि ।
पूरोर्वंशे हि ये पुत्रा नप्तारो वा त्विहागताः । [120]

गते; D_2 तत्र चोपगते (for तत्र चावभृथे). — (L. 93) K_4 D_3 स्वान् स्वान् निलयान् (D_2 लालया) सुराः; S (G1 damaged) गताः स्वानिलयान् (T_1 °यं) सुराः. — (L. 94) K_2 B_1 Dn D_4 विशिष्टाः (for विसृष्टाः). K_4 De $D_{1-3.5}$ स्वान्गृहान्; S निलयं (for स्वगृहं). De $D_{1.5}$ तथा; T_1 सुराः (for गताः). — (L. 95) De $D_{1.5}$ ऽनाश; S अह (for अपि). B_1 D_5 विवर्जिताः (for विस°). — (L. 96) D_3 निर्दि° (for संदि°). — (L. 97) K_4 $D_{3.3}$ S (G1 damaged) स्वयं; B_2 इदं (for अथ). De $D_{1.5}$ मामेवं स्वयमब्रवीत् (for the posterior half). — (L. 98) De त्वत्कृतेन (for °तेऽहं). D_3 सुरेंद्रेण. $D_{1.2}$ G_4 M_2 प्रेषिता (for °तो). $D_{1.2}$ $G_{3.4}$ वरवर्णिनि. — (L. 99) D_2 सुरेशस्य (for महेन्द्रस्य). D_3 °त्मनस्तथा; D_5 °त्मना सह (for °त्मनश्च ह). — (L. 100) De $D_{1.5}$ वीरं (for शूरं). K_2 B Dn $D_{4.6}$ G_1 सदा° (for रूपौ°). — (L. 101) De $D_{1.4.5}$ त्वमित्येव. De च सा; D_2 S स मा; D_5 वचो (for तदा). D_3 (corrupt) त्वमेनं समुनोदितं. — (L. 102) De D_1 तथा (for ततो). T_1 $G_{1.2}$ M प्रीता (for पित्रा). M_3 तवांतिकं (for च तेऽनघ). D_3 तव पित्रा च तेन च (for the posterior half). — (L. 103) M_3 अनुप्राप्ता महाबाहो (for the prior half). — (L. 104) K_4 D_3 S न केवलं हि शक्रेण प्रेषिता चाह(K4 D2 संदिष्टेत्यह)मागता; D_3 त्वत्सनिधानं शक्रस्य संदेशादहमागता. — (L. 106) D_3 वदतीं (for ब्रुवतीं). K_4 D_3 S °न्वितो (for °वृतो). — (L. 107) K_4 D_2 transp. उवाच and पिधाय. K_4 B_4 $D_{2.3}$ S त्रिदशोपमः (for °शालये). — (L. 108) S अश्रुतं (for दुःश्रुतं). D_{C1} $D_{2.3.5}$ ते (for मे). D_{C2} D_1 तेषु (for मेऽस्तु). K_4 यथा; G_2 M यन्मां (for यन्मां). K_4 D_{C2} $D_{1-3.5.6}$ T_1 $G_{1.2}$ M भामिनि (for भाविनि). — (L. 109) De D_{N2} $D_{1.5}$ त्वं; S हि (T_1 नमि; M_1 नमि also) (for मे). K_4 D_2 नित्यमेव; De $D_{1.5}$ नित्यमेषा; D_3 विभेत्येषा; S नित्यं मेमि (T_1 मे हि) (for निश्चयेन). De $D_{1.5}$ मतिर्मम; D_3 वरांगने (for वरा°). — K_4 B_{1-3} D_2 S om. lines 110–111. — (L. 110) D_5 reads line 110 in marg. $D_{3.5}$ यथा कुंती च माद्री च तथा त्वमपि भामिनि. — (L. 111) De Dn $D_{1.4.6}$ कल्याणि (for °णी). — (L. 112) De $D_{1.5}$ यद्वीक्षि°; T_2 G_{2-4} यत्प्रेक्षि° (for यच्चेक्षि°). D_3 सुभगे (for विस्पष्टं). K_4 तवाशुभे (to मया शुभे as above). — (L. 113) K_4 त्वं तच्च कारणं सर्वं; De $D_{1.2.5}$ T G तच्च मे कारणं पूर्वं (D_2 T G सर्वं); D_3 M तत्र (M_1 तस्य) मे कारणं सर्वं (for the prior half). K_4 $D_{2.3}$ S शृणु सत्येन सुस्मिते (D_3 सुव्रते). — (L. 114) D_3 इह (for इयं). K_2 D_3 जननी-मुचितेति ह (D_2 °न हि); K_4 °नी मुदितेन ह; $B_{2.3}$ De D_5 °नी विदितेति ह; $D_{1.2}$ °नी मुदितोमयं; S °नी मुदतीति ह (T_1 °नीति मुनीति हि) (for the posterior half). — (L. 115) K_4 $D_{2.3}$ S विस्मयाः; D_5 विज्ञायो° (for विज्ञायो°). — (L. 116) T_2 $G_{2.3}$ मुक्षोणि (for कल्याणि). K_2 $D_{5.6}$ मंतुम्; K_4 P_3 De D_{N2} D_{1-3} S मंतुम्; D_4 मातुम् (for ध्यातुम्). K_4 $D_{1.2}$ अप्सरे; D_3 उत्सहे; S अंगने (for अप्सरः). — (L. 117) K_2 D_{C2} Dn गुरुतरा. D_2 3 T $G_{1.3.4}$ M त्वं मे (by transp.). D_{N1} मा मे (for मम). K_2 $D_{N2.N3}$ मम त्वं वंशवर्धिनी: $B_{1.2.4}$ $D_{2.3.6}$ T G_{2-4} M_2 मम वंशविवर्धनी. — (L. 118) K_4 न नः सर्वा; S वयं सर्वा (for च सर्वाः स्म). K_4 $D_{2.5}$ देवराजा वरानन; De D_1 °राजं (D_1 °राज-) वरानने; D_3 °राजानुगानघ; T G °वार(T1 °वारा)-वरांगनाः; M °वारा वरानन (for the posterior half). — (L. 119) T_2 $G_{1.3}$ मा (for मां). — (L. 120) B

तपसा रमयन्त्यस्मान्न च तेषां व्यतिक्रमः ।
तत्प्रसीद न मामार्तां विसर्जयितुमर्हसि ।
हृच्छयेन च संतप्तां भक्तां च भज मानद ।
अर्जुन उवाच ।
शृणु सत्यं वरारोहे यत्त्वां वक्ष्याम्यनिन्दिते ।
शृण्वन्तु मे दिशश्चैव विदिशश्च सदेवताः । [125]
यथा कुन्ती च माद्री च शची चैव ममानघे ।
तथा स्वयंशजननी त्वं हि मेऽद्य गरीयसी ।
गच्छ मूर्ध्ना प्रपन्नोऽस्मि पादौ ते वरवर्णिनि ।
त्वं हि मे मातृवन्पूज्या रक्ष्योऽहं पुत्रवत्त्वया ।
वैशंपायन उवाच ।
एवमुक्ता तु पार्थेन उर्वशी क्रोधमूर्छिता । [130]
वेपन्ती भ्रुकुटीवक्त्रा शशापाथ धनंजयम् ।
उर्वश्युवाच ।
तव पित्राभ्यनुज्ञातां स्वयं च गृहमागताम् ।
यस्मान्मां नाभिनन्देथाः कामबाणवशं गताम् ।
तस्मात्त्वं नर्तनः पार्थ स्त्रीमध्ये मानवर्जितः ।
अपुमानिति विख्यातः षण्ढवद्विचरिष्यसि । [135]
वैशंपायन उवाच ।
एवं दत्त्वार्जुने शापं स्फुरदोष्ठी श्रमन्त्यथ ।
पुनः प्रत्यागता क्षिप्रमुर्वशी गृहमात्मनः ।
ततोऽर्जुनस्त्वरमाणश्चित्रसेनमरिंदमः ।
संप्राप्य रजनीवृत्तं तदुर्वश्या यथा तथा ।
निवेदयामास तदा चित्रसेनाय पाण्डवः । [140]
तत्र चैवं यथावृत्तं शापं चैव पुनः पुनः ।
न्यवेदयच्च शक्रस्य चित्रसेनोऽपि सर्वशः ।
तत आनाय्य तनयं विविक्ते हरिवाहनः ।
मान्वयित्वा शुभैर्वाक्यैः स्मयमानोऽभ्यभाषत ।
सुपुत्राद्य पृथा तात त्वया पुत्रेण सत्तम । [145]
ऋषयोऽपि हि धैर्येण जिता वै ते महाभुज ।

De Dn₂ D₁ पुरोर (for पृ°). De D₁ च (for हि). K₄ D₂ पितुः; K₄ पुत्राश्च; D₃ पितरो वापि तनया; S पितुः मातुः पुत्रा (for the prior half). D₃ [ह]पि (for वा). D₁ M₂ इहागताः; T G M₁ [आ]गता इह (for विहा°). — (L. 121) T₁ °यंति मा (for °वन्त्यस्मान्). T₁ G₁ M न चास्मे(M₂ °स्वे)षां; T₂ G₂. ₃ नैव तेषां; G₄ न वै तेषां (for न च तेषां). — (L. 123) K₄ B₁ S मक्षार्ता (for संतप्ता). S (except G₄) मानद (for °द). — (L. 124) T₁ यथा; G₁ यदा; G₃ M यत्त्वा (for यत्त्वां). — (L. 125) B₃ सदेवता (for सदे°). — (L. 126) K₃ D₅ वैद्र; K₄ B₁–₃ Dc Dn D₁. ₂ नेह (for चैव). S मम इह (for ममानघे). D₃ ममानेति ममामि मे (for the posterior half). — (L. 127) K₂ B Dn D₄. ₆ च; T₁ त्वं (for स्व-). D₃ [ह]पि (for ऽद्य). M₂ त्वत्पादौ (for पादौ ते). — (L. 129) K₄ पालया (for पूज्या). G₁ ईक्ष्यो; a few MSS. रक्ष्यो (for रक्ष्यो). — (L. 130) K₄ Dc D₃. ₅ S तथा(S °नो)वेपता पार्थेन (for the prior half). — T₂ G₃ om. lines 131–134. — (L. 131) K₄ चुकोप चोर्वशी रोषात; B₃ Dc D₁–₃. ₅ T₁ G₁. ₂. ₄ M वेपंती भ्रुकुटीं कृत्वा. K₄ शापो दत्तश्च दारुणः (for the posterior half). — (L. 132) K₄ om. line 132. G₂. ₄ चित्रसेना° (for तव पित्रा°). — (L. 133) T₁ G₂. ₄ M त्वं (for मां). D₃ °प्रपीडितां (for °वशं गताम्). K₄ भजंतीं मामनादृत्य न कृतं वचनं मम. — (L. 134) B₃. ₄ Dc D₅ T₁ G₁. ₂. ₄ नर्तकः (for °नः). — (L. 135) S अपुंस्त्वेन च (for अपुमानिति). A few MSS. षंढ° or खंढ° (for षण्ढ°). — (L. 136) K₃ B D (except D₁–₃. ₅) S (except M₁) om. the ref. (M₁ om. उवाच). K₄ D₂ S स्फुरितोष्ठी; B₃. ₄ D₅ स्फुरदोष्ठा. K₃ श्रमत्यथ; K₄ D₃. ₅ °मन्निव; B₄ °मत्तथा; Dc T G₃ M₁ °मेत्यपि; D₃ °मित्यलं; G₁. ₂. ₄ M₃ श्रमन्त्यपि. — (L. 137) S शीघ्रम (for क्षिप्रम). K₄ D₁–₃ S स्वं निवेशनं (for गृहमा°). — K₄ B₃ D₁–₃ S subst. for lines 138–139; D₅ ins. (the first line only) after 137:

पार्थोऽपि लब्ध्वा तं शापं तां निशां दुःखितोऽवसत् ।
चित्रसेनोऽपि चित्रसेनाय प्राप्य सर्वमदुष्टवान् ।
ततः प्रभाते विमले गन्धर्वस्य यथातथम् ।

[(L. 1) T₂ G₂–₄ शापं तं (by transp.). G₁ [ऽ]भवत् (for ऽभवन्). B₃ तां निशां दुःखितो राजन्नतः पार्थोऽवसत्. — (L. 2) B₃ M₃ om. line 2. T G विचक्षुः (for चित्रसेनः). M₂ विचित्रं चित्रसेनाय; G₁ स चित्रवांश्चसेनाय (for the prior half). T G₂–₄ M₁ °मदुष्टवत; G₁ °मदुष्टवन् (for °मदुष्टवान्). — M₁ om. lines 138–141. — (L. 138) Dc त्वरायुक्तश्च (for त्वरमाणश्च). B Dc D₅. ₆ चित्रसेनस्य मंदिरं (Dc °रे) (for the posterior half). — (L. 139) Dc D₅ उर्वश्याश्च (for तदुर्वश्या). B Dc D₆ यथातथं. — (L. 140) D₆ T₁ G M₂ चित्रसेनस्य. S (M₁ om.) फल्गुनः (for पाण्डवः). — (L. 141) K₄ B Dc D₁–₃. ₅ S (M₁ om.) तत्र (T₁ यच्च; T₂ G₁. ₂. ₄ M₃ तच्च) सर्वं; D₃. ₆ चित्रसेनं (for तत्र चैवं). S (M₁ om.) यथातथं (for पुनः पुनः). D₃ शापस्यैव तथा पुनः (for the posterior half). — (L. 142) K₃ Dn D₆ अवेदयच्च (K₃ °ड); K₄ निवे°; Dc D₅ आवे°; D₆ न्यवेदयत्स. — (L. 143) S तदा त्वानाय्य तनयं. — (L. 144) K₄ B₂–₄ शांतं (for मान्व°). — (L. 145) B₄ Dc Dn₂ D₅ सत्पुत्रा° (for सु°). Dc T₂ G₂–₄ transp. पृथा and त्वया. D₅ त्वया (for पृथा), and माता (for त्वया). K₄ B₁. ₂. ₄ D₁–₃. ₆ S पुरुषसत्तम (G₁ [अ]थ पुरुषर्षभ); Dc [अ]हं पुरुषोत्तमः (for पुत्रेण सत्तम). — (L. 146) D₃ damaged. S जिताश्चैते.

यत्तु दत्तवती शापमुर्वशी तव मानद ।
स चापि तेऽर्थकृत्तात साधकश्च भविष्यति ।
अज्ञातवासो वस्तव्यो युष्माभिर्भूतलेऽनघ ।
वर्षे त्रयोदशे वीर तत्र त्वं क्षपयिष्यसि । [150]
तेन नर्तनवेषेण अपुंस्त्वेन तथैव च ।
वर्षमेकं विहृत्यैव ततः पुंस्त्वमवाप्स्यसि ।
एवमुक्तस्तु शक्रेण फाल्गुनः परवीरहा ।
मुदं परमिकां लेभे न च शापं व्यचिन्तयत् ।
चित्रसेनेन सहितो गन्धर्वेण यशस्विना । [155]
रेमे स स्वर्गभवने पाण्डुपुत्रो धनंजयः ।
य इदं शृणुयान्नित्यं वृत्तं पाण्डुसुतस्य वै ।
न तस्य कामः कामेषु पापकेषु प्रवर्तते ।
इदममरवराग्र्यजस्य घोरं
शुचि चरितं विनिशम्य फाल्गुनस्य । [160]
व्यपगतमददम्भरागदोषा-
स्त्रिदिवगताभिरमन्ति मानवेन्द्राः ।

Colophon.

7

K$_2$ B (except B$_1$) D (except D$_{1-3}$) ins. after 3. 49. 21; K$_1$ (which om. 21–21) ins. after 3. 49. 20:

घृतप्रियेण राजेन्द्र कृतं तद्भवता तथा ।
प्रायेणाज्ञातचर्यायां वयं सर्वे निपातिताः ।
न तं देशं प्रपश्यामि यत्र सोऽस्मान्सुदुर्जनः ।
न विज्ञास्यति दुष्टात्मा चारैरिति सुयोधनः ।
अधिगम्य च सर्वान्नो वनवासमिमं ततः । [5]
प्रव्राजयिष्यति पुनर्निकृत्याधमपूरुषः ।
यद्यस्मानभिगच्छेत पापः स हि कथंचन ।
अज्ञातचर्यामुत्तीर्णान्दृष्ट्वा च पुनराह्वयेत ।
घृतेन ते महाराज पुनर्घृतमवर्तत ।
भवांश्च पुनराहूतो घृतेनैवापनेष्यति । [10]
स तथाक्षेषु कुशलो निश्चितो गतचेतनः ।
चरिष्यसि महाराज वनेषु वसतीः पुनः ।
यद्यस्मान्सुमहाराज कृपणान्कर्तुमर्हसि ।
यावज्जीवमवेक्षस्व वेदधर्मांश्च कृत्स्नशः ।
निकृत्या निकृतिप्रज्ञा हन्तव्या इति निश्चयः । [15]
अनुज्ञातस्त्वया गत्वा यावच्छक्ति सुयोधनम् ।
यथैव कक्षमुत्सृष्टो दहेदनिलसारथिः ।
हनिष्यामि तथा मन्दमनुजानानु नो भवान् ।

T$_1$ °रथ (for °सुत). — (L. 147) K$_2$ D$_{1-3}$ यच्च; S यं च (for यत्तु). — (L. 148) D$_3$ स चापि हि तथा काले (for the prior half). — (L. 149) K$_2$ B$_2$ D$_{\rm n}$ D$_{4.6}$ भवद्भिर् (for युष्माभिर्). D$_3$ विल (for ऽनघ). — (L. 150) K$_2$ B$_1$ D$_{\rm n}$ D$_{4.6}$ ते तत्र; B$_2$ D$_{1.3.5}$ तत्र ते (D$_3$ तत) (for तत्र त्वं). D$_{2.3}$ क्षपयिष्यति; S गमयिष्यसि. — (L. 151) D$_3$ तत्र (for तेन). T$_2$ G नर्तक° (for नर्तन°). S अपुंस्कत्वेन (T$_1$ अप्यपुंस्त्वेन) चैव हि. — (L. 152) K$_2$ D$_{\rm n}$ G$_4$ °भवं (for °भवने). B$_3$ D$_{\rm e2}$ D$_3$ °त्वैवं (for °त्वैव). — (L. 153) Before line 153, K$_4$ D$_{\rm e}$ D$_{1-3.5}$ S ins. वैशं° उ° (S om. उ°). S अर्जुनः (for फाल्गुनः). — (L. 154) D$_{1.3}$ विचिन्त° ; S अचिंत° (for व्यचिन्त°). — (L. 156) S रत्नवान् (for रेमे स). K$_4$ B$_{1.3.4}$ D$_{\rm e}$ D$_{1-3.5}$ स्वर्गसदने; S शक्र(G$_1$ चित्र)सदने (for स्वर्गभवने). — (L. 157) K$_2$ D$_{\rm n}$ इदं यः (by transp.); B$_{1.4}$ D$_{1.3}$ T$_2$ G$_1$ य इमं; T$_1$ M य इमां. K$_2$ D$_{\rm n}$ वृत्तं नित्यं (by transp.); S नित्यं श्रुतिं. — (L. 158) K$_4$ D$_2$ पातकेषु; T$_1$ °कामु° (for पाप°). D$_3$ पापेषु परिवर्तते. — Metre of final stanza: Puṣpitagrā. — (L. 159) T$_1$ इयम् (for इदम्). S घोरं (for घोरं). — (L. 160) B$_3$ पांडवस्य (for फाल्गु°). K$_2$ D$_{\rm e}$ D$_2$ शुचि चरितं धनंजयस्य श्रुत्वा; S धृतिमन्तो च धनंजयस्य श्रुत्वा (T$_2$ G$_{2-4}$ दृष्ट्वा). — (L. 161) T$_2$ G$_{2-4}$ अपगत- (for व्यपगत-). B$_3$ °रागदेभ° (by transp.); S -भयद्वे(T$_2$ G$_3$ °दं)भरागदोषाः. — (L. 162) S रमयंति (for [अ]मिरमन्ति). D$_3$ त्रिदिवगतान्नरमयेन्द्र पार्थिवेन्द्रान्.

7

(L. 1) K$_1$ D$_{\rm n}$ transp. कृतं and तथा. D$_{\rm e}$ यत्तं तद्भवता तथा. — (L. 3) K$_2$ सुदुर्जयः (for °र्जनः). — (L. 4) K$_2$ नान्वेत्ति (for °र्गति). — (L. 5) B$_3$ reads line 5 in marg. K$_1$ अभि° (for अधि°). — (L. 6) D$_6$ परा°यिष्यसि (for प्रव्राज°). B$_4$ D$_{\rm e1}$ D$_6$ [अ]धर्मं°; D$_4$ यमं° (for [अ]धम°). — (L. 7) B$_4$ त्वामानयिगच्छेत्. — (L. 8) B$_{2-4}$ D$_{\rm e}$ अज्ञातवासं(B$_2$ °चर्या)दुर्जीर्णान्. — (L. 9) B$_3$ D$_1$ युद्धम् (for द्यूतम्). K$_1$ पुनः पूर्ववदेव हि (for the posterior half). — (L. 10) K$_2$ B$_{3.4}$ D$_{\rm e}$ तु (for च). B$_2$ °वाप्यति (for °नेष्यति). — (L. 11) B$_4$ स तथा; D$_{\rm e}$ D$_{\rm n2}$ D$_6$ सर्वथा (for स तथा). B$_3$ D$_{\rm n2}$ [अ]कुशलो (for कुशलो). K$_1$ [ऽ]कृत° (for गत°). — (L. 12) K$_1$ चरिष्यसि भवांस्तावत् (for the prior half). D$_{\rm e}$ वसतीः (for °तीः). — (L. 13) K$_1$ तु; D$_{\rm n1}$ न (for कृ). — (L. 14) B$_2$ $_4$ D$_{\rm e}$ D$_6$ वेदान्; B$_3$ देवान् (for वेद°). K$_1$ B$_{2-4}$ D$_{\rm e}$ D$_{4-6}$ शाश्वतान् (for कृत्स्नशः). — Line 15 = 3. 49. 20^{ab}. — (L. 16) D$_{\rm e}$ D$_{\rm n}$ D$_2$ यावद्वन्मि (for °च्छक्ति). — (L. 18) K$_1$ मे; B$_4$ मां (for नो).

8

(L. 1) B$_2$ वस्त्राणि (for वासांसि). — (L. 2) B D$_{\rm e}$ D$_{5.6}$

8

After 3. 53. 7, K1. 2 B D (except D1–3) ins.:

विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा ।
भूषणानि तु मुख्यानि देवान्प्राप्य तु भुङ्क्ष्व वै ।
य इमां पृथिवीं कृत्स्नां संक्षिप्य प्रसते पुनः ।
हुताशमीशं देवानां का तं न वरयेत्पतिम् ।
यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः । [5]
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिम् ।
धर्मात्मानं महात्मानं दैत्यदानवमर्दनम् ।
महेन्द्रं सर्वदेवानां का तं न वरयेत्पतिम् ।
क्रियतामविशङ्केन मनसा यदि मन्यसे ।
वरुणं लोकपालानां सुहृद्वाक्यमिदं शृणु । [10]
नैषधेनैवमुक्ता सा दमयन्ती वचोऽब्रवीत् ।
समाकुलाभ्यां नेत्राभ्यां शोकजेनाथ वाग्णा ।
देवेभ्योऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते ।
तामुवाच ततो राजा वेपमानां कृताञ्जलिम् । [15]
दौत्येनागत्य कल्याणि तथा भद्रे विधीयताम् ।
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः ।
परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे ।
एष धर्मो यदि स्वार्थो ममापि भविता ततः ।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयताम् । [20]

9

After 3. 55. 1, M3 ins.:

मद्यपूर्णं समादाय घटं कटिसमन्वितम् ।
अपरेण तु मांसं च दग्धकाष्ठाचितं बहु ।
ऋक्षैः परिवृतो रौद्रः कपटी भ्रुकुटीमुखः ।
रक्ताम्बरधरः कालो रक्तस्रगनुलेपनः ।
कथयन्विविधास्तत्र कथाः परमदारुणाः । [5]
परदारापहरणं परद्रव्यप्रलम्भनम् ।
पाने चातिप्रसङ्गं च विश्वासस्य च घातनम् ।
द्यूते च मृगयायां च चौर्यं चाशुचिकर्मणि ।

10

For 3. 62. 1–17, K4 D1–3 subst.:

बृहदश्व उवाच ।
सा तच्छ्रुत्वानवद्याङ्गी सार्थवाहवचस्तदा ।
अगच्छद्राजशार्दूल विद्युल्लेखेव शारदी ।
सार्थे महति दुःखार्ता भर्तृदर्शनलालसा ।
रजसा समवच्छन्ना सार्थेन शुचिस्मिता ।
अनभिज्ञायमानैव गच्छन्ती सुमहद्वनम् । [5]
आससाद सरो रम्यं भास्करस्यास्तमंगमे ।
शीततोयं सुविपुलं निर्मलं नैकयोजनम् ।
कह्लारैः समवच्छन्नं पद्मोत्पलविराजितम् ।
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ।
तीरजैस्तरुभिर्हृद्यैः फलपुष्पोपशोभितैः । [10]
व्यराजत यथा राजा सुभृत्यैः परिवारितः ।
तदाश्रित्य स सार्थस्तु निवासायोपजग्मिवान् ।
भारार्ताः सौरभेयास्तु क्षुत्तृषापरिवारिताः ।
अवरोपितभाराम्तु लेभिरे परमं सुखम् ।
तथाश्वा वारणाश्चैव रासभाः करभैः सह । [15]
दृष्ट्वा तत्सरो रम्यमाश्वासं परमं ययुः ।
अथानन्तरमेवेह वणिजः पथिकास्तथा ।
यथायोगं यथास्थानं स्वावासं प्रतिपेदिरे ।
यथास्थितिसमाचारमाहारस्थानमेव च ।
अवतीर्यावसन्नानां चक्रुश्चैव प्रवेक्षणम् । [20]

च (for the first तु). — (L. 4) K2 Dc1 D4 कांतं; B1 या तं (for का तं). — (L. 5) K1 भूतास्त्रासमन्विताः (for the posterior half). — (L. 6) Dc °मेवाद्य° (for °मेवानु°). K2 Dc1 Dn2 कांतं (for का तं). — (L. 7) B1. 2 °सूदनं (for °मर्दनम्). — (L. 8) K2 Dc1 कांतं (for का तं). — (L. 11) B1. 3. 4 Dc D5 तु (for सा). — (L. 13) K2 B1. 3 Dc नमस्कृत्वा. — (L. 16) D5 दूत्येन (for दौ°). B2 Dc D5 नाहं (Dc कथं) स्वार्थमिहोत्सहे (for the posterior half); cf. line 18. — (L. 18) B2 तु (for कथं). — (L. 19) K1 तथा; K2 पुनः (for ततः). — (L. 20) Dc तत्र (for भद्रे).

10

(L. 1) = 3. 62. 1ab. D3 सार्थवाहस्य तद्वचः. — (L. 2) D1 नर° (for राज°). — (L. 3) Cf. 3. 62. 1cd. D3 भर्तुर् (for भर्तृ°). — (L. 4) D1 सार्थेन सह दुःखिता (for the posterior half). — (L. 5) D1 °मानं च; D3 °माना तु (for °मानैव). — (L. 7) K4 नैक°; D1 नव° (for नैक°). — (L. 10) K4 °शोभितं (for °शोभितैः). — (L. 11) K4 विराजति; D1 विराजत. K4 भ्व° (for भृ°). — (L. 12) D1 यदाश्रित्य. K4 D1 तु (for च), and °चक्रमे (for °जग्मिवान्). — (L. 13) K4 D1 च (for तु). K4 लेभिरे परमं सुखं; D3 क्षुत्तृषापरिकर्शिताः. — K4 om. line 14. — (L. 17) D1 °मेवाह; D2 °मेतं च (for °मेवेह). — (L. 18) K4 यथायोगं (for °योगं). K4 आवासं; D3 स्वावासं. — (L. 20) D1 विपण्णानां (for [अ]वसन्नानां). K4 [अ]न्ववेपणं; D1 [अ]व्यवेक्षणं (for प्रवेक्षणम्). — (L. 22) D3 परे (for [अ]परे). — (L. 23) K4 समागमान्. — (L. 25) D1 च (for ते).

चक्रुः कथाश्च विविधाः क्रयविक्रयसंश्रिताः ।
प्रशंसन्त्यपरे कष्टामटवीं श्वापदावृताम् ।
स्मरन्तो गृहभोगांश्च ज्ञातीनां च समागमम् ।
पुत्रमित्रकलत्राणि सर्वे निद्रावशं ययुः ।
संवाहनेन भाराणां बहुवासरजेन ते । [25]
खिन्नाः पतितगात्रास्तु निद्रयापहृता भृशम् ।
प्रसारिताङ्गाः खिन्नाश्च मृतकल्पा इवासते ।
अथार्धरात्रसमये गजयूथं महत्तदा ।
आजगाम सरो पिपासुस्तत्सरोजलम् ।
अथापश्यत तं सार्थं सार्थजान्सुबहून्गजान् । [30]
ते तान्ग्राम्यगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ।
तेषामापततां वेगः करीणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां शृङ्गाणां पततां क्षितौ ।
स्पन्दतामपि नागानां नालं संस्था वनोद्भवैः । [35]
करिभिः करिणः सर्वे नीता मृत्युवशं क्षणात् ।
स च सार्थो विमथितः सस्त्रीबालगजान्वितः ।
आरावः सुमहानासीत्त्रैलोक्यभयकारकः ।
वाजिभिः प्रद्रुतैश्चैव महोष्ट्रैः रासभैस्तथा ।
अन्योन्यं नाभिरक्षन्तं मथ्यमाना वनद्विपैः । [40]
हतो भ्राता हतः पुत्रो हतः स्वामी हतो मम ।
एषोऽग्निरुत्थितः कष्टं त्रायध्वं धावताधुना ।
रत्नराशिर्विशीर्णोऽयं गृह्णीध्वं किं प्रधावत ।
सामान्यमेतद् द्रविणं न मिथ्या वचनं मम ।
एवमेवाभिभाषन्तो विद्रवन्ति भयात्ततः । [45]
पुनरेवाभिधावन्ति वित्तप्रध्वंसकास्तथा ।
तस्मिंस्तथा वर्तमाने दारुणे जनसंक्षये ।
द यन्ती च बुबुधे भयसंत्रस्तमानसा ।

अपश्यद्दारुणं तच्च सर्वलोकभयंकरम् ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा । [50]
स्वप्नमनसा तस्मिंस्तस्थौ शशिनिभानना ।
सर्वैर्विध्वंसितैर्भग्नैस्तरुभिश्चन्दनादिभिः ।
विक्षिप्तैर्भाति भूः सर्वा द्यौरुल्कैरिव शारदी ।
पतद्भिः पात्यमानैश्च पतितैश्च ततस्ततः ।
भीषणीयं वनं तद्वि बभौ तत्र समन्ततः । [55]
विमुक्तनादसंत्रस्तं हाहाकारविनादितम् ।
बभौ तत्सत्त्वसंबाधं महारणमिवापरम् ।
ये तु तत्र विनिर्मुक्ताः सार्थाः केचिदविक्षताः ।
तेऽब्रुवन्महिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः । [60]
तथा यक्षाधिपः श्रीमान्न च वैश्रवणः प्रभुः ।
न पूजा विघ्नकर्तॄणामथ वा सार्थिकैः कृता ।
शकुनानां फलं चाथ विपरीतमिदं ध्रुवम् ।
ग्रहा वा विपरीतास्तु किमन्यदिदमागतम् ।
अपरे स्वबुवन्दीना ज्ञातिद्रव्यविनाकृताः । [65]
यामावद्य महाभागे नारी द्युम्नत्तदर्शना ।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा ।
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा । [70]
यदि पश्याम तां पापां सार्थघ्नीं नैकदुष्कृताम् ।
लोष्टभिः पांशुभिश्चैव तृणैः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हंस्यामः सा तु सार्थस्य कृत्यका ।
दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम् ।
भीता त्रस्ता च संविग्ना प्राद्रवद्येन काननम् । [75]
आशङ्कमाना तत्पापमात्मानं पर्यदेवयत् ।

— (L. 26) D1 च (for तु). D2 °पहृता (for °पहृता). — (L. 27) D1 प्रसारिताश्च (for °ताङ्गाः). K4 corrupt. — (L. 29) K4 D2 गजान् (for यत्र). — (L. 30) D1 अथापश्यच्च. K4 सार्थं तु; D1 तत्सार्थं; D2 सार्थं तत्. — (L. 32) D1 °द्रवतो; D2 °द्रवंति (for °द्रवन्त). — (L. 34) D1 मृगाणां; D2 शृंगिणां (for शृङ्गाणां). — (L. 35) K4 स्पंदनादपि. K4 marg. स्पंदनानपि मातंगानालानस्थान्वनोद्भवैः. — (L. 38) D1 सुमहांश्चासीत्. — (L. 40) K4 °लक्षंत (for °रक्षन्तं). — (L. 41) D1 हताः पुत्राः. K4 D1 सहायो (D1 °या) निहतो (D1 °ता) मम (for the posterior half). — (L. 42) K4 कष्टम् (for कष्टं). — (L. 44) D1 एव (for एतद्). — (L. 45) D1 [s]भिद्र° (for विद्र°). — (L. 49) D2 °द्विषमं (for °द्वैशसं). D1 तत्र (for तच्च). — (L. 50) D2 तच्छ्रुत्वा (for तद् दृष्ट्वा). — (L. 52) K4 D1 सार्थे (for सर्वैर्). D1 विध्वंसिते. K4 मणिरासिस्तरंतैः (sic) (for the posterior half). K4 (marg.) सार्थे विध्वंसिते भग्नैर्मुकुभिः सह चरनैः. — D2 om. from the posterior half of line 52 up to पतितैश्च in line 54. — (L. 53) D2 शारदैः (for °दी). — (L. 54) D1 पतद्भिः पात्यितैस्ततः (for the posterior half). — (L. 58) K4 माथोत् (for माथाः). — (L. 61) K4 नूनं (for न च). D1 नार्चितो धनदः प्रभुः (for the posterior half). — (L. 64) D2 °द्विह वागतं (for °दिमा°). — (L. 66) D1 द्युतम° (for द्युम्नत्त°). — (L. 68) D1 तथेयं (for तयेयं), and नून (for पूर्वं). — D1 om. lines 69–70. — (L. 70) K4 (by corr.) कांचिद् (for कार्या). D2 कृत्वा वै राक्षसीमिव (for the posterior half). — D2 om. lines 71–88. — (L. 71) D1 घ्नत मारिषं; D2 सर्वदुःखदां (for नैकदु°). — (L. 72) D1 लोष्टैश्च (for लोष्टाभिः). — (L. 74) K4 तेषां वाक्यं (by transp.). — (L. 75) K4 हता भीता; D1 भीता भीता.

अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नाति कुशलं कस्येदं कर्मणः फलम् ।
न स्मराम्यशुभं किंचित्कृतं कस्यचिदप्यहम् ।
कर्मणा मनसा वाचा कस्येदं कर्मणः फलम् । [80]
नूनं जन्मान्तरकृतं पापमापतितं महत् ।
अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
भर्तृराज्यापहरणं स्वजनाच्च पराभवः ।
भर्त्रा सह वियोगं च तनयाभ्यां च विच्युतिः ।
निर्वसता वने वासो बहुव्यालनिषेविते । [85]
योऽप्यकस्मान्मया त्रासो निर्जने गहने वने ।
सोऽपि सार्थः पराभूतो दैवेन विधिना ध्रुवम् ।
आशङ्कते च मां पापां मदीयं व्यसनं तथा ।
साहमेवंविधा नूनं ध्रुवं नास्त्यत्र संशयः ।
मन्दाया हि ममाभाग्यैः सार्थो नूनं निपातितः । [90]
कुत्रात्मानं पातयेयं यामि कं शरणं वने ।
मरणेन भवेच्छान्तिर्धिग्मन्या दुःखजीवितम् ।
हा नाथ हा महाराज हा स्वामिञ्जीवितेश्वर ।
किं मां विलपतीमेवं नाभिजल्पसि मानद ।
एवमादि बहून्यान्प्रलापान्बाष्पविकुवा । [95]
कुर्वती पर्यधावच्च विजनं गहनं वनम् ।

Colophon.

☞ This passage has many lines in common with passages No. 11–12 given below, with which it should be compared.

11

For 3. 62. 6^{ab}–10^{cd}, D_8 subst.:

भागार्ताः सौरभेयाश्च क्षुत्तृषाभिपरिप्लुताः ।
अवरोपितभारास्तु लेभिरे परमां मुदम् ।
तथाश्वा वारणाश्चैव रासभाः करभैः सह ।
दृष्ट्वैव तन्मरो रम्यमाह्लादं परमं ययुः ।
तथानन्तरमेवेह वणिजः पथिकास्तथा । [5]
यथायोग्यं यथास्थानमावासं प्रतिपेदिरे ।
यथास्थितैः समाचारमाहारं स्थानमेव च ।
अवतीर्यावसन्नानां चक्रुश्चैवान्ववेक्षणम् ।
चक्रुः कथाश्च विविधाः क्रयविक्रयसंश्रिताः ।
प्रशंसन्त्यपरे कष्टं पदवीश्रापदावृताम् । [10]
स्मरन्तो गृहभोगांश्च ज्ञातीनां च समागमम् ।
पुत्रमित्रकलत्राणि सर्वे निद्रावशं ययुः ।
संवाहनेन भाराणां बहुवासरजेन च ।
खिन्नाः शयितुकामास्ते निद्रयापगता भृशम् ।
प्रसारिताङ्गाः खिन्नाश्च मृतकल्पा इवासते । [15]
अथार्धरात्रसमये निःशब्दस्तिमितं तदा ।
सुप्ते सार्थे परिश्रान्ते हस्तियूथमुपागमत् ।
अथ सार्थं गिरिनिभा मदप्रस्रवणाविलाः ।
मार्गं संरुध्य संसुप्तं पद्मिन्यास्तीरमुत्तरम् ।
अथापश्यत तं सार्थं सार्थजान्सुबहून्गजान् । [20]
तांश्च पान्थगजान्दृष्ट्वा सर्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ।
तेषामापततां वेगः करिणां दुःसहोऽभवत् ।
नगाग्रादिव शीर्णानां मृगाणां पततां क्षितौ ।
स्पन्दतामपि नागानां बालसंस्थावनोद्भवैः । [25]
करिभिः करिणः सर्वे मृत्युनां प्रापिताः क्षणात् ।
सार्थश्च सोऽपि मथितः सस्त्रीबालगजान्वितः ।
आरावः सुमहानासीत्त्रैलोक्यभयकारकः ।
वाजिभिः प्राहतैश्चैव गजोष्ट्रै रासभैस्तथा ।
अन्योन्यं नाभ्यरक्षन्त मथ्यमाना वनद्विपैः । [30]
सुप्तं ममर्दुः सहसा चेष्टमानं महीतले ।
हाहाकारं प्रमुञ्चन्तः सार्थकाः शरणार्थिनः ।
न च गुल्मांश्च धावन्तो निद्रान्धा बहवोऽभवन् ।
केचिद्दन्तैः करैः केचित्केचिन्पद्भ्यां हता गजैः ।
निहतोष्ट्राश्च बहुलाः पदातिजनसंकुलाः । [35]
भयादाधावमानाश्च परस्परहतास्तदा ।
घोरान्नादान्विमुञ्चन्तो निपेतुर्धरणीतले ।
वृक्षेष्वासज्य संहृष्टाः पतिता विषमेषु च ।
तथा तं निहतं सर्वं समृद्धं सार्थमण्डलम् ।
हतो भ्राता हतः पुत्रः सहायो निहतो मम । [40]
एषोऽग्निरुत्थितः कष्टस्त्रायध्वं धावताधुना ।
रक्षराशिविशीर्णोऽयं गृह्णीध्वं किं प्रधावतः ।

D_3 °यत्र (for °त्रैव). — (L. 76) D_3 °निदयत् (for °दवयत्). — (L. 78) K_4 नाशुभमाप्नुयां कुशलं. — (L. 81) D_1 य[ज्ञ]-जन्मांतरकृतं पापं पतितं महत्. — (L. 82) D_1 कष्टां विपदं; D_3 कष्टामापदां. — (L. 83) D_1 स्वजनस्य (for °नाच्च). K_4 पराभवं. — (L. 84) D_1 विधिगश्च; D_3 °गो हि. — (L. 86) D_3 यो ह्यकस्मादनुप्राप्तो. — (L. 88) D_1 मार्थो (for पापां). D_1 जनविध्वंसकारिणी; D_3 कृत्यां वै राक्षसीमिव (for the posterior half). — (L. 89) D_3 resumes. D_3 °स्मत्र (for °स्त्यत्र). D_1 लोकैर्वत्परिशंकिता (for the posterior half). — (L. 90) K_4 मम हाभाग्यैः (for हि ममा°). D_3 [ई]यं विनि° (for नूनं नि°). — (L. 91) D_1 पातयेहं (for °येयं). D_2. 3 त्यक्त्वात्मानं तु पापिष्ठा कस्याहं शरणं वने. — (L. 94) K_4 °जानासि (for °जल्पसि). — (L. 95) D_3 विलापान् (for प्र°). — (L. 96) D_1 °धावत्सा (for °धावच्च). D_3 विपिनं गहने वने (for the posterior half). — Colophon. *Adhy. no.*: D_1 (in figures and words) 67.

संत्रस्तवदना भैमी तस्थौ शशिनिभानना ।
सार्थे विध्वंसितैर्भग्नैरगरुभिः सचन्दनैः ।
विक्षिप्तैर्भाति भूः सर्वा चौरिवर्क्षैश्च शारदैः । [45]
पतितैः पात्यमानैश्च धावद्भिश्च ततस्ततः ।
विमुक्तनादसंत्रस्तं हाहाकारविनादितम् ।
भीषणीयं वनं तद्वै तत्राभूद्वै समन्ततः ।
अभूत्प्रलयसंकाशं महारण्यमिवापरम् ।
ये तु तत्र विनिर्मुक्ताः सार्थाः केचिदभिद्रुताः । [50]
तेऽब्रुवन्महिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।
तथा यक्षाधिपः श्रीमान्न वै वैश्रवणो विभुः ।
न पूजा विघ्नकर्तॄणामथ वा सार्थिकैः कृता ।
शकुनानां फलं वाथ विपरीतमिदं ध्रुवम् । [55]
ग्रहास्तु विपरीता वा किमन्यदिदमागतम् ।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।
यामावद्य महासार्थे नारीवोन्मत्तदर्शना ।
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा । [60]
राक्षसी वा पिशाची वा यक्षी वातिभयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा ।
यदि पश्याम तां पापां सार्थघ्नीं नैकदुःखदाम् ।
लोष्टैकः पांसुभिश्चैव नृशंसः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हन्तव्या सा सार्थस्य तु कृच्छ्रदा । [65]
दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम् ।
ह्रीता भीता च संविग्ना प्राद्रवद्येन काननम् ।
आशङ्कमाना तत्पापानात्मानं पर्यदेवयत् ।
अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुवध्नामि कुशलं कस्येदं कर्मणः फलम् । [70]
नूनं जन्मान्तरकृतं पापं मापतितं महत् ।
अपश्चिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
राज्यापहरणं भर्तुः स्वजनाच्च पराभवः ।
भर्त्रा सह वियोगश्च तनयाभ्यां च विच्युतिः ।
विवस्त्रता वने वासो बहुव्यालनिषेविते । [75]
यो ह्यकस्मान्मया प्राप्तो निर्जने गहने वने ।
सोऽपि सार्थः पराभूतो विधिना केनचिद्भृशम् ।
आशङ्कमाना सा पापं महीयो व्यसनं तथा ।
साहमेवंविधा नूनं ध्रुवं नास्त्यत्र संशयः ।
मन्दायास्तु ममाभाग्यैः सार्थो नूनं निपातितः । [80]
कुत्रात्मानं पातयेयं यामि कं शरणं वने ।
मरणात्तु भवेच्छान्तिर्धिग्मया दुःखजीवितम् ।
हा नाथ हा महाराज हा स्वामिन्जीवितेश्वर ।
किं मां विलपतीमेवं नाभिजानासि मानद ।
एवमादीन्बहूनन्यान्प्रलापान्बाष्पविकृवा । [85]
कृवैनं पर्यधावत्सा गहनं विपिनान्तरम् ।

Colophon.

☞ This passage is a variant version of lines 13–96 of passage No. 10 given above (q. v.).

12

K₃ Du ins. after 3. 62. 10; D₆ after 281*

आगतः सुमहांश्चासीत्त्रैलोक्यभयकारकः ।
एषोऽग्निरुत्थितः कष्टस्त्रायध्वं धावतापुना ।
स्वराशिविशीर्णोऽयं गृह्णीध्वं किं प्रधावत ।
सामान्यमेतद्वचनं न मिथ्या वचनं मम ।
एवमेवाभिभाषन्तो विद्रवन्ति भयार्तदा । [5]
पुनरेवाभिधास्यामि चिन्तयध्वं सकातराः ।
तस्मिंस्तथा वर्तमाने दारुणे जनसंक्षये ।
दमयन्ती च बुबुधे भयसंत्रस्तमानसा ।
अपश्यद्वैशसं तत्र सर्वलोकभयंकरम् ।
अदृष्टपूर्वं तद् दृष्ट्वा बाला पद्मनिभेक्षणा । [10]
संमक्तवदनाश्वासा उत्तस्थौ भयविह्वला ।
ये तु तत्र विनिर्मुक्ताः सार्थात्केचिद्विक्षिताः ।
तेऽब्रुवन्महिताः सर्वे कस्येदं कर्मणः फलम् ।
नूनं न पूजितोऽस्माभिर्मणिभद्रो महायशाः ।
तथा यक्षाधिपः श्रीमान्न वै वैश्रवणः प्रभुः । [15]
न पूजा विघ्नकर्तॄणामथ वा प्रथमं कृता ।
शकुनानां फलं वाथ विपरीतमिदं ध्रुवम ।
ग्रहा न विपरीतास्तु किमन्यदिदमागतम् ।
अपरे त्वब्रुवन्दीना ज्ञातिद्रव्यविनाकृताः ।
यामावद्य महासार्थे नारी ह्युन्मत्तदर्शना । [20]
प्रविष्टा विकृताकारा कृत्वा रूपममानुषम् ।
तयेयं विहिता पूर्वं माया परमदारुणा ।
राक्षसी वा ध्रुवं यक्षी पिशाची वा भयंकरी ।
तस्याः सर्वमिदं पापं नात्र कार्या विचारणा ।
यदि पश्याम तां पापां सार्थघ्नीं नैकदुःखदाम् । [25]
लोष्टैनिः पांसुभिश्चैव नृशंसः काष्ठैश्च मुष्टिभिः ।
अवश्यमेव हन्यामः सार्थस्य किल कृत्यकाम् ।

12

(L. 9) Du₃ सर्वं (for तत्र). — (L. 11) Du₃ °वदनो-ष्यासा. — (L. 21) K₃ अमानुषा; Du₃ च मानुषं. — (L. 23) D₆ नाभया (for वाथ). — (L. 25) D₆ नैकदुःखदां. — (L. 26) D₆ लोष्टैश्च (for लोष्टैनिः). — (L. 27) D₆ हन्यामः (for हन्यामः), and सा वै सार्थस्य हन्यका (for the posterior half). — (L. 29) K₃ D₆ °जैन (for °वन)

दमयन्ती तु तच्छ्रुत्वा वाक्यं तेषां सुदारुणम्
होता भीता च संविग्ना प्राद्रवद्यत्र काननम् ।
आशङ्कमाना तत्पापमात्मानं पर्यदेवयत् । [30]
अहो ममोपरि विधेः संरम्भो दारुणो महान् ।
नानुबध्नाति कुशलं कस्येदं कर्मणः फलम् ।
न स्मराम्यशुभं किंचित्कृतं कस्यचिदप्यहम् ।
कर्मणा मनसा वाचा कस्येदं कर्मणः फलम् ।
नूनं जन्मान्तरकृतं पापं मापतितं महत् । [35]
अपश्यिमामिमां कष्टामापदं प्राप्तवत्यहम् ।
भर्तृराज्यापहरणं स्वजनाच्च पराजयः ।
भर्त्रा सह वियोगश्च तनयाभ्यां च विच्युतिः ।
निर्नाथना वने वासो बहुव्यालनिषेविते ।

☞ Cf. passages No. 10 and 11 given above, which are similar in content. This amplified version of the story, though adopted in all old printed editions, is restricted to a small group of Devanāgarī MSS., K₂. ₄ Dn D₁–₃. ₅. ₆ and is undoubtedly spurious. It was rightly athetized by Böhtlingk in his edition of the Nalopākhyāna in the first edition of his *Chresthomathie*. Cf. Holtzmann, *Das Mahābhārata*, 3. 70.

13

After 3. 83. 82, K₁. ₂ B De Dn D₄. ₆ ins.:

कुरुक्षेत्रसमा गङ्गा यत्रतत्रावगाहिता ।
विशेषो वै कनखले प्रयागे परमं महत् ।
यज्ञकार्यशतं कृत्वा कृतं गङ्गावसेचनम् ।
सर्वं तत्तस्य गङ्गापो दहत्यग्निरिवेन्धनम् ।
सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतम् । [5]
द्वापरेऽपि कुरुक्षेत्रं गङ्गा कलियुगे स्मृता ।
पुष्करे तु तपस्तप्त्वेहानं दद्यान्महालये ।
मलये त्वग्निमारोहेद् भृगुतुङ्गे त्वनाशनम् ।
पुष्करे तु कुरुक्षेत्रे गङ्गायां मगधेषु च ।
स्नात्वा तारयते जन्तुः सप्त सप्तावरांस्तथा । [10]
पुनाति कीर्तिता पापं दृष्टा भद्रं प्रयच्छति ।
अवगाढा च पीता च पुनात्यासप्तमं कुलम् ।
यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् ।
तावत्स पुरुषो राजन्स्वर्गलोके महीयते ।
यथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च । [15]
उपास्य पुण्यं लब्ध्वा च भवत्यमरलोकभाक् ।
न गङ्गासदृशं तीर्थं न देवः केशवात्परः ।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ।

14

After 3. 97. 27, K₁. ₂ B D (except D₁–₃. ₅) ins.:

वातेरिता पताकेव विराजति नभस्तले ।
प्रतार्यमाणा कूटेषु यथा निम्नेषु नित्यशः ।
शिलातलेषु संत्रस्ता पन्नगेन्द्रवधूरिव ।
दक्षिणां वै दिशं सर्वां प्लावयन्ती च मातृवत् ।
पूर्वं शम्भोर्जटाभ्रष्टा समुद्रमहिषी प्रिया । [5]
अस्यां नद्यां सुपुण्यायां यथेष्टमवगाह्यताम् ।
लोमश उवाच ।
युधिष्ठिर निबोधेदं त्रिषु लोकेषु विश्रुतम् ।

— (L. 30) K₂ तत्पापम्. — (L. 31) K₂ संरंभे दारुणे महत् (for the posterior half). — (L. 35) Dn₂ De मां पतितं (for मापतितं). — (L. 36) K₂ कष्टम् (for कष्टाम्). — (L. 38) K₂ वियोगं च (for °गश्च).

13

(L. 1) De transp. lines 1–2 and 3–4. K₁ De₂ °कृत्वा° (for °तत्रा°). — (L. 2) K₁ नखलं; De₁ परमं (for परमं). — B₄ om. lines 3–4. — (L. 3) B₃m अश्वमेध° (for यज्ञकार्य°). K₂ गत्वा (for कृत्वा). K₂ °वसेवनं; B₂ °भिषेचनं (for °वसेचनम्). — (L. 4) K₂ गांगेयो; B₂ गंगांभो; B₃ De गंगायां (for गङ्गापो). K₁. ₂ दहत्यग्नि°. — (L. 6) B₁ De च; B₂–₄ तु (for ऽपि). B₂ कलौ गंगैव केवला (for the posterior half). — (L. 7) De पुष्करेषु (for °रे तु). — (L. 8) B₁ De त्वनाशकं. — (L. 9) B₁. ₃. ₄ De पुष्करेषु; B₂ °रे च; De °रे वै. B De D₄ मध्यमेषु च. — (L. 10) K₂ सप्तावरं; B₂–₄ सप्तापरान्; De पूर्वावरान्. — (L. 11) B Dn₁ दृष्ट्वा (for दृष्टा). — (L. 12) De अवगाह्य च पीत्वा च. — (L. 13) B₂ गंगानीरे निमज्जति. — (L. 16) K₁ तापस्य- (for उपास्य). De तु (for च). B₂ Dn °लोकता (B₂ °तां) (for °लोकभाक्). — (L. 18) B₁ प्रजापतिः (for पितामहः).

14

D₁ om. from line 1 up to the prior half of line 6. — (L. 2) De तथा (for यथा). — (L. 3) B₃ De₁ संभ्रांता; De₂ संजाता (for संत्रस्ता). B₄ पातालेषु च संभूता (for the prior half). — (L. 4) B [इ]व (for च). — (L. 5) B₁ पूर्वं समुद्रं तु गता (for the prior half). — (L. 6) De तस्यां (for अस्यां). K₂ तु (for सु-). — After line 6, K₂ B₃. ₄ De Dn₂ ins. an addl. colophon (*adhy. no.*: Dn₂ 99). — K₁. ₂ om. lines 7–82:

भृगोस्तीर्थं महाराज महर्षिगणसेवितम् ।
यत्रोपस्पृष्टवान्रामो हृतं तेजस्तदास्तवान् ।
अत्र त्वं भ्रातृभिः सार्धं कृष्णया चैव पाण्डव । [10]
दुर्योधनहृतं तजः पुनरादातुमर्हसि ।
कृतवैरेण रामेण यथा चोपहृतं पुनः ।
वैशंपायन उवाच ।
स तत्र भ्रातृभिश्चैव कृष्णया चैव पाण्डवः ।
स्नात्वा देवान्पितॄंश्चैव तर्पयामास भारत ।
तस्य तीर्थस्य रूपं वै दीप्तादीप्ततरं बभौ । [15]
अप्रधृष्यतरश्चासीच्छात्रवाणां नरर्षभ ।
अपृच्छच्चैव राजेन्द्र लोमशं पाण्डुनन्दनः ।
भगवन्किमर्थं रामस्य हृतमासीद्वपुः प्रभो ।
कथं प्रत्याहृतं चैव एतदाचक्ष्व पृच्छतः ।
अथाचष्ट मार्कण्डेयः । महाराज वृषदर्भसेदुकनामानौ राजानौ नीतिमार्गरतावस्तोपास्तकृतिनौ ॥५८॥ सेदुको वृषदर्भस्य बालस्यैव उपांशुव्रतमभ्यजानात् । कुप्यमदेयं ब्राह्मणस्य ॥५९॥ अथ तं सेदुकं ब्राह्मणः कश्चिद्वेदाध्ययनसंपन्न आशिषं दत्त्वा गुर्वर्थी भिक्षितवान् । अश्वसहस्रं मे भगवान्ददात्विति ॥६०॥ तं सेदुको ब्राह्मणमब्रवीत् । नास्ति संभवो गुर्वर्थं दातुमिति । स त्वं गच्छ वृषदर्भसकाशम् । राजा परमधर्मज्ञः । ब्राह्मण तं भिक्षस्व । स ते दास्यति । तस्यैतदुपांशुव्रतमिति ॥६१॥ अथ ब्राह्मणो वृषदर्भसकाशं गत्वा अश्वसहस्रमयाचत । स राजा तं कशेनाताडयत् । तं ब्राह्मणोऽब्रवीत् । किं हंस्यनागसं मामिति ॥६२॥ एवमुक्त्वा तं शपन्तं राजाह । विप्र किं

क्रूरः क्राय कौरव्यो मृदवे कौरवो मृदुः ।
असाधवे क्षमाधुश्च साधवे तत्समो मतः ।

45 K₄ D₁. ₃ om. 45. — ᵇ) Dc वेदेषु (for देवेषु).

46 ᵃᵇ)=(var.) 5. 39. 58ᵃᵈ. — ᵃ) K₄ D₁. ₃ दानात्कदर्यं जयति. — ᵃᵈ) K₄ D₁. ₃ अक्रोधाज्जयति क्रोधमसाधुं साधुना शिबिः (see insertion above).

47 K₄ D₁. ₃ [ई]दृशौ (for [उ]दारौ). — B₃ om. इदानीं. K₄ D₁. ₃ शिबिरुदारोयं शिबेरहं मन्ये कौरव्यो यात्विति (for य इदानीं – °सर्पतु). — K₄ तत्संमतमिति; D₁. ₃ एतत्संगतम् (for एतद्वै निदर्शनम्). — K₄ D₁. ₃ om. उक्त्वा, and read [स]भवत् (for बभूव).

48 K₄ D₁. ₃ तच्छ्रुत्वा कौरव्यः (om. तु). B₃ शिवाय; Dc D₄ शिबेः; G₃ शिर्विः (for शिबिं). K₃ Dc D₄ G₃ om. कृत्वा. K₄ कृत्य (for कृत्वा). K₄ D₁. ₃ om. बहुकर्मभिः प्रशस्य. B₃ ययौ (for प्रययौ).

49 K₄ D₁. ₃ तदेष विनयो राज्ञां भाग्यं (D₁ महाभाग्यं) च कथितामिति (K₄ °मस्ति).

Colophon. K₃ B₃–₄ Dc D₄. ₆ G₃ om. the colophon. — *Adhy. no.*: Dn 193 (Dn₃ 194); D₁ 215.

50 K₄ °जनपरिवृत (for °जनावृत).

51 D₁. ₃ तं गुर्वर्थी (for गुर्वर्थी). — K₄ D₃ ins. भवंतं before गुर्वर्थं.

53 ᶜ) K₄ Dn₃ तत्त्वां (for तं त्वां). D₃ स कथं नु (for कथं नु). — ᵈ) K₄ दयितश्च; D₃ °तश्चापि.

54 ᵃ) Dn D₁ दत्त्व दत्त्वा (for दत्त्वा). — ᵇ) K₄ न प्राप्यम् (for अयाच्यम्). — ᵈ) Dn₃ दद्यां (for दत्त्वा).

55 ᵇ) Dn याच्य° (for याच°)! — ᶜ) Dn D₃ याच्यमाने! — ᵈ) D₃ ददन् (for दत्तं).

Colophon. K₄ D₁. ₃ om. the colophon. — *Adhy. no.*: Dn 194 (Dn₃ 195).

57 K₄ राजमहाभाग्यं; D₃ महाराजभाग्यं (for महाभाग्यं).

58 K₄ D₃ transp. मार्कण्डेयः and महाराज. D₃ राज- (for राजानौ).

59 Dn D₁. ₃ अभ्यजानत्. — After कुप्यम्, D₃ ins. अश्वसहस्रं मे भवान्. K₄ कुप्येददेच्च (for कुप्यमदेयं).

60 K₄ गुर्वर्थ (for °र्थी).

61 K₄ D₁–₃ नास्ति मे संभवो (for नास्ति संभवो). K₄ D₁. ₃ ब्रह्मण्यस्तं भिक्षयस्व (for ब्राह्मण तं भिक्षस्व).

62 K₄ कशया नम्; D₃ तं कशया (for तं कशेन). A few MSS. हिंमि (for हंसि). K₄ reads मां before हंमि.

यो न ददाति तुभ्यम् । उताहो स्विद्ब्राह्मण्यमेतत् ॥६३॥ ब्राह्मण उवाच । राजाधिराज तव समीपं सेदुकेन प्रेषितो भिक्षितुमागतः । तेनानुशिष्टेन मया त्वं भिक्षितोऽसि ॥६४॥ राजोवाच । पूर्वाह्णे ते दास्यामि । यो मेऽद्य बलिरागमिष्यति । यो हन्यते कशया कथं मोघं क्षेपणं तस्य स्यात् ॥६५॥ इत्युक्त्वा ब्राह्मणाय दैवसिकामुत्पत्तिं प्रादात् । अधिकस्याश्वसहस्रस्य मूल्यमेवादादिति ॥६६॥

Colophon.

५

मार्कण्डेय उवाच ।

देवानां कथा संजाता । महीतलं गत्वा महीपतिं शिबिमौशीनरं साध्वेनं शिबिं जिज्ञास्याम इति ॥६७॥ एवं भो इत्युक्त्वा अग्नीन्द्रावुपतिष्ठताम् । अग्निः कपोतरूपेण । तमभ्यधावदामिषार्थमिन्द्रः श्येनरूपेण ॥६८॥ अथ कपोतो राज्ञो दिव्यासनासीनस्योत्सङ्गं न्यपतत् ॥६९॥

अथ पुरोहितो राजानमब्रवीत् । प्राणरक्षणार्थं श्येनाद्भीतो भवन्तं प्राणार्थी प्रपद्यते । वसु ददातु । अन्तवान्पार्थिवोऽस्य निष्कृतिं कुर्यात् । घोरं कपोतस्य निपातमाहुः ॥७०॥

अथ कपोतो राजानमब्रवीत् । प्राणरक्षार्थं श्येनाद्भीतो भवन्तं प्राणरक्षार्थी प्रपद्ये । अङ्गैरङ्गानि प्राप्यार्थी मुनिर्भूत्वा प्राणांस्त्वां प्रपद्ये । स्वाध्यायेन कर्शितं ब्रह्मचारिणं मां विद्धि । तपसा दमेन युक्तमाचार्यस्याप्रतिकूलभाषिणम् । एवंयुक्तमपापं मां विद्धि ॥७१॥

गदामि वेदान्विचिनोमि छन्दः
सर्वे वेदा अक्षरशो मे अधीताः ।
न साधु दानं श्रोत्रियस्य प्रदानं
मा प्रादाः श्येनाय न कपोतोऽस्मि ॥ ७२

अथ श्येनो राजानमब्रवीत् ॥७३॥

पर्यायेण वसतिर्वा भवेषु
सर्गे जातः पूर्वमस्मात्कपोतात् ।
स्वमाददानोऽथ कपोतमेनं
मा त्वं राजन्विघ्नकर्ता भवेथाः ॥ ७४

राजोवाच ।

केनेदृशी जातु परा हि दृष्टा
वागुच्यमाना शकुनेन संस्कृता ।
यां वै कपोतो वदते यां च श्येन
उभौ विदित्वा कथमस्तु साधु ॥ ७५
नास्य वर्षं वर्षति वर्षकाले
नास्य बीजं रोहति काल उप्तम् ।
भीतं प्रपन्नं यो हि ददाति शत्रवे
न त्राणं लभेत्त्राणमिच्छन्स काले ॥ ७६
जाता हस्वा प्रजा प्रमीयते
सदा न वासं पितरोऽस्य कुर्वते ।
भीतं प्रपन्नं यो ददाति शत्रवे
नास्य देवाः प्रतिगृह्णन्ति हव्यम् ॥ ७७
मोघमन्नं विन्दति चाप्रचेताः
स्वर्गाल्लोकाच्छ्रयति क्षीघ्रमेव ।
भीतं प्रपन्नं यो हि ददाति शत्रवे

---

63 After ददाति, Dn_3 ins. स्वीयं धनं. After तुभ्यं, D_3. 3 ins. तस्मै ददासि शापम्.

65 K_4 D_{1-3} पूर्वाह्णे; Dn_3 पूर्वार्धे (for पूर्वाह्णे). — D_3 यं हन्यात् (for यो हन्यते). K_4 तेय न (for तस्य). D_3 तस्य न देयं स्यान्मोघं क्षेपणं ते यथा न स्यात्; D_3 मोघं क्षेपणं ते यथा न स्यात् (for कथं – स्यात्).

66 K_4 D_2. 3 एवम् (for the first इति). K_4 Dn_3 दैवसिकीम्. — K_4 अथो (for एव). K_4 om. [अ]दादिति; D_2. 3 om. एवादादिति.

Colophon. K_4 Dn_2. n3 D_{1-3} om. the colophon. — *Adhy. no.*: Dn_1 195.

67 Before देवानां, D_2. 3 ins. अथ.

68 K_4 इंद्राग्नी (for अग्नीन्द्रौ). D_2. 3 [उ]पातिष्ठतां. — K_4 Dn_1. n3 D_1. 3 अभि°; D_3 अन्व° (for अभ्य°). K_4 D_3 आमिषार्थी (for °र्थम्).

69 K_4 D_2. 3 दिव्या सहासीनस्य; D_1 दिव्यसेनस्य (for दिव्यासनासीनस्य). K_4 D_2. 3 [उ]त्संगे.

70 After अब्रवीत्, K_4 D_{1-3} ins.: निर्दिनं यस्याभिपतते कपोतकः स भवान् वेश्म यान्यद्य. — K_4 reads प्राणरक्षणार्थं — प्राणार्थी प्रपद्यते । after राजानमब्रवीत् (in 71). D_3 अन्नं चाशु (for अन्तवान्).

71 K_4 °रक्षणाथ (for °रक्षार्थं). D_2. 3 भयभीतो (for भीतं), and प्राप्यायुरर्थी (for प्राप्यार्थी). — D_2. 3 दमेन च (for दमेन). — K_4 एवमुक्तम् (for एवंयुक्तम्).

72 [b]) K_4 हि (for मे). — [c]) K_4 D_2. 3 श्रोत्रिय- (for श्रोत्रियस्य). — [d]) K_4 D_2. 3 मां मा (*or* मा मां) (for मा).

74 [b]) K_4 D_2. 3 स्वर्गे (for सर्गे). D_2. 3 कपोतः (for °तात्). — [c]) K_4 D_2. 3 स्वम् (for स्वम्).

75 [a]) D_2. 3 पुरो (for परा). — [b]) K_4 D_2. 3 कुशलेन (for शकुनेन). — [c]) K_4 D_3 om. वै. — [d]) K_4 कथयानुशास्तां; D_2. 3 कथयामि गाथां.

76 =(var.) 5. 12. 19. — K_4 om. (hapl.) 76[d]–77[c]. — [b]) D_2 न त्रातारं (for न त्राणं). Dn_1 D_2. 3 लभते (for लभेत्). D_2 काले; D_3 त्राणकाले (for स काले).

77 =(var.) 5. 12. 21. — [a]) D_2 ह्रस्वरूपा (for ह्रस्वा), and प्रमीते (for प्रमीयते). — [b]) Dn_1 न च वासं; D_2 [अ]नुवाधां (for न वासं).

78 =(var.) 5. 12. 20. — [a]) Dn_3 विंदते. Dn_3 D_2. 3 om. च.

सेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् ॥ ७८
उक्षाणं पक्त्वा सह ओदनेन
अस्मात्कपोतात्प्रति ते नयन्तु ।
यस्मिन्देशे रमसेऽतीव श्येन
तत्र मांसं शिबयस्ते वहन्तु ॥ ७९
श्येन उवाच ।
नोक्षाणो राजन्प्रार्थयेयं न चान्य-
दस्मान्मांसमधिकं वा कपोतात् ।
देवैर्दत्तः सोऽद्य ममैष भक्ष-
स्तन्मे ददस्व शकुनानामभावात् ॥ ८०
राजोवाच ।
उक्षाणं वेह तमनूनं नयन्तु
ते पश्यन्तु पुरुषा ममैव ।
भयाहितस्य दायं ममान्तिकात्त्वां
प्रत्याह्वायं तु त्वं श्येनं मा हिंसीः ॥ ८१
त्यजे प्राणांश्चैव दद्यां कपोतं
सौम्यो ह्ययं किं न जानासि श्येन ।
यथा क्लेशं मा कुरुष्वेह सौम्य
नाहं कपोतमर्पयिष्ये कथंचित् ॥ ८२
यथा मां वै साधुवादैः प्रसन्ना:
प्रशंसेयुः शिबयः कर्मणा तु ।
यथा श्येन प्रियमेव कुर्या
प्रशाधि मां यद्वदेस्तत्करोमि ॥ ८३
श्येन उवाच । ऊरोर्दक्षिणादुत्कृत्य स्वपिशितं तावद्राजन्याव-
न्मांसं कपोतेन समम् । तथा तस्मात्साधु त्रातः कपोतः । प्रशंसेयुश्च
शिबयः । कृतं च प्रियं स्यान्ममेति ॥८४॥
अथ स दक्षिणादूरोरुत्कृत्य स्वमांसपेशीं तुलयाधारयत् । गुरुतर
एव कपोत आसीत् ॥८५॥ पुनरन्यमुत्कर्त । गुरुतर एव
कपोतः ॥८६॥ एवं सर्वं समधिगत्य शरीरं तुलायामारोपयामास ।
तत्तथापि गुरुतर एव कपोत आसीत् ॥८७॥ अथ राजा स्वयमेव
तुलामारुरोह । न च व्यलीकमासीद्राज्ञः ॥८८॥ एतद्वृत्तान्तं दृष्ट्वा
त्रात इत्युक्त्वा प्रालीयत श्येनः ॥८९॥ अथ राजा अब्रवीत् ॥९०॥
कपोतं विद्युः शिबयस्त्वां कपोत
पृच्छामि ते शकुने को नु श्येनः ।
नानीश्वर ईदृशं जातु कुर्या-
देतं प्रश्नं भगवन्मे विचक्ष्व ॥ ९१
कपोत उवाच ।
वैश्वानरोऽहं ज्वलनो धूमकेतु-
रथैव श्येनो वज्रहस्तः शचीपतिः ।
साधु ज्ञातुं त्वामृषभं सौरथेय नौ
जिज्ञासया त्वत्सकाशं प्रपन्नौ ॥ ९२
यामेतां पेशीं मम निष्क्रयाय
प्रादाद्भवानसिनोत्कृत्य राजन् ।
एतद्वो लक्ष्म शिवं करोमि
हिरण्यवर्णं रुचिरं पुण्यगन्धम् ॥ ९३
एतामां प्रजानां पालयिता यशस्वी
सुरर्षीणामथ संमतो भृशम् ।
एतस्मात्पार्श्वात्पुरुषो जनिष्यति
कपोतरोमेति च तस्य नाम ॥ ९४
कपोतरोमाणं शिबिनौद्विदं पुत्रं प्राप्स्यसि नृप । नृपसंहननं

79 a) K4 पक्वं (for पक्त्वा). — b) D1 अस्मत्- (for अस्मात्). — c) D1 हि (for ऽतीव). — d) K4 D2. 3 वयमस्ते (for शिबयस्ते).

80 a) D2 द्वादश प्रार्थये (for प्रार्थयेयं). — b) K4 Dn1 D1–3 om. वा. — d) K4 कुशलं नाभावात्; D2. 3 नान्यशकुना-न्नभावात् (for शकुनानाम°).

81 a) K4 D1–3 वै हतम् (for वेह तम्). — b) K4 ते पचंतु पुरुषा ममैव वाचा; D2 ते पुरुषा ममैव वचनात्; D3 ते पुरुषा ममैव च. — c) K4 याहि त्वमादाय; D1 याहि त्वस्य दायं; D2. 3 याहि तदादाय (for भयाहितस्य दायं). — d) Dn2 प्रापयंतु (for प्रत्याह्वायं तु). K4 D1–3 त्वं श्येनं मा हिंसीः पुरुषं (D2. 3 सत्पुरुषं) कपोतं.

82 b) K4 Dn1. n2 जानामि; D2 जहासि. — c) K4 D2. 3 वृथा (for यथा).

83 a) Dn1 हि (for मां). D2. 3 ते (for वै). K4 Dn2 D3 प्रपन्नाः. — b) D3 (by corr.) [अ]थ (for तु). — c) K4 D1. 3 ins. ते after यथा. — d) D2. 3 यावदेत-त्करोमि.

84 Dn2 [अ]स्मात् (for तस्मात्). Dn1 त्रातः; Dn2 मात्रः (for त्रातः).

85 Dn2 D3 om. स.

87 Dn2 एवं सर्वं मांसमधिकृत्य; D2. 3 एवं सर्वमांसमुत्कृत्य. D2. 3 शरीरात् (for शरीरं). — K4 D2. 3 तथा (for तत्तथापि).

89 D2. 3 तात (for त्रात). K4 प्रालीयत; D3 प्रलीयत.

91 a) D2. 3 कथं विद्युः (for विद्युः). — b) D3 क (for को). — cd) D2. 3 इतीदृशं (for ईदृशं), and एतत् (for एतं).

92 c) K4 साधुं. D2 ज्ञातं त्वम्. K4 D2 ऋषयः (for ऋषभं). K4 सौरथानां; K4m D2. 3 सौरभेयानां (for सौरथेय नौ).

93 a) K4 इमां (for एतां), and निःक्रयार्थं (for निष्क्रयाय). — c) D2. 3 पश्य (for लक्ष्म). — d) K4 D3 om. वर्णं. D2 °रूपं (for °वर्णं).

94 a) K4 D2. 3 आसां (for एतासां). — b) D1 सुरर्ष-भाणाम्. K4 D2. 3 संभूतो (for °मतो). — c) K4 D3 जनिष्यते.

95 K4 D1. 3 शिबिगौद्विदं. K4 D2. 3 वृषं महारथं (for

यशोदीप्यमानं द्रष्टासि शूरवृषभं सौरथानाम् ॥९५॥

Colophon.

६

वैशंपायन उवाच ।

भूय एव महाभाग्यं कथ्यताम् । इत्यब्रवीत्पाण्डवो मार्कण्डेयम् ॥९६॥

अथाचष्ट मार्कण्डेयः । अष्टकस्य वैश्वामित्रेरश्वमेधे सर्वे राजानः प्रागच्छन् । भ्रातरश्चास्य प्रतर्दनो वसुमनाः शिबिरौशीनर इति ॥९७॥ स च समाप्तयज्ञो भ्रातृभिः सह रथेन प्रायात् । तं च नारदमागच्छन्तमभिवाद्यारोहतु भवान्रथमित्यब्रुवन् ॥९८॥ तांस्तथेत्युक्त्वा रथमारुरोह ॥९९॥

अथ तेषामेकः सुरर्षिं नारदमब्रवीत् । प्रसाद्य भगवन्तं किंचिदिच्छेयं प्रष्टुमिति ॥१००॥ पृच्छ । इत्यब्रवीदृषिः ॥१०१॥

सोऽब्रवीत् । आयुष्मन्तः सर्वगुणप्रमुदिताः । अथायुष्मन्तं स्वर्गस्थानं चतुर्भिर्यातव्यं स्यात्कोऽवतरेत् ॥१०२॥ अयमष्टकोऽवतरेत् । इत्यब्रवीदृषिः ॥१०३॥ किं कारणम् । इत्यपृच्छत् ॥१०४॥ अथाचष्ट । अष्टकस्य गृहे मया उषितम् । स मां रथेनानुप्रावहत् ॥१०५॥ अथापश्यमनेकानि गोसहस्राणि वर्णशो विविक्तानि ॥१०६॥ तमहमपृच्छम् । कस्येमा गाव इति ॥१०७॥ सोऽब्रवीत् । मया निसृष्टा इत्येताः ॥१०८॥ तेनैव स्वयं श्लाघति कथितेन । एषोऽवतरेत् ॥१०९॥

अथ त्रिभिर्यातव्यम् । सांप्रतं कोऽवतरेत् ॥११०॥ प्रतर्दनः । इत्यब्रवीदृषिः ॥१११॥ तत्र किं कारणम् ॥११२॥ प्रतर्दनस्यापि गृहे मयोषितम् । स मां रथेनानुप्रावहत् ॥११३॥ अथैनं ब्राह्मणो भिक्षेत । अश्वं मे ददातु भवान् ॥११४॥ निवृत्तो दास्यामि । इत्यब्रवीद्ब्राह्मणम् ॥११५॥ त्वरितमेव दीयताम् । इत्यब्रवीद्ब्राह्मणः ॥११६॥ त्वरितमेव ॥११७॥ स ब्राह्मणस्यैवमुक्त्वा दक्षिणं पार्श्वमददत् ॥११८॥ अथान्योऽप्यश्वार्थी ब्राह्मण आगच्छत् ॥११९॥ तथैव चैनमुक्त्वा वामपार्श्वमभ्यदात् ॥१२०॥ अथ प्रायात् । पुनरपि चान्योऽप्यश्वार्थी ब्राह्मण आगच्छत् । त्वरितोऽथ तस्मै अपनह्य वामं धुर्यमददत् ॥१२१॥ अथ प्रयात् । पुनरन्य आगच्छदश्वार्थी ब्राह्मणः ॥ तमब्रवीत् । अतियातो दास्यामि ॥१२२॥ त्वरितमेव मे दीयताम् । इत्यब्रवीद्ब्राह्मणः ॥१२३॥ तस्मै दत्वाश्वं रथधुरं गृह्णता व्याहृतम् । ब्राह्मणानां सांप्रतं नास्ति किंचिदिति ॥१२४॥ य एष ददाति चासूयति च तेन व्याहृतेन तथावतरेत् ॥१२५॥

अथ द्वाभ्यां यातव्यमिति कोऽवतरेत् ॥१२६॥ वसुमना अवतरेत् । इत्यब्रवीदृषिः ॥१२७॥ किं कारणम् । इत्यपृच्छत् ॥१२८॥ अथाचष्ट नारदः । अहं परिभ्रमन्वसुमनसो गृहमुपस्थितः । स्वस्तिवचनमासीत् । पुष्परथस्य प्रयोजनेन तमहमन्वगच्छम् । स्वस्तिवाचितेषु ब्राह्मणेषु रथो ब्राह्मणानां दर्शितः । तमहं रथं प्राशंसम् ॥१२९॥ अथ राजाब्रवीत् । भगवता रथः प्रशस्तः । एष भगवतो रथ इति ॥१३०॥ अथ कदाचित्पुनरप्यहमुपस्थितः । पुनरेव च रथप्रयोजनमामीत् ॥१३१॥ सम्यगयमेष भगवतः । इत्येवं राजाब्रवीदिति ॥१३२॥ पुनरेव तृतीयं स्वस्तिवाचनं समभावयम् ॥१३३॥ अथ

नृप । वृषसंहननं).

Colophon. *Adhy. no.*: Dn 196 (Dn$_2$ 195); D1 216.

97 D$_{2.3}$ अथाचष्ट मां°. — K$_4$ Dn1 D$_{2.3}$ आगच्छन् (for प्राग°).

98 K$_4$ D$_{2.3}$ तं (for तं च). K$_4$ D$_{2.3}$ ins. अपश्यन् after आगच्छन्तम्.

99 K$_4$ om. तांम्. D$_{2.3}$ तथेत्युक्त्वा.

100 K$_4$ D$_{2.3}$ एकतरो ऋषिं (K$_4$ marg. औशीनरो [gloss?]) (for एकः सुरर्षिं).

102 K$_4$ D1–3 सर्व एव (for सर्व-). — K$_4$ अथायुष्मन्. K$_4$ D1–3 गुणविशेषात्; Dn1 गणविशेषं (for स्वर्गस्थानं). K$_{4m}$ यानं स्यात्; D$_{2.3}$ यातव्यं (for यातव्यं स्यात्).

105 D2 om. from मया (in 105) up to कोऽवतरेत् (in 110).

108 After निसृष्टा, K$_4$ D1. 3 ins. गावः.

112 K$_4$ D$_{2.3}$ अत्र (for तत्र).

113 Dn अनुप्रवहत; D1 अनुवाहत.

114 D2 भिक्षितः; D3 [ऽ]पि भिक्षत (for भिक्षेत).

118 D$_{2.3}$ पार्ष्णिम् (for पार्श्वम्). K$_4$ D$_{2.3}$ अददात् (for अददत्).

120 K$_4$ अस्य ददौ; D2 अददात्; D3 अभ्यददात् (for अभ्यदात्).

121 D2 om. (? haplt.) 121. K$_4$ D3 धुर्यमददात् (for °ददत्).

122 K$_4$ इति प्रतिप्रयामि (for अतियातो दास्यामि).

123 K$_4$ D$_{2.3}$ om. मे.

124 K$_4$ D$_{2.3}$ तमस्मै (for तस्मै). K$_4$ D3 स्वयं (D3 स्वयं च) धुरं (for रथधुरं).

125 K$_4$ यदेष; D3 य एवं (for य एष). D$_{2.3}$ [अ]नेन (for तेन).

126 K$_4$ D$_{2.3}$ om. इति.

129 K$_4$ Dn1. n3 D1–3 स्वस्तिवाचनम् (for °वचनम्). D$_{2.3}$ (*sup. lin. sec. m.* as above) स ह मान्वगच्छत् (for तमहमन्व°). — K$_4$ स्वस्तिवाचनेषु (for °वाचितेषु). — K$_4$ समभावयं (for प्राशंसम्).

130 K$_4$ D$_{2.3}$ अथ स (for अथ). K$_4$ D$_{2.3}$ भगवन् (for भगवता), and भवतो (for भगवतो).

131 K$_4$ D$_{2.3}$ पुनश्चरंस्तमहम् (for पुनरप्यहम्).

132 K$_4$ D$_{2.3}$ तथा चैनं प्र(D3 प्रा)शंसम् (for सम्यगयम्) K$_4$ D$_{2.3}$ om. (the *second*) इति.

134 K$_4$ D$_{2.3}$ अहो (for अथो).

राजा ब्राह्मणानां दर्शयन्मामभिप्रेक्ष्याब्रवीत् । अथो भगवता पुष्परथस्य स्वस्तिवाचनानि सुष्ठु संभावितानि ॥१३४॥ एतेन द्रोहवचनेनावतरेत् ॥१३५॥

अथैकेन यानव्यं स्यात्कोऽवतरेत् ॥१३६॥ पुनर्नारद आह । शिबिर्यायात् । अहमवतरेयम् ॥१३७॥ अत्र किं कारणम् । इत्यब्रवीत् ॥१३८॥ असावहं शिबिना समो नास्मि ॥१३९॥ यतो ब्राह्मणः कश्चिदेनमब्रवीत् । शिबे अन्नार्थ्यस्मीति ॥१४०॥ तमब्रवीच्छिबिः । किं क्रियताम् । आज्ञापयतु भवानिति ॥१४१॥ अथैनं ब्राह्मणोऽब्रवीत् । य एष ते पुत्रो बृहद्गर्भो नाम एष प्रमातव्य इति । तमेनं संस्कुरु । अन्नं चोपपादय । ततोऽहं प्रतीक्ष्य इति ॥१४२॥ ततः पुत्रं प्रमाथ्य संस्कृत्य विधिना साधयित्वा पाठ्यामर्पयित्वा शिरसा प्रतिगृह्य ब्राह्मणममृगयत् ॥१४३॥ अथास्य मृगयमाणस्य कश्चिदाचष्ट । एष ते ब्राह्मणो नगरं प्रविश्य दहति ते गृहं कोशागारमायुधागारं स्त्यगारमश्वशालां हस्तिशालां च क्रुद्ध इति ॥१४४॥ अथ शिबिस्तथैवाविकृतमुखवर्णो नगरं प्रविश्य ब्राह्मणं तमब्रवीत् । सिद्धं भगवन्नन्नमिति ॥१४५॥ ब्राह्मणो न किंचिद्व्याजहार । विस्मयादधोमुखश्चापीत् ॥१४६॥ ततः प्रासादयद्ब्राह्मणम् । भगवन्भुज्यतामिति ॥१४७॥ मुहूर्तादुदीक्ष्य शिबिमब्रवीत् । त्वमेवैतदशानेति ॥१४८॥ तत्राह । तथा । इति ॥१४९॥ शिबिस्तथैवाविमना महित्वा कपालमभ्युद्धार्य भोक्तुमैच्छत् ॥१५०॥ अथास्य ब्राह्मणो हस्तमगृह्णात् । अब्रवीच्चैनम् । जितक्रोधोऽसि । न ते किंचिदपरित्याज्यं ब्राह्मणार्थे ॥१५१॥ ब्राह्मणोऽपि तं महाभागं सभाजयत् ॥१५२॥ स व्युदीक्षमाणः पुत्रमपश्यदग्रे तिष्ठन्तं देवकुमारमिव पुण्यगन्धान्वितमलंकृतम् ॥१५३॥ सर्वं च तमर्थं विधाय ब्राह्मणोऽन्तरधीयत ॥१५४॥ तस्य राजर्षेर्विधाता तेनैव वेषेण परीक्षार्थमागत इति ॥१५५॥ तस्मिन्नन्तर्हिते अमात्या राजानमूचुः । किं प्रेप्सुना भवता हृदमेवं जानता कृतमिति ॥१५६॥

शिबिरुवाच ।

नैवाहमेतद्यशसे ददानि
न चार्थहेतोर्न च भोगतृष्णया ।
पापैरनासेवित एष मार्ग
इत्येवमेतत्सकलं करोमि ॥ १५७
सद्भिः सदाध्यासितं तु प्रशस्तं
तस्मात्प्रशस्तं श्रयते मतिर्मे ।
एतन्महाभाग्यवरं शिबेस्तु
तस्मादहं वेद यथावदेतत् ॥ १५८

---

135 K_4 D_3. 3 [ए]पोवतरेत् (for [अ]व°).

139 D_3 om. from असावहं (in 139) up to अब्रवीत् (in 140). K_4 D_3 असावाख्यात् (for असावहं), and तुल्यो (for समो).

140 K_3 B_2. 3 D_C D_6 G_3 तं शिबिं ब्राह्मणोऽभ्यागच्छत् । स चैनमब्रवीत् (for यतो — °ब्रवीत्). — K_4 D_{1-3} शिबे अन्नार्थ्यहमिति.

141 D_C भगवन् (for भवान्).

142 K_3 अथ वा (for अथैनं). D_C om. अथैनं — °ब्रवीत्. B_3 D_4 om. [ए]नं. — B_3 D_C D_{1-3} एष (for य एष). K_6 om. पुत्रो. K_4 D_{1-3} वृषदर्भो (for बृहद्गर्भो), and एष संस्क्रियतां (for एष प्रमातव्य इति). — K_3 तं भवने (for तमेनं). K_4 D_{1-3} त्वं चैनं संज्ञापय (for त्वमेनं संस्कुरु), and पाठ्यां स्थापय (for अन्नं चोपपादय). — D_C तत्र (for ततो).

143 K_4 D_{1-3} तथा पुत्रं संज्ञप्य (for ततः पुत्रं प्रमाथ्य). K_4 D_{1-3} संस्कृत्य चाविमनाः ; D_4 संस्कृतिविधिना. K_4 D_{1-3} om. साधयित्वा. K_4 D_{1-3} वर्धयित्वा (for अर्प°). K_4 गृह्य ; D_3. 3 प्रगृह्य (for प्रति°). K_4 D_{1-3} बहिर्मृगयते (K_4 °ति) (for ब्राह्मणममृ°).

144 K_4 D_{1-3} अथास्याचष्ट मंत्री मृगयमाणस्य (for अथास्य — °चष्ट). — D_1. 3 एष स (for एष ते). K_4 D_{1-3} कोष्ठागारम् (for कोशा°). B_3 D_C D_4. 6 कोषागारायुधागाराश्च क्रुद्ध (for कोशा° — च क्रुद्ध). D_3 om. from आयुधा° up to नगरं (in 145). K_4 D_3 यंत्रागारम् (for स्त्यगारम्). D_1 स्त्यगारं कोशमायुधागारं यंत्रागारम् (for आयुधागारं स्त्यगारम्).

145 K_4 D_3. 3 अन्नं भगवन्निति (by transp.).

146 For 146, K_4 D_{1-3} subst. : एवमुक्तो ब्राह्मणो न किंचिव्याहरत् । किंचिदवाङ्मुख आसीत् .

147 K_3 B_3 D_{n1}. n_3 D_4 प्रसादयद् ; K_4 D_{n3} D_3. 3 प्रसाद्य ; D_1 प्रणतः (for प्रासादयद्).

148 Before मुहूर्तात्, K_4 D_{1-3} ins. स. D_{1-3} उदीक्ष्य (for उद्दीक्ष्य). — After अब्रवीत्, K_4 D_{1-3} ins. : नाहमतिथेरदत्वा भुनज्मि । ततः शिबिरन्विषत् । नातिथिं प्राप्तवान् । आगत्य चाह । भगवन्नातिथिर्लभ्यते । ततस्तमुवाच ब्राह्मणः ।; and read त्वमेवातिथिर्भूत्वा भुंक्ष्वेति (for त्वमेवैतदशानेति).

150 For 150, K_4 D_{1-3} subst. : अथ शिबिस्तथैवाविमना अर्चयित्वा तमै(D_1° दै)च्छद्भोक्तुं.

151 K_4 D_1. 3 om. (haplogr.) from हस्तमं° up to ब्राह्मणो (in 152).

155 K_4 D_{1-3} om. 155.

156 K_4 D_{1-3} पश्यता (for प्रेप्सुना). K_4 विज्ञातीयकं ; D_1 जानीयं ; D_3. 3 जानीयकं (for जानता).

157 ^{a}) K_4 D_{C1} D_{1-3} ददानि (for °नि). — ^{bc}) K_4 D_{1-3} न भूतिमिच्छन्शिबयो न लोभात् । शिष्टैः सदा सेवित एष मार्ग (D_1 °तो मार्ग एष).

158 For 158, K_4 D_{1-3} subst. :

तस्मात्प्रधानमाद्रियते मतिर्मे ।

एतच्छिबेर्महाभाग्यं । तस्मादहमवतरेयं । शिबिर्यायादिति ।

[Before एतच्, K_4 ins. तस्मिन्नंतर्हिते पुत्रः प्रादुरासीत्, and om. अहम् before अवतरेय.]

Colophon.

[Correction ! In the footnote on p. 677 (marked by ☞) K1 is wrongly included among the MSS. which have this insertion. This mistake has been rectified in the list given above (p. 1067 f.).]

22

K2 B De Dn D3–6 ins. after adhy. 221 (for G2. 4 see below) :

युधिष्ठिर उवाच ।
भगवन्श्रोतुमिच्छामि नामान्यस्य महात्मनः ।
त्रिषु लोकेषु यान्यस्य विख्यातानि द्विजोत्तम ।
वैशंपायन उवाच ।
इत्युक्तः पाण्डवेयेन महात्मा ऋषिसंनिधौ ।
उवाच भगवांस्तत्र मार्कण्डेयो महातपाः ।
मार्कण्डेय उवाच ।
आग्नेयश्चैव स्कन्दश्च दीप्तकीर्तिरनामयः । [5]
मयूरकेतुर्धर्मात्मा भूतेशो महिषार्दनः ।
कामजित्कामदः कान्तः सत्यवाग्भुवनेश्वरः ।
शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ।
अमोघस्त्वनघो गौद्रः प्रियश्चन्दाननस्तथा ।
दीप्तशक्तिः प्रशान्तात्मा भद्रकृत्कूटमोहनः । [10]
षष्ठीप्रियश्च धर्मात्मा पवित्रो मातृवत्सलः ।
कन्याभर्ता विभक्तश्च स्वाहेयो रेवतीसुतः ।
प्रभुर्नेता विशाखश्च नैगमेयः सुदुश्चरः ।
सुव्रतो ललितश्चैव बालक्रीडनकप्रियः ।
खचारी ब्रह्मचारी च शूरः शरवणोद्भवः । [15]
विश्वामित्रप्रियश्चैव देवसेनाप्रियस्तथा ।
वासुदेवप्रियश्चैव प्रियः प्रियकृदेव तु ।
नामान्येतानि दिव्यानि कार्त्तिकेयस्य यः पठेत् ।
स्वर्गं कीर्तिं धनं चैव स लभेन्नात्र संशयः ।
मार्कण्डेय उवाच ।
स्तोष्यामि देवैर्ऋषिभिश्च जुष्टं [20]
शक्त्या गुहं नामभिरप्रमेयम् ।
षडाननं शक्तिधरं सुवीरं
निबोध चैतानि कुरुप्रवीर ।
ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविच्च
ब्रह्मेशयो ब्रह्मवतां वरिष्ठः । [25]
ब्रह्मप्रियो ब्राह्मणसंवृतो त्वं
ब्रह्मज्ञो वै ब्राह्मणानां च नेता ।
स्वाहा स्वधा त्वं परमं पवित्रं
मन्त्रस्तुतस्त्वं प्रथितः षडर्चिः ।
संवत्सरस्त्वमृतवश्च षड् वै [30]
मासार्धमासावयनं दिशश्च ।
त्वं पुष्कराक्षस्त्वरविन्दवक्त्रः
सहस्रवक्त्रोऽसि सहस्रबाहुः ।
त्वं लोकपालः परमं हविश्च
त्वं भावनः सर्वसुरासुराणाम् । [35]
त्वमेव सेनाधिपतिः प्रचण्डः
प्रभुर्विभुश्चाप्यथ शक्रजेता ।
सहस्रभूस्त्वं धरणी त्वमेव
सहस्रतुष्टिश्च सहस्रभुक्च ।
सहस्रशीर्षस्त्वमनन्तरूपः [40]
सहस्रपात्त्वं गुह शक्तिधारी ।
गङ्गासुतस्त्वं स्वमतेन देव
स्वाहामहीकृत्तिकानां तथैव ।

Colophon. — *Adhy. no.*: B2 198; Dn 197 (Dn2 196); D1 217.

22

(L. 1) B1. 2 (m as above). 4 De च (for [अ]स्य). — (L. 4) D3 महामनाः (*sup. lin.* °तपाः as above). — (L. 7) B4 कामः (for कान्तः). De सत्यवान् (for °वाग्). — (L. 8) De D4 चंद्रो (for चण्डो). — (L. 10) De D3 तत्र कुलकुटमोहनः (for the posterior half). — (L. 11) B4 सर्वात्मा (for धर्मात्मा). — (L. 12) B1 °कर्ता ; B4 De °हर्ता (for °भर्ता). — (L. 13) D5 नयो (for नेता), and °दुश्चरः (for °दुश्चरः). — D5 om. (hapl.) from the posterior half of line 11 up to the prior half of line 17. — (L. 15) De शूरबलो भुवः (De2 वसुः) (for शरवणोद्भवः). D3 सुव्रतो ललितश्चैव बालचारी खशोद्भवः. — B1 om. (hapl.) from the posterior half of line 16 up to the prior half of line 17. — (L. 17) K2 B De D4–6 प्रियः प्रियक एव च (D4–6 तु). — (L. 19) B4 D3 लभते (for स लभेत्). — After line 19, B2 ins. आंगिरसे (colophon ?). — (L. 20) B2. 4 De D3. 5 भक्त्या (for शक्त्या). De सादरम् (for नामभिः). — (L. 24) K2 B4 De वै ब्रह्मनेजो ; B1 ब्रह्मयोनिर् (for वै ब्रह्मजो). B2 De2 ब्रह्मवित्तं ; B3. 4 °विश्वं ; De1 D3. 5 °वित्त्वं. — (L. 26) B1 °सर्वमंत्री ; De °सर्वतीर्थं (for °सत्रती त्वं). — (L. 29) De मंत्रस्तुतिस्त्वं. — (L. 30) B2 षडेव (for च षड् वै). — (L. 31) K2 B2. 4 De2 Dn2. n3 D3–6 °मासावयने ; B3 °मासा विदिशो. — (L. 38) B1 De °पात्त्वं ; B3. 4 D3. 4 °सूरत्वं (for °भूरत्वं). — (L. 39) B4 °दुष्टिश्च (for °तुष्टिश्च). K2 °संभुक् ; De °भुक्त्वं (for °भुक्च). — (L. 41) K2 °पादं (for °पात्त्वं). Dn1 गुहं (for गुह°). — (L. 43)

त्वं क्रीडसे षण्मुख कुक्कुटेन
यथेष्टनानाविधकामरूपी । [45]
दीक्षासि सोमो मरुतः सदैव
धर्मोऽसि वायुरचलेन्द्र इन्द्रः ।
सनातनानामपि शाश्वतस्त्वं
प्रभुः प्रभूणामपि चोग्रधन्वा ।
ऋतस्य कर्ता दितिजान्तकस्त्वं [50]
जेता रिपूणां प्रवरः सुराणाम् ।
सूक्ष्मं तपस्तत्परमं त्वमेव
परावरज्ञोऽसि परावरस्त्वम् ।
धर्मस्य कामस्य परस्य चैव
त्वत्तेजसा कृत्स्नमिदं महात्मन् । [55]
व्याप्तं जगत्सर्वसुरप्रवीर
शक्त्या मया संस्तुत लोकनाथ ।
नमोऽस्तु ते द्वादशनेत्रबाहो
अतः परं वेद्मि गतिं न तेऽहम् ।
स्कन्दस्य य हृदं विप्रः पठेज्जन्म समाहितः । [60]
श्रावयेद्ब्राह्मणेभ्यो यः शृणुयाद्वा द्विजेरितम् ।
धनमायुर्यशो दीप्तं पुत्राञ्शत्रुजयं तथा ।
स पुष्टितुष्टी संप्राप्य स्कन्दसालोक्यमाप्नुयात् ।

Colophon.

☞ $G_{2.4}$ ins. (with v.l.) lines 61–62 only of the above passage after 80^{ab} of the same adhy. (221), which is a very clear proof of the contamination of these two Grantha MSS. from the Northern Recension.

23

T_2 G M ins. after 3. 232. 10 (G_1, after 3. 232. 9):

एवमुक्तस्तु कौन्तेयः पुनर्वाक्यमभाषत ।
कोपसंरक्तनयनं पूर्ववैरमनुस्मरन् ।
पुरा जतुगृहेऽनेन दग्धुमस्मान्युधिष्ठिर ।
दुर्बुद्धिर्हि कृता वीर तदा दैवेन रक्षिताः ।
द्यूतकालेऽपि कौन्तेय वृजिनानि कृतानि वै । [5]
द्रौपद्याश्च परामर्शः केशग्रहणमेव च ।
वस्त्रापहरणं चैव सभामध्ये कृतानि च ।
पुरा कृतानां पापानां फलं भुङ्क्ते सुयोधनः ।
अस्माभिरेव कर्तव्यो धार्तराष्ट्रस्य निग्रहः ।
अन्येन तु कृतं तद्धि मैत्रमस्माकमिच्छता । [10]
उपकारी तु गन्धर्वो मा राजन्विमना भव ।
एतस्मिन्नन्तरे राजंश्चित्रसेनेन वै हृतः ।
विललाप सुदुःखार्तो ह्रियमाणः सुयोधनः ।
युधिष्ठिर महाबाहो सर्वधर्मभृतां वर ।
सपुत्रान्सहदारांश्च गन्धर्वेण हृतान्बलात् । [15]
पाण्डुपुत्र महाबाहो कौरवाणां यशस्कर ।
सर्वधर्मभृतां श्रेष्ठ गन्धर्वेण हृतं बलात् ।
रक्षस्व पुरुषव्याघ्र युधिष्ठिर महायशः ।
भ्रातरं ते महाबाहो बद्ध्वा नयति मामयम् ।
दुःशासनं दुर्विषहं दुर्मुखं दुर्जयं तथा । [20]
बद्ध्वा हरन्ति गन्धर्वा अस्महारांश्च सर्वशः ।
अनुधावत मां क्षिप्रं रक्षध्वं पुरुषोत्तमाः ।
यमौ मामनुधावेतां रक्षार्थं मम सायुधौ ।

K_3 स्वाहाग्रही; B_1 D_{c3} °त्मजः; D_{c1} °मर्षी-; D_5 °मनी- (for °महो-). — (L. 44) D_c यस्त्वथ (for षण्मुख). — (L. 45) B_3 °रूपधारी (for °कामरूपी). — (L. 46) B_{1-3} D_3 मरुतां; D_c यजतां (for मरुतः). — (L. 47) $B_{1.3}$ वचनेंद्र; D_3 अखिलेंद्र (for अचलेन्द्र). D_5 धर्मो वायूरसनेंद्रस्त्वमिंद्र वः. — (L. 50) K_3 $D_{3.4.5}$ [अ]मृतस्य; B_{3-4} मूढस्य; D_c मृडस्य (for ऋतस्य). D_5 अमृत्युकर्ता दिवि जातस्ततस्त्वं. — (L. 51) D_5 [अ]रीणां (for रिपूणां). — (L. 59) After line 59, B_1 ins.: लोकाश्रय सुहृदामप्रमेय. — (L. 60) D_5 transp. विप्रः and जन्म. — K_3 om. line 61. — (L. 62) B_1 D_c धर्मम्; B_2 D_3 बलम् (for धनम्). $G_{3.4}$ दीप्तिं (for दीप्तं). — (L. 63) K_3 om. line 63. B_1D_c स पुष्टिमिह; $B_{3.5}$ D_5 सुपुष्टि(B_3 °ष्टि)तुष्टिं; D_3 स तुष्टिपुष्टी; D_4 स पुष्टि तुष्टिं. D_5 रुद्र° (for स्कन्द°). — Colophon. — *Adhy. no.*: Dn 231 (Dn$_3$ 230).

23

(L. 1) G_1 धर्मराजस्य तद्वाक्यं निशम्य स वृकोदरः. — (L. 3) G_1 अस्मान् (for ऽनेन), and दग्धुमारब्धवांस्तदा (for the posterior half). — (L. 4) G_1 दैवयुक्ता वयं वीर; M_3 वंचना हि कृतानेन (for the prior half). G_1 दैवेन परिरक्षिताः. — After line 4, G_1 ins.:

कालकूटं विषं तीक्ष्णं भोजने मम भारत ।
उप्त्वा गङ्गां लतापाशैर्बद्ध्वा च प्राक्षिपत्प्रभो ।
रसातलं तु संप्राप्य तथा वासुकिमाश्रमे ।
तस्य प्रसादाद्राजेन्द्र पुनः प्राप्तो महीतलम् ।

— After line 7, G_1 ins.:

राज्यं च छित्त्व राजेन्द्र उक्तवान्पुरुषाणि नः ।

— G_2 om. lines 9–13. — (L. 9) T_2 $G_{3.4}$ M_1 °रेव कर्तव्यं पाण्डुपुत्रस्य निग्रहं. — (L. 10) T_2 $G_{1.3}$ कृतं तच्च; M_3 कृतः सोपि. T_2 G_3 अस्माभिर् (for अस्माकम्). — (L. 11) G_1 कृतोपकारो (for उपकारी तु). — (L. 12) T_2 G_3 राजा (for राजन्). — T_2 $G_{1.3}$ M_3 om. lines 14–15. — (L. 17) $G_{1.3}$ °विदां (for °भृतां). — (L. 18) T_2 $G_{3.4}$ M_3 °यशाः (for °यशः). — (L. 21) G_4 M_1 अस्मान्

कुरुवंशस्य सुमहदयशः प्राप्तमीदृशम् ।
व्यपोहयध्वं गन्धर्वाञ्जित्वा वीर्येण पाण्डवाः । [25]
एवं विलपमानस्य कौरव्यार्तया गिरा ।
श्रुत्वा विलापं संभ्रान्तो घृणयाभिपरिप्लुतः ।
युधिष्ठिरः पुनर्वाक्यं भीमसेनमथाब्रवीत् ।

☞ This passage is followed by a *repetition* of 3. 232. 9^{cd}–10^{cd} (evidently, for resuming the context disturbed by this interpolation).

24

After 3. 241. 15^{ab}, K$_4$ D (except D$_4$) G$_3$ ins. :

भीष्मोऽस्मान्निन्दति सदा पाण्डवांश्च प्रशंसति ।
त्वद्द्वेषाच्च महाबाहो ममापि द्वेष्टुमर्हति ।
विगर्हते च मां नित्यं त्वत्समीपे नरेश्वर ।
सोऽहं भीष्मवचस्तद्वै न मृष्यामीह भारत ।
त्वत्समक्षं यदुक्तं च भीष्मेणामित्रकर्शन । [5]
पाण्डवानां यशो राजंस्तव निन्दां च भारत ।
अनुजानीहि मां राजन्सभृत्यबलवाहनम् ।
जेष्यामि पृथिवीं राजन्सशैलवनकाननाम् ।
जिता च पाण्डवैर्भूमिश्चतुर्भिर्बलशालिभिः ।
तामहं ते विजेष्यामि एक एव न संशयः । [10]
संपश्यतु सुदुर्बुद्धिर्भीष्मः कुरुकुलाधमः ।
अनिन्द्यं निन्दते यो हि अप्रशंस्यं प्रशंसति ।
स पश्यतु बलं मेऽद्य आत्मानं तु विगर्हतु ।
अनुजानीहि मां राजन्ध्रुवो हि विजयस्तव ।
प्रतिजानामि ते सत्यं राजन्नायुधमालभे । [15]
तच्छ्रुत्वा तु वचो राजन्कर्णस्य भरतर्षभ ।
प्रीत्या परमया युक्तः कर्णमाह नराधिपः ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महाबलः ।
हितेषु वर्तसे नित्यं सफलं जन्म चाद्य मे ।
यदा च मन्यसे वीर सर्वशत्रुनिबर्हणम् । [20]
तदा निर्गच्छ भद्रं ते ह्यनुशाधि च मामिति ।
एवमुक्तस्तदा कर्णो धार्तराष्ट्रेण धीमता ।
सर्वमाज्ञापयामास प्रायात्रिकमरिंदम ।
प्रययौ च महेष्वासो नक्षत्रे शुभदैवते ।
शुभे तिथौ मुहूर्ते च पूज्यमानो द्विजातिभिः । [25]
मङ्गलैश्च शुभैः स्नातो वाग्भिश्चापि प्रपूजितः ।
नादयन्रथघोषेण त्रैलोक्यं सचराचरम् ।

Colophon.

वैशंपायन उवाच ।
ततः कर्णो महेष्वासो बलेन महता वृतः ।
द्रुपदस्य पुरं रम्यं रुरोध भरतर्षभ ।
युद्धेन महता चैनं चक्रे वीरं वशानुगम् । [30]
सुवर्णं रजतं चापि रत्नानि विविधानि च ।
करं च दापयामास द्रुपदं नृपसत्तम ।
तं विनिर्जित्य राजेन्द्र राजानस्तस्य येऽनुगाः ।
तान्सर्वान्वशगांश्चक्रे करं चैनानदापयत् ।
अथोत्तरां दिशं गत्वा वशे चक्रे नराधिपान् । [35]
भगदत्तं च निर्जित्य राधेयो गिरिमारुहत् ।
हिमवन्तं महाशैलं युध्यमानश्च शत्रुभिः ।

(for असाद्-). — (L. 26) T$_3$ G$_3$ कौरव्यस्य (for °वस्य). — (L. 27) M सघृणो (for संभ्रान्तो). T$_3$ G$_3$ घृणयानि°; G$_2$ प्रणयाभि° (for घृणयाभि°).

24

(L. 1) D$_1$ भीष्मस्त्वां द्विषते नित्यं (for the prior half). — (L. 2) K$_4$ Dc मामपि (for ममापि). D$_1$. $_3$ इच्छति (for अर्हति). — (L. 3) K$_4$ विगर्हे चैव (for विगर्हते च). D$_1$ त्वत्समेन (for त्वत्समीपे). — (L. 4) D$_3$ श्रुत्वा; Dc तस्मै (for तद्वै). D$_2$ सृजामि; Dc G$_3$ मृषामि (for मृष्यामि). — (L. 5) Dc वै; D$_3$ मे (for च). — (L. 6) K$_4$ Dc D$_1$. $_3$ G$_3$ निंदा च. — (L. 7) D$_2$. $_3$. $_6$ °वाहनः; D$_3$ °वाहिनीं (for °वाहनम्). D$_1$ अनुजानीहि मां वीर त्वदर्थं वै नृपोत्तम. — (L. 8) K$_4$ Dc D$_1$. $_3$ सर्वा (for राजन्). — (L. 9) K$_4$ Dc D$_1$. $_3$ या जिता (for जिता च). — (L. 10) D$_3$ एक एव (for तामहं ते). — (L. 11) Dc स (for सं-). — (L. 12) D$_3$ निंदत्यनिंद्यं यो नित्यं (for the prior half). K$_4$ Dc T$_2$ G$_3$ अप्रशस्यं; D$_1$ °शस्यान्. K$_4$ प्रशंसते. — (L. 13) K$_4$ Dc D$_1$. $_3$ च (for तु). — (L. 14) D$_1$ ध्रुवं (for ध्रुवो). — (L. 16) K$_4$ D$_1$. $_3$ एतच्छ्रुत्वा (for तच्छ्रुत्वा तु). D$_3$ धृतराष्ट्रजः (for भरत°). — (L. 20) K$_4$ Dn$_1$ D$_3$. $_6$ °निबर्हण; Dc D$_3$ °निबर्हणे; D$_1$ °वधाय मे; D$_3$ °निबर्हणः. — (L. 21) K$_4$ Dc D$_1$–$_3$ G$_3$ अनुशाधि (om. हि). — (L. 23) Dc सर्वं निर्वापयामास. — (L. 24) K$_4$ Dc Dn$_1$. $_3$ D$_1$. $_3$. $_5$. $_6$ G$_3$ निर्ययौ (for प्र°). — Colophon. D$_3$ om. colophon. — *Adhy. no.:* Dn 252 (Dn$_3$ 251); D$_1$ 254. — (L. 29) K$_4$ Dc D$_1$ पुरुष° (for भरत°). — (L. 30) A few MSS. वीरो *or* वीर (for वीरं). — (L. 32) K$_4$ Dc D$_1$. $_3$ राजसत्तमं (Dc °मः) (for नृपसत्तम). — (L. 33) Dc$_1$ राजेंद्रं राजानं. D$_1$ चानुगाः. — (L. 34) D$_1$ तांश्च सर्वान्वशीकृत्वा (for the prior half). Dn करं चानीय दापयत्। — (L. 35) D$_3$ om. line 35. D$_1$ कृत्वा (for चक्रे). Dn$_2$ G$_3$ नराधिप. — (L. 36) K$_4$ D$_3$. $_6$ वि- (for च). — (L. 38) Dn$_3$ D$_3$ G$_3$ सर्वाः (for सर्वान्). — (L. 40) Dn om. (? haplᵈ.) line 40! K$_4$ D$_3$. $_6$ G$_3$ विनिर्जैयत्; D$_1$ च वर्जे°; D$_3$ व्यवर्जे° (for अवाजे°). — (L. 41)

प्रययौ च दिशः सर्वान्नृपतीन्वशमानयत् ।
स हैमवतिकाञ्जित्वा करं सर्वानदापयत् ।
नेपालविषये ये च राजानस्तानवाजयत् । [40]
अवतीर्य ततः शैलात्पूर्वां दिशमभिद्रुतः ।
अङ्गान्वङ्गान्कलिङ्गांश्च शुण्डिकान्मिथिलानथ ।
मागधान्कर्कखण्डांश्च निवेश्य विषयेऽऽत्मनः ।
आवशीरांश्च योध्यांश्च अहिक्षत्रं च निर्जयत् ।
पूर्वां दिशं विनिर्जित्य वत्सभूमिं तथागमत् । [45]
वत्सभूमिं विनिर्जित्य केवलां मृत्तिकावतीम् ।
मोहनं पत्तनं चैव त्रिपुरीं कोसलां तथा ।
एतान्सर्वान्विनिर्जित्य करमादाय सर्वशः ।
दक्षिणां दिशमास्थाय कर्णो जित्वा महारथान् ।
रुक्मिणं दाक्षिणात्येषु योधयामास सूतजः । [50]
स युद्धं तुमुलं कृत्वा रुक्मी प्रोवाच सूतजम् ।
प्रीतोऽस्मि तव राजेन्द्र विक्रमेण बलेन च ।
न ते विघ्नं करिष्यामि प्रतिज्ञां समपालयम् ।
प्रीत्या चाहं प्रयच्छामि हिरण्यं यावदिच्छसि ।
समेत्य रुक्मिणा कर्णः पाण्ड्यं शैलं च सोऽगमत् । [55]
स केरलं रणे चैव नीलं चापि महीपतिम् ।
वेणुदारिसुतं चैव ये चान्ये नृपसत्तमाः ।

दक्षिणस्यां दिशि नृपान्करान्सर्वानदापयत् ।
शैशुपालिं ततो गत्वा विजिग्ये सूतनन्दनः ।
पार्श्वस्थांश्चापि नृपतीन्वशे चक्रे महाबलः । [60]
आवन्त्यांश्च वशे कृत्वा साम्ना च भरतर्षभ ।
वृष्णिभिः सह संगम्य पश्चिमामपि निर्जयत् ।
वारुणीं दिशमागम्य यावनान्बर्बरांस्तथा ।
नृपान्पश्चिमभूमिस्थान्दापयामास वै करान् ।
विजित्य पृथिवीं सर्वां स पूर्वापरदक्षिणाम् । [65]
सम्लेच्छाटविकान्वीरः सपर्वतनिवासिनः ।
भद्राञ्रोहितकांश्चैव आग्नेयान्मालवानपि ।
गणान्सर्वान्विनिर्जित्य नीतिकृत्प्रहसन्निव ।
शशकान्यवनांश्चैव विजिग्ये सूतनन्दनः ।
नग्नजित्प्रमुखांश्चैव गणाञ्जित्वा महारथान् । [70]
एवं स पृथिवीं सर्वां वशे कृत्वा महारथः ।
विजित्य पुरुषव्याघ्रो नागसाह्वयमागमत् ।
तमागतं महेष्वासं धार्तराष्ट्रो जनाधिपः ।
प्रत्युद्गम्य महाराज सभ्रातृपितृबान्धवः ।
अर्चयामास विधिना कर्णमाहवशोभिनम् । [75]
आश्रावयञ्च तत्कर्म प्रीयमाणो जनेश्वरः ।
यत्र भीष्मात्र च द्रोणात्र कृपात्र च बाह्लिकात् ।

D1 अभिद्रवत; D6 °श्रितः (for °द्रुतः). — (L. 42) K4 D2. 3 वंगानंगान् (by transp.). D1 वंगान्कलिंगान्गौडांश्च. Dn1 मंडिकान्; Dn2. n3 D1 G3 मुंडिकान्; D2 3 चंडिकान्; D5 पुंड्रकान् (for शुण्डिकान्). K4 D1 अपि (for अथ). — (L. 43) K4 कर्षखंडांश्च; D1 अर्कखंडांश्च (for कर्कखं°). K4 D6 G3 विषयात्मनः; D6 विषयांस्ततः. — (L. 44) K4 D1-3 श्रावस्तीं चाप्यं(D2 चाम्य°; D3 वांइच)योधांश्च; D6 D5 अवंती चाप्ययां° (for the prior half). K4 D6 D1-3. 5 अहिच्छत्रांश्च सोजयत्. — G3 om. the posterior half of line 44 and the prior half of line 45. — (L. 45) K4 D6 D2. 3 अथा°; D1 उपा° (for तथा°). — (L. 46) K4 मेखलां; D6 D1-3 मेकलां (for केवलां). — (L. 47) K4 सोदनं; D6 D1-3 मोदनं; D5 नोदनं (for मोहनं). D6 त्रिपुरं; D5 त्रिपुरां. K4 D6 कौशलं; Dn1 कोशलीं; Dn2 D1-3 कोशलान्; D5 कोसलं. — (L. 48) D1 करानादाय; D5 करादानाय. — (L. 49) K4 D6 D1-3. 5 आसाद्य (for आस्थाय). K4 D6 D2. 3 °नृपान् (for °रथान्). — (L. 51) A few MSS. तुमलं. — (L. 52) K4 D6 D1-3 राधेय (for राजेन्द्र). — (L. 53) K4 D2. 3. 5 °कल्पय; D6 °कल्पयन्; D1 °कंपयन्; G3 °पालय (for °पालयम्). — (L. 54) D6 सुवर्णं (for हिरण्यं). — (L. 55) K4 सोध्यगात्; D6 D1-3 सोभ्यगात्; D5 सोत्यगात् (for सोऽगमत्). — (L. 56) D5 चापि; D1 जित्वा (for चैव). D6 चैव (for चापि). — (L. 57) D5 °दार° (for °दारि°). G3 पंचान्ये (for ये चान्ये). — (L. 58) D5 नृपसुतान् (for दिशि नृपान्). — D2 om. lines 59–60. — (L. 59) K4 D6 Dn2. n3 D1 G3 °पालं (for °पालिं). — (L. 60) D1 पार्श्वस्थांश्चैव; D3 सुपार्श्वस्थांश्च. D6 नराधिपः (for महाबलः). — (L. 61) D1 पुरुष° (for भरत°). Dn1 om. from साम्ना up to संगम्य (in line 62). — (L. 62) D2. 5 निर्जयन्. — (L. 63) D1 आक्रम्य (for आगम्य). K4 D1-3. 5 यवनान्बर्बरां°; D6 बर्बरान्यवनां°. — (L. 64) D1 करं (for करान्). — (L. 66) K4 D6 सम्लेच्छाटविकां; D1. 3 सम्लेच्छाटविकान् (D1 °कां). — D1 om. from सपर्वत (in line 66) up to पुरुषव्याघ्रो (in line 72). — (L. 66) K4 D2. 3. 5 G3 °निवासिनीं; D6 °निवासिनां. — (L. 67) D6 Dn2 D2. 6 G3 भद्रान्; D5 महान् (for भद्रान्). K4 सामुद्रांल्लोहितांश्चैव. K4 D2 om. (hapl.) from आग्नेयान् up to °श्चैव (in line 69). — (L. 68) D6 तंगण-परतंगणान्; D5 नातिक्रुन्द्रान्द्रान्नान्निव. — (L. 69) D6 सशकान् (for शशकान्). — (L. 70) K4 D6 D2. 3 महारथः. — (L. 71) K4 D6 D5 समुद्रनगद्रुमां; D2. 3 समुद्रनगरद्रुमां (for the posterior half). — (L. 72) D1 समागच्छत्स्वयं पुरं (for the posterior half). — (L. 73) D6 धनाधिपं (for जनाधिपः). — (L. 75) D6 विधिवत् (for °ना). D5 °शालिनं (for °शोभिनम्). — (L. 76) K4 D6 D1-3. 5 आराधयच्च (D1 °त) (for आश्रावयच्च). — (L. 78) D5

प्राप्तवानस्मि भद्रं ते त्वत्तः प्राप्तं मया हि तत् ।
बहुना च किमुक्तेन शृणु कर्ण वचो मम ।
सनाथोऽस्मि महाबाहो त्वया नाथेन सत्तम । [80]
न हि ते पाण्डवाः सर्वे कलामर्हन्ति षोडशीम् ।
अन्ये वा पुरुषव्याघ्र राजानोऽभ्युदितोदिताः ।
स भवान्धृतराष्ट्रं तं गान्धारीं च यशस्विनीम् ।
पश्य कर्ण महेष्वास अदितिं वज्रभृद्यथा ।
ततो हलहलाशब्दः प्रादुरासीद्दिशां पते । [85]
हाहाकाराश्च बहवो नगरे नागसाह्वये ।
केचिदेनं प्रशंसन्ति निन्दन्ति स्म तथापरे ।
तूष्णीमासंस्तथा चान्ये नृपास्तत्र जनाधिप ।
एवं विजित्य राजेन्द्र कर्णः शस्त्रभृतां वरः ।
सपर्वतवनाकाशां ससमुद्रां सनिष्कुटाम् । [90]
देशैरुच्चावचैः पूर्णां पत्तनैर्नगरैरपि ।
द्वीपैश्चानूपसंपूर्णैः पृथिवीं पृथिवीपते ।
कालेन नातिदीर्घेण वशे कृत्वा तु पार्थिवान् ।
अक्षयं धनमादाय सूतजो नृपमभ्ययात् ।
प्रविश्य च गृहं राजन्नभ्यन्तरमरिंदम । [95]
गान्धारीसहितं वीरो धृतराष्ट्रं ददर्श सः ।
पुत्रवच्च नरव्याघ्र पादौ जग्राह धर्मवित् ।
धृतराष्ट्रेण चाश्लिष्य प्रेष्णा चापि विसर्जितः ।
तदा प्रभृति राजा च शकुनिश्चापि सौबलः ।
जानते निर्जितान्पार्थान्कर्णेन युधि भारत । [100]

Colophon.

वैशंपायन उवाच ।
जित्वा तु पृथिवीं राजन्सूतपुत्रो जनाधिप ।
अब्रवीत्परवीरघ्नो दुर्योधनमिदं वचः ।

☞ This is followed in the above MSS. by a *repetition* of 3. 241. 15^{ab} (v.l. त्वां for त्वा) with the ref. (कर्ण उवाच ।), which is a clear indication of the passage being an interpolation Cf. note at the end of passage No. 23.

25

After adhy. 247, De1 Dn D1. 3. 6 G3 ins. the foll. two adhy.:

जनमेजय उवाच ।
वसत्स्वेवं वने तेषु पाण्डवेषु महात्मसु ।
रममाणेषु चित्राभिः कथाभिर्मुनिभिः सह ।
सूर्यदत्ताक्षयान्नेन कृष्णाया भोजनावधि ।
ब्राह्मणांस्तर्पयाणेषु ये चान्नार्थमुपागताः ।
आरण्यानां मृगाणां च मांसैर्नानाविधैरपि । [5]
धार्तराष्ट्रा दुरात्मानः सर्वे दुर्योधनादयः ।
कथं तेष्वन्ववर्तन्त पापाचारा महामुने ।
दुःशासनस्य कर्णस्य शकुनेश्च मते स्थिताः ।
एतदाचक्ष्व भगवन्वैशंपायन पृच्छतः ।
वैशंपायन उवाच ।
श्रुत्वा तेषां तथा वृत्तिं नगरे वसतामिव । [10]

[अ]त्र (for हि). — (L. 79) K4 De D1. 3 [अ]त्र (for च). — (L. 80) D1 समर्थो (for सनाथो). — (L. 82) De च (for वा). K4 De D3 पुरुषव्याघ्रा. De2 [उ]भ्युदितो दिशः; D5 [उ]भ्युदितोदिताः. — (L. 83) K4 De D1–3. 6 च (for तं). — De2 om. lines 84–86. — (L. 86) De1 Dn3 हाहाकारश्च. De1 बहुशो; D3. 3 बहुलो (for बहवो). — (L. 87) D1 [अ]परे जनाः (for तथापरे). — (L. 88) Dn2 भूतास् (for ग्रामन्). D1 तथैवान्ये; D3 नृपाश्चास्य. D5 प्राप्ते कर्णे नरेश्वर (for the posterior half). For line 88, De subst.:

नन्दन्ति स्म तथा चान्ये तूष्णीमासंस्तथापरे ।
नृपाश्च तुष्टुवुश्चान्ये द्विजास्तत्र जनाधिप ।

— (L. 89) De निर्जित्य (for विजित्य). — (L. 90) De समुद्रवनोद्देशं; D3 सपर्वतवनोद्देशां; D5 सपर्वताकरवनां. — (L. 92) K4 D3 च रत्न°; De D1. 3 च रत्न° (for चानूप°). — (L. 93) K4 De1 D1–3 च; De2 [अ]थ (for तु). — (L. 94) D3 गृहम् (for नृपम्). — (L. 95) D5 [अ]भ्यंतरं (for च गृहं). D1 सूतपुत्रः प्रतापवान्; D6 गृहस्य रिपुमर्दनः (for the posterior half). — (L. 96) De ह (for सः). — (L. 97) K4 De1 D3 G3 नरव्याघ्रः. — (L. 98) K4 वाचा (for चापि). — (L. 100) D2 reads line 100 after line 102. K4 De D1. 3. 6 मेनाते; Dn3 (by corr.) जानंति (for जानते). D1 विजितान् (for निर्जि°). K4 ते सर्वे (for कर्णेन). — Colophon. *Adhy. no.:* Dn 253 (Dn2 252); D1 255. — (L. 101) D5 स (for तु). De सर्वा (for राजन्). K4 De D1–3. 6 महाबलः (for जनाधिप). — (L. 102) D1 उवाच श्लक्ष्णया वाचा धृतराष्ट्रसुतं नृपं.

25

(L. 2) De1 D1. 3. 6 G3 मुनिसत्तम (for °भिः सह). — (L. 4) D1. 3. 6 G3 तर्प्य° (for तर्प°). De1 वनेषूपवनेषु च (for the posterior half). — (L. 5) De1 भक्ष्यैर्भोज्यैर्नेकैश्च (for the prior half). — D3 om. from पायन (line 9) up to तेषु (line 11). — (L. 10) De1 पत्तने (for नगरे). — (L. 11) De1 °मानी (for °राज). — (L. 12) De1 D3 निकृतप्रज्ञैः. — (L. 14) De1 ऋषिः परमकोपनः (for the posterior half). — (L. 15) De1 दुर्वासा शंकरस्यांशो

दुर्योधनो महाराज तेषु पापमरोचयत् ।
तथा नैर्निकृतिप्रज्ञैः कर्णदुःशासनादिभिः ।
नानोपायैरघं तेषु चिन्तयत्सु दुरात्मसु ।
अभ्यागच्छत्स धर्मात्मा तपस्वी सुमहायशाः ।
शिष्यायुतसमोपेतो दुर्वासा नाम कामतः । [15]
तमागतमभिप्रेक्ष्य मुनिं परमकोपनम् ।
दुर्योधनो विनीतात्मा प्रश्रयेण दमेन च ।
सहितो भ्रातृभिः श्रीमानातिथ्येन न्यमन्त्रयत् ।
विधिवत्पूजयामास स्वयं किंकरवत्स्थितः ।
अहानि कतिचित्तत्र तस्थौ स मुनिसत्तमः । [20]
तं च पर्यचरद्राजा दिवारात्रमतन्द्रितः ।
दुर्योधनो महाराज शापात्तस्य विशङ्कितः ।
क्षुधितोऽस्मि ददस्वान्नं शीघ्रं मम नराधिप ।
इत्युक्त्वा गच्छति स्नातुं प्रत्यागच्छति वै चिरात् ।
न भोक्ष्याम्यद्य मे नास्ति क्षुधेत्युक्त्वैत्यदर्शनम् । [25]
अकस्मादेत्य च ब्रूते भोजयास्मांस्त्वरान्वितः ।
कदाचिच्च निशीथे स उत्थाय निकृतौ स्थितः ।
पूर्ववत्कारयित्वान्नं न भुङ्क्ते गर्हयन्स्म सः ।
वर्तमाने तथा तस्मिन्यदा दुर्योधनो नृपः ।
विकृतिं नैति न क्रोधं तदा तुष्टोऽभवन्मुनिः । [30]
आह चैनं दुराधर्षो वरदोऽस्मीति भारत ।
वरं वरय भद्रं ते यत्ते मनसि वर्तते ।

मयि प्रीते तु यद्वर्म्यं नालभ्यं विद्यते तव ।
एतच्छ्रुत्वा वचस्तस्य महर्षेर्भावितात्मनः ।
अमन्यत पुनर्जातमात्मानं स सुयोधनः । [35]
प्रागेव मन्त्रितं चासीत्कर्णदुःशासनादिभिः ।
याचनीयं मुनेस्तुष्टादिति निश्चित्य दुर्मतिः ।
अतिहर्षान्वितो राजा वरमेनमयाचत ।
शिष्यैः सह मम ब्रह्मन्यथा जातोऽतिथिर्भवान् ।
अस्मत्कुले महाराजो ज्येष्ठः श्रेष्ठो युधिष्ठिरः । [40]
वने वसति धर्मात्मा भ्रातृभिः परिवारितः ।
गुणवाञ्शीलसंपन्नस्तस्य त्वमतिथिर्भव ।
यदा च राजपुत्री सा सुकुमारी यशस्विनी ।
भोजयित्वा द्विजान्सर्वान्पतींश्च वरवर्णिनी ।
विश्रान्ता च स्वयं भुक्त्वा सुखासीना भवेत्तदा । [45]
तदा त्वं तत्र गच्छेथा यद्यनुग्राह्यता मयि ।
तथा करिष्ये त्वत्प्रीत्येवमुक्त्वा सुयोधनम् ।
दुर्वासा अपि विप्रेन्द्रो यथागतमगात्ततः ।
कृतार्थमिव चात्मानं तदा मेने सुयोधनः ।
करेण च करं गृह्य कर्णस्य मुदितो भृशम् । [50]
कर्णोऽपि भ्रातृसहितमित्युवाच नृपं मुदा ।
दिष्ट्या कामः सुसंवृत्तो दिष्ट्या कौरव वर्धसे ।
दिष्ट्या ते शत्रवो मग्ना दुस्तरे व्यसनार्णवे ।
दुर्वासःक्रोधजे वह्नौ पतिताः पाण्डुनन्दनाः ।

शिष्यायुतसमन्वितः. — (L. 16) De1 ऋषि परमतेजसं (for the posterior half). — (L. 17) De1 न नाम देव तत् मुदा (sic) (for the posterior half). — De1 (which om. lines 18–19) ins. after line 17:

पादौ प्रक्षाल्य विधिवदासने चोपवेश्य च ।
पूजयित्वा यथान्यायमातिथ्येन न्यमन्त्रयत् ।
तथेति स मुनिर्भुक्त्वा ययौ पादधिको (?) द्विजः ।
पुनः प्रत्यागमत्प्रातःकाले स नृपसत्तम ।
तथैव भोजयामास परमान्नेन तं मुदा ।
गतः स पुनरेवाथ भोक्तुकामः समभ्ययात् ।
तथैव भोजयामास राजा शापविशङ्कितः ।
मध्यंदिने कदाचित्स्युः (?) कदाचिन्निशिथेऽपि च ।
गोरजे प्रत्युषे चापि कदाचित्प्रहरार्धके ।
धापिना (?) याति तद्वेश्म शिष्यायुतसमन्वितः ।
कदाचिद्बहुभिः सार्धं कदाचिदयुतेन च ।
उषाकाले कदाचित्स स समपात्याण्मासिकः (?) ।
दुर्योधनं भ्रंशयितुं राज्याच्छापेन निष्टराम् (?) ।
क्रियया पाण्डुपुत्राणां क्रोधेन कलुषीकृतः ।
यदि मत्सेवनाद्भ्रंशेत्सकुलं नाशमेति च ।
एवं स मुनिराजाय षण्मासावधि प्रत्यहम् ।
दुर्योधनगृहं प्रायाद्यदिच्छति तथैव तत् ।

ततः परमसंतुष्टो राजानं धृतराष्ट्रजम् ।

— (L. 23) De1 जनपदेश्वर (for मम नराधिप). — (L. 28) D1 तन् (for [अ]न्न). D2 गर्हयते (for °यन्). De1 सदा (for स सः). — (L. 30) De1 D2 नैव (for नैति). — Before line 32, most MSS. ins. दुर्वासा उवाच. — After line 33, De1 ins.:

प्रसन्नोऽसि तथात्थात्तनाह वरदोऽस्म्यहम् ।

— Before line 34, most MSS. ins वैशं° उ°. — (L. 37) De1 मुनौ तुष्टे (for मुनेस्तुष्टाद्), and तैः समेत्य स दुर्मतिः (for the posterior half). — (L. 38) Dm1 राजन् (for राजा). — (L. 39) De1 भ्रातृभिः सहितः सर्वैः कर्णशकुनिसाधनैः. (L. 40) D1 °राज (for °राजो). — (L. 41) De1 कांतया सह (for परिवारितः) — (L. 44) De1 भ्रातृंश्च द्रुपदात्मजा (for the posterior half). — (L. 47) De1 D1 s त्वत्प्रीत्यै एवमुक्त्वा (om. इति). — (L. 48) De1 तपसां श्रेष्ठो (for अपि विप्रेन्द्रो). — (L. 49) De1 Dm1 G2 अपि (for इव). — (L. 51) Dm1 D1 तदा (for मुदा). — Before line 52, most MSS. ins कर्ण उ°. — (L. 54) De1 D2 पातिताः (for प°). — (L. 55) Dm2 स्वैरं वत; Du2 स्वैरमेते (for स्वैरेव ते). — Before line 56, most MSS. ins. वैशं° उ°. — Colophon. De1 om. the colophon.

स्वैरेव ते महापापंगता वै दुस्तरं तमः । [55]
इत्थं ते निकृतिप्रज्ञा राजन्दुर्योधनादयः ।
हसन्तः प्रीतमनसो जग्मुः स्वं स्वं निकेतनम् ।

Colophon.

वैशंपायन उवाच ।
ततः कदाचिद्दुर्वासाः सुखासीनांस्तु पाण्डवान् ।
भुक्त्वा चावस्थितां कृष्णां ज्ञात्वा तस्मिन्वने मुनिः ।
अभ्यागच्छत्परिवृतः शिष्यैरयुतसंमितैः । [60]
दृष्ट्वायान्तं तमतिथिं स च राजा युधिष्ठिरः ।
जगामाभिमुखः श्रीमान्सह भ्रातृभिरच्युतः ।
तस्मै बद्ध्वाञ्जलिं सम्यगुपवेश्य वरासने ।
विधिवत्पूजयित्वा तमातिथ्येन न्यमन्त्रयत् ।
आह्निकं भगवन्कृत्वा शीघ्रमेहीति चाब्रवीत् । [65]
जगाम च मुनिः सोऽपि स्नातुं शिष्यैः सहानघः ।
भोजयेत्सहशिष्यं मां कथमित्यविचिन्तयन् ।
न्यमज्जत्सलिले चापि मुनिसंघः समाहितः ।
एतस्मिन्नन्तरे राजन्द्रौपदी योषितां वरा ।
चिन्तामवाप परमामन्नहेतोः पतिव्रता । [70]
सा चिन्तयन्ती च यदा नान्नहेतुमविन्दत ।
मनसा चिन्तयामास कृष्णं कंसनिषूदनम् ।
कृष्ण कृष्ण महाबाहो देवकीनन्दनाव्यय ।
वासुदेव जगन्नाथ प्रणतार्तिविनाशन ।
विश्वात्मन्विश्वजनक विश्वहर्तः प्रभोऽव्यय । [75]
प्रपन्नपाल गोपाल प्रजापाल परात्पर ।
आकूतीनां च चित्तीनां प्रवर्तक नताऽस्मि ते ।
वरेण्य वरदानन्त अगतीनां गतिर्भव ।
पुराणपुरुष प्राणमनोबुद्ध्याद्यगोचर ।
सर्वाध्यक्ष पराध्यक्ष त्वामहं शरणं गता । [80]
पाहि मां कृपया देव शरणागतवत्सल ।
नीलोत्पलदलश्याम पद्मगर्भारुणेक्षण ।
पीताम्बरपरीधान लसत्कौस्तुभभूषण ।
त्वमादिरन्तो भूतानां त्वमेव च परायणम् ।
परात्परतरं ज्योतिर्विश्वात्मा सर्वतोमुखः । [85]
त्वामेवाहुः परं बीजं निधानं सर्वसंपदाम् ।
त्वया नाथेन देवेश सर्वापद्भ्यो भयं न हि ।
दुःशासनादहं पूर्वं सभायां मोचिता यथा ।
तथैव संकटादस्मान्मामुद्धर्तुमिहार्हसि ।
एवं स्तुतस्तदा देवः कृष्णया भक्तवत्सलः । [90]
द्रौपद्याः संकटं ज्ञात्वा देवदेवो जगत्पतिः ।
पार्श्वस्थां शयने त्यक्त्वा रुक्मिणीं केशवः प्रभुः ।
तत्राजगाम त्वरितो ह्यचिन्त्यगतिरीश्वरः ।
ततस्तं द्रौपदी दृष्ट्वा प्रणम्य परया मुदा ।

Adhy. no.: Dn 260 (Dn$_3$ 261), D$_1$ 263. — (L. 59) D$_1$ महा- (for वने). — (L. 61) De$_1$ अत्रैयं सशिष्यं च (for अतिथिं स च राजा). — (L. 62) De$_1$ भ्रातृभिः परमद्युतिः (for the posterior half). — (L. 63) De$_1$ D$_3$ G$_3$ उपविश्य; D$_1$ प्रवेश्य च (for उपवेश्य). D$_2$ च कानने (for वरासने). — (L. 64) De$_1$ पूजयित्वाथ; D$_1$ पूजयामास. De$_1$ निमन्त्रयत; D$_1$ न्यवेदयत. — After line 64, De$_1$ Dn$_3$ ins.:

दुर्वासा उवाच ।
राजंस्त्वाश्रमे भोक्तुं सत्वरं समुपागतः ।
क्षुधा मां बाधतेऽत्यर्थं तस्मान्मां भोजयाधुना ।
भोज्यैर्नानाविधैश्चान्नैर्व्यञ्जनैः परमाद्भुतैः ।,

followed in De$_1$ by राजोवाच, in Dn$_3$ by युधिष्ठिर उ°. — (L. 65) De$_1$ स्नात्वा शीघ्रं समेहीति (for the posterior half). — (L. 66) D$_1$ जगामैवं. Dn$_3$ महानर्दी (for महानघः). De$_1$ जगाम सह शिष्यैश्च स्नातुं स मुनिपुंगवः. — (L. 67) D$_1$. $_3$. $_6$ °त्यविचिन्तयन्. — (L. 68) De$_1$ मुनिः शिष्यायुतेन च; D$_1$ मुनिः सघः समाहितः; D$_3$. $_6$ G$_3$ मुनिः शिष्यैः समन्वितः (for the posterior half). — After line 68, De$_1$ Dn$_3$ ins.:

अथ युधिष्ठिरो राजा भ्रातृभिरन्वतप्यत ।
भीम भीम महाबाहो काष्ठान्यानीय मां दह ।

वैशंपायन उवाच ।
भ्रातुर्वचनमाकर्ण्य हृदि शल्यमिवार्पितम् ।
आहि त्राहीति गोविन्देत्युक्त्वा दारूणि चानयत् ।

— (L. 69) D$_3$. $_6$ G$_3$ चापि (for राजन्). De$_1$ द्रौपदी व्यसने वीक्ष्य पांडवानां महात्मनां. — (L. 71) Dn$_3$ D$_1$ तदा (for यदा). — (L. 72) De$_1$ समार मनसा कृष्णं कृपालुं दीनवत्सलं. — (L. 73) D$_1$ °नंदनंदन (for °नन्दनाव्यय). — (L. 74) De$_1$ प्रपन्नार्ति° (for प्रणतार्ति°). — (L. 75) De$_1$ विश्वहृत्प्रभुरीश्वरः (for the posterior half). — (L. 76) De$_1$ विश्वनाथ; Dn$_3$ विश्वपाल (for प्रजा°). — D$_2$ om. from परात्पर up to °परीधान (in line 83). — (L. 77) De$_1$ D$_1$ आकूतीनां च वृत्तीनां (D$_1$ वित्तानां) (for the prior half). — (L. 78) D$_6$ G$_3$ त्वगतीनां (for अग°). De D$_6$ गतिप्रद (for गतिर्भव). — (L. 80) De$_1$ परानंद; D$_1$ सुराध्यक्ष. — (L. 83) De$_1$ चतुर्बाहो (for °परीधान). — (L. 84) De$_1$ °भूतां (for °रत्नो). — (L. 85) Dn$_3$ D$_1$. $_2$ परं (for °तरं). De$_1$ D$_2$. $_6$ विश्वनो° (for सर्वतो°). — (L. 87) De$_1$ त्वं नाथ कृपयेशान (for the prior half). — (L. 92) De$_1$ रुक्मिणीं (for पार्श्वस्थां), and सुप्तां केशिनिषूदनः (for the posterior half). — (L. 95) D$_2$. $_6$ G$_3$ अवदद् (for अब्रवीद्). De$_1$ उवाचाश्रुमुखी कृष्णा कृष्णं कमललोचनं. — For line 96, De$_1$ subst.:

अब्रवीद्वासुदेवाय मुनेरागमनादिकम् । [95]
ततस्तामब्रवीत्कृष्णः क्षुधितोऽस्मि भृशातुरः ।
शीघ्रं भोजय मां कृष्णे पश्चात्सर्वं करिष्यसि ।
निशम्य तद्वचः कृष्णा लज्जिता वाक्यमब्रवीत् ।
स्थाल्यां भास्करदत्तायामन्नं मद्भोजनावधि ।
भुक्तवत्यस्म्यहं देव तस्मादन्नं न विद्यते । [100]
ततः प्रोवाच भगवान्कृष्णां कमललोचनः ।
कृष्णे न नर्मकालोऽयं क्षुच्छ्रमेणातुरे मयि ।
शीघ्रं गच्छ मम स्थालीमानयित्वा प्रदर्शय ।
इति निर्बन्धतः स्थालीमानाय्य स यदृच्छः ।
स्थाल्याः कण्ठेऽथ संलग्नं शाकान्नं वीक्ष्य केशवः । [105]
उपयुज्याब्रवीदेनामनेन हरिरीश्वरः ।
विश्वात्मा प्रीयतां देवस्तुष्टश्चास्त्विति यज्ञभुक् ।
आकारय मुनीञ्शीघ्रं भोजनायेति चाब्रवीत् ।
ततो जगाम त्वरितः सहदेवो महायशाः ।

स्नातुं गतान्देवनद्यां दुर्वासःप्रभृतीन्मुनीन् । [110]
ते चावतीर्णाः सलिले कृतवन्तोऽघमर्षणम् ।
दृष्ट्वोद्गारान्सान्नरसांस्तृप्त्या परमया युताः ।
उत्तीर्य सलिलात्तस्माद्दृष्टवन्तः परस्परम् ।
दुर्वाससमभिप्रेक्ष्य सर्वे ते मुनयोऽब्रुवन् ।
राज्ञा हि कारयित्वान्नं वयं स्नातुं समागताः । [115]
आकण्ठतृप्ता विप्रर्षे किं स्विद्भुञ्जामहे वयम् ।
वृथा पाकः कृतोऽस्माभिस्तत्र किं करवामहे ।
दुर्वासा उवाच ।
वृथापाकेन राजर्षेरपराधः कृतो महान् ।
मास्मानधाक्षुरुद्वीक्ष्य पाण्डवाः क्रूरचक्षुषा ।
स्मृत्वानुभावं राजर्षेरम्बरीषस्य धीमतः । [120]
बिभेमि सुतरां विप्रा हरिपादाश्रयाज्जनात् ।
पाण्डवाश्च महात्मानः सर्वे धर्मपरायणाः ।
